THE
BHAṬṬIKÂVYA
OF
BHAṬṬI
WITH
The Commentary (Jayamangalâ)
OF
JAYAMANGALA.

EDITED BY
THE LATE VINÂYAK NÂRÂYAṆ SHÂSTRÎ JOSHI,
AND
WÂSUDEV LAXMAN SHÂSTRÎ PANSÎKAR.

Sixth Edition.

PUBLISHED BY
PÂNDURANG JÂWAJÎ,
PROPRIETOR OF THE "NIRNAYA-SÂGAR" PRESS,
BOMBAY.

1920.

Price 3 Rupees

॥ श्रीः ॥

महाकविश्रीभट्टिविरचितं

भट्टिकाव्यम् ।

जयमङ्गलकृतटीकया जयमङ्गलया समेतम् ।

[illegible]र्गनिवासिना नारायणात्मजेन विनायक-
शास्त्रिणा संस्कृत्य संशोधितम् ।

(तस्येदं षष्ठं संस्करणं)

पणशीकरोपाह्वविद्वद्वरलक्ष्मणशर्मतनुजनुषा
वासुदेवशास्त्रिणा संस्कृतम् ।

इदं च

मुम्बय्याम्

पांडुरंग जावजी

इत्यनेन "निर्णयसागरा"ख्यमुद्रणयन्त्रालयाधिपतिना
स्वीयेऽङ्कनालये रा. य. शेडगेद्वारा मुद्रयित्वा
प्रसिद्धिं नीतम् ।

शकाब्दाः १८४१, खिस्ताब्दाः १९२०.

श्री-भट्टिकाव्य-सुधारणा—

यद्यपि बहु नाधीषे तथापि पठ पुत्र ! व्याकरणम् ।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृत् शकृत् ॥

अ-विदित-श-ष-स-विशेषा वाणी वक्त्रात् विनिर्गता येषां ।
गुद-वदन-विवर-भेदो रदनैरेव किल लक्ष्यते तेषाम् ॥

अष्टाध्यायी जगन्माता,ऽमर-कोशो जगत्पिता ।
भट्टि-काव्यं गणेशश्च त्रयीयं सुख-दाऽस्तु वः ॥

शब्द-वाक्य-पद-च्छेद-स्थूलाक्षर-विशेषदृक् ।
सुधारकैः सुधार्यासौ पुस्तक-स्थापने[1] यदि— ॥

स्थाप्यते[2] गद्य-पद्येषु सच्छात्राऽनुग्रहेच्छया, ।
मूलादेवार्थ[3][4]-सिद्धिः स्यात् किं टीकायाः प्रयोजनम् ॥

अ-संस्कारं वि-कोशं चाऽपच्छन्दश्चानलङ्कृति ।
नीरसं तद्भवेत्काव्यमित्याहुः काव्य-कोविदाः ॥

व्याकृत्या कोश-छन्दोभ्यामलङ्कृत्या रसेन च ।
पञ्चकेनान्वितं काव्यं भट्टि-काव्यं विराजते ॥

व्याकृति-चषके पेयं राम-राज-कथामृतम् ।
शब्द-वाक्य-पद-च्छेद-स्थूलाक्षर-विशेषदृक् ॥

सर्वेषामेव ग्रन्थानामेवं भाव्या सुधारणा ।
अन्ततः शिक्षण-ग्रन्था अप्येवं स्युः सुधारिताः ॥

कै० वि० ना० शा०.

---

१. (छापणें). २. (छापली जाते). ३. मूलग्रन्थात्, पक्षे बाल-शिष्यात्.
, पक्षे स्पष्टम्.

विशेष-सूचना.

१—सदहू ग्रंथ छापण्याची व्यवस्था अशी ठेविली आहे कीं— विद्यार्थ्यांना पदच्छेद करण्यास सुलभ पडावें ह्मणून संध्यक्षरावर वैदिक स्वरितस्वराप्रमाणें '।' अशी उभी रेषा दिली आहे; तिचा अर्थ—ज्या अक्षरावर ही '।' उभी रेषा दिली आहे तें अक्षर उभें चिरून त्याचा पूर्वभाग पूर्वपदांत व उत्तरभाग उत्तरपदांत सामील करावा, असें समजावें. जसें प्रथम श्लोकांत 'इत्युदाहृतः' आणि 'पितरमुपागमत्' ह्या दोहोंवर '।' ही रेषा आहे. आतां त्यु=त्य्+उ=त्यु; मु=म्+उ=मु; ह्मणजे इत्य्, (इति) उदाहृतः; पितरम् उपागमत् अशीं पदें समजावींत. इति याचें इत्य् हें पाणिनीच्या 'इको यणचि' या सूत्रानें झालें आहे; ह्याप्रमाणें पदच्छेद दाखवून सामासिक नामांत शब्द—(प्रातिपदिक) छेदही '—' ह्या चिह्नानें दाखविला आहे. आतां जेथें संधीमुळें '—' ह्या चिह्नानें शब्दच्छेद दाखवितां येत नाहीं, तेथें संध्यक्षराखालीं वैदिकानुदात्तस्वराप्रमाणें '—' अशी आडवी रेषा दिली आहे. ह्मणजे तीच शब्दच्छेदरेषा खालीं ओढली आहे. जसें ३ श्लोकांत (सर्वेषु-भूताम्) र्वे यांत र्व+इ=र्वे, ह्मणजे सर्व-इषु-भूताम् असें जाणावें. येथें सर्व+इषु=सर्वेषु हें पाणिनीच्या 'आद्गुणः' या सूत्रानें झालें आहे असें समजावें. स्वल्पविराम चिह्नाचा उपयोग करून वाक्येंही निरनिराळीं तोडून दाखविलीं आहेत. ह्याप्रमाणें मूळ ग्रंथाला बाध न येतां वाक्य-पदशब्दच्छेद दर्शविला. परंतु कित्येक स्थलीं 'अभून् नृपः' (श्लोक ११). 'स्त्रीभिर् युतानि' (श्लो० ७), 'ज्ञाताऽऽशयम् तस्य' (श्लोक ११). असा पदच्छेद दाखविला आहे. त्या स्थळीं 'अभून्नृपो,' 'स्त्रीभिर्युतानि,' 'ज्ञाताशयस्तस्य' असेंच पाठकालीं ह्मणावें । संयुक्त पाठ दुर्बोध नाहीं

टीकेंतच कोठें कोठें फेरफार केला आहे. किल्येक ठिकाणीं टीका कायम ठेवून मूळांत फेरफार केला आहे. जसें १४५५ श्लोकांत 'असर्यत महीपतेः' असा जयमङ्गलाटीकेचा पाठ आहे, परंतु मल्लि-नाथाच्या टीकेंत 'असार्यत महीपतिः' असा पाठ आढळतो, आणि हा जरी (माझ्या अल्पमतीला) योग्य वाटतो तथापि सर्व पुस्तकांत जयमङ्गला टीका असल्यामुळें वरीलच पाठ (असर्यत महीपतेः) घेतला आहे आणि दुसरा पाठ 'असार्यत महीपतिः' हा खालीं टीकेंत दिला आहे.

'प्रायेण मुह्यन्ति हि ये लिखन्ति' ह्या नियमानें हा प्रथमच प्रसंग असल्यामुळें ज्या कांहीं नजरचुकीनें प्रकृत पुस्तकांत चुका राहिल्या असतील त्या स्वदेशविद्वत्सुहृज्जनांनीं पत्रद्वारा कळविल्यास आदरपूर्वक स्वीकारून आगामि मुद्रणांत सुधारीन इ० इ०.

क० त्रि० जो०.

भट्टिकाव्यस्य काण्ड-वर्ग-पद्य–संख्याऽनुक्रमः–

भाग (काण्डाः) ४	विभागाः (वर्गाः) २२	
	व्याकरण-रीत्या परिच्छेदाः (वर्गाः)	कथानक-रीत्या सर्गाः
१–प्रकीर्ण–काण्डः– (संकीर्णः)	१— २— ३— ४— ५,९७—१०० टाधि०, १०१—१०३प्र०, १०४—४ आमधि०	१–राम-संभवः २–सीता-परिणयः ३–राम-प्रवासः ४——— ५–सीता-हरणः राम-प्रवासः
२–अधिकार–काण्डः प्रकीर्ण-मिश्रः–	१–५—७,प्र०,८—१० दुहादि-द्विकर्माधि०, ११—१५ प्र०, १६—३४ सिजधि०, ३५—३९ श्नमधि०, ४०—४५ प्र०, ४६—६७ कृत्याधि०, ६८—७० प्र०, ७१—८६ निरुपपदकृदधि०, ८७—९४—१०८ खजधि०, १०९—१११ डाधि०, ११२—१४३ सोपपदकृदधि०, २–१—२७ ताच्छीलिककृदधि०, २८—३३ निरधिकारकृदधि०, ३४—६७ भावेकर्तृ० कृदधि०, ६८—७७ स्त्रीलिङ्गाधि०, ७८—८५ कृदधि०, ८६—९० प्र०, ९१-—१०९ ङित्वाधि०, ३–१—६९ आत्मनेपदाधि०, ७०—८४ कारकाधि०, ८५—९३ कर्मप्रवचनीयाधि०, ९४—१३१ अनभिहितेऽधि० ४–१—७ प्र०, ८—११ सिचिवृध्यधि०, १२—२२ इट्प्रतिषेधाधि०, २३—५७ इड्विध्यधि० ५८—६६ सत्वाधि०, ६७—९१ षत्वाधि०, ९२—१०९ णत्वाधि०, ११०—१३७ प्रकी०–	६–सुग्रीवाभिषेकः ७–सीता-ऽन्वेषणम् ८–अशोक-वनिका-भङ्ग. ९–मारुति-संयमः
३–प्रसन्न-काण्डः–	१—अलङ्कार–दर्शनम्—शब्दाऽलङ्कारः १—२१; अर्थाऽलङ्कारः २२—७४; २—माधुर्य—प्रदर्शनम् ३—भाविकत्व—प्र० ४—भाषा—समावेशः	१०–सीताऽभिज्ञानदर्शनम् ११–लङ्कागतप्रभात-वर्णनम् १२–विभीषणाऽऽगमनम्. १३–सेतु-बन्धनम्.
४–तिङन्त-काण्डः–	१—लिङ्—विलसितः (पू. भू. का.)— २—लुङ्—वि० (सा. भू. का.)— ३—लृट्—वि० (—भ. का.)— ४—लङ्—वि० (अ. भू. का.)— ५—लट्—वि० (वर्त. का.) ६—लिङ्—वि० (विध्यर्थः) ७—लोट्—वि० (आ–र्थः) ८—लृङ् वि० (सं र्थ) ९—लुट्—वि० (अ म का	१४–शर-बन्धः १५–कुम्भकर्ण-वधः १६–रावण-विलापः १७————वधः १८–विभीषण–प्रलापः १९–विभीषणाऽभिषेकः २०–सीता-प्रत्याख्यानम् २१——संशोधनम् २२

श्लोकानुक्रमणिका—

श्लोकाः	श्लोकाङ्काः

द.

फ.

ब.

भ.

समाप्तेयं श्लोकानुक्रमणिका ।

देवं नंदनंदनं वंदे । ओं नमः सिद्धम् ।

अथ
श्रीभट्टि-काव्यं
जयमङ्गलया समेतम्—

प्रथमः सर्गः—

प्रणिपत्य सकलवेदिनमतिदुस्तरभट्टिकाव्यसलिलनिधेः ॥
जयमङ्गलेति नाम्ना नौकेव विरच्यते टीका ॥ १ ॥

लक्ष्यं लक्षणं चोभयमेकत्र विदुषः प्रदर्शयितुं श्रीस्वामिसूनुः कविर्भट्टिनामा रामकथाश्रयमहाकाव्यं चकार । तथाह्यस्योपनिबन्धनं कविना द्विधा कृतम् । एकं लक्षणसूचकैः प्रकीर्णा-धिकार-प्रसन्न-तिङन्तकाण्डैश्चतुर्भिः । द्वितीयं लक्ष्य-सूचकैः रामसंभवादिभिर्द्वाविंशत्या सर्गैः । तत्र लक्षणं द्विविधम् । शब्दलक्षणं काव्यलक्षणं च । तत्र प्रथमस्य प्रकीर्णाधिकारतिङन्तकाण्डानि । द्वितीयस्य प्रसन्नकाण्डम् । यत्रोच्चावचेन बहूनां लक्षणानां प्रकरणं तत्प्रकीर्णकाण्डम् । तदेवात्र प्रथममुक्तं तस्य व्यापित्वात् 'उत्तरत्रापि द्रष्टव्यम्' इति प्रदर्शनार्थम् । अत्र यद्यप्यादौ कविना देवतानमस्कारो न कृतस्तथापीष्टदेवतासंकीर्तनमपि विघ्नोपशमनहेतुर्भवतीति मन्यमान आह—

१—अभून् नृपो विबुध-सखः परं-तपः
श्रुताऽन्वितो दश-रथ इत्युदाहृतः, ॥
गुणैर् वरं भुवन-हितच्-छलेन यं
सना-तनः पितरमुपागमत् स्वयम्, ॥

१—'अभून्नृपो दशरथ इत्युदाहृतः श्रुतान्वितो विबुधसखः परन्तपः ॥' इति पाठव्यत्यासोऽपि क्वचित् । २—'७७७। अथ मित्रं सखा सुहृद् ।' इति नामलिङ्गानुशासनेऽमरसिंहः । ३—दशसु दिक्षु रथो रथ-गतिर्यस्येति यथार्थनामेति भावः । ४—'१४६। छे च ।६।१।७३। ह्रस्वस्य छे परे तुगागमः स्यात्संहितायाम् । यथा-सदाशिव+छात्रः=सदाशिवच्छात्रः ।' इतिसिद्धान्त-कौमुद्यां भट्टदीक्षितः । ५—पद्येऽस्मिन्वृत्तं रुचिरा । तल्लक्षणम्-'चतुर् (४)- ग्रहै (९) रिह रुचिरा ज-भ-स्-ज-गाः ।' इति वृत्तरत्नाकरे भट्टकेदार

अभूदित्यादि—तस्य हीष्टदेवता सनातनो विष्णुः । स चादौ कीर्तितः । तत्प्रतिबन्धना चेयं कथेति प्रबन्धेनैवात्र संकीर्तनं रामायणवत् । तत्र विष्णोर्यस्मिन्काले जगत्कार्यवशादवतारः कृतस्तदेव प्रथमं दर्शयति । अभूदिति भूतसामान्ये लुङ् । भूत इत्यर्थः । अन्यथा राज्ञश्चिरातीतत्वात्कवेः परोक्षत्वाच्च लिट् स्यात् । '२२२३। गाति-स्था-।२।४।७७।' इति सिचो लुक् । '२२२४। भू-सुवोस्तिङि ।७।३।८८।' इति गुणप्रतिषेधः ॥ 'नयतेर्डिच्च' इति नयतेरौणादिक ऋन् । नरो मनुष्यास्तान्नृन्पातीति । '२९१५। आतोऽनुपसर्गे कः ।३।२।३।' । '२३७२। आतो लोपः-।६।४।६४।' नृपो राजा । अत्यन्तधर्मविजयित्वाद्देवराजस्य मित्रमासीदित्याह—विबुधसख इति । विबुध्यन्त इति विबुधा देवास्तेषामपि प्रधानत्वात् । तत्रेगुपधलक्षणः कः । सामान्यशब्दोऽपि देवेषु वर्तमानोऽप्यर्थवशाच्छक्रे प्रयुक्तस्तस्य सखेति । '७८८। राजाऽहःसखिभ्यष्टच् ।५।४।९१।' विबुधसखः । अनेन धर्मविजयित्वं दर्शयति विबुधसखत्वस्य धर्मकार्यत्वात् । सुरलोकविजयिनश्च ये राजानस्तेषां धर्मविजयी प्रधानम् । परे शत्रवस्त्रिविधाः—उच्छेदनीयोपपीडनीयकर्षणीयाः । तत्र ये उपपीडनीयकर्षणीयास्तान्परांस्तापयतीति परंतपः । '२९५४। द्विषत्परयोस्तापेः ।३।२।३९।' इति खच् । '२९५५। खचि ह्रस्वः ।६।४।९४।' । '२९४२। अरुर्द्विषदजन्तस्य– ।६।३।६७।' इति मुम् । नृप इत्यनेन स्वमण्डले वृत्तिराख्याता । परंतप इति परमण्डले । श्रूयन्त इति श्रुतानि वेदादीनि तैरन्वितः संबद्धः । ग्रन्थतोऽर्थतश्च गृहीतत्वात् । दशरथ इत्यनेन नाम्नोदाहृतो लोके गीतः ॥ गुण्यन्तेऽभ्यस्यन्त इति गुणाः । '२०४०। गुण आमन्त्रणे।' इति चौरादिकोऽदन्तः । तस्मात् '३१८८। अकर्तरि च-।३।३। १९।' इत्यादिना घञ् । येषाम् 'एरजण्यन्तानाम्' इति दर्शनम् । येषां तन्नास्ति तेषामेरच् । स्वरं प्रति विवादो न रूपं प्रति । गुणैरभिरामत्वादिभिर्वरं श्रेष्ठं यं नृपं पितरमुपागमदिति संबन्धः । व्रियत इति वरः । '३२३४। ग्रह-वृ-दृ- ।३।३।५८।' इत्यादिना कर्मण्यप् । केन हेतुनोपगतवांस्तं पितरं सनातन इत्यत आह—भुवनहितच्छलेनेति । भवन्त्युत्पद्यन्त इति भुवनानि । भूर्भुवःस्वरिति त्रयो लोकाः । 'रञ्जः क्युन्' इत्यनुवर्तमाने 'भू-सू-धू-सर्जिभ्यश्छन्दसि' इत्यौणादिकः क्युन्बहुलवचनाद्भाषायामपि भवति । तेभ्यो हिता भुवनहिता विष्णोर्दशावताराः । इह तु रामो द्रष्टव्यः । तच्छलेन व्याजेन भुवनहितच्छलेन । इदानीं रावणादि-कण्टकोद्धरणात् । तथा चोक्तम्—'परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥' इति । सनेत्यव्ययं सदार्थे वर्तते । सना भवतीति । '१३९१। सायं-चिरम्- ।४।३।२३।' इति ट्युट्युलौ तुट् च । सनातनो विष्णुरुपागमदुपजगाम । लृदित्वादङ् । सत्स्वन्येषुराजसु गुणैर्वरत्वार्थं पितरं [illegible] ऽभूदिति योज्यम्

न कर्मणान्येन वा प्रेरित इत्यर्थ ॥

२—सोऽध्यैष्ट वेदांस्, त्रि-दशानयष्ट,
पितॄनपारीत्, सममंस्त बन्धून्, ॥
व्यजेष्ट षड्-वर्गमरंस्त नीतौ,
स-मूल-घातं न्यवधीदरींश्च. ॥

सोऽध्यैष्टेत्यादि—क्षत्रियस्य धर्मोऽध्ययनं यजनं दानम्। शस्त्राजीवो भूत-रक्षणं चेत्युभयं नृप इत्यनेनोक्तम्। भूतरक्षणे शस्त्रमङ्गम्। स नृपो वेदानध्यै-ष्टाधीतवानिति स्वाध्याय उक्तः। वेदयन्ति ज्ञापयन्ति धर्माधर्माविति वेदाः सामादयः। '२८९६। नन्दि-ग्रहि-पचादि-।३।१।१३४।' इत्यच्। इङोऽधिपू-र्वस्य '२४६०। विभाषा लुङ्-लृङोः-।२।४।५०।' इति गाङ्। विभाषयेति गा-ङभावपक्षे रूपम्। अजादित्वादाट्। '२६९। आटश्च।६।१।९०।' इति वृद्धिः। ङित्वादात्मनेपदम्। '२१२। आदेश-प्रत्यययोः-।८।३।५९।' इति षत्वं ष्टुत्वं च। त्रिदशान्देवानयष्टाग्निष्टोमादिभिः पूजितवान्। यजनमुक्तम्। यजेः '२१५८। स्वरित-ञितः-।१।३।७२।' इति तङ्। अनिक्समीपत्वाद्धलः '२३००। लिङ्सि-चौ-१।२।११।' इति कित्त्वं न भवति। '२२४। व्रश्च-भ्रस्ज-८।२।३६।' इत्या-दिना षत्वम्। '२२८१। झलो झलि।८।२।२६।' इति सिचो लोपः॥ पितॄनपा-रीदाप्यायितवान्। पितरमुद्दिश्य यजनम् '११६०। पॄ पालन-पूरणयोः।' इत्यस्मा-त्पूरणार्थाल्लुङि रूपम्। '२२९७। सिचि वृद्धिः-।७।२।१'। '२२६६। इट ईटि।८।२।२८।' इति सिचो लोपः। अथवा 'पितॄनतार्प्सीत्' इति पाठः। '१२७१। तृप प्रीणने।' इत्यस्माल्लुङि 'स्पृश-मृश-कृश-तृप-दृपां च्लेः सिज्वक्तव्यः' इति च्लेः सिचि '२४०२। अनुदात्तस्य च-।६।१।५९।' इत्यादिना अमभावपक्षे रूपम्। पितॄंस्तर्पितवानित्यर्थः॥ सममंस्त बन्धून्मातृपित्रादिज्ञातीन्संमतवान्। सदा दानमानादिभिः पूजितवानित्यर्थः। मन्यतेरनुदात्तत्वात्तङ्। इट्प्रतिषेधश्च। येषां सिच इकार उच्चारणार्थस्तेषाम् '२६९७। हनः सिच्।१।२।१४।' इति कित्त्व-

१—'७। अमरा निर्जरा देवास् **त्रि-दशा** विबुधाः सुराः॥' इति ना० अ० 'तृ-तीया यौवनाख्या दशा सदा येषां ते **त्रि-दशाः**। त्रिशब्दस्य तृतीयार्थता त्रिभागवत्'। इति व्याख्यासुधायां (रामाश्रम्यां) भानुदीक्षितः। २—'२९४। व्रश्च-भ्रस्ज-सृज-मृज-यज-राज-भ्राज-छ-शां षः।८।२।३६। व्रश्चादीनां सप्तानां छशान्तयोश्च षकारोऽन्तादेशः स्याज्झलि पदान्ते च।' इति वै० भ०। ३—काम-क्रोध-लोभ-मोह-मद-मत्सरेत्यन्तररीणां षड्वर्गमित्यनित्यसमासः। यथा—'४३। तनुमुद्धूलयन् मर्त्यः **शिव-भागवतो** यदि। **अरि-षड्-वर्ग-तस्** तस्य भयं नाऽस्ति कदा-चन॥' इति समास-कुसुमाऽऽवल्यामन-न्त-शिष्यः। ४—पद्येऽस्मिन्वृत्त**मुपजाति**रापञ्चविंशतिपद्येभ्यः। तल्लक्षणम्—'स्यादिन्द्र-वज्रा यदि तौ ज-गौ ग· उपेन्द्रवज्रा ज त-जास्ततो गौ। अनन्तरोदीरितलक्ष्मभाजौ पादौ यदी

 इति वृत्त० मठ० अर्थदशविधा सन्ति

रणज्ञापकान्नलोपाभावः । येषां तु इकार इत्तेषामिदित्वान्नकारलोपाभावः ॥ आभ्यन्तरं शत्रुमजित्वा कथं परंतप इत्याह—व्यजेष्ट षड्वर्गमिति । कामक्रोधलोभमोहमदमात्सर्याणां षण्णां वर्गः षड्वर्गः । तमभिभूतवान् । विपूर्वस्य जयतेः '२६८५। वि-पराभ्यां जेः ।१।३।१९।' इति तङ् ॥ अरंस्त नीतौ सामादिषु संध्यादिषु च रतः । नीतिमानित्यर्थः ॥ समूलघातं न्यवधीत्समूलान्निःशेषानरीञ्शत्रूञ्जिहतवान् । उच्छेदनीया ये शत्रवस्तेष्विदं विधानम् । समूलोपपदाद्धन्तेः '३३५७। समूलाकृत-।३।४।३६।' इत्यादिना णमुल् । '३५८। हो हन्तेः-।७।३।५४।' इति घत्वम् । वृद्धिः । '२५७४। हनस्तः-।७।३।३२।' इति तत्वम् । '३३६७। कषादिषु यथा-।३।४।४६।' इत्यादिना यथाविध्यनुप्रयोगः । अनुप्रयोगे '२४३४। लुङि च-।२।३।४३।' इति वधादेशः । तस्याकारान्तत्वादुपदेशेऽनेकाच्त्वादिण्निषेधो न भवति । अतो लोपे कृते तस्य स्थानिवद्भावात् '२२८४। अतो हलादेः-।७।२।७।' इति विभाषावृद्धिर्न भवति ॥

३—वसूनि[1] तोयं घन-वद्[2] व्यकारीत्,
सहाऽऽसनं गोत्र-भिदाऽध्यवात्सीत्[3], ॥
न त्र्यम्बकादन्यमुपास्थिताऽसौ[4],
यशांसि सर्वेषु-भृतां निरास्थत् ॥

वसूनीत्यादि—वसूनि द्रव्याणि बन्धुव्यतिरेकेण बालादिभ्यो व्यकारीद्दत्तवान् । विक्षिप्तवानिति वा । किरतेर्लुङि रूपम् । कः किमिवेत्यपेक्षायामाह—तोयं घनवदिति । तोयमुदकम् । घनो मेघः फलनिरपेक्षतया यथा विकिरति तद्वत् । एवं सम्यक्पालनादिन्द्रेण तुल्यत्वमाह—सहासनं गोत्रभिदाऽध्यवात्सीदिति । गोत्रभिदेन्द्रेण सहासनमध्यवात्सीदध्युषितवान् । अनेनात्यन्तधर्मविजयित्वस्य फलं दर्शयति । '१०७४। वस निवासे ।' इत्यस्य रूपम् ।'वसिः संप्रसारणी' इति वचनादिडभावः । '२२२५। अस्ति-सिचः-।७।३।९६।' इति इट्

१—'९७६ । द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु । हिरण्यं द्रविणं द्युम्नमर्थ-रै-विभवा अपि ॥' इति ना० अ० । २—'१७७८। तेन तुल्यं क्रिया चेद् वतिः (वत्) ।५।१।११५। ब्राह्मणेन तुल्यं ब्राह्मणवदधीते । क्रिया चेदिति किम् । गुणतुल्ये माभूत् । पुत्रेण तुल्यः स्थूलः ।' इति वै० म० । ३—'४९। सुत्रामा गोत्र-भिद् वज्री वासवो वृत्रहा वृषा । वास्तोष्पतिः सुरपतिर् वलारातिः शचीपतिः ॥' इति० ना० अ० । 'गां पृथ्वीं त्रायन्ते पालयन्ति ते गोत्राः पर्वतास्तान् भिनत्ति विदारयतीति गोत्र-भिद् (त्) ।' इति व्या० मा० । '१०३४। त्रै-ङ् पालने ।' ('१५२३। भिदिर् विदारणे ।' इति धातुपाठे पाणिनिः । ४—'३८। हरः स्मरहरो भर्गस् त्र्यम्बकस् त्रिपुरान्तकः । गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः ।' इति ना० अ० 'दैवं दीपम् तु लोचनम् ॰ च इति त्रिकाण्डशेषे पुरुषोत्तम

'२२६७। वद-व्रज—।७।२।३।' इत्यादिना वृद्धिः। '२३४२। सः स्यार्धधातुके। ७।४।४९।' इति तत्त्वम्। आसनमिति '५४४। उपान्वध्याङ्वसः ।१।४।४८।' इत्यधिकरणस्य कर्मसंज्ञा ॥ त्रीण्यम्बकान्यक्षीणि अस्येति त्र्यम्बको महादेवस्तस्मादन्यं नोपास्थित। न पूजितवानित्यर्थः। उपपूर्वात्तिष्ठतेः 'देवपूजा—संगतिकरण-मित्रकरण-पथिषु—।' इति देवपूजायां तङ्। '२३८९। स्था-घ्वोरिच्च। १।२।१७।' इत्यादिनेत्त्वं कित्त्वं च। '२३६९। ह्रस्वादङ्गात् ।८।२।२७।' इति सिचो लोपः ॥ इषून्बिभ्रतीति। '२९८०। अन्येभ्योऽपि दृश्यन्ते ।३।२।७५।' इति क्विप्। इषुभृतो धनुर्धराः सर्वेषां तेषां यशांसि निरास्थत्। निरस्तवानित्यर्थः। एतेनास्यासाधारणीकृतास्त्रत्वं दर्शितत्। 'उपसर्गादस्यत्यूह्योर्वा-वचनम्' इति वचनाद्यदा तङ् नास्ति तदा तिप्। '२४३८। अस्यति—।३।१।५२।' इत्यादिना च्लेरङ्। '२५२०। अस्यतेस्थुक् ।७।४।१७' ॥

४—पुण्यो महा-ब्रह्म[१]-समूह-जुष्टः
संतर्पणो नाक-सदां[२] वरेण्यः ॥
जज्वाल लोक-स्थितये स राजा
यथाऽध्वरे वह्निरभिप्रणीतः[३] ॥

पुण्य इत्यादि—पुनातीति पुण्यः। 'पूञो यत् णुक् ह्रस्वश्च' इत्यौणादिको यत् णुगागमश्च ह्रस्वश्च। अत्यन्तपुण्यकरणाद्राजापि पुण्य इत्युच्यते। तन्मयत्वाद्राजा। अग्निरपि पुण्यः पावनत्वात्पुण्यः। यागादिः पुण्यस्तेन पुरुषः पूयते। महतां वेदविदां ब्रह्मणां ब्राह्मणानां समूहेन जुष्टः सेवितो राजाग्निश्च। ब्रह्मशब्दोऽत्र ब्राह्मणपर्यायः। नाके स्वर्गे सीदन्तीति '२९७५। सत्-सू-द्विष—।३।२।६१।' इत्यादिना क्विप्। नाकसदो देवास्तेषां। कर्मणि षष्ठी। संतर्पयति प्रीणयतीति संतर्पणः। संतर्पयतेः '२८४१। कृत्यल्युटो बहुलम् ।३।३।११३।' इति कर्तरि ल्युट्। राजा यागादिना तर्पयति। अग्निरप्यग्निमुखत्वाद्देवानाम्। वरेण्यः श्रेष्ठो राजाग्निश्च 'वृञ एण्यः'। जज्वाल प्रदीप्तवान्। लोकस्थितये माभूल्लोकस्य स्थित्यतिक्रम इत्येवमर्थम्। अग्निरपि लोकस्य स्थितये ज्वलति। यथोक्तम्—'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः

१—'१३२२। वेदस् तत्त्वं तपो ब्रह्म, ब्रह्मा विप्रः प्रजापतिः।' इति ना० अ०। यथा—'ब्रह्माणो ब्रह्मणो ब्रह्म ब्रह्मणा वेत्तुमर्हतः, । एतत्-पद्याऽर्थ-बाह्याऽर्थोऽपि न स्यात् कोशमन्तरा. ॥' इति कोशाऽवतंसः। २—'२९७५। सत्-सू-द्विष-द्रुह-दुह-युज-विद-भिद्च्-छिद-जि-नी-राजामुपसर्गेऽपि क्विप् (०) ।३।२।६१। एभ्यः क्विप् स्यादुपसर्गे सत्यसति च सुप्युपपदे। यथा—द्यु-सत्। उप-नि-षत्। अण्डसूः। प्रसूरित्यादि।' इति वै० म० ३ २२८७ उपसर्गादे-समासेऽपि णोपदेशस्य ८ ४ १४ उपसर्गस्थान्निमित्तात् परस्य णोपदेशस्य धातोर्नस्य ण समासेऽपि प्रणदति प्रणिनदति।'

प्रजाः ॥' इति । अभिप्रणीत इत्यग्निविशेषणम् । आभिमुख्येन प्रणीत इति प्रादिसमासः । '२२८७। उपसर्गादसमासे–।८।४।१४।' इत्यादिना णत्वम् । मन्त्रेणाभिमुखीकृत इत्यर्थः । यथाध्वरे यागेऽभिप्रणीतो वह्निर्ज्वलति तथा राजापीत्यर्थः ॥

यत्रस्थो राज्यं चकार तां नगरीं दर्शयन्नाह—

५—स पुण्य-कीर्तिः शत-मन्यु-कल्पो
महेन्द्र-लोक-प्रतिमां समृद्ध्या ॥
अध्यास्त सर्वर्तु-सुखामयोध्या-
मध्यासितां ब्रह्मभिरिद्ध-बोधैः ॥

स पुण्येत्यादि—स्वामिगुणपूर्वका हि निवासस्य गुणा भवन्तीति प्रदर्शनार्थं पश्चात्तदभिधानम् । तथा चोक्तम्—'स तु यच्छीलस्तच्छीला अस्य प्रकृतयो भवन्ति ।' इति । स राजा पुण्यकीर्तिः पुण्याः पवित्राः कीर्तयो यस्य सः । शतमन्युकल्प इति प्रभावं दर्शयति । '२०२२। ईषदसमाप्तौ–।५।३।६७।' इति कल्पप् । शतमन्युरिन्द्रः । महेन्द्रलोकप्रतिमामयोध्यामिति योज्यम् । प्रतिमीयते तुल्यत इति प्रतिमा । '३२८३। आतश्चोपसर्गे–।३।३।१०६।' इत्यङ् । महेन्द्रलोकेन प्रतिमा तुल्या । '६९२। तृतीया–।२।१।३०।' इति योगविभागात्समासः । अमरावतीमिवेत्यर्थः । कया । समृद्ध्या । सम्यगतिशयेनर्द्धिः समृद्धिः । '७६९१। कुगतिप्रा–।२।२।१८।' इति प्रादिसमासः । अध्यास्ताध्यासितवान् । भूतसामान्ये लङ् । अस्तेरनुदात्तेत्त्वात्तङ् । '५४२। अधि-शीङ्–।१।४।४६।' इत्यादिनाधिकरणस्य कर्मसंज्ञा । सुखयतीति सुखा पचाद्यच् । सुखहेतुत्वाद्वा सुखा । सर्वेषु ऋतुषु सुखेति । '७१७। सप्तमी–।२।१।४०।' इति योगविभागात्समासः । अध्यासितामध्युषिताम् । ब्रह्मभिर्ब्राह्मणैरिद्धबोधैः । सर्वशास्त्रपरिज्ञानात्पटुबुद्धिभिरित्यर्थः । इन्धेर्निष्ठायामनुनासिकलोपः ॥

६—निर्माण-दक्षस्य समीहितेषु
सीमेव पद्माऽऽसन-कौशलस्य ॥
ऊर्ध्व-स्फुरद्-रत्न-गभस्तिभिर् या
स्थिताऽवहस्येव पुरं मघोनः ॥

१—'५४२। अधि-शीङ्–स्थाऽऽसां कर्म ।१।४।४६। अधिपूर्वाणामेषामाधारः कर्म स्यात् । यथा—अधिशेते-अधितिष्ठति-अध्यास्ते वा वैकुण्ठं हरिः ।' इति० वै० म० ।
२—'११८। किरणोस्रमयूखांऽशु-**गभस्ति**-घृणि-रश्मयः ॥' ३—'३३० । **पूः** स्त्री पुरी-नगर्यौ वा पत्तन ४ ४७ इन्द्रो मरुत्वान् **मघवा** बिडौजा पाकशासन इति सर्वत्र ना० म०

निर्माणेत्यादि—पद्मासनो ब्रह्मा । पद्ममासनं यस्येति कृत्वा । तस्य कौशलं नैपुण्यमिति षष्ठीसमासः । तस्य '७०५। पूरण-गुण-।२।२।११' इत्यादिना न प्रतिषेधः । तत्र विशिष्टा एव गुणा रूपरसगन्धस्पर्शास्तद्विशेषाश्च शुक्लनीलादयः कटुकाम्लादयः सौरभ्यादयः शीतोष्णादयश्च गृहीताः । तत्र रूपादिभिः समासो भवत्येव । 'तस्यैश्च गुणैः षष्ठी समस्यते न तु तद्विशेषगुणैः ।' इति वचनात् । अन्यैस्तु समासप्रतिषेधः । एवं च कृत्वा ज्ञुलिङ्गवचनमर्थवद्भवति । तद्यथा '९१९। अधिकरणैतावत्त्वे च ।२।४।१५।' '१२९५। तदशिष्यं संज्ञाप्रमाणत्वात् ।१।२।५३।' इति पाणिनेः, 'युगपद्देशपृथक्त्वदर्शनादिति रूपसामान्याद्वेति वचनप्रामाण्यादिति चेदलोपप्रतिषेधः' इति कात्यायनस्य, 'नकारग्रहणसामर्थ्याल्लोपो न भविष्यतीति किं पुनरत्रार्थसत्त्वम्' इति भाष्यकारस्येति । तस्य सीमेव मर्यादेवायोध्या । ततो न सृष्ट्यन्तरं शोभनमस्तीत्यर्थः । कीदृशस्य । निर्माणदक्षस्य । निर्मितिर्निर्माणं सृष्टिस्तत्र दक्षस्य पटोः । क्व विषयेषु । समीहितेषु । स्वष्टमीप्सितेष्वित्यर्थः । ऊर्ध्वमुपरिष्टात्स्फुरद्रत्नगभस्तिभिः स्फुरन्तो ये रत्नानां गभस्तयो रश्मयस्तैर्हासभूतैर्मघोन इन्द्रस्य पुरममरावतीमवहस्येव स्थिता या तामध्यास्त । 'मघवन् श्वन् उक्षन्' इत्यौणादिकः । '३६२। श्वयुवमघोनाम्-।६।४।१३३।' इति संप्रसारणम् ॥

७—सद्-रत्न-मुक्ता-फल-वज्र-भाञ्जि
विचित्र-धातूनि स-काननानि[1] ॥
स्त्रीभिर् युतान्यप्सरसामिवौघैर्
मेरोः शिरांसीव गृहाणि यस्याम् ॥

सद्रत्नेत्यादि—सन्ति शोभनानि यानि रत्नादीनि तानि भजन्ते यानि गृहाणि तानि सद्रत्नमुक्ताफलवज्रभाञ्जि । मुक्ताफलवज्रयो रत्नान्तर्भावेऽपि प्राधान्यख्यापनार्थं वचनम् । गोबलीवर्दन्यायाद्वा । रत्नशब्देन मरकतपद्मरागवैदूर्यादयो गृह्यन्ते । 'सद्रत्नादि—युञ्जि' इति पाठान्तरम् । '३७६। युजेरसमासे ।७।१।७१।' इति प्रतिषेधो न भवति । अनपुंसकविषयत्वात् । नपुंसके तु तल्लक्षणस्य नुमो विधानात् । विचित्रधातूनि विचित्रा नानाप्रकारा धातवो मनःशिलादयो येषु गृहेषु तेषां विरचितचित्रकर्मत्वात् । सकाननानि सोद्यानानि । स्त्रीभिर्युतान्यप्सरसामिवौघैस्तत्रत्याभिः स्त्रीभिरप्सरोभिरिवेत्यर्थः । मेरोः शिरांसीव मेरोः शृङ्गाणीव एवंविधानि गृहाणि यस्यामयोध्यायां तामध्यास्त । गृह इति '२९०६। गेहे कः ।३।१।१४४।' तत्र गृहशब्दो वेश्मनि नपुंसकलिङ्गः । तत्स्थायिषु पुंल्लिङ्गो नित्यं बहुवचनान्तश्च ॥

१ ३४९ अटव्यरण्य विपिन गहन कानन वनम् इति ना० अ०

८—अन्तर्-निविष्टोज्ज्वल-रत्न-भासो
गवाक्ष-जालैरभिनिष्पतन्त्यः ॥
हिमाऽद्रि-टङ्कादिव भान्ति यस्यां
गङ्गाऽम्बु-पात-प्रतिमा गृहेभ्यः ॥

अन्तरित्यादि—अन्तर्गृहमध्ये निविष्टानि निहितान्युज्ज्वलरत्नानि यानि तेषां भासो रश्मयो गृहेभ्यो गवाक्षजालैरभिनिष्पतन्त्यो निर्गच्छन्त्यो यस्यां भान्ति तामध्यास्तेति योज्यम् । पर्वतस्योन्नतप्रदेशष्टङ्क इत्युच्यते । तस्माद्धिमवत्पर्वतटङ्कादिव गङ्गाम्बुपातप्रतिमा गङ्गाजलप्रवाहतुल्याः स्वच्छत्वात् ॥

९—धर्म्यासु[1] कामाऽर्थ[2]-यशस्-करीषु
मतासु लोकेऽधिगतासु काले ॥
विद्यासु विद्वानिव[3] सोऽभिरेमे
पत्नीषु राजा तिसृषूत्तमासु ॥[4]

धर्म्यास्वित्यादि—धर्मादनपेतासु । '१६४४। धर्म-पथ्यर्थ—।४।४।९२।' इत्यादिना यत् । कामार्थयशांसि कर्तुं शीलं यासां तासु । '२९२४। कृञो हेतु—।३।२।२०' इत्यादिना ताच्छील्ये टः । '१६०। अतः कृ-कमि—।८।३।४६।' इत्यादिना विसर्जनीयस्य सत्वम् । टित्वान्ङीप् । मतासु पूजितासु लोके तासां प्रतीतत्वात् । अधिगतासु काले विवाहयोग्ये काले परिणीतासु । सोऽभिरेमे स राजाभिरतवान् । पत्नीषु '४९०। पत्युर्नो यज्ञसंयोगे ।४।१।३३।' इति नकारः । तिसृषु कौसल्याकैकेयीसुमित्रासूत्तमास्विति सच्चारीगुणैः श्रेष्ठासु । विद्यास्विति विदन्त्याभिर्धर्माधर्माविति विद्याः '३२७६। संज्ञायां समज—।३।३।९९' इत्यादिना क्यप् । तिसृषु सामर्ग्यजुराख्यासु । धर्म्यास्वित्यादिकं तुल्यम् । विद्वानिव यथाधिगतविद्य इत्यर्थः । '३१०५। विदेः शतुर्वसुः ।७।१।३६।' दीर्घ-हल्ङ्यादि-संयोगान्तलोपाः ॥

तस्य राज्ञः पत्नीभिस्ताभिः सह रममाणस्य सुता नैवासन् । ऋष्यशृङ्गनामा मुनिः पुत्रीयं कर्तुं जानातीति पुरोधसो वसिष्ठादुपश्रुत्य राज्ञा वारविलासिनीभिरानायितो मुनिरित्येतत्कथयितुमाह—

१—'१६४४। **धर्म**-पथ्यर्थ-न्यायादनपेते ।४।४।९२। धर्मादनपेतं **धर्म्यम्** । पथ्यम् । अर्थ्यम् । न्याय्यम् ।' इति वै० भ० ॥ २—'इच्छा काङ्क्षा स्पृहेहा तृड् वाञ्छा लिप्सा मनोरथः ॥ २२८ । **कामोऽ**भिलाषस् तर्षश् च—।' इति ना० अ० । ३—अत्रोपमाऽलङ्कारः, तल्लक्षणं कुवलयानन्दकारिकायाम् । **'उपमा'** यत्र सादृश्य-लक्ष्मी-रुल्लसति द्वयो हंसीव **कृष्ण** ते कीर्ति स्वर्-गङ्गाम् स्वग गाम्) अवगा-हते ४ तल्लक्षण पूर्वो (७) क्तम्

१०—पुत्रीयता तेन वरा॒ऽङ्गनाभि-
रानायि विद्वान् क्रतुषु क्रियावान्[1] ॥
विपक्त्रिम-ज्ञान-गतिर् मनस्वी
मान्यो मुनिः स्वां पुरमृष्य-शृङ्गः ॥

पुत्रीयतेत्यादि—पुत्रीयताऽऽत्मनः पुत्रमिच्छता । इच्छायाम् '२६५७। सुप आत्मनः क्यच् ।३।१।८।' इति क्यच् । '२६५८। क्यचि च ।७।४।३३।' इतीत्वम् । तेन राज्ञा प्रयोजककर्त्रा वराङ्गनाभिर्वरस्त्रीभिः प्रयोज्यकर्त्रीभिरानायि स्वां पुरमिति योज्यम् । 'नी-वह्योः' इत्यादेरपि '५३९। अकथितं च ।१।४।५१।' इति चकारेण संगृहीतत्वान्नयतिर्द्विकर्मकः । तत्र प्रधानकर्मणि लुङ् । चिण्णिलोपौ '२३२९। चिणो लुक्–।६।४।१०४।' इति तशब्दस्य लुक् । गुणकर्मणि तु पुरमिति द्वितीया । '५४०। गति-बुद्धि–।१।४।५२।' इत्यादिना प्रयोज्यकर्तरि द्वितीया न भवति । 'नी–वह्योः प्रतिषेधः' इति वचनात् । विद्वान्वेदार्थतत्त्ववित् । एवं च कृत्वा क्रतुषु क्रियावान्प्रशस्तक्रियः । प्रशंसायां मतुप् । विपक्त्रिमज्ञानगतिरिति विपाकेन निर्वृत्तम् । पचतेः क्त्रिः क्त्रेर्मप् । यत्पूर्वजन्मकृतमनिवर्तनीयं कर्म तस्योभयतःप्रत्ययाद्विनोपदेशाज्ज्ञानाप्रवृत्तिर्बुद्धावस्य जातेत्यर्थः । मनस्वी प्रशस्तमनाः । प्रशंसायाम् '१९२८। अस्मायामेधा–।५।२।१२१।' इत्यादिना विनिः । मान्यो मानार्हः । '२८२२। अर्हे कृत्यतृचश्च–३।३।१६९।' इति ण्यत् । धर्मादिमननान्मुनिः । 'मनेरुच्चोपधायाः' इति इन् । उपधाया उकारः । ऋष्यस्य शृङ्गमृष्यशृङ्गं तच्छृङ्गमिव शृङ्गं यस्य स ऋष्यशृङ्गः । 'सप्तम्युपमान–'इत्यादिनोत्तरपदलोपी समासः ॥

११—ऐहिष्ट[2] तं कारयितुं कृता॒ऽऽत्मा
क्रतुं नृपः पुत्र-फलं मुनीन्द्रम्, ॥
ज्ञाना॒ऽऽशयस् तस्य ततो व्यतानीत्
स कर्मठः[3] कर्म सुता॒ऽनुबन्धम्. ॥

ऐहिष्टेत्यादि—तं मुनीन्द्रं क्रतुं कारयितुं नृप ऐहिष्ट ईहितवान् । ईहतेरात्मनेपदिनो लुङि सेट्त्वादिटि च रूपम् । द्विकर्मकता तु '५४१। हृ-कोरन्यतरस्याम् ।१।४।५३।' इति । कृतात्मा वशीकृतात्मेति भावः । पुत्रफलं पुत्रः फलं कार्यं यस्य क्रतोः ॥ तत उत्तरकालम् । स मुनिः परचित्तज्ञत्वाज्ज्ञाताशयो ज्ञा-

---

१—'१०६३। **क्रियावान्** कर्मसूद्यतः ।' इति ना० अ० । 'भूम-निन्दा-प्रशंसासु नित्ययोगेऽतिशायने । संबन्धेऽस्ति विवक्षायां भवन्ति मतुबादयः ॥' इति वै० म० ।
२—'६७५। **ईह** चेष्टायाम् ।' इति धा० पा० । ३—'१०६३। कर्मशूरस्तु **कर्मठः**' इति ना० अ०

ताभिप्रायो राजाभिमतं कर्म कारयितुं तस्य नृपस्य कर्म व्यतानीत्प्रारब्धवान् । तनोतेः '२२६८। नेटि–।७।२।५।' इति हलन्तलक्षणायां प्रतिषिद्धायाम् '२२८४। अतो हलादेः–।७।२।७।' इति विभाषावृद्धिः । कर्मठः कर्मणि घटते '१८३६। कर्मणि घटोऽठच् ।५।२।३५।' यागक्रियानिष्पादक इत्यर्थः । सुतानुबन्धं सुतान-नुबध्नातीति कर्मण्यण् । 'सुतानुबन्धि' इति पाठान्तरम् । सुतानजुबद्धुं शीलम-स्येति । '२९८८। सुप्यजातौ णिनिः–।३।२।७८।' सुपीत्यनुवर्तमाने सुपग्रहण-मुपसर्गनिवृत्त्यर्थमिति केवलस्योपसर्गस्य निवृत्त्यर्थं द्रष्टव्यम् । अन्यथा जाता-विति किं ब्राह्मणानामन्त्रयितेति न युज्यते । आङित्यस्योपसर्गत्वात् ॥

१२—रक्षांसि वेदीं परितो निरास्थ-
दङ्गान्ययाक्षीदभितः प्रधानम् , ॥
शेषाण्यहौषीत् सुत-संपदे च,
वरं वरेण्यो नृपतेरमार्गीत्. ॥

रक्षांसीत्यादि—वेदीं परितो यजनवेद्याः समन्तात् । विघ्नायोपस्थितानि रक्षांसि । रक्ष्यते येभ्य इत्यसुन् । तानि रक्षोघ्नैर्मन्त्रैर्निरास्थन्निरस्तवान् । पर्यभि-भ्यां सर्वोभयार्थे तसिल् । 'अभितःपरितः–' इत्यादिना द्वितीया ॥ अङ्गान्य-याक्षीदभितः प्रधानमिति । यद्देवतामयो यागः सा देवता तत्र प्रधानम् । पुत्र-फलत्वाद्विष्णुः प्रधानम् । तमिष्ट्वा । तस्योभयतः पार्श्वयोर्यान्यङ्गानि चक्षुरादीनि देवतान्तराणि तान्ययाक्षीत् अग्नावाहुत्या पूजितवान् । कर्तुः क्रियाफलाभावा-त्तङ् न भवति । परस्मैपदं ॥ शेषाण्यहौषीदिति स्वाङ्गं विष्णुमिष्ट्वा शेषाणि प्रति-कृतानि पिष्टकमयानि सुतानां संपदर्थमग्नौ हुतवान् । जुहोतेः सिचि वृद्धाविटि च रूपम् ॥ वरेण्यः श्रेष्ठः । वरं चामार्गीन्मार्गितवान् । हे देवा अग्निप्रभृतयो नृपतेः सुता भूयासुरिति । '१९८९। मार्ग अन्वेषणे' । 'आ-धृषाद्वा' इति यदा णिच् नास्ति तदा चङभावात्सिजेव भवति ॥

१३—निष्ठां गते दत्त्रिम-सभ्य-तोषे
विहित्रिमे कर्मणि राज-पत्न्यः ॥
प्राशुर् हुतोच्छिष्टमुदार-वंश्यास्
तिस्रः प्रसोतुं चतुरः सु-पुत्रान्. ॥

निष्ठामित्यादि—निष्ठां समाप्तिं गते कर्मणि यागक्रियायां समाप्तायां राज-पत्न्यो हुतोच्छिष्टं हुतावशेषं शिष्टचरुं प्राशुर्भक्षितवत्यः । अश्नोतेर्लिटि उसि

१–'*अभितःपरितः-समया-निकषा-हा-प्रतियोगेऽपि*' । २–'१२४७ । निष्ठा निष्पत्ति-नाशान्ताः ।' इति ना० अ० । ३–'११६६। डु–दा—ञ् दाने' । ४–'११६७ डु-धा-ञ् धारण पोषणयो दान इत्यप्येके इति धा० पा०

रूपम् । दत्त्रिमसभ्यतोषे दानेन निर्वृत्तो दत्त्रिमः सभ्यानां ब्राह्मणानां तोषो यत्र कर्मणि । विहित्रिमे विधानेन निर्वृत्ते कर्मणि दाञो धाञश्च '३२६६। ड्वितः क्त्रिः ।३।३।८८।' इति क्त्रौ विहिते प्रथमस्य '३०७६। दोदद्घोः ।७।४।४६।' इति ददादेशः । द्वितीयस्य '३०७७। दधातेर्हिः ।७।४।४२।' इति हिरादेशः । मप् । सभायां साधव इति सभ्याः । '१६५७ सभाया यः—४।४।१०५।' उदारवंश्या महावंशोद्भवाः । शेषे यत् । कौसल्या कैकेयी च क्षत्रिये । सुमित्रा तु वर्णसंकरजा । किमर्थं प्राशुः । प्रसोतुं सुपुत्रान्विनीतान्प्रसवितुम् । तत्र कौसल्या कैकयी चैकैकं पिण्डं प्राशितवत्यौ । ताभ्यां चावयोः परिचारिकेति पिण्डभागद्वयं दत्तं सुमित्रा प्राशितवती । ततश्च पुत्रद्वयं जनयिष्यति । एवंचाभिसंधाय चतुर इत्युक्तं न तु त्रीनिति । '११०४। षू-ङ् प्राणिगर्भविमोचने ।' '२२७९। स्वरति–।७।२।४४।' इत्यादिना विभाषितेट् ॥

१४—कौसल्ययाऽसावि सुखेन रामः
प्राक्, केकयी-तो भरतस् ततोऽभूत्, ॥
प्रासोष्ट शत्रु-घ्नमुदार-चेष्ट-
मेका सुमित्रा सह लक्ष्मणेन. ॥

कौसल्ययेत्यादि—कोसलस्य राज्ञोऽपत्यमिति '११८९। वृद्धेत्कोसलाजादाञ्ञ्यङ् ।४।१।१७१।' '५२८। यङश्चाप् ।४।१।७४।' कौसल्यया प्राक् प्रथमम् असावि रामो जन्यते स्म । षूङः कर्मणि लुङि चिणि रूपम् । सुखेनेति प्रकृत्यादित्वात्तृतीया । महतां जन्मनि न काचिदपि पीडास्ति ॥ तदनन्तरं केकयीतो भरतोऽभूत् । केकयानाचष्टेति णिच् । सा हीदृशास्तादृशाः केकया इति कथयति । तदन्तात् 'अच इः' इति इकारप्रत्यय औणादिकः । णिलोपः । 'कृदिकारादक्तिनः' इति ङीष् । '२११२। अपादाने चाहीयरुहोः ।५।४।४५।' इति तसिः । यदा च केकयस्यापत्यम् '११८६। जनपदशब्दात्क्षत्रियादञ् ।४।१।१८६। इत्यञ्' '११४४। केकय-मित्रयु-प्रलयानां यादेरियः ।७।३।२।' 'इतीयादेशः । '४७०। टिड्ढाणञ्–।४।१।१५।' इति ङीप् । तदा कैकेयीति द्वितीयं रूपम् । सुमित्रा शत्रुघ्नमुदारचेष्टम् । उदारा चेष्टा यस्येति । प्रासोष्ट प्रसूतवती । कर्तरि लुङ् । ङित्वात्तङ् । जातमात्रस्य हि तस्य किल महासत्त्वतया तादृश्येव चेष्टाऽभूदिति श्रूयते । एकेति । एकैवेति गम्यमानत्वादेवशब्दो न प्रयुक्तः । सह लक्ष्मणेन लक्ष्मणेन सह ॥

१५—आर्चीद् द्वि-जातीन् परमाऽर्थ-विन्दा-
नुदेजयान् भूत-गणान् न्यषेधीत्,

विद्वानुपानेष्ट च तान् स्व-काले
यतिर्[1] वशिष्ठो[2] यमिनां[3] वरिष्ठः, ॥

आर्चीदित्यादि—तेषु जातेषु द्विजातीन्द्वे जाती येपामिति तान्ब्राह्मणक्षत्रियवैश्यान्परमार्थविन्दान्। विन्दन्तीति विन्दाः। '१५२६। विद्-लृ लाभे' इत्यस्मात् '२९००। अनुपसर्गा–।३।१।१३८। इत्यादिना शः। मुचादित्वान्नुम्। परमार्थस्य विन्दाँल्लाभिन इति कर्मणि षष्ठी। तस्याः 'कृद्योगा च षष्ठी समस्यत इति वक्तव्यम्' इति समासः। तानार्चीत्स्रगादिभिः पूजितवान्। '२१३। अर्च पूजायाम्' इत्यस्माल्लुङि तिप् इट् सिचो लोपः॥ भूतगणान्राक्षसादिगणान्। उदेजयानुत्कम्पान्। तस्मिन्नेव सूत्र उत्पूर्व एजिपर्यन्तो निर्दिष्टः। तस्मादुदेजयतीति शः। तान्यपेधीदुत्सादितवान्। षिधेः '२२६८। नेटि।७।२।४।' इति हलन्तलक्षणायाः प्रतिषेधः॥ विद्वान्पौरोहित्यकर्मणि कुशलः। उपानेष्ट च तान्रामादीन्। तेषामुपनयनादिक्रियां चकार। '२७०९। संमानन–।१।३।३६।' इत्यादिनाचार्यकरणे तङ्। स्वकाले इति 'गर्भादेकादशे वर्षे जातस्य गर्भैकादशे' इत्यादिना वचनेन उपनयनकाल उक्तः। यमनियमेषु यतत इति यतिः। 'सर्वधातुभ्य इन्' इति इन्। 'अहिंसा सत्यमस्तेयं ब्रह्मचर्यमकल्मषम्। इति पञ्च यमा येषां सन्तीति यमिनः स्मृताः'। तेषां वरिष्ठ उत्तमः। '२०१६। प्रिय-स्थिर–।६।४।१५७।' इत्यादिनोरुशब्दस्य वरादेशो महत्पर्यायस्य। वशिष्ठः॥

१६–वेदोऽङ्गवांस्तैरखिलोऽध्यगायि,
शस्त्राण्युपायंसत जित्वराणि,[4] ॥
ते भिन्न-वृत्तीन्यपि मानसानि
समं जनानां गुणिनोऽध्यवात्सुः, ॥

वेद इत्यादि—'शिक्षा कल्पो व्याकरणं छन्दोविचितिर्निरुक्तं ज्योतिषं चेति षडङ्गानि शास्त्राणि तानि विद्यन्ते यस्य वेदस्येत्यङ्गवान्। तैरुपनीतै रामादिभिः। अखिलो निःशेषो वेदोऽध्यगायि। अधीत इत्यर्थः। इङोऽधिपूर्वात्कर्मणि लुङि '२४६० विभाषा लुङ्-लृङोः।२।४।५०।' इति गाङादेशः। चिण् युक् तलुक्। शस्त्राणि धनुरादीनि जित्वराणि जयशीलानि। '३१५३। इण्-नश्-जि-।३।२।

१—'७५२। ये निर्जितेन्द्रिय-ग्रामा **यतिनो यतयश्** च ते ॥' इति ना० अ०। २—वश इन्द्रिय-निग्रहो येषां तेषु प्राधान्येन तिष्ठति यः स वशिष्ठः। ३—'यतिनां वरिष्ठः' इत्यपि क्वचित् पाठः। ४—'३१४३। इण्-नश्-**जि**-सर्ति-भ्यः क्वरप् (वा०) ।३।२।१६३। इत्वरः। इत्वरी। नश्वरः। **जित्वरः**। सृत्वरः।' इति वै० भ० ८४,२ जेता जिष्णुश् च **जित्वर** इति ना० अ०

१६३।' इत्यादिना क्वप् । तैरुपायंसत स्वीकृतानि । उपपूर्वो यमिः स्वीकरणे वर्तते । तस्मात्कर्मणि लुङ् । '२२५८। आत्मनेपदेषु ।७।१।५।' इत्यादिना अदादेशः। '२६९७। हनः सिच् ।१।२।१४।' इति ज्ञापकादनुनासिकलोपाभावः॥ ततस्ते रामादयो गुणिनो मानसानि मनांसि । प्रज्ञादित्वात्स्वार्थे णः । भिन्नवृत्तीनि नानाविधप्रवृत्तीनि विषयेषु तानि मानसान्यपि जनानां समं साधारणम् । क्रियाविशेषणम् । अध्यवात्सुरध्युषितवन्तः । अधिपूर्वाद्वसेः सिचि '२२६७। वद-व्रज-।७।२।३।' इत्यादिना वृद्धिः । '२३४२। सः सि-।७।४।४९।' इति तत्वम् । '२२२६। सिजभ्यस्त-।३।४।१०९।' इति जुस् । '५४४। उपान्व-१।४।४८।' इत्यादिनाऽधिकरणस्य कर्मसंज्ञा ॥

१७—ततो–ऽभ्यगाद् गाधि-सुतः क्षितीन्द्रं
रक्षोभिरभ्याहत-कर्म-वृत्तिः ॥
रामं वरीतुं परिरक्षणा–र्थं,
राजाऽऽजिहत् तं मधुपर्क-पाणिः. ॥

तत इत्यादि—तेषु रामादिषु तथाभूतेषु । गाधिसुतो विश्वामित्रः । क्षितीन्द्रं राजानमभ्यगादभिगतवान् । इणो गादेशः । '२२२३। गाति-स्था-।२।४।७७।' इत्यादिना सिचो लुक् । रक्षोभिर्निशाचरैरभ्याहताभिभूता यागादेः कर्मणो वृत्तिः प्रवृत्तिर्यस्येति । रामं वरीतुं प्रार्थयितुम् । '२३९१। वृतो वा ।७।२।३८।' इति इटो दीर्घत्वम् । परिरक्षणार्थं विहन्यमानस्य कर्मण इत्यर्थः ॥ तं गाधिसुतम् । आजिहत् पूजितवान् । '१८६४ अर्ह पूजायाम्' इति स्वार्थिकण्यन्तश्चौरादिको गृह्यते न भौवादिकः । तस्माद्धेतुमण्णिचात्र न भवितव्यम् । '२३१२। णि-श्रि-।३।१।४८।' इत्यादिना चङ् । णिलोपः । '२२४३। द्विर्वचनेऽचि ।१।१।५९।' इति स्थानिवद्भावात् । '२१७६। अजादेर्द्वितीयस्य ।६।१।२।' इति हिशब्दो द्विरुच्यते । रेफस्य न । '२४४६। न न्द्राः ।६।१।३।' इति प्रतिषेधः । चुत्वम् । आट् । वृद्धिः । मधुपर्कपाणिः । दधिघृतमधून्येकीकृतानि मधुपर्क इत्युच्यते । तस्मिन् पात्रे स्थितः पाणिर्यस्येति विग्रहः । 'सप्तम्युपमाने-' इत्यादिना उत्तरपदलोपी समासः । पात्रादुद्धृत्य मधुपर्केण पूजितवानित्यर्थः ॥

१८—ऐषीः पुनर्-जन्म-जयाय यत् त्वं,
रूपा–ऽऽदि-बोधान् न्यवृतच्च यत् ते, ॥
तत्त्वान्यबुद्धाः प्रतनूनि येन,
ध्यानं नृपस् तच्छिवमित्यवादीत्. ॥

१—'७४३। अथ गाधेयो विश्वामित्रश्च कौशिकः ॥' इति ना० अ० ।

२ १४७ श्व श्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् । इति ना० अ०

ऐषीरित्यादि—मुक्तिस्तत्त्वावबोधस्तस्या ध्यानं प्रयोजनं तत्र पुनर्जन्म भूयोजन्म तस्य जयाय यद्ध्यानं त्वमैषीः एषितवानसि । इषेर्लुङ् । मध्यमैक-वचने '२२६६। इट ईटि ।८।२।२८।' इति सिचो लोपे रूपम् ॥ रूपादिबोधा-द्व्यवृतच्च यत्ते—रूपादिषु शब्दस्पर्शरूपरसगन्धेषु चक्षुरादिद्वारेण यो बोधोऽध्य-वसायलक्षणा बुद्धिः तस्माच्च यद्ध्यानं न्यवृतत् निवृत्तम् । वृतेर्द्युतादित्वात् '२३४५। द्युद्भ्यो लुङि ।१।३।९१।' इति तिप् । च्लेरङ् ॥ तत्त्वानि पञ्चविंशतिः पुरुषप्रधानमहदहङ्कारादीनि । प्रतनूनि सूक्ष्माणि येन ध्यानेनाबुद्धाः ज्ञातवा-नसि । बुधेरनुदात्तेतो लुङ् । थासः सिच् '२३००। लिङ्सिचावात्मनेपदेषु ।१।२।११।' इति सिचः कित्वाद्गुणाभावः । सिज्लोपधत्वजश्त्वादि ॥ तद्ध्यानं शिवं शोभनं कच्चिदिति नृपोऽवादीत् । न तस्य व्याघात इति '२२६७। वद-व्रज-।७।२।३।' इत्यादिना वृद्धिः । '९७४ ध्यै चिन्तायाम्' भावे ल्युट् । ध्यानम् ॥

१९—आख्यन् मुनिस् तस्य शिवं समाधेर्,
विघ्नन्ति रक्षांसि वने क्रतूंश्च, ॥
तानि द्विषद्-वीर्य-निराकरिष्णुस्
तृणेढु रामः सह लक्ष्मणेन. ॥

आख्यदित्यादि—पृष्टो मुनिस्तस्य समाधेर्ध्यानस्य शिवमनुपद्रवमाख्यत् कथितवान् । '२४३६। चक्षिङः ख्याञ् ।२।४।५४।' '१४२८। अस्यति ३।१।५२।' इत्यादिना च्लेरङ् । आतो लोपः ॥ किन्त्वयं दोषः—विघ्नन्ति रक्षांसि वने क्रतून् । '२३६३ । गम-हन—।६।४।९८।' इत्यादिना उपधालोपः । '३५८। हो हन्तेः—।७।३।५४।' इति कुत्वम् ॥ किं क्रियतामिति चेदाह—तानि रक्षांसि । द्विषतां वीर्यं सामर्थ्यं । वीरेः स्वार्थिकण्यन्तात् '२८४२। अचो यत् ।३।१।९७।' तस्य निराकरिष्णुः निराकरणशीलः । '३११६। अलंकृञ्—।३।२।१३६।' इत्या-दिना इष्णुच् । तृणेढु हिनस्तु । तृहेर्विधौ लोट् । '२२९६। एरुः ।३।४।८६।' रुधादित्वात् श्नम् । '२५४५। तृणह इम् ।७।३।९२।'। '३२४। हो ढः ।८।२।३१।' ढत्वम् । '२३३५। ढो ढे ।८।३।१३।' इति ढलोपः । सह लक्ष्मणेन लक्ष्म-णेन सह ॥

२०—स शुश्रुवांस्तद्-वचनं मुमोह
राजा ऽसहिष्णुः सुत-विप्रयोगम्, ॥

---

१ १४७ प्र श्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् इति ना० अ०

अहंयुना ऽथ क्षिति-पः शुभंयु-
रूचे वचस् तापस-कुञ्जरेण. ॥

स इत्यादि—स राजा तस्य मुनेस्तद्वचनं शुश्रुवान् श्रुतवान् सन् सुतविप्रयोगमसहिष्णुरसहनशीलो मुमोह मोहमुपगतः । शृणोतेः '२०९७। भाषायां सद्-वस-श्रुवः ।३।२।१०८।' इत्यनेन क्वसुः । सुतेन विप्रयोगमिति '६९४। कर्तृ-करणे कृता बहुलम् ।२।१।३२।' इति समासः '६२७। न लोकाव्यय-निष्ठा—।२।३।६९।' इति षष्ठ्याः प्रतिषेधः ॥ अथानन्तरम् । अहंयुना अहंकारवता । '१९४६। अहं-शुभमोर्युस् ।५।२।१४०।' तापसकुञ्जरेण '१९०९। तपःसहस्राभ्यां विनीनी ।५।२।१०२।' इत्यनुवर्तमाने 'अण् च' इति मत्वर्थेऽण् । तापसश्च स कुञ्जरश्चेति । '७४१। वृन्दारक—।२।१।६२।' इत्यादिना समासः । तेन क्षितिपो राजा । शुभंयुः कल्याणवान् । पूर्ववद्युस् । वचो वक्ष्यमाणमूचे उक्तः । कर्मणि लिट् । सम्प्रसारणम् । अहंयुनाथः इति विसर्गान्तं पाठान्तरम् । तत्र अहंयूनां क्षत्रियाणां नाथ इति योज्यम् ॥

२१—मया त्वमाप्थाः शरणं भयेषु,
वयं त्वयाऽप्याप्स्महि धर्म-वृद्धौ, ॥
क्षात्रं द्विज-त्वं च परस्परा ऽर्थं,
शङ्कां कृथा मा, प्रहिणु-स्व-सूनुम्. ॥

मयेत्यादि—भयेषु त्वं शरणम् आप्थाः प्राप्तोऽसि मया । आपेः कर्मणि लुङ् । सिज्लोपः ॥ त्वयापि धर्मवृद्धौ धर्मोपचयाय वयमाप्स्महि प्राप्ताः । पूर्ववल्लुङादि । उत्तमबहुवचनम् । सिचो लोपाभावः । मकारस्याझल्त्वात् ॥ तदित्थं क्षात्रं द्विजत्वं च धर्मवृद्धौ परस्परार्थं अन्योन्यप्रयोजनम् । 'कर्मव्यतिहारे सर्वनाम्नो द्वे भवतः' । 'समासवच्च बहुलम्' इति यदा न समासवत् तदायम् ॥ तस्मान्मा शङ्कां कृथाः माकार्षीः । कथमस्मिन् संकटे पुत्रं नियोजयामीति । '२२१९। माङि लुङ् ।३।३।१७५' अडभावः । '२३६८। उश्च ।१।२।१२' इति कित्त्वाद्गुणाभावः । '२३६९। ह्रस्वादङ्गात् ।८।२।२७' इति सिचो लोपः ॥ प्रहिणु प्रेषय । स्वं पुत्रम् । हिनोतेः प्रार्थनायां लोट् । श्नुः । अपित्त्वात् ङित्त्वम् । गुणाभावः । '२३३४। उतश्च प्रत्ययात् ।६।४।१०६।' इति हेर्लुक् । २५३०। हिनु मीना ।८।४।१५ इति णत्वम् ।

२२—घानिष्यते तेन महान् विपक्षः,
स्थायिष्यते येन रणे पुरस्तात्, ॥
मा मां महाऽऽत्मन् परिभूर्-योग्ये
न मद्-विधो न्यस्यति भारमग्र्यम्. ॥

घानीत्यादि—अनागतमर्थं ज्ञानेन समीक्ष्याह—महान्विपक्षो रावणः त्रैलोक्यविजयित्वात्। सोऽपि तेन रामेण घानिष्यते किमुतेतरे राक्षसाः। हन्तेः कर्मणि लृट्। '१७५७। स्य-सिच्—।६।४।६२।' इत्यादिना चिण्वदिट् उपधावृद्धिः। '३५८। हो हन्तेः—।७।३।५४।' इति कुत्वम्॥ पुरस्तादग्रतो यद्रणं युद्धं भावि परशुरामेण सार्धमिति भावः। तत्र येन स्थायिष्यते तेन घानिष्यत इति योज्यम्। अत्र तिष्ठतेर्भावे लृट्। चिण्वदिड्वा। '२७६१। आतो युक् ।७।३।३३।' ॥ हे महात्मन्। महासत्व मा मां परिभूरवज्ञासीः। किमेवं वदसीति। परिपूर्वो भवतिर्निराकरणे वर्तते॥ मद्विध इति विधानं विधा प्रकारः '३२८३। आतश्चोपसर्गे ।३।३।१०६।' इत्यङ्। विधा भेदः सादृश्यं च। इह सादृश्यं गृह्यते मया विधा सादृश्यं यस्येति मद्विधः। '१३७३। प्रत्ययोत्तरपदयोश्च ।७।२।९८।' इति मदादेशः। मद्विधो मत्सदृशोऽन्यो न भारमग्र्यम् '३४६२। अग्राद्यत् ।४।४।११६।' अयोग्ये असमर्थे न्यस्यति निक्षिपति। किमहं येनानागतं समीक्षितमिति भावः। योगाय प्रभवति योग्यः '१७६६। योगाद्यत् ।५।१।१०२।' ॥

२३—क्रुध्यन् कुलं धक्ष्यति विप्र-वह्निर्,
यास्यन् सुतस् तप्स्यति मां स-मन्युम्, ॥
इत्थं नृ-पः पूर्वमवालुलोचे,
ततोऽनुजज्ञे गमनं सुतस्य. ॥

क्रुध्यन्नित्यादि—यद्यहं भूतरक्षणेऽधिकृतोऽस्य वचनं न कुर्यां तदा क्रुध्यन्सन्। दिवादित्वात् श्यन्। विप्रो वह्निरिव। '७३५। उपमितम्—।२।१।५६।' इति समासः। धक्ष्यति कुलं भस्मसात्करिष्यति। दहेर्लृट् '३२५। दादेः—।८।२।३२।' इति घः। भष्भावः। चर्त्वम्। गकारस्य ककारः। '२११। इण्कोः ।८।३।५७।' इति षत्वम्॥ यास्यन्गमिष्यन्सुतो मां समन्युं सशोकं तप्स्यति सन्तापयिष्यति। तपेर्लृट्॥ इत्थमेवंप्रकारं नृपः पूर्वमादाववालुलोचेऽवलोकितवान्। अवाङ्पूर्वाल्लोचेर्लिट्॥ ततः उत्तरकालं सुतस्य गमनमनुजज्ञे। अनुज्ञातं नृपेणेति विभक्तिविपरिणामेन तेनेति योज्यम्। कर्मणि लिट्। '१६०४ ज्ञा अवबोधने' इति परस्मैपदित्वात्
त्मनेपदं विहितम्।

२४—आशीर्भिरभ्यर्च्य मुनिः क्षितीन्द्रं
प्रीतः प्रतस्थे पुनराश्रमाय, ॥
तं पृष्ठ-तः प्रेष्ठमियाय नम्रो
हिंस्रेषु-दीप्ताऽऽप्त-धनुः कुमारः. ॥

आशीर्भिरित्यादि—रामगमनस्यानुज्ञातत्वात् प्रीतो मुनिः क्षितीन्द्रं राजानमाशीर्भिरभ्यर्च्य पूजयित्वा । आङः शासेः क्विप्युपसंख्यानात् उपधाया इत्वम् । प्रतस्थे पुनराश्रमाय—आश्रमं पुनः प्रस्थितवान् । तिष्ठतेः '२६८९। समव–।१।३।२२।' इत्यादिना लिटि तङ् ॥ प्रष्ठम् अग्रयायिनं तं । '२९१७। प्रष्ठोऽग्रगामिनि ।८।३।९२।' इति षत्वम् । पृष्ठतः पश्चात् इयाय कुमारः । इणो णलि वृद्धिरायादेशः '२२४३। द्विर्वचनेऽचि ।१।१।५९।' इति स्थानिवद्भावाद्विर्वचनमिकारस्य । '२२९०। अभ्यासस्याऽसवर्णे ।६।४।७८।' इतीयङ् । नम्रोऽनुकूलः । हिंसनशीला इषवः शराः हिंस्रेषवः । आप्तमविसंवादि यद्धनुस्तत् । हिंस्रेषु दीप्तमाप्तं धनुर्यस्य कुमारस्येति विग्रहः । अत्र '८७०। धनुषश्च ।५।४।१३२।' इत्यनङ् न भवति 'समासान्तविधिरनित्यः' इति । दीप्ताऽस्त्रधनुरिति पाठान्तरम् । दीप्तमस्त्रं धृष्टतया यस्य धनुषस्तद्दीप्तास्त्रं धनुर्यस्येति सः। कस्मिन्विषये । हिंस्रेषु नान्येषु । नम्रादयो '३१४७। नमिकम्पि–।३।२।१६७।' इत्यादिना रप्रत्ययान्ताः ॥

२५—प्रयास्यतः पुण्य-वनाय जिष्णो-
रामस्य रोचिष्णु-मुखस्य धृष्णुः ॥
त्रै-मातुरः कृत्स्न-जिताऽस्त्र-शस्त्रः
सध्र्यङ् रतः श्रेयसि लक्ष्मणोऽभूत्. ॥

प्रयास्यत इत्यादि—प्रयास्यतो गमिष्यतो रामस्य लक्ष्मणः सध्र्यङ् अभूत् सहायीभूतः। 'सहाञ्चति' इति क्विन् अनुषङ्गलोपः '३६१। उगिदचाम्–।७।१।७०।' इति नुम् । हल्ङ्यादि-संयोगान्तलोपौ '३७७। क्विन्प्रत्ययस्य–।८।२।६२।' इति कुत्वं नकारस्य ङकारः । '४२२। सहस्य सध्रिः ।६।३।९५।' इति सध्र्यादेशः। पुण्यवनाय पुण्यहेतुत्वात्पुण्यं वनम् । गत्यर्थात् कर्मणि चतुर्थी । जिष्णोर्जयशीलस्य '३११९। ग्ला-जि-स्थश्च–।३।२।१३९।' इति ग्स्नुः । रोचिष्णु रोचन-

---

१—'८३७। पुरोगाऽग्रेसर-प्रष्ठाऽग्रतःसर-पुरस्-सराः ।' इति ना० अ० । २—'५८५। गत्यर्थ-कर्मणि द्वितीया-चतुर्थ्यौ चेष्टायामनध्वनि ।२।३।१२। अध्वभिन्ने गत्यर्थानां कर्मण्येते स्तश्चेष्टायाम् । ग्रामं ग्रामाय वा गच्छति ।' इति वै० भ० । ३—'८४२। जेता जिष्णुश्च जित्वरः ।' ४—'६६५। विभ्राड् भ्राजिष्णु-रोचिष्णू,' ५—'१०७०। धृष्टे धृष्णग् (धृष्णुर्) वियातश्च,' । ६—'१०७९। कः सहाऽञ्चति सध्र्यङ् स इति सर्वत्र ना० म०

शीलं सुखं यस्य रामस्य पितुराज्ञया सुष्ठुत्वात्। '३११६। अलंकृञ्-।३।२।१३६।' इत्यादिना इष्णुच्। धृष्णुः शत्रुविध्वंसने प्रगल्भः। '३१२०। त्रसि-गृधि-।३।४।१४०।' इत्यादिना क्नुः। त्रैमातुरः तिसृणां मातृणामपत्यमिति तद्धितार्थ-विषये समासः। पश्चात् '१११८। मातुरुत्सङ्ख्या-।४।१।११५।' इत्यादिना अण् उत्वं च। '१०८०। द्विगोर्लुगनपत्ये ।४।१।८८।' इति लुक् न भवति। स हि पिण्डद्वयप्राशनाभ्यां च जनितः। अस्त्रं च शस्त्रं चेति द्वन्द्वः। कृत्स्नं समग्रं जितमधिगतमस्त्रशस्त्रं येनेति विग्रहः, रतः श्रेयसि कल्याणे। '२०१०। अकृत्स्नैकाच्।६।४।१६३।' '२००९। प्रशस्यस्य श्रः ।५।३।६०।' लक्ष्मीरित्यौणा-दिकः। लक्षेर्मुट् ईप्रत्ययश्च। सा यस्य विद्यत इति लक्ष्मणः। लोमादिषु 'लक्ष्म्या अच्च' इति न-प्रत्ययः अत्वं च॥

२६—इषु-मति रघु-सिंहे दन्दशूकाञ् जिघांसौ
धनुररिभिरसह्यं मुष्टि-पीडं दधाने॥
व्रजति, पुर-तरुण्यो बद्ध-चित्राऽङ्गुलित्रे
कथमपि गुरु-शोकान् मा रुदन् माङ्गलिक्यः[१]॥

इषुमतीत्यादि—रघुसिंहे रामे रघुषु रघुवंशभवेषु सिंह इव शौर्यादि-योगात्। व्रजति सति। इषुमति लनिषङ्गे। प्रशंसायां मतुप्। तदुक्तं कौमुद्यां 'भूम-निन्दा-प्रशंसासु नित्ययोगेऽतिशायने। संसर्गेऽस्तिविवक्षायां भवन्ति म-तुबादयः।' दन्दशूकान् हिंस्रान्। दंशेः '२६३५। लुप-सद-।३।१।२४।' इत्या-दिना यङ्। 'जप-जभ-' इत्यादिना अभ्यासस्य नुक्। तदन्तात् '३१४६। यज-जप-।३।२।१६६' इत्यादिना ऊकः। '२३०८। अतो लोपः ।६।४।४८।'। '२६३१। यस्य हलः ।६।४।४९'। जिघांसौ हन्तुमिच्छौ। '२६१४। अज्झन-।६।४।१६।' इति दीर्घः। '२४३०। अभ्यासाच्च।७।३।५५।' इति कुत्वम् '३१४८। सनाशंस-।३।२।१६८।' इति उः '६२७। न लोक-।२।३।६९।' इति षष्ठीप्रतिषे-धात् द्वितीयैव। धनुर्दधाने बिभ्राणे। अरिभिरसह्यं सोढुमशक्यम्। '२८४७। शकि-सहोश्च।३।१।९९।' इति यत्। मुष्टिपीडं मुष्टिना पीडयित्वा। मुष्टिशब्दे तृतीयान्ते उपपदे '३३७०। सप्तम्यां चोपपीड-।३।४।४९।' इति णमुल्। तत्र चकारेण तृतीयानुकर्षणात्। बद्धं चित्रमङ्गुलित्रं येन। अङ्गुलिं त्रायत इति कः। पुरे तरुण्यः पुरतरुण्यः। 'नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसङ्ख्यानम्' इति ङीप्। यदि तद्वचोऽर्थवत्। नो चेद्गौरादिपाठात् ङीप्। रामो गत इति गुरुः शोको यासां ताः। कथमपि मा रुदन् न रुदितवत्यः। रुदेः '२२६९। इरितो वा ।३।१।५७।' इति च्लेरङ्। यतो माङ्गलिक्यः मङ्गलप्रयोजनाः।

---

१ मालिनी (८)-लोकैः (७) इति वृत्तर
न न-म य-य-युतेयं मालिनी भोगि लोकैः (१५ अक्ष०) भट्ट केदार

तदस्य '१७७२। प्रयोजनम् ।५।१।१०९।' इति ठञ् । '४७०। टिड्ढाणञ्—।४।१।१५।' इत्यादिना ङीप् ॥

२७—अथ जगदुरनीचै—राशिषस् तस्य विप्रास्,
तुमुल-कल-निनादं तूर्यमाजघ्नुरन्ये, ॥
अभिमत-फल-शंसी चारु पुस्फोर बाहुस्,
तरुषु चुकुवुरुच्चैः पक्षिणश् चाऽनुकूलाः. ॥

अथेत्यादि—तस्य रामस्य व्रजतो विप्रा अनीचैर्महता ध्वनिनाशिष इष्टवचनानि जगदुर्गदितवन्तः । अन्ये वादकास्तूर्यं कांस्यतालपटहादिसमूहमाजघ्नुस्ताडितवन्तः । '२६९५। आङो यम-हनः ।१।३।२८।' इत्यात्मनेपदं न भवति । अकर्मकादित्यनुवर्तते । तुमुलो महान्कलो मधुरो निनादो ध्वनिर्यस्येति । अभिमतमिष्टं फलं शंसितुं शीलं यस्य बाहोः स चारु पुस्फोर सुतरां स्फुरितवान् । अत्र दक्षिणो बाहुः सामर्थ्याद्गम्यते स्वाङ्गत्वात् । अनेन सीताप्राप्तिबीजमुपन्यस्तम् । स्फुरतेरभ्यासस्य '२२५९। शर्पूर्वाः खयः ।७।४।६१।' इति खयः शेषः । चत्वंम् । पक्षिणश्च तरुषु स्थिता अनुकूलाः सन्त उच्चैः सुष्ठु चुकुवुः कूजितवन्तः । '१११५। कु शब्दे' इत्यस्य लिटः किरवादुवङादेशः ॥

इति श्री-जयमङ्गलाऽऽख्यया व्याख्यया समलंकृते श्री-भट्टिकाव्ये—
प्रथमे प्रकीर्ण-काण्डे लक्षण-रूपे प्रथमः परिच्छेदः (वर्गः),
तथा लक्ष्य-रूपे कथानके श्री-राम-संभवो नाम प्रथमः
सर्गः पर्यवसितः ।

द्वितीयः सर्गः—

इदानीं विजिगीषूणां कण्टकान् समुद्धर्तुं शरत्काले समुद्योग इति तमेव वर्णयन्नाह—

२८—वनस्पतीनां सरसां नदीनां
तेजस्विनां कान्तिभृतां दिशां च ॥
निर्याय तस्याः स पुरः समन्ता-
च्छ्रियं दधानां शरदं ददर्श. १

वनस्पतीनामित्यादि—स रामः। तस्याः पुरः अयोध्यायाः। निर्यः निर्गत्य। समन्तात् सर्वतः शरदं ददर्श दृष्टवान्। कालस्याप्रत्यक्षत्वात् कार्याण दर्शनात्तद्दर्शनमिति मन्यते। श्रियं दधानां धारयन्तीं। केषां वनस्पतीना पारस्करादिदर्शनात् सुट्। अत्र लोकप्रतीत्या वृक्षा द्रष्टव्याः। न तु पारि भाषिकाः। तथा सरसां तडाकानां नदीनां गङ्गादीनां तेजस्विनां चन्द्रतारा-दीनां कान्तिं नैर्मल्यं बिभ्रतां दिशां च। तदा हि निर्मला दिशो भवन्ति। वन-स्पत्यादीनां श्रियं दधानां शरदं ददर्श॥

तां रामव्यापारं विना सामान्येन वर्णयन्नाह—

२९—तरङ्ग-सङ्गाच् चपलैः पलाशैर्
ज्वाला-श्रियं सा॒ऽतिशयां दधन्ति॥
स-धूम-दीप्ता॒ऽग्नि-रुचीनि रेजुस्
ताम्रो॒त्पलान्याकुल-षट्-पदानि.॥ २॥

तरङ्गेत्यादि—तरङ्गसङ्गात् सलिलोर्मिसम्पर्काच्चपलैः चञ्चलैः पलाशैः पत्रैः ज्वालाश्रियं सातिशयां दधन्ति। सधूमदीप्ताग्निरुचीनि सधूमदीप्ताग्नेरिव रुचि-र्येषां रक्तोत्पलानां तानि रेजुः दीप्यन्ते स्म। राजेर्लिटि '२३५४। फणां च सप्तानाम् ।६।४।१२५।' इति एत्वाभ्यासलोपौ। आकुलाः इतस्ततो यायिनः षट्पदा येष्विति। चलितपत्राणामग्निशिखातुल्यत्वात् षट्पदानां च धूमतुल्यत्वात् सधूमदीप्ताग्निरुचीनीत्युक्तम्॥

३०—बिम्बा॒ऽऽगतैस् तीर-वनैः समृद्धिं
निजां विलोक्या॒ऽपहृतां पयोभिः॥
कूलानि सा॒ऽऽमर्षतयेव तेनुः
सरोज-लक्ष्मीं स्थल-पद्म-हासैः.॥ ३॥

बिम्बेत्यादि—बिम्बं प्रतिबिम्बं तेनागतैर्निपतितैरिति। तृतीयेति योगवि-भागात् समासः। तीरवनैः कुसुमितैरित्यर्थात्। तैः करणभूतैः। पयोभिः कर्तृभिः समृद्धिं विभूतिं निजामात्मीयां अपहृतां विलोक्य कूलानि कर्तृभूता-नि सामर्षतयेव साक्षमतयेव सरोजलक्ष्मीं कमलशोभां पयःसम्बन्धिनीं तेनुः विस्तारितवन्ति। '२२६०। अत एकहल्मध्ये—।६।४।१२०।' इत्यादिना एत्वा-भ्यासलोपौ। कूले सरोजासम्भव इति चेदाह—स्थलपद्महासैरिति स्थल-कमलविकाशैरित्यर्थः॥

३१—निशा-तुषारैर् नयना॒ऽम्बु-कल्पैः
पत्रा-ऽन्त-पर्यागलदुच्छ-बिन्दुः॥

उपारुरोदेव नदत्-पतङ्गः[1]
कुमुद्वतीं तीर-तरुर् दिनाऽऽदौ. ॥ ४ ॥

निशेत्यादि—निशायां तुषारैः हिमैः। नयनाम्बुकल्पैः अश्रुतुल्यैः। नयनानुकारिषु पत्रेषु स्थितत्वात्। तैर्हेतुभूतैः पत्रान्तपर्यागलदच्छबिन्दुः। पत्रान्तात्पर्यागलन्तः अच्छास्तुषारबिन्दवो यस्य तीरतरोः। स दिनादौ दिनारम्भे कुमुद्वतीमुपारुरोदेव आक्रन्दितवानिव भाति शशिवियोगादीदृशी त्वं भूतासीति। रोदनक्रियया आक्रन्दनविशिष्टया कुमुद्वत्या ईप्सिततमत्वात् रुदिः सकर्मकः। तदाक्रन्दनं योजयन्नाह—नदत्पतङ्ग इति। कूजत्पक्षीत्यर्थः। 'पतेरङ्गच् पक्षिणि' इत्यौणादिकः। कुमुद्वती '१३०६। कुमुदनड—।४।२।८७।' इत्यादिना ड्मतुप्। '१८९८। झयः।८।२।१०।' इति वत्वम्। उगित्वात् ङीप्॥

३२—वनानि तोयानि च नेत्र-कल्पैः
पुष्पैः सरोजैश् च निलीन-भृङ्गैः॥
परस्परां विस्मय-वन्ति लक्ष्मी-
मालोकयाञ्चक्रुरिवाऽऽदरेण. ॥ ५ ॥

वनानीत्यादि—वनानि पुष्पैर्निलीनभृङ्गैः स्थितभ्रमरैः। लीयतेः '३०१९। स्वादय ओदितः।८।२।४५।' इति निष्ठानत्वं। नेत्रकल्पैः नेत्रतुल्यैः। तोयानि च सरोजैः निलीनभृङ्गैर्नेत्रकल्पैः। विस्मयवन्ति जातविस्मयानि। परस्परामन्योन्यस्य लक्ष्मीं शोभाम् आलोकयाञ्चक्रुरिव। आदरेण तात्पर्येण॥

३३—प्रभात-वाताऽऽहति-कम्पिताऽऽकृतिः
कुमुद्वती-रेणु-पिशङ्ग-विग्रहम्॥
निरास भृङ्गं कुपितेव पद्मिनी,
न मानिनी संसहते ऽन्य-सङ्गमम्. ॥ ६ ॥[2]

प्रभातेत्यादि—प्रभाते यो वातस्तस्याघातेन कम्पिता चालिता आकृतिराकारो यस्याः पद्मिन्याः सा भृङ्गं निरास निरस्तवती। कुमुद्वतीरेणुना पिशङ्गः कपिशः विग्रहो यस्य भृङ्गस्य। कुपितेव। यथा अन्यया स्त्रिया सहोषितं तदङ्गसंक्रान्तपरिमलकण्ठमालमात्मदयितं काचित् कुपिता निरस्यति तद्वत्। सा

१—'१२२५। पतङ्गौ पक्षि-सूर्यौ च।' इति ना० अ०। २—'अत्राऽर्थान्तरन्यासाऽलंकारः। तल्लक्षणं कुवलयानन्दकारिकायाम्—उक्तिरर्थान्तरन्यासः स्यात् सामान्य विशेषयो। हनूमानब्धिमतरद् दुष्-करं किं [illegible] इति

किमिति निरस्यति—यतो मानिनी मानवती अन्यसङ्गमम् अन्यया सह संगमं न सहते। आत्मसङ्गादन्यसङ्गमं न संसहते न क्षमते ॥

२४—दत्ताऽवधानं मधु-लेहि-गीतौ
प्रशान्त-चेष्टं हरिणं जिघांसुः ॥
आकर्णयन्नुत्सुक-हंस-नादान्
लक्ष्ये समाधिं न दधे मृगावित्. ॥ ७ ॥

दत्तेत्यादि—मधुलेहिगीताविति मधु लेढुं शीलमेषामिति णिनिः। मधुलेहगीताविति पाठान्तरं तत्र लिहन्तीति लेहाः पचाद्यच्। मधुनो लेहा इति षष्ठीसमासः। मधु लिहन्तीति वा कर्मण्यण्। दत्तावधानं दत्तमानसं हरिणं प्रशान्तचेष्टं जिघांसुः हन्तुमिच्छुरपि मृगावित् व्याधः। मृगान्विध्यतीति क्विप्। '२४१२। ग्रहि-ज्या—।६।१।१६।' इत्यादिना सम्प्रसारणम्। '१०३७। नहि-वृति—।६।३।११६।' इत्यादिना दीर्घः। लक्ष्ये वध्ये समाधिं चित्तैकाग्रतां न दधे न धारितवान्। णित्वात्तङ्। लिटः कित्त्वे आतो लोपः। उत्सुकानां हंसानां नादानाकर्णयन् शृण्वन् तत्राभिरतचित्तकत्वात्। वर्तमानकालो भूतेनाभिसम्बध्यमानः साधुः। '२८२४। धातु-सम्बन्धे प्रत्ययाः ।३।४।१।' इति च। आकर्णयन्निति 'प्रातिपदिकाद्धात्वर्थे बहुलम्' इति णिच् '३१०३। लक्षण-हेत्वोः—।३।२।१२६।' इति शतृप्रत्ययः ॥

२५—गिरेर् नितम्बे मरुता विभिन्नं
तोयाऽवशेषेण हिमाऽऽभमभ्रम् ॥
सरिन्-मुखाऽभ्युच्चयमादधानं
शैलाऽधिपस्याऽनुचकार लक्ष्मीम्. ॥ ८ ॥

गिरेरित्यादि—गिरेः कस्यचित् नितम्बे मध्यभागे स्थितमभ्रं कर्तृ, मरुता विभिन्नं विश्लीकृतं तोयावशेषेण पयसोऽवशिष्टतया हिमाभं हिमसदृशं सरिन्मुखानां गिरिनदीनिर्गमाणामभ्युच्चयं वृद्धिम् आदधानं कुर्वाणं शैलाधिपस्य हिमवतः लक्ष्मीं शोभामनुचकार अनुकृतवत् ॥

२६—गर्जन् हरिः साऽम्भसि शैल-कुञ्जे
प्रतिध्वनीनात्म-कृतान् निशम्य ॥

१—'९४। अभ्रं मेघो वारि-वाहः स्तनयित्नुर् बलाहकः। धारा-धरो जल-धरस् तडित्वान् वारि-दोऽम्बु-भृत्' इति ना० म० २ १३८३ यमाऽनिलेन्द्र चन्द्राऽर्क विष्णु सिंहा ऽशु-वाजिषु शुकाऽहि कपि भेकेषु हरिर् ना कपिले त्रिषु

क्रमं बबन्ध क्रमितुं स-कोपः
प्रतर्कयन्नन्य-मृगेन्द्र-नादान्. ॥ ९ ॥

गर्जन्नित्यादि—हरिः सिंहः गर्जन् शब्दं कुर्वन् । क्व शैलनिकुञ्जे गिरेर्गहने । साम्भसि ससलिले । एवंविधे प्रदेशे प्रतिध्वनीन् प्रतिशब्दान् आत्मकृतान् निशम्य श्रुत्वा सरोषः सकोपः क्रमं बबन्ध क्रमितुमुत्पतितुं यत् सामर्थ्यं तच्चकारेत्यर्थः । अनेकार्थत्वाद्धातूनां बन्धिरत्र करणे वर्तते । किमिति प्रतर्कयन्नन्यमृगेन्द्रनादान् ॥

इदानीं रामं व्यापारेण वर्णयन्नाह—

२७—अदृक्षता ऽम्भांसि नवोत्पलानि,
रुतानि चा ऽश्रोषत षट्-पदानाम्, ॥
आघ्रायि वान् गन्ध-वहः सु-गन्धस्
तेना ऽरविन्द-व्यतिषङ्ग-वांश् च. ॥ १० ॥

अदृक्षतेत्यादि—नवान्युत्पलानि येष्वम्भस्सु जलेषु तानि रामेणादृक्षत दृष्टानि । दृशेः कर्मणि लुङ् । '२२३६। शल इगुपधा—।३।१।४५।' इति प्राप्तस्य क्सादेशस्य '२४०७। न दृशः—।३।१।४७।' इति प्रतिषेधात् '२२६९। इरितो वा—।३।१।५७।' इति सिजेव भवति । तेन विकल्पेनाङो विधीयमानत्वात् '२३००। लिङ्सिचा—।१।२।११।' इति कित्त्वे गुणाभावः ॥ षट्पदानां रुतानि अश्रोषत श्रुतानि । शृणोतेः कर्मणि लुङ् ॥ वहतीति वहः पचाद्यच् । गन्धस्य वह इति कृद्योगे षष्ठी समस्यते । गन्धवहो वायुराघ्रायि आघ्रातः । कर्मणि लुङ् । अरविन्देन पद्मेन व्यतिषङ्गः संपर्कः सोऽस्ति यस्य वायोः सः । वातीति वान् वातेः शतृप्रत्ययः । सुगन्धः । शोभनो गन्धो यस्य सः । अरविन्दव्यतिषङ्गत्वात् '८७४। गन्धस्येदुत्-पूति-सु-सुरभिभ्यः ।५।४।१३५।' इतीकारः समासान्तो न भवति । गन्धस्येत्त्वे तदेकान्तग्रहणमिति वचनात् सुगन्ध आपणिक इति यथा ॥

१—'१९८। कोलाहलः कलकलस्, तिरश्चां वाशितं रुतम् ।' २—'५४९। मधुव्रतो मधुकरो मधुलिण्-मधुपाऽलिनः । द्विरेफ-पुष्पलिड्-भृङ्ग-षट्-पद-भ्रमराऽलयः ॥' ३—'६९ । श्वसनः स्पर्शनो वायुर् मातरिश्वा सदागतिः । पृषदश्वो गन्ध-वहो गन्धवाहाऽनिलाऽऽशुगाः ॥' इति सर्वत्र ना० अ० ।

३८—लताऽनुपातं कुसुमान्यगृह्णात्
स, नद्यवस्कन्दमुपास्पृशच् च, ॥
कुतूहलाच्, चारु-शिलोपवेशं
काकुत्स्थ ईषत् स्मयमान आस्त. ॥ ११ ॥

लतेत्यादि—'३३७८। विशि-पति-पदि-स्कन्दां व्याप्यमानासेव्यमानयोः।३।४।५६।' इति द्वितीयान्त उपपदे णमुल्विधीयते। तत्र व्याप्यमाने द्रव्यवचनस्य आसेव्यमाने च क्रियावचनस्य '२१२७। नित्य-वीप्सयोः।८।१।४।' इति द्विर्वचनं विधीयते। अत्र तु समासेनैवोक्तत्वात् नोपयुज्यत इति स्थितम्। स काकुत्स्थो रामो गच्छन् लतां लतामनुपात्य कुसुमान्यगृह्णात् गृहीतवान्। लतामनुपात्यानुपात्य च। '७८४। तृतीयाप्रभृतीन्यन्यतरस्याम्।२।२।२१।' इति समासः। ग्रहेर्लङ्। श्नाप्रत्ययस्य, अपिदिति ङित्वे '२४१२। ग्रहि-ज्या-६।१।१६' इत्यादिना सम्प्रसारणम्॥ नद्यवस्कन्दमिति नदीं नदीम् अवस्कन्द्यसर्वां नदीमवस्कन्द्य ढौकित्वा नदीं वा अवस्कन्द्यावस्कन्द्य, उपास्पृशत्, आचमनं कृतवान्। कुतूहलादिति सर्वत्र योज्यम्॥ चारुशिलोपवेशमिति चारुशिलाः चारुशिला उपविश्य चारुशिला उपविश्योपविश्य वा आस्त आसितवान्। आसेर्लङि रूपम्। ईषत् स्मयमानः ईषद्धसन्॥

३९—तिग्मांशु- रश्मिच्-छुरितान्य-दूरात्
प्राञ्चि प्रभाते सलिलान्यपश्यत् ॥
गभस्ति-धाराभिरिव द्रुतानि
तेजांसि भानोर् भुवि संभृतानि. ॥ १२ ॥

तिग्मांश्वित्यादि—अदूरात्समीपे सलिलान्यपश्यत्। दृशेर्लङि '२३६०। पा-घ्रा-।७।३।७८।' इति पश्यादेशः। तिग्मांशोरादित्यस्य रश्मिभिः छुरितानि रञ्जितानि। तुक्। प्राञ्चि पूर्वस्यां दिशि अवस्थितानि। प्रपूर्वादञ्चतेः '३७३। ऋत्विग्-।३।२।५९।' इत्यादिना क्विप्। अनुषङ्गलोपः। शिः। नपुंसकस्य नुम्। भानोरिव तेजांसि भुवि संभृतानि पिण्डीकृतानि। गभ-स्तिभिः रश्मिभिः धाराभिरिव द्रुतानि गलितानि। धारा प्रपात इति भिदा पाठाद्द्रष्टव्यम्॥

१—'अलं-खल्वोः प्रतिषेधयोः प्राचां **क्त्वा** (त्वा) ।३।४।१८॥३३१६।
समान-कर्तृकयोः पूर्व-काले — ।३।४।२१॥३३२०।
आभीक्ष्ण्ये **णमुल्** (अम्) च— ।३।४।२२॥३३४३।
समासे ऽनञ्-पूर्वे क्त्वो **ल्यप्** (य) ७ १ ३७ ३३३२
इति पाणिनि वै० म० च

४०—दिग्-व्यापिनीर् लोचन-लोभनीया
मृजाऽन्वयाः स्नेहमिव स्रवन्तीः ॥
ऋज्वाऽऽयताः शस्य-विशेष-पङ्क्तीस्
तुतोष पश्यन् वितृणाऽन्तरालाः ॥ १३ ॥

दिग्व्यापीत्यादि—शस्यविशेषाणां शाल्यादीनां पङ्क्तीः पश्यंस्तुतोष तुष्टवान्। दिग्व्यापिनीः सर्वदिग्व्यापनशीलाः । लोभयन्तीति लोभनीयाः । बहुलवचनात्कर्तर्यनीयः । लोचनानां लोभनीया इति षष्ठीसमासः । मार्जनं मृजा शुद्धिः । '३२८१। षिद्भिदादिभ्योऽङ् ।३।३।१०४।' तया, अन्वयोऽनुगमो यासाम्। शुद्ध्यनुगता इत्यर्थः । ततः स्नेहमिव स्रवन्तीः । ऋजवश्च ता आयताश्च वितृणान्तरालाः उत्पाटितानि तृणानि अन्तराले मध्यभागे यासां ताः ॥

४१—वियोग-दुःखाऽनुभवाऽनभिज्ञैः
काले नृपांऽशं विहितं ददद्भिः ॥
आहार्य-शोभा-रहितैरमायै-
रैक्षिष्ट पुम्भिः प्रचितान् स गोष्ठान् ॥ १४ ॥

वियोगेत्यादि—पुम्भिः गोपैः प्रचितान् व्याप्तान् गोष्ठान् गावस्तिष्ठन्ति येष्विति '२९१६। सुपि स्थः ।३।२।४।' इति कः । '२११८। अम्बाम्ब- ।८।३।९७।' इत्यादिना मूर्धन्यः । तान् स राम ऐक्षिष्ट दृष्टवान् । अनुदात्तेत्वात्तङ् । इट् । वियोगदुःखस्य योऽनुभवः अनुभवनं तस्यानभिज्ञैः तेषां पुत्रदारैः सहैव सर्वत्र गमनात् एतावता कालेन एतावद्देयमिति विहितं कृतम् । दधातेर्हिः । नृपांशं करं ददद्भिः । आहार्या कटकादिभिः आहरणीया या शोभा दीप्तिः तया रहितैः । अमायैः ऋजुभिः । आहार्येति '२८७२। ऋ-हलोर्ण्यत् ।३।१।१२४।' शोभयतीति शोभा पचाद्यच् । '३२८४। ण्यासश्रन्थो युच् ।३।३।१०७।' इति युच् न भवति तस्य स्त्रीलिङ्गे भावे अकर्तरि च कारके विधानात् । नन्द्यादिपाठात् ल्युर्न भवति तस्य '२८३०। वाऽसरूपोऽस्त्रियाम्।३।१।९४' इति विकल्पितत्वात् । अथवा शोभनं शोभा स्त्रीलिङ्गे भावे घञ् । '२८४१। कृत्य-ल्युटो बहुलम् ।३।३।११३।' इति बहुलवचनादन्येऽपि कृतः प्राप्तमपि स्वाभिधेयं व्यभिचरन्ति ॥

४२—स्त्री-भूषणं चेष्टितमप्रगल्भं
चारूण्य-वक्राण्यपि वीक्षितानि ॥
ऋजूंश्च विश्वास-कृतः स्वभावान्
गोपाऽङ्गनानां मुमुदे विलोक्य ॥ १५ ॥

स्त्रीभूषणमित्यादि—गोपाङ्गनानां चेष्टितं गमनागमनादि। अप्रगल्भं लज्जावत्। तच्च स्त्रीविभूषणं स्त्रीणामलङ्कारः। तथा वीक्षितानि विलोकितानि अवक्राण्यपि कटाक्षादिरहितान्यपि चारूणि शोभनानि। स्वभावान् स्वाभिप्रायान् ऋजून् अकुटिलान् विश्वासकृतो विश्वासस्य जनकान् विलोक्य मुमुदे हृष्टवान्। स रामः। लिटोऽपित्वात्किश्वे गुणाभावः। कार्याणां दर्शनात् स्वभावानां दर्शनमित्युक्तम्॥

४३—विवृत्त-पार्श्वं रुचिराऽङ्गहारं
समुद्वहच्-चारु-नितम्ब-रम्यम्॥
आमन्द्र-मन्थ-ध्वनि-दत्त-तालं
गोपाऽङ्गना-नृत्यमनन्दयत् तम्॥ १६॥

विवृत्तेत्यादि—गोपाङ्गनानां दधिमन्थनाय यत् स्थानं कृतं तत् नृत्यमिवेति गोपाङ्गनानृत्यं कर्तृ तं रामम् अनन्दयत् सन्तोषितवत्। नन्देर्ण्यन्तस्य लङि रूपम्। विवृत्ते तिर्यक्चलिते पार्श्वे यत्र नृत्ये। रुचिरः शोभनोऽङ्गहारोऽङ्गविक्षेपो यत्र। समुद्वहता तिर्यक् समुद्गच्छता चारुनितम्बेन कटिभागेन रम्यं मनोहरम्। आमन्द्र ईषद्गम्भीरो यो मन्थकृतो ध्वनिः तेन दत्तस्तालो यत्र॥

४४—विचित्रमुच्चैः प्लवमानमारात्
कुतूहलं त्रस्नु ततान तस्य॥
मेघाऽत्ययोपात्त-वनोपशोभं
कदम्बकं वातमजं मृगाणाम्॥ १७॥

विचित्रमित्यादि॥ मृगाणां कदम्बकं वृन्दं तस्य रामस्य कौतूहलं ततान विस्तृतवत्। विचित्रम् कृष्णश्वेतत्वात्। उच्चैः प्लवमानम् ऊर्ध्वं जिहानम्। आरात् समीपे। त्रस्नु त्रसनशीलम्। '३११०। त्रसि-गृधि-।३।२।१४०।' इत्यादिना क्नुः। मेघात्ययेन मेघापगमेन उपात्तवनोपशोभम्। उपात्तं गृहीतं वनम् उपशोभा च येनेति व्यधिकरणबहुव्रीहिः। वातमजति वातमजम् वाताभिमुखं गच्छतीत्यर्थः। 'वात-शुनी-तिल-शर्धेषु—' इति खश्। '२९४२। अरुर्द्विष-।६।३।६७।' इति मुम्॥

४५—सिताऽरविन्द-प्रचयेषु लीनाः
संसक्त-फेनेषु च सैकतेषु॥
कुन्दाऽवदाताः कलहंस-मालाः
प्रतीयिरे श्रोत्र-सुखैर् निनादैः॥ १८॥

सितेत्यादि [illegible] प्रचयेषु समूहेषु ३२३१ परत् ३१५६' ३२१४ 'सह्ये चामौसराधर्ये ३१४२' इति मस्को न भवत्र प्राणिषु

सङ्गशब्दस्य रूढत्वात् । लीनाः कलहंसमालाः । तथा संसक्तफेनेषु च सैकतेषु पुलिनेषु लीनाः सिकता येषु विद्यन्त इति । '१९१२। देशे लुबिलचौ च ।५।२।१०५।' इति चकारादण् । कुन्दावदाताः कुन्दमिवावदाताः शुक्लाः।'७३४। उपमानानि-।२।१।२२।' इत्यादिना समासः । प्रतीयिरे ज्ञाताः । तेन रामेणेति विभक्तिविपरिणामेन सम्बन्धः । कर्मणि लिट् । '२४५५। इणो यण् ।६।४।८१।' ।'२२४३। द्विर्वचनेऽचि ।१।१।५९।' इति स्थानिवद्भावाद्द्विर्वचनम् । श्रोत्रसुखैर्मधुरैर्निनादैः करणभूतैः । '३३४१ । नौ गद-।३।३।६४।' इत्यादिना घञ् ॥

शरद्वर्णनमुपसंहरन्नाह—

४६—न तज् जलं, यन् न सु-चारु-पङ्कजं,
न पङ्कजं तद्, यद्-लीन-षट्-पदम्, ॥
न षट्-पदोऽसौ, न जुगुञ्ज यः कलं;
न गुञ्जितं तन्, न जहार यन् मनः.[1] ॥१९॥

न तज्जलमित्यादि ॥ किम्बहुनोक्तेन सर्वथा न तज्जलं यत् सुचारुपङ्कजं न बभूव । पङ्कजमपि यदलीनषट्पदं तदपि न । असौ षट्पदोऽपि तथाविधो नाभूत् । यः कलं मधुरं न जुगुञ्ज न गुञ्जितवान् । '२१२। गुजि अव्यक्ते शब्दे' । '२२६२। इदितो नुम् धातोः ।७।१।५८।' इति नुमि लिटि रूपम् । गुञ्जितमपि तत् नैवासीत् । यन्मनो न जहार न हृतवत् रामस्य लोकस्य वा ॥

४७—तं यायजूकाः[2] सह भिक्षु-मुख्यैस्[3]
तपः-कृशाः शान्त्युदकुम्भ-हस्ताः, ॥
यायावराः पुष्प-फलेन चा ऽन्ये
प्राणर्चुरर्च्या जगदर्चनीयम्. ॥ २० ॥

१—पद्येऽस्मिन्नेकावल्यलङ्कारः । तल्लक्षणं काव्यप्रकाशे भट्ट-मम्मटः—'स्थाप्यतेऽपोह्यते वाऽपि यथा-पूर्वं परं-परम् ॥ विशेषणतया वस्तु यत्र, सैकावली द्विधा. ॥' इति । **स्थापने** यथा—'पुराणि यस्यां स-वराऽङ्गनानि, वराऽङ्गनारूप-पुरस्कृता-ऽङ्गः, ॥ रूपं समुन्मीलित-सद्-विलासमस्त्रं विलासाः कुसुमा-ऽऽयुधस्य. ॥' किंवा—'स पण्डितो, यः स्व-हिताऽर्थ-दर्शी; हितं च तद्, यत्र पराऽनपक्रिया ॥ परे च ते, ये श्रित-साधु-भावाः; सा साधुता, यत्र चकास्त्युमाधवः. ॥' **अपोहने** यथा—'निरत्ययं साम न दान-वर्जितं; न भूरि दानं विहरय्य सत्-क्रियाम् ॥ प्रवर्तते तस्य विशेष-शालिनी; गुणाऽनुरोधेन विना न सत्-क्रिया. ॥' इति श्री-भारवि-किराताऽर्जुनीये-१।१२। किं वा—'नाऽऽर्यः स, यो न स्व-हित समीक्षते; न तद् हितं, यत् न पराऽनुतोषणम् ॥ न ते परे, यैर् नहि साधुता श्रिता; न साधुता सा, नहि यत्र मा-धवः. ॥' २—'७१४। इज्या-शीलो **यायजूकः** ।' ३ '७४९ **भिक्षु** परिव्राट् कर्मन्दी पाराशर्यपि मस्करी ।'

तमित्यादि—यायजूकाः, अत्यर्थं यजनशीलाः। '३१४६। यज-जप-दशां यङः ।३।२।१६६।' इत्यूकः। '२३०८। अतो लोपः ।६।४।४८।'। '२६३१। यस्य हलः ।६।४।४९।' ते तपोवनस्थितास्तं राममागच्छन्तमानर्चुः सुष्ठु पूजितवन्तः। अर्चेर्लिटि द्विर्वचनम्। '२२४८। अत आदेः ।७।४।७०।' इति दीर्घत्वम्। '२२८८। तस्मान्नुड् द्विहलः ।७।४।७१।' इति नुट्। सह भिक्षुमुख्यैः। भिक्षणशीला भिक्षवः परिव्राजकाः। '३१४८। सनाशंसभिक्ष उः।३।२।१६८।' तेषां ये प्रधानास्तैः सह। तपःकृशाः तपसा दुर्बलाः। शान्त्यर्थमुदकं तेन पूर्णः कुम्भः। '९९७। एकहलादौ—।६।३।५९।' इत्यादिना, उदकस्य उदभावः। स हस्ते येषामिति बहुव्रीहिः। परनिपातश्चात्र वाहिताग्न्यादिदर्शनात्। प्रहरणार्थेभ्य इति वा। शान्त्युदकुम्भस्याहितनिवारणसाधर्म्यात् उपचारेण प्रहरणम्। ते शिरःसूदकदानेन प्राणर्चुः। अन्ये मुनयो यायावरा एकत्रानियतनिलयाः। यातेर्यङन्तात्। '१३५६। यश्च यङः ।३।२।१७६।' इति वरच्। अतोलोपादि। पुष्पफलेन प्राणर्चुः। पुष्पाणि च फलानि चेति '९१०। जातिरप्राणिनाम् ।२।४।६।' इत्येकवद्भावः। अर्च्या अर्चनार्हाः। '२८२२। अर्हे कृत्य—।३।३।१६९।' अर्चनीयमित्यत्रापि। जगतां जगद्भिर्वा, अर्चनीयम्। '६२९। कृत्यानां कर्तरि वा ।२।३।७१।'। इति पक्षे षष्ठी, नतु '६२३। कर्तृ-कर्मणोः कृति ।२।३।६५।' इति षष्ठी॥

४८—विद्यामथैनं विजयां जयां च
रक्षो-गणं क्षिप्नुम-विक्षताऽऽत्मा॥
अध्यापिपद् गाधि-सुतो यथावन्
निघातयिष्यन् युधि यातुधानान्॥ २१॥

विद्यामित्यादि—तपोवनं प्राप्तः गाधिसुतः एनं रामं। '३५१। द्वितीया-टौ—।२।४।३४।' इत्येनादेशः। विद्यां नाम्ना विजयां जयां च। यथावत् यथाविधि। अध्यापिपत् पाठितवान्। '२६०१। णौ च संश्चङोः।६।१।३१।' इति गाङभावपक्षे रूपम्। अधिपूर्वादिङो हेतुमण्णिचि '२६००। क्रीङ्जीनां णौ।६।१।४८।' इत्यात्वम्। पुगादिविधयः। रक्षोगणम्। क्षिप्नुं प्रेरयितारम्। '३१२०। त्रसि-गृधि-।३।२।१४०।' इत्यादिना क्नुः। '६२७। न लोका—।२।३।६९।' इति षष्ठीप्रतिषेधात् द्वितीयैव। अविक्षतात्मा रागादिभिरनभिभूतचित्तवृत्तिः। तस्य हि विद्या अमोघा भवति। संग्रामे युधि। यातुधानान् रक्षांसि। निघातयिष्यन् मारयिष्यन्। हन्तेर्हेतुमण्णिच्। घत्वं। लृट् लृटः सदादेशः॥

४९—आयोधने स्वायुकमस्त्रजात-
ममोघमभ्यर्ण-महाऽऽहवाय॥

१ १०७५ निराकरिष्णु क्षिप्नुः स्यात्

ददौ वधाय क्षणदा-चराणा
तस्मै मुनिः श्रेयसि जागरूकः ॥ २२ ॥

आयोधन इत्यादि—स मुनिः तस्मै रामायास्त्रजातम्, अस्त्रसमूहं ददौ दत्तवान्। ददातेर्लिट्। णल् '।२३७१। आत औ णलः ।७।१।३४।' आयुध्यन्ते अस्मिन्निति आयोधनं संग्रामः। अधिकरणे ल्युट्। तत्र स्थायुकं स्थितिकरणशीलम् जयावहत्वात्। '३१३४। लष-पत—।३।२।१५४।' इत्यादिना उकञ्। आतो यक्। अत एवामोघम् अवन्ध्यम्। अवृथामोक्षत्वात्। अभ्यर्णो निकटो महाहवो यस्य तस्मै। अभिपूर्वादर्देर्निष्ठायाम्, '३०६५। अभेश्चाविदूर्ये।७।२।२५।' इतीट्प्रतिषेधः। '३०१६। र-दा-भ्याम्-।८।२।४२।' इति नत्वम्। अभ्यर्णः। आहव इति आहूयन्ते अस्मिन्युद्धायेति ह्वयतेराङ्पूर्वात् '३२५०। आङि युद्धे ।३।३।७३।' इति सम्प्रसारणम्। अप्प्रत्ययः। गुणावादेशौ। वधाय क्षणदाचराणामिति क्षणदा रात्रिः तत्र चरन्तीति '२९३०। चरेष्टः ३।२।१६।' तत्र हि महाहवे रामो राक्षसान् हनिष्यतीति। '३२५३। हनश्च वधः ।३।३।७६।' इति वधादेशः। कृद्योगे क्षणदाचराणामिति कर्मणि षष्ठी। श्रेयसि जागरूकः तत्कल्याणे सावधानः। जागर्तेरूकः॥

५०—तं विप्र-दर्शं कृत-घात-यत्ना
यान्तं वने रात्रि-चरी डुढौके,[1] ॥
जिघांसु-वेदं धृत-भासुराऽस्त्रम्
तां ताडकाऽऽख्यां निजघान रामः. ॥ २३ ॥

तमित्यादि—विद्यामस्त्रजातं चादाय यज्ञकर्मणि विघ्नोपशमनार्थं वने यान्तं रामम् रात्रिचरी राक्षसी ताडकाभिधाना डुढौके ढौकते स्म। ढौकतेरात्मनेपदिनो लिटि रूपम्। तां च रामो निजघान निहतवान्। विप्रदर्शं कृतघातयत्ना विप्रान् ब्राह्मणान् दृष्ट्वा कृतमारणाभियोगा रात्रिचरी। रामोऽपि जिघांसुवेदं धृतभासुरास्त्रः। जिघांसुं विदित्वा धृतं भासुरं भासनशीलम् अस्त्रं येनेति बहुव्रीहिः। विप्रदर्शं जिघांसुवेदमिति '३३५०। कर्मणि दृशि-विदोः साकल्ये ।३।४।२९।' इति णमुल्॥

५१—अथाऽऽलुलोके[2] हुत-धूम-केतु-
शिखाऽञ्जन-स्निग्ध-समृद्ध-शाखम् ॥
तपो-वनं प्राध्ययनाऽभिभूत-
समुच्चरच्-चारु-पतत्रि-शिञ्जम्. ॥ २४ ॥

अथेत्यादि—अथासौ रामो राक्षसीं हत्वा तपोवनम् आलुलोके दृष्टवान्।

१—'२०१। ढौकृ गत्यर्थः।' २—'७९। लोकृ दर्शने।'

कथम्भूतम् । हुतधूमकेतुशिखाञ्जनस्निग्धसमृद्धशाखम् । हुतश्चासौ धूमकेतुरग्निश्च हुतधूमकेतुः । तस्य शिखाञ्जनेन स्निग्धाः समृद्धाश्च फलादिना शाखा यस्य तपोवनस्य । प्राध्ययनेन वेदपाठेन अभिभूता तिरस्कृता समुच्चरन्ती चार्वी शोभना पतत्रिणां पक्षिणां शिञ्जा ध्वनिर्यत्र । '१०९८ शिजि अव्यक्ते शब्दे ।' शिञ्जनं शिञ्जा '३२८०। गुरोश्च हलः ।३।३।१०३।' इत्याकारप्रत्ययः पतन्तं त्रायन्त इति पतत्राणि पक्षाः । '२९१५। आतोऽनुपसर्गे कः ।३।२।३।' । तानि येषां सन्तीति पतत्रिणः । पतङ्गशिञ्जमिति पाठान्तरम् ॥

५२—क्षुद्रान् न जक्षुर् हरिणान् मृगेन्द्रा,
विशश्वसे पक्षि-गणैः समन्तात्, ॥
नन्नम्यमानाः फल-दित्सयेव
चकाशिरे[1] तत्र लता विलोलाः. ॥ २५ ॥

क्षुद्रानित्यादि—तत्र तस्मिंस्तपोवने तपोधनानां मित्रभावात् क्षुद्रानितरानपि हरिणान्मृगेन्द्राः सिंहाः न जक्षुः न बाधितवन्तः । क्षुद्यन्त इति क्षुद्राः । स्फायितञ्चीत्यादिना औणादिको रक् । '२४२४। लिट्यन्यतरस्याम् ।२।४।४०।' इति अदेर्घस्लृ ।'२३६३। गम-हन—।६।४।९८।' इत्यादिनोपधालोपः '१२१। खरि च ।८।४।५५।' इति चर्त्वम् । '२४१०। शासि-वसि—।८।३।६०।' इत्यादिना षत्वम् । पक्षिगणैः समन्तात्सर्वत्र विरुद्धैरपि काकोलूकादिभिः परस्परं विशश्वसे विश्वस्तम् । भावे लिट् । लताश्च विलोलाश्चपलाश्चकाशिरे शोभन्ते स्म । फलदित्सयेव मुनिभ्यः फलं दातुमिच्छयेव नन्नम्यमानाः अत्यर्थं नमन्त्यः । दातुमिच्छा दित्सा । ददातेः सन् । '२६५३। सनि मी-मा—।७।४।५४।' इत्यादिना इस् '२६२०। अत्र लोपोऽभ्यासस्य ।७।४।५८।' इति अभ्यासलोपश्च।'२३४२। सः सि—।७।४।४९।' इत्यादिना सकारस्य तकारः । '३२७९। अ प्रत्ययात् ।३।३।१०२।' इत्यकारप्रत्ययः । फलानां दित्सेति कर्मणि षष्ठीं विधाय कृद्योगे समासः । नन्नम्यमाना इति नमेर्यङि '२६४३। नुगतोऽनुनासिक—।७।४।८५' इति नुक् । यङन्ताच्छानच् । आने मुक् ॥

५३—अपूपुजन् विष्टर[2]-पाद्य[3]-माल्यै[4]-
रातिथ्य-निष्णा वन-वासि-मुख्याः, ॥
प्रत्यग्रहीष्टां मधुपर्क-मिश्रं
तावासनाऽऽदि क्षिति-पाल-पुत्रौ. ॥ २६ ॥

१—'६९४। काशृ दीप्तौ ।' २—'१३७८। **विष्टरो** विटपी दर्भ-मुष्टिः पीठाऽऽद्यमासनम् ।' ३—'७३८। **पाद्यं** पादाय वारिणि ।' ४—'६९९। **माल्यं** मालास्रजौ मूर्ध्नि

अपूपुजन्नित्यादि—वनवासिमुख्याः महर्षयो विष्टरादिभिः अपूपुजन् पूजितवन्तः। तौ क्षितिपालपुत्रावित्यर्थात् द्वितीयान्तेन योज्यम्। वनवासीति '९७८। शय-वासि—।६।३।१८।' इत्यादिना विकल्पेन सप्तम्या अलुक्। पूजेः स्वार्थिकण्यन्तस्य णौ चङि ह्रस्वः। '२३१८ दीर्घो लघोः ।७।४।९४।' इति अभ्यासस्य दीर्घः। विष्टरमासनम्। '३२२३। वृक्षासनयोर्विष्टरः ।८।३।९३।' इति निपातनात्। पाद्यं पादार्थमुदकम् ।२०५३। पादार्घाभ्यां च ।५।४।२५।' इति यत्। तदर्थत्वात्पद्भावाभावः। माल्यानि कुसुमानि। मालायां साधूनि। '१६५०। तत्र साधुः ।४।४।९८।' इति यत्। आतिथ्य-निष्णाः अतिथ्यर्थम् आतिथ्यम्। '२०९४। अतिथेर्ञ्यः ।५।४।२६।' तत्र निष्णाः कुशलाः। '३०८२। नि-नदीभ्यां स्नातेः कौशले ।८।३।८९।' इति षत्वम्। तौ च क्षितिपालपुत्रौ रामलक्ष्मणौ तदासनादि प्रत्यग्रहीष्टां प्रतिगृहीतवन्तौ। प्रतिपूर्वाद् ग्रहेः लुङ्। तसस्ताम्। '२५६२। ग्रहोऽलिटि—।७।२।३७।' इति दीर्घः। षत्वष्टुत्वे। मधुपर्कमिश्रम् मधुपर्केण सहेत्यर्थः॥

५४—दैत्याऽभिभूतस्य युवामवोढं
मन्नस्य दोर्भिर्[1] भुवनस्य भारम्, ॥
हवींषि संप्रत्यपि रक्षतं, तौ
तपोधनैरित्थमभाषिषाताम्. ॥ २७ ॥

दैत्येत्यादि—दितेरपत्यानि दैत्याः। '१०७७। दित्यदित्या—।४।१।८५।' इत्यादिना ण्यः। तैरभिभूतस्य मग्नस्य शरण्यस्य भुवनस्य भारमितिकर्तव्यतालक्षणं दोर्भिर्भुजैः युवामवोढम् ऊढवन्तौ। नरनारायणौ युवामित्युक्तौ। त्वं च त्वं चेति एकशेषः। अवोढमिति वहेर्लुङ्। थसस्तम्। हलन्तलक्षणा वृद्धिः। सिजलोपः। '२३५७। सहि-वहोः—।६।३।११२।' इत्योत्वम्। ढत्वष्टुत्वढलोपाः। दोरिति दमेर्डोसित्यौणादिको डोस्। हवींषि होतव्यानि। सम्प्रत्यपि रक्षतम्। अर्चिशुचिहुसृपिच्छादिच्छर्दिभ्य इसिरित्यौणादिक इसिः। राक्षसैरुपहन्यमानानि रक्षतम्। प्रार्थनायां लोट्। शप्। थसस्तम्। इत्थमिति '१९६५। इदमस्थमुः ।५।३।२४।' अनेनोक्तप्रकारेण। तपोधनैस्तप एव धनं येषामिति। अभाषिषाताम् अभिहितौ। भाषतेः कर्मणि लुङ्। सिजिटौ॥

५५—तान् प्रत्यवादीदथ राघवोऽपि—,
यथेप्सितं प्रस्तुत कर्म धर्म्यम्, ॥

१—'६४४ 'भुज-बाहू प्रवेष्टो दोः।'

तपो-मरुद्भिर् भवतां शराऽग्निः
संधुक्ष्यतां नोऽरि-समिन्धनेषु. ॥ [1]२८ ॥

तानित्यादि—अथैतस्मिन् प्रस्तावे राघवोऽपि रघुसुतः तान्मुनीन् प्रत्यवादीत् ।'२२६७। वद-व्रज–।७।२।३।' इत्यादिना वृद्धिः । यथेप्सितं यथाभिमतम् । आप्नोतेः '२६१९। आप्-ज्ञप्यृधामीत् ।७।४।५५।' इतीत्त्वम् अभ्यासलोपश्च । सन्नन्तात्कर्मणि निष्ठा । धर्मादनपेतं धर्म्यम् यागादि कर्म । प्रस्तुत प्रारभध्वम् । प्रपूर्वः स्तौतिः प्रारम्भे वर्तते । तस्मान्निमन्त्रणे नियोगकरणे लोट् । थस्य तः । शपो लुक् । तपांसि मरुत इव तपोमरुद्भिः । भवतां तपोमरुद्भिर्नोऽस्माकम् । '४०५। बहुवचनस्य वस्-नसौ ।८।१।२१।' इति नसादेशः । शराग्निः शरोऽग्निरिव । संधुक्ष्यतां दीप्यताम् । '६४४। धुक्ष, धिक्ष, सन्दीपन-क्लेदन-जीवनेषु ।' तस्मात्कर्मणि लोट् । अरिसमिन्धनेषु अरिकाष्ठेषु । समिध्यते एभिरिति समिन्धनानि । करणे ल्युट् । अरयः समिन्धनानीव ॥

५६—प्रतुष्टुवुः कर्म ततः प्रक्लृप्तैस्
ते यज्ञियैर् द्रव्य-गणैर् यथावत्, ॥
दक्षिण्य-दिष्टं कृतमार्त्विजीनैस्
तद् यातुधानैश् चिचिते प्रसर्पत्. ॥ २९ ॥

प्रतुष्टुवुरित्यादि—ततो रामवचनादनन्तरं तपोधनाः कर्म यागक्रियां प्रतुष्टुवुः । यथावत् यथाविधि आरब्धवन्तः । यज्ञियैः यज्ञकर्मार्हैः द्रव्यगणैः प्रक्लृप्तैः मिलितैः । '२३५०। कृपो रो लः ।८।२।१८।' दक्षिणामर्हन्तीति दक्षिण्याः महामुनयः '१७३३ । कडङ्कर-दक्षिणाच्छ च ।५।१।६९।' इति चकाराद्यत् । तैर्दिष्टमुक्तम् । कृतमार्त्विजीनैः ऋत्विक्कर्मार्हैरनुष्ठितम् । ऋत्विजश्च ब्रह्मादयः षोडश पठिताः । तच्च कर्म प्रसर्पत् वृद्धिं गच्छत् । यातुधानै राक्षसैः चिचिते ज्ञातम् । '३९ । चिती" संज्ञाने' इत्यस्मात् कर्मणि लिट् । यज्ञियैरार्त्विजीनैरिति '१७३५। यज्ञर्त्विग्भ्यां घखञौ ।५।१।७१।' इति तत्कर्मार्हतीति ॥

५७—आपिङ्ग-रूक्षोर्ध्व-शिरस्य-वालैः
शिराल-जङ्घैर् गिरि-कूट-दघ्नैः ॥

१—पद्येऽस्मिन् रूपकाऽलंकारः । तल्लक्षणं का० प्र० म० मम्मटः—'तद् रूपकमभेदो य उपमानोपमेययोः॥' इति। यथा—'एष मनः-स्वैर-पशुर् धावति पर-कनक-कामिनी-निकटम्, ॥ तस्माद् विवेक-पाशैः कण्ठे वैराग्य-काष्ठ-माबध्यम्. ॥' किं वा—'दुष्यन्त-सद्म-पद्मं सा स्त्री-श्रीः कण्व-मातु-शिष्य-करैः । नीता स-सुत-सुगन्धा सद्-धर्म-नयाऽम्बु-पूर्णं पुर सरसि स्वकृत-संस्कृत पद्य २ १४३४ रूक्षस् त्वं प्रेम्ण्य-चिक्कणे इति ना० म० २०५९ रूक्ष पारुष्ये इति धा० पा०

ततः क्षपाऽटैः पृथु-पिङ्गलाऽक्षैः
खं प्रावृषेण्यैरिव चाऽऽनशेऽब्दैः. ॥ २० ॥

आपिङ्गेत्यादि—ततः कर्मप्रवर्तनादनन्तरम्। क्षपाटैः निशाचरैः। अटन्तीत्यटाः पचाद्यच्। क्षपायामटा इति। सप्तमीति योगविभागात् समासः। खमाकाशमानशे व्याप्तम्। अश्नोतेः कर्मणि लिट्।'२५३३। अश्नोतेश्च।७।४।७२।' इति नुड्॥ शिरसि जाताः शिरस्याः। '१६६६। शरीरावयवाद्यत् ।५।१।६।' आपिङ्गा आ समन्तात् पिङ्गा विद्युदिव। रूक्षाः सूक्ष्माः ऊर्ध्वशिरस्या बाला येषां तैः। अन्योऽपि शिरस्यो भवति इति बालग्रहणम्। अमङ्गलबाला इत्यर्थः। शिराः सन्ति यासामिति '१९०३। प्राणिस्थादातो लजन्यतरस्याम् ।५।२।९६।' इति लच्। शिराला जङ्घा येषां तैः। गिरिकूटदघ्नैर्गिरिकूटप्रमाणैः। '१८३८। प्रमाणे द्वयसच्–।५।२।३७।' इति दघ्नच्। पृथूनि विस्तीर्णानि पिङ्गलानि चाक्षीणि येषां तैः। '८५२। बहुव्रीहौ सक्थ्यक्ष्णोः–।५।४।११३।' इति षच्। प्रावृषेण्यैरिवेति '१३८८। प्रावृष एण्यः ।४।३।१७।' अब्दैर्मेघैः कृष्णसाधर्म्यात्। अपो ददतीति अब्दाः। चकारः पादपूरणार्थः॥

५८—अधि-ज्य-चापः स्थिर-बाहु-मुष्टि-
रुदञ्चिताऽक्षोऽञ्चित-दक्षिणोरुः॥
तान् लक्ष्मणः सन्नत-वाम-जङ्घो
जघान शुद्धेषुर-मन्द-कर्षी. ॥ २१ ॥

अधीत्यादि—तान् क्षपाटान् गगनस्थान् लक्ष्मणो जघान हतवान्। कीदृशः अधिज्यचापः। अध्यारूढा उत्कलिता ज्या गुणो यस्य चापस्य तदधिज्यम्। प्रादिभ्यो धातुजस्येति समासः। अधिज्यं चापं यस्य लक्ष्मणस्य। स्थिरो निश्चलो बाहुर्मुष्टिश्च यस्य। उदञ्चिते उत्क्षिप्ते अक्षिणी येन स उदञ्चिताक्षः। आकाशस्थापितदृष्टिरित्यर्थः। अञ्चितः सङ्कोचितो दक्षिणोरुर्येन सोऽञ्चितदक्षिणोरुः। अञ्चेः पूजायामितीटोऽनुत्पन्नत्वात् ण्यन्तस्य रूपम्। न चात्र पूजा गम्यते किन्तु गतिविशेष एव। अनुषङ्गलोपोऽपि न भवति णिलोपस्य स्थानिवद्भावात्। समन्तात् नता वामजङ्घा यस्य स सन्नतवामजङ्घः। शुद्धेषुः निशितबाणः। अमन्दमत्यन्तं कर्ष्टुं शीलमस्यासावमन्दकर्षी। कर्णान्ताकृष्टचाप इत्यर्थः॥

५९—गाधेय-दिष्टं वि-रसं रसन्तं
रामोऽपि माया-चणमस्त्र-चुञ्चुः॥
स्थास्नुं[1] रणे स्मेर-मुखो जगाद
मारीचमुच्चैर् वचनं महाऽर्थम्. ॥ २२ ॥

---

१ '१११८' स्थास्नु' स्थिरन्तर' स्थेयान्।'

गाधेयेत्यादि—गाधेरपत्यं गाधेयो विश्वामित्रः। ध्यच इत्यनुवर्तमाने '११२५। इतश्चानिञः ।४।१।१२२।' इति ढक्। तेन दिष्टं कथितं मारीचं नाम राक्षसं रामो जगाद गदितवान्। रसन्तम् वदन्तम्। विरसमश्राव्यमिति क्रियाविशेषणम्। मायाचणं मायया वित्तम् अस्त्रचुञ्चुः अस्त्रैः प्रतीतो रामः। '१८२७। तेन वित्तश्चुञ्चुप्चणपौ ।५।२।२६।' इति। स्थास्नुं रणे स्थितिशीलम्। तस्य सेनापतित्वात्। स्मेरमुखः चित्तस्याक्षोभादीषद्धसनशीलवदनः। '३१४७। नमिकम्पि ।३।२।१६७।' इत्यादिना रः। उच्चैस्तरां जगादेति क्रियाविशेषणम्। वचनं वक्ष्यमाणं महार्थं प्रधानार्थम्। ब्रुविशासीत्यत्र ब्रुवीत्यर्थग्रहणाद्द्विकर्मकता। मारीचं वचनं च ॥

६०—आत्मम्-भरिस् त्वं पिशितैर् नराणां
फले-ग्रहीन् हंसि वनस्-पतीनाम्, ॥
शौवस्तिकत्वं विभवा न येषां
व्रजन्ति, तेषां दयसे न कस्मात्. ॥ ३३ ॥

आत्मेत्यादि—नराणां पिशितैर्मांसैः आत्मानं बिभर्षि पुष्णासि। नान्यदपि शरीरस्थितिहेतुर्भवतीति भावः। स त्वमात्मम्भरिः आत्मभरणाय फलानि गृह्णन्ति ये वनस्पतीनां तान् फलेग्रहीन् फलाशिनो मुनीन् हंसि मारयसि। शपो लुक्। '२९४०। फलेग्रहिरात्मम्भरिश्च ।३।२।२६।' इति निपातितौ। श्वो भवितारः शौवस्तिकाः। '१३८५। श्वसस्तुट् च ।४।३।१५।' इति ठञ् तुडागमश्च। द्वारादित्वादैजागमः। शौवस्तिकत्वं तदेषां विभवा न व्रजन्ति तेषामश्वस्तनिकवृत्तीनां कस्माच्च दयसे न रक्षसि। '६१३। अधीगर्थ-दयेशाम्— ।२।३।५२।' इति कर्मणि षष्ठी ॥

६१—अद्मो द्विजान्, देवयजीन् निहन्मः,
कुर्मः पुरं प्रेत-नराऽधिवासम्, ॥
धर्मो ह्ययं दाशरथे ! निजो नो,
नैवाऽध्यकारिष्महि वेद-वृत्ते. ॥ ३४ ॥

अद्म इत्यादि—राक्षसः प्राह। द्विजान् ब्राह्मणक्षत्रियवैश्यान् अद्मो भक्षयामः। देवयजीन् देवान् यजन्ति आराधयन्ति ये तान्निहन्मः। 'अच इः' इत्यनुवर्तमाने खनीत्यादिषूच्यमानेष्वौणादिकेषु सूत्रेषु यद्यपि यजिर्न पठितस्तथापि यजेरिः

१—'१०६६। उभौ त्वात्मम्भरिः कुक्षिम्भरिः स्वोदर-पूरके॥' २—'३२४। वानस्पत्यः फलैः पुष्पात्, तैर्-पुष्पाद् वनस्पतिः, ॥ ओषध्यः फल-पाकाऽन्ताः स्युर्-वन्ध्य फलेग्रहिः ॥' इति सर्वत्र ना० अ० ३ १३४७ धर्मो पुण्य-यम न्याय ऽऽचार सोमपा इति ना० अ०

प्रकृतेश्च तद्रूप्यमिति वचनात् । '६१७। जासि-निप्रहण—।२।३।५६।' इत्यत्र सङ्घातविगृहीतविपर्यस्तग्रहणात् षष्ठी अत्रापि न भवति । कर्मणः शेषत्वेनाविवक्षितत्वात् । पुरं नगरं प्रेतनराणां मृतनराणाम् । अधिवासमवस्थानं कुर्मः । नित्यहननेन स्मशानतुल्यमित्यर्थः । कस्मादेवमित्याह—धर्म इति । दशरथस्यापत्यं दाशरथिः । '१०९५। अत इञ् ।४।१।९५।' । हे दाशरथे । हि यस्मादर्थे वर्तते । यस्मादयं धर्मः आचारः । निजो नित्यः । न इत्यस्माकम् । वेदविरुद्ध इति चेत्—नैवाध्यकारिष्महि वेदवृत्ते । वेदविहितं वृत्तमिति मध्यमपदलोपी समासः । यद् ब्राह्मणानामुक्तमनुष्ठानं तत्र वयं नैवाधिकृता इत्यर्थः । अधिपूर्वात्करोतेः कर्मणि लुङ् । '२७५७। स्यसिच्—।६।४।६२।' इत्यादिना चिण्वदिट् ॥

६२—धर्मो ऽस्ति सत्यं तव राक्षसाऽय-
मन्यो व्यतिस्ते तु ममाऽपि धर्मः, ॥
ब्रह्म-द्विषस् ते प्रणिहन्मि येन,
राजन्य-वृत्तिर् धृत-कार्मुकेषुः ॥ ३५ ॥

धर्म इत्यादि—रामः प्राह । हे राक्षस रक्ष एव राक्षसः । प्रज्ञादित्वादण् । स्वार्थिका अतिवर्तन्त इति पुँल्लिङ्गता । तवायं पूर्वोक्तः पराभिद्रोहलक्षणो धर्मोऽस्तीति सत्यमेतत् किन्तु ममापि रामस्य अन्यो धर्मोऽशिष्टनिग्रहलक्षणो व्यतिस्ते व्यतिभवते । इदमुक्तं भवति—यद्यप्येवंप्रकारस्त्वद्धर्मो भविष्यति तथापीदानीमेव या त्वद्धर्मेण विद्यमानतया निष्पाद्या सा अस्मद्धर्मेणैव निष्पादकत्वेन व्यतिस्ते । ततश्चान्यसम्बन्धिनीं क्रियामन्यः करोति इतरसम्बन्धिनीमितर इति धर्मव्यतिहारसम्भवात् । अस्तेः '२६८०। कर्मव्यतिहारे ।१।३।१४।' तङ् । तथाहि यो यदवसरे यां कांचित् क्रियां करोति स तत्क्रियाकारीत्युपचाराल्लोक उच्यते । येन धर्मेण हेतुना ब्रह्मद्विषस्ते प्रणिहन्मि मारयामि स व्यतिस्ते इति योज्यम् । '२२८५। नेर्गद—।८।४।१७।' इत्यादिना णत्वम् । '६१७। जासि-नि—२।३।५६।' इत्यादिना कर्मणि षष्ठी । तथा कथं तव धर्म इति चेदाह—राजन्यवृत्तिरिति । क्षत्रियवृत्तिः । ततो राज्ञोऽपत्यम् । '११५२। राजश्वशुराद्यत् ।४।१।१३७।' । '११५४। ये च ।६।४।१६८। इति प्रकृतिभावः । धृतं कार्मुकम् इषवश्च येन सः । यतः अहं राजन्यवृत्तिः ततोऽहं धृतकार्मुकेषुरिति । 'धृतकार्मुकेषु' इति पाठान्तरम् । क राजन्यवृत्तिः सायुधेष्वित्यर्थः ॥

६३—इत्थं-प्रवादं युधि संप्रहारं
प्रचक्रतू राम-निशा-विहारौ, ॥

---

१ १२४७ धर्मो पुण्य-यमन्याय ऽऽचार-सोमपा इति-ना० म० ।

तृणाय मत्वा रघु-नन्दनोऽथ
बाणेन रक्षः प्रधनान् निरास्थत्. ॥ ३६ ॥

इत्थमित्यादि—इत्थम् अनेन प्रकारेण प्रवादः अन्योन्याभिघातो यत्र संप्रहारे तं संप्रहारं परस्पराभिभवलक्षणं प्रकृतवन्तौ। युधि रणभूमौ। युध्यन्ते अस्यामिति। सम्पदादित्वादधिकरणे क्विप्। रामनिशाविहारौ। रामो निशाविहारो निशाचरो मारीचश्चेत्यर्थः। निशायां विहारो यस्येति समासः। अथानन्तरं रघुनन्दनो रघुवंशस्य नन्दयिता रामो मारीचं बाणेन तत्सम्बन्धित्वे सत्यपि तृणाय मत्वा तृणमिव अवमत्य—। '५८४। मन्यकर्मण्यनादरे—।२।३।१७।' इति चतुर्थी। तत्र प्रकृष्टकुत्सितग्रहणं कर्तव्यम्। इह मा भूत्। तृणं मत्वेति। प्रधनात् संग्रामात् निरास्थत् अपनीतवान्॥

६४—जग्मुः प्रसादं द्विज-मानसानि,
द्यौर् वर्षुका पुष्प-चयं बभूव,॥
निर्व्याजमिज्या ववृते. वचश् च
भूयो बभाषे मुनिना कुमारः—॥ ३७ ॥

जग्मुरित्यादि—यागविघ्नकारिषु निरस्तेषु द्विजानां मानसानि मनांस्येव मानसानि। '२१०६। प्रज्ञादि—५।४।३८।' इत्यण्। प्रसादम् अव्याकुलत्वं जग्मुः गतानि। '२३६३। गम-६।४।९८।' इत्युपधालोपः। द्यौः पुष्पचयं वर्षुका वर्षणशीला बभूव भवति स्म। '३१३४। लष-पत-पद—३।२।१५४।' इत्यादिना उकञ्। '६२७। न लोका—२।३।६९।' इति षष्ठीप्रतिषेधः। निर्व्याजं निर्विघ्नम्। इज्या यागः। '३२७५। व्रज-यजोर्भावे—३।३।९८।' इति क्यप्। ववृते। वृतः लिट्। भूयः पुनरपि मुनिना गाधेयेन। कुमारः। अकृतदारकर्मत्वात्। वचो वक्ष्यमाणं बभाषे। कर्मणि लिट्। ब्रुवीत्यर्थग्रहणात् द्विकर्मकता वचः कुमारश्च॥

६५—महीयमाना भवताऽतिमात्रं
सुराऽध्वरे घस्मर-जित्वरेण॥
दिवोऽपि वज्राऽऽयुध-भूषणाया
हिणीयते वीर-वती न भूमिः. ॥ ३८ ॥

१—'८६९। युद्धमायोधनं जन्यं प्रधनं प्रविदारणम्॥ मृधमास्कन्दनं संख्यं समीकं साम्परायिकम्॥ इति ना० अ०। २—'१२३६। दन्तविप्राऽण्डजा द्विजाः।' ३ १०६५ मक्षको घस्मरो ऽघर ४ ८४२ जेता जिष्णुश्च च जित्वरः।' इति सर्वत्र ना० अ०

महीत्यादि—भवता भूमिः पृथिवी महीय्यमाना पूज्यमाना । अतिमात्रं सुष्ठु सम्यक् पालनाद्दिवोऽपि स्वर्गस्य न हिणीयते न लज्जते किंतु प्रतिस्पर्धत इति भावः । '२१३८। हृणी महीङ्' इति कण्ड्वादिपाठाद्यक् । ङित्वात्तङ् । अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवतीति महीयशब्दात्कर्मणि लकारः । शानच् । यक् । अतो लोपः । मुक् । महीय्यमानेति रूपम् । सुराध्वरे सुरानुद्दिश्य योऽध्वरो यज्ञः क्रियते तत्र । ये घस्मराः अदनशीला राक्षसाः । '३१४०। सृघस्यदः क्मरच् ३।२।१६०।' तेषां जित्वरेण जयशीलेन भवता । '३१४३ इण् नश्-जि—३।२।१६३।' इत्यादिना क्वरप् । वज्रायुधभूषणायाः शक्र एवालङ्कारो यस्याः दिवः । वीरवती त्वद्विधो वीरो यस्यां भूमाविति ॥

संक्षेपेण स्तुतिमाह—

६६—बलिर् बबन्धे, जलधिर् ममन्थे,
जह्रेऽमृतं, दैत्य-कुलं विजिग्ये, ॥
कल्पाऽन्त-दुःस्था वसुधा तथोहे
येनैष भारोऽति-गुरुर् न तस्य. ॥ ३९ ॥

बलिरित्यादि—येन भवता बलिर्बबन्धे बद्धः । जलधिर्ममन्थे मथितः । मन्दरं दोर्भिर्गृहीत्वा । '४३। मन्थ विलोडने ।' इत्यस्य रूपम् । संयोगान्तत्वाल्लिटोऽकित्वे अनुनासिकलोपो न भवति । जह्रेऽमृतम् । स्त्रीरूपधारिणा । दैत्यकुलं विजिग्ये विजितमनेकधा । '२३३१। सन्-लिटोर्जेः ७।३।५७।' इति कुत्वम् । '२७२। एरनेकाचः ६।४।८२।' इति यणादेशः । तथा कल्पान्ते प्रलये दुःस्था दुःस्थिता वसुधा पृथिवी । ऊहे उद्धृता । वराहरूपिणा । वहेर्यजादित्वात् संप्रसारणम् । तस्य भवत एष भारो मुनिजनरक्षणम् अतिगुरुर्न भवति । सर्वत्र कर्मणि लिट् ॥

६७—इति ब्रुवाणो मधुरं हितं च
तमाञ्जिहन् मैथिल-यज्ञ-भूमिम् ॥
रामं मुनिः प्रीत-मना मखाऽन्ते
यशांसि राज्ञां निजिघृक्षयिष्यन्. ॥ ४० ॥

इतीत्यादि—इति यथोक्तप्रकारेण मधुरं श्रोत्रसुखं हितं च ब्रुवाणः अभिदधानः । '३१०३। लक्षण-हेत्वोः-३।२।१२६।' इति शानच् । मुनिः प्रीतमनाः मखान्ते यज्ञावसाने तं रामं मैथिलस्य यज्ञभूमिं आञ्जिहत् गमितवान् मिथिलानां राजेति । '११८६। जनपदशब्दात् क्षत्रियादञ् ४।१।१६८।' इत्यत्र तस्य राजन्यपत्यवदित्यतिदेशादञ् । '६७८ अहिँ गतौ ।' । '२२६२। इदितो नुम्—७।१।५८।' प्रयोजकव्यापारे णिच् । लुङ् आट् चङि णिलोपः । '२२४३। द्विर्वचनेऽचि । १।१।५९' इति स्थानिवद्भावात् '२१७६। [illegible] ६।१।२।' इति हिश

त्दस्य द्विर्वचनम् । '२४४३। न न्द्राः—६।१।३।' इति नकारस्य प्रतिषेधः । अभ्यासकार्यम् । आञ्जिहदिति रूपम् । राज्ञां यशांसि निजिघृक्षयिष्यन् निग्रहीतुमभिभवितुमेषयिष्यन् । ग्रहेः सन् । '२६१०। सनि ग्रह-गुहोश्च । ७।२।१२।' इति इट्प्रतिषेधः । द्विर्वचनादि । '१६०९। रुद्-विद—।१।२।८।' इत्यादिना सनः कित्त्वम् । '२४१२। ग्रहि-ज्या—।६।१।१६।' इत्यादिना संप्रसारणम् । ढत्वभष्भावौ । गकारस्य घकारः । कत्वषत्वे । पश्चाण्णिच् । तदन्ताद्भविष्यत्सामान्यविवक्षायां लृट् । तेन भविष्यदनद्यतने लुट् न भवति ॥

> ६८—एतौ स्म मित्रा-वरुणौ किमेतौ,
> किमश्विनौ सोम-रसं पिपासू, ॥
> जनं समस्तं जनका ऽऽश्रम-स्थं
> रूपेण तावौजिहतां नृ-सिंहौ. ॥ ४१ ॥

एताविस्यादि—एतौ तत्रागतौ नृसिंहौ नरौ सिंहाविव । जनकाश्रमस्थं जनं रूपेण स्वरूपतया औजिहतां वितर्कं कारितवन्तौ । सिंहाविव । '६९५। ऊहँ वितर्के ।' इत्यस्माद्धातोः ण्यन्तात् कर्तुः क्रियाफलाविवक्षायां '२५६४। णिचश्च ।१।३।७४।' इति तङ् न भवति । चङि णिलोपस्य स्थानिवद्भावात् । '२१७६। अजादेर्द्वितीयस्य ।६।१।२।' इति द्विर्वचनम् । ऊहमाह—मित्रावरुणौ आदित्यवरुणौ । '९२२। देवता-द्वन्द्वे च ।६।३।२६।' इत्यानङ् । तयोर्महानुभावत्वात् । सोमरसं पिपासू पातुमिच्छू । '६२७। न लोका-।२।३।६९।' इति षष्ठीप्रतिषेधः । एतावागतौ । आङ्पूर्वस्येणो निष्ठायां रूपम् । किमश्विनौ अश्विनीकुमारौ सोमरसं पिपासू एताविति । एवं जनम् औजिहताम् । सुशब्दपाठे एतौ सुमित्रेति पाठः । एतौ स्म मित्रेति स्मशब्दो निपातः पादपूरणार्थः ॥

> ६९—अजिग्रहत् तं जनको धनुस् तद्
> 'येना ऽर्दिदद् दैत्य-पुरं पिनाकी', ॥
> जिज्ञासमानो बलमस्य बाह्वोर्.
> हसन्नभाङ्क्षीद् रघु-नन्दनस् तत्. ॥ ४२ ॥

अजिग्रहदित्यादि—येन धनुषा दैत्यपुरं पिनाकी महादेव आर्दिदत् हिंसितवान् । अर्देः स्वार्थिकण्यन्तात् चङि । '२१७६। अजादेर्द्वितीयस्य ।७।१।२।' इति दिशब्दो द्विरुच्यते । रेफस्य प्रतिषेधः।तद्धनुः तं रामं जनकः अजिग्रहत् योधितवान्।

१—नृ-सिंहावित्युपमान-पूर्वपदः कर्मधारय-समासस्तत्रोदाहरणं समास-कुसुमावल्याम् '—रामोऽयं पुरुष-व्याघ्रः संवृतः कपि-कुञ्जरैः ॥ हनिष्यति बलाद् युद्धे रावण-राक्षस-र्षभम् १७ ' स्युरुत्तरपदे व्याघ्र-पुङ्गव र्षभ-कुञ्जरा ॥ १२०५ ऽस्था पुंसि श्रेष्ठाऽर्थगोचरा इति ना० अ०

अनेन धनुषा त्रिपुरं दग्धमिति । अर्हेर्हेतुमण्ण्यन्ताल्लुङि णिलोपः । '२३१४। णौचङ्—।७।४।१।' इति ह्रस्वः । सन्वद्भावादित्वम् । अर्हेश्च बुद्ध्यर्थत्वात् । '५४०। गतिबुद्धि—।१।४।५२।' इत्यादिना रामस्य कर्मसंज्ञा । अस्य रामस्य बाह्वोर्भुजयोर्बलं जिज्ञासमानो जनकः ॥ एवंभूतं धनुः हसन् स्मयमानो रघुनन्दनो रामः अभाङ्क्षीत् भग्नवान् । भञ्जेर्लुङि सिचि हलन्तलक्षणा वृद्धिः । तत्र हि हल्ग्रहणं समुदायप्रतिपत्त्यर्थमित्युक्तम् ॥

७०—ततो नदी-ष्णान् पथिकान् गिरि-ज्ञा-
नाह्वायकान् भूमि-पतेरयोध्याम् ॥
दित्सुः सुतां योध-हरैस् तुरङ्गैर्
व्यसर्जयन् मैथिल-मर्त्य-मुख्यः. ॥ ४३ ॥

तत इत्यादि—धनुर्भङ्गादनन्तरं महानयमिति ज्ञात्वा जनकः सुतां दुहितरं दित्सुः दातुमिच्छुः । ददातेः । '२६२३। सनि मी-मा—।७।४।५४।' इत्यादिना अच इस् । द्विर्वचनम् । '२६२०। अत्र लोप—।७।४।५८।' इत्यभ्यासलोपः । '२३२७। सः सि—७।४।७९।' इति तत्वम् । '३१४८। सनाशंस भिक्ष उः । ३।२। १६८।' भूमिपतेर्दशरथस्य आह्वायकान् आह्वयन्ति आकारयन्तीति कर्तरि ण्वुल् । '२७६१। आतो युक्—।७।३।३३।' कृद्योगे भूमिपतेः कर्मणि षष्ठी । तान् अयोध्यां व्यसर्जयत् विसर्जितवान् । विपूर्वस्य सृजेर्हेतुमण्ण्यन्तस्य लङि रूपम् । गत्यर्थत्वात् द्विकर्मकता । नद्यां स्नान्तीति नदीष्णाः । '२९१६। सुपि स्थः।३।२। ४।' योगविभागात्कः । '२३७२। आतो लोपः—।६।४।६४।' । '३०८२। नि-नदीभ्यां स्नातेः—।८।३।८९।' इति षत्वम् । नदीं तरीतुं कुशलानित्यर्थः । पथिकान् पथि कुशलान् । '१८६३। तत्र कुशलः पथः ।५।२।६३।' इति ठक् । गिरिज्ञान्। यथाप्रदेशं गिरिज्ञान् । '२८९७। इगुपध—।३।१।१३५।' इत्यादिना कः । तुरङ्गैः अश्वैः करणभूतैः । युध्यन्त इति योधाः । पचाद्यच् । तानाहर्तुं क्षमैः । '२९२४। वयसि च ।३।२।१०।' इत्यच् । 'हसिमृग्रिण्वामिदमिलूपूधुर्विभ्यस्तन्' इत्यौणादिकस्तन् । म्रियन्ते प्राणिनोऽस्मिन्निति मर्त्तो भूर्लोकः । तत्र भवा मर्त्या मनुष्याः । दिगादेराकृतिगणत्वात् यत् । आकृतिगणत्वस्य लिङ्गं देवमनुष्यपुरुषपुरुमर्त्येभ्य इति निर्देशः। मुखमेव मुख्यः प्रधानम् । '२०५८। शाखादिभ्यो यत्।५।३।१०३।'। मर्त्यानां मुख्यो मर्त्यमुख्यः । मैथिलश्चासौ मर्त्यमुख्यश्चेति विशेषणसमासः । जनक इत्यर्थः ॥

७१—क्षिप्रं ततोऽध्वन्य-तुरङ्ग-यायी
यविष्ठ-वद् वृद्ध-तमोऽपि राजा ॥
आख्यायकेभ्यः श्रुत-सूनु-वृत्ति-
र-ग्लान-यानो मिथिलामगच्छत्. ॥ ४४ ॥

क्षिप्रमित्यादि—आख्यान्ति कथयन्ति ये ते आख्यायकास्तेभ्यः श्रुता सूनुवृत्तिर्येन न स राजा दशरथः। सूयत इति सूनुः पुत्रः। 'दाभाभ्यां नुः' इति वर्तमाने 'सुवः किच्च' इत्यौणादिको नुप्रत्ययः। ततोऽनन्तरमेव क्षिप्रं शीघ्रम्। 'स्फायि तञ्चि–' इत्यादिना रक्। क्रियाविशेषणं चैतत्। मिथिलामगच्छत्। भरतशत्रुघ्नाभ्यां सहेत्यर्थादवुपलक्ष्यम्। गमेर्लङि '२४००। इषु-गमि यमां छः ।७।३।७७।' अध्वानम् अलंगामिनो ये तुरङ्गा अश्वाः ते अध्वन्याः। अलंगामीत्यस्मिन्नर्थे '१८१७। अध्वनो यत्-खौ ।५।२।१६।' इति यत्। '११५४। ये चाभाव-कर्मणोः ।६।४।१६८।' इति प्रकृतिभावः। तैः साधु यातीति साधुकारिणी णिनिः। अध्वन्यतुरङ्गयायी। एवं च कृत्वा अग्लानयानः न विद्यते ग्लानं ग्लानिर्यस्मि-न्याने तत् अग्लानं। अग्लानं यानं यस्य। तादृशैस्तुरङ्गैः सुखयानः। ग्लानेति भावे निष्ठा। '३०१७। संयोगादेरातः—।८।२।४३।' इति नत्वम्। वृद्धतमोऽपि यविष्ठवत्। युवशब्दस्येष्ठनि '२०१५। स्थूल-दूर–।६।४।१५६।' इत्यादिना यणादि-परलोपः पूर्वस्य च गुणः। पश्चात् '१७७८। तेन तुल्यम्–।५।१।११५।' इति वतिः॥

७२—वृन्दिष्ठमार्चीद् वसुधाऽधिपानां
तं प्रेष्ठमेतं गुरु-वद् गरिष्ठम्॥
सदृङ्-महान्तं सुकृताऽधिवासं
बंहिष्ठ-कीर्तिं यशसा वरिष्ठम्॥ ४५॥

वृन्दिष्ठमित्यादि—तं राजानमेतमायान्तं जनक आर्चीत् पूजितवान्। अर्चे-र्लुङि रूपम्। वृन्दिष्ठं वृन्दारकतमम्। प्रशस्ततममित्यर्थः। केषां वसुधाधिपानां पृथ्वीपतीनाम्। प्रेष्ठं प्रियतमम्। गुरुवत् गुरुणा तुल्यं वर्तमानं गरिष्ठम् गुरुतम-म्। सदृक् समानान्ययोश्चेत्युपसंख्यानाद् दृशेः क्विप्। रूढिशब्दश्चायम्। नात्र दर्शनक्रिया विद्यते। अभिजनादिभिस्तुल्यो जनक इत्यर्थः। महान्तं महानुभावं सदृशां मध्ये महान्तम्। सुकृताधिवासं सुकृतनिलयम्। अधिवसत्यस्मिन्निति अधिकरणे घञ्। बंहिष्ठा बहुलतमा कीर्तिर्यस्य स बंहिष्ठ-कीर्तिः। यशसा वरिष्ठं गुरुतमम्। अत्र वृन्दारकप्रियगुरुबहुलोरूणामिष्ठनि यथासंख्यं '२०१६। प्रियस्थिर–।६।४।१५७।' इत्यादिना वृन्दप्रगर्बंहवर इत्येते आदेशा भवन्ति॥

७३—त्रि-वर्ग-पारीणमसौ भवन्त-
मध्यासयन्नासनमेकमिन्द्रः॥

१—'११५७। क्षेपिष्ठ-क्षोदिष्ठ-प्रेष्ठ-वरिष्ठ-स्थविष्ठ-बंहिष्ठाः॥ क्षिप्र-क्षुद्राऽभीप्सित-पृथु-पीवर-बहुल-प्रकर्षाऽर्थाः॥११५८। साधिष्ठ-द्राघिष्ठ-स्फेष्ठ-गरिष्ठ-ह्रसिष्ठ-वृन्दिष्ठाः। बाढ-व्यायत-बहु-गुरु वामन इति ना० अ० २ त्रिवर्गो धर्मकामार्थैश्, चतुर्वर्ग स मोक्ष-कै ७६६ स-बलैस् तैश्च।'

विवेक-दृश्वन्त्वमगात् सुराणां,
तं मैथिलो वाक्यमिदं बभाषे. ॥ ४६ ॥

त्रिवर्गेत्यादि—तं दशरथं मैथिलो जनकः वाक्यमिदं बभाषे। ब्रवीत्यर्थग्रहणान् द्विकर्मकता। किं तद्वाक्यमित्याह—असाविन्द्रो भवन्तम् एकासनमध्यासयन् आरोपयन् विवेकदृश्वत्वमगादिति संबन्धः। आसनस्य '५४२। अधिशीङ्-।१।४।४६।' इत्यादिना अधिकरणे कर्मसंज्ञा। भवन्तमिति '५४०। गति–बुद्धि–।१।४।५२' इत्यादिना अस्तेरण्यन्तावस्थायामकर्मकत्वात्। पारंगामीत्यस्मिन्नर्थे '१८१२। अवार-पार–।५।२।११।'इत्यादिना पारशब्दात् खः। तत्र विगृहीतविपर्यस्तग्रहणात्। त्रिवर्गस्य धर्मार्थकामस्य पारीणमिति षष्ठीसमासः। त्रिवर्गपारीणं भवन्तम्। सुराणां मध्ये स एवैको विवेकदृश्वत्वं विवेकज्ञतामगात्। '२४५८। इणो गा लुङि।२।४।४५।'। '२२२३। गाति-स्था–।२।४।७७।' इत्यादिना सिचो लुक्। विवेकं दृष्टवानिति दृशेः क्वनिप्॥

७४–हिरण्मयी साल-लतेव जङ्गमा
च्युता दिवः स्थास्नुरिवाऽचिर-प्रभा॥
शशाङ्क-कान्तेरधिदेवताऽऽकृतिः
सुता ददे तस्य सुताय मैथिली. ॥ ४७ ॥

हिरण्मयीत्यादि—तस्य दशरथस्य सुताय रामाय। सूयत इति सुतः। '१००७। षु प्रसवैश्वर्ययोः' इत्यस्मात् कर्मणि निष्ठा। सुता मैथिली सीता ददे जनकेनेत्यर्थात्। कर्मणि लिट्। मैथिलस्यापत्यं '१०९५। अत इञ्।४।१।९५।' तदन्तान् '५२०। इतो मनुष्य-जातेः।४।१।६५।' इति ङीप्। रामस्य ज्येष्ठत्वात्तस्यैव कविना परिणय उक्तः न शेषाणाम्। तेन अन्या अपि तदैव दुहितरो दत्ताः। हिरण्मयी सुवर्णनिर्मितेव साललता वृक्षलता। सुवर्णच्छवित्वात् तस्याः। हिरण्यविकार इति मयटि'११४५। दाण्डिनायन–।६।४।१७४।'इत्यादिना यलोपनिपातनम्। जंगमा संचारिणी नतु स्थावरा। अत्यर्थं गच्छतीति यङि'२६४३।नुगतः–।७।४।८५।' इति नुक्। यङन्तात्पचाद्यचि '२६५०। यङोऽचि च।२।४।७४।' इति यङो लुक्। च्युता दिवः आकाशात्पतिता। अचिरप्रभेव विद्युदिव तेजस्वित्वात् तन्वीत्वाच। किन्तु स्थास्नुरचञ्चला। सा तु चञ्चलेति व्यतिरेकः। '५२१। ऊङुतः।४।१।६६।' इति ऊङ् न भवति क्रियाशब्दत्वात्। तत्र मनुष्यजातेरिति वर्तते। शशाङ्ककान्तेर्याधिदेवता अधिष्ठात्री देवता तस्या आकृतिर्यस्याः।सौम्यत्वात्। आक्रियते अनयेत्याकृतिः संस्थानम्। '३१८८। अकर्तरि च कारके–।३।३।१९।' इति स्त्रियां क्तिन्॥

१—'आत्मजस् तनयः सूनुः सुतः पुत्रस्, स्त्रियां त्वमी ॥५९१। आहुर् दुहितरं सर्वे ऽपत्यं तोकं तयोः समे' इति सर्वत्र ना० अ०

७५—लब्ध्वा ततो विश्वजनीन-वृत्तिस्-
तामात्मनीनामुदवोढ रामः ॥
सद्-रत्न-मुक्ता-फल-भर्म-शोभां
संवंहयन्तीं रघु-वर्ग्य-लक्ष्मीम्. ॥ ४८ ॥

लब्ध्वामित्यादि—ततो दानानन्तरम् लब्धां तामात्मनीनाम् आत्मने हिताम्।'१६७०। आत्मन्विश्व–।५।१।९।' इति खः। रामः उदवोढ । वहेः स्वरितेत्त्वात्कर्तुः क्रियाफलविवक्षया तङ्। विश्वजनीना विश्वजनाय हिता वृत्तिः प्रवृत्तिर्यस्य रामस्य सः पूर्ववत् खः। सती उत्कृष्टा रत्नादिशोभा यस्याः। तैरलंकृतत्वात्। तां सद्रत्नमुक्ताफलभर्मशोभाम् । भर्म स्वर्णम्। सर्वधातुभ्यो मनिन्। 'भर्मभूषाम्' इति पाठान्तरम्। सद्रत्नादिभूषा अलंकारो यस्या इति योज्यम्। '३२८०। गुरोश्च हलः ।३।३।१०३।' इत्यकारः। संवंहयन्तीं संबहुलामतिस्थिरां कुर्वाणाम्। बहुलशब्दात् 'तत्करोति–' इति णिचि इष्ठवद्भावात् '२०१६। प्रिय-स्थिर–।६।४।१५७।' इत्यादिना बंहादेशः। पश्चात्तदन्तस्य संपूर्वस्य साधनेन योगः। कामित्याह—रघुवर्ग्यलक्ष्मीमिति। रघुवर्गे भवां विभूतिम्। '१४४२। वर्गान्ताच्च ।४।३।६३।' इत्यनुवृत्तौ '१४४३। अशब्दे यत्खावन्यतरस्याम् ।४।३।६४।' इति यत् ॥

७६—सु-प्रातमासादित-संमदं तद्
वन्दारुभिः संस्तुतमभ्ययोध्यम् ॥
अश्वीय-राजन्यक-हास्तिकाऽऽढ्य-
मगात् स-राजं बलमध्वनीनम्. ॥ ४९ ॥

सुप्रातेति—विवाहं निर्वर्त्य प्रभाते अयोध्याभिमुखं तद्बलं दशरथस्यागात् गतवत्। सुप्रातं निरुपद्रवत्वात्। शोभनं प्रातर्दिनमुखं यस्य बलस्य। '८६०। सुप्रात-सुश्व-।५।४।१२०।' इत्यादिना समासान्तष्टिलोपश्च निपात्यते। आसादितसंमदं प्राप्तहर्षम्। '३२४५। प्रमद-संमदौ हर्षे।३।३।६८।' इति निपातनम्। वन्दारुभिः संस्तुतं कृतस्तवम्। अभ्ययोध्यम् अयोध्याभिमुखम् । '६६८। लक्षणेनाऽभि-प्रती आभिमुख्ये ।२।१।१४' इति अव्ययीभावः। अश्वानां समूहो अश्वीयम्। '१२५७। केशाश्वाभ्यां यञ्छौ–।४।२।४८।' इति छः। राजन्यानां क्षत्रियाणां समू-

१—'९८०। स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम्। तपनीयं शातकुम्भं गाङ्गेयं **भर्म** कर्बुरम् ॥' इति ना० अ०।२—'मुत्प्रीतिः **प्रमदो** हर्षः प्रमोदाऽऽमोद-**संमदाः**॥ १४७। स्यादानन्दथुरानन्दः शर्म-शात-सुखानि च. ।' ३—'८१३। वृन्दे त्व**श्वीय**माश्ववत्. ॥' ४—'७६९। अथ राजकम्। **राजन्यकं** च नृपति-क्षत्रियाणां गणे क्रमात् ॥' ५ ८०७ **हास्तिक** गजता वृन्दे ९ ७८२ ऽध्वन्य पान्थ पथिक इत्यपि

हो राजन्यकम् । '१२४६। गोत्रोक्ष—।४।२।३९।' इत्यादिना वुञ् । 'प्रकृत्याके राजन्यमनुष्ययुवानः' इति प्रकृतिभावादपत्ययकारलोपो न भवति । हस्तिनां समूहो हास्तिकम् । '१२५६। अचित्त-हस्ति—।४।२।४७।' इति ठक् । एषां सेनाङ्गत्वात् द्वन्द्व एकवद्भावः । तेनाढ्यमुपचितमिति तृतीयेति योगविभागात् समासः। सह राज्ञेति विगृह्य साकल्यवचने यौगपद्ये वाव्ययीभावः। '६६०। अव्ययीभावे चाकाले—।६।३।८१।' इति स-भावः। '६७८। अनश्च—।५।४।१०८।' इति टच् समासान्तः । अध्वनीनमध्वानमलंगामीति '१८१७। अध्वनो यत्-खौ ।५।२।१६।' । '१६७१। आत्माध्वानौ खे ।६।४।१६९।' इति प्रकृतिभावः ॥

७७—विशङ्कटो वक्षसि बाण-पाणिः
संपन्न-ताल-द्वयसः पुरस्तात् ॥
भीष्मो धनुष्मानुपजान्वरत्निः-
रैति स्म रामः पथि जामदग्न्यः ॥ ५० ॥

विशङ्कटेत्यादि—एवमस्य गच्छतः पथि मार्गे । सप्तम्यां '३६८। भस्य टेर्लोपः ।७।१।८८।' पुरस्तादग्रतः । '१९७६। अस्ताति च ।५।३।४०।' इति पूर्वस्य पुरादेशः । रामो जामदग्न्यः । जमदग्नेरपत्यं रामोऽयम् । गर्गादिपाठाद्यञ् । स ऐति स्म आगतवान् । आङ्पूर्वादिणो लट् । '७३। एत्येधत्यूठ्सु ।६।१।८९।' इति वृद्धिः । विशङ्कटो वक्षसि विशाल उरसि ।'१८२९। वेः शालच्छङ्कटचौ ।५।२।२८।' इति शङ्कटच्। बाणः पाणावस्येति बाणपाणिः। 'प्रहरणार्थेभ्य' इत्यादिना सप्तम्यन्तस्य परनिपातः। संपन्नो निष्पन्नो यस्तालवृक्षः स प्रमाणं यस्य स तथोक्तः। '१८३८। प्रमाणे द्वयसच्—।५।२।३७।' भीयते अस्मादिति भीष्मः। 'भियः षुक्वा' इति औणादिको मक्प्रत्ययः। वा षुगागमश्च। '२१७३। भीमादयोऽपादाने ।३।४।७४।' इत्यपादाने साधुः । धनुष्मान् धनुषा युक्तः । संसर्गे मतुप् । जानुनोः समीपमुपजानु । सामीप्येऽव्ययीभावः । उपजानु अरत्निर्यस्य स तथोक्तः प्रलम्बबाहुरित्यर्थः ॥

७८—उच्चैरसौ राघवमाह्वतेदं
धनुः स-बाणं कुरु, माऽतियासीः ॥
पराक्रम-ज्ञः प्रिय-सन्ततिस् तं
नम्रः क्षितीन्द्रो ऽनुनिनीषुरूचे ॥ ५१ ॥

उच्चैरित्यादि—उच्चैर्महता ध्वनिना राघवं दाशरथिं एवं वक्ष्यमाणमाह्वत

१—'११०६। विशङ्कटं पृथु बृहद् विशालं पृथुलं महत्।' इति सर्वत्र ना० अ०।
२—'भूम-निन्दा-प्रशंसा-सु नित्य-योगेऽति—शायने ॥ संसर्गे ऽस्ति-विवक्षायां भवन्ति मतुबादय १ इति वै० म० ३ 'रामम्' इति वा क्वचित्पाठ

आहूतवान्। '२७०४। स्पर्धायामाङः।१।३।३१।' इत्यात्मनेपदम्। '२६९६। आत्मनेपदेष्वन्यतरस्याम्।२।४।४४।' इति च्लेरङ्। धनुः सबाणं कुरु। धनुषि बाणमारोप्य युद्धाय सज्जीभवेत्यर्थः। मातियासीः मातिक्रम्य गमनं कार्षीः। यातेर्माङि लुङ्। अडभावः। '२३७७। यम-रम-नमातां सक्।७।२।७३।' इति इट्।' '२२६६। इट ईटि—।८।२।२८।' इति सिचो लोपः। अथ क्षितीन्द्रो दशरथः तमूचे। '२४५३। ब्रुवो वचिः।२।४।५४।'। आदेशस्य स्थानिवद्भावेन कर्तुः क्रियाफलविवक्षायां तङ् न। वचेः परस्मैपदित्वात्। '२४०९। वचिस्वपि—।६।१।१५।' इत्यादिना संप्रसारणम्। पराक्रमज्ञः यतस्तस्य पराक्रमं जानाति राजा। प्रियसन्ततिः प्रिया सन्ततिर्यस्य। रामे व्यापादिते मा भूत्सन्तानविच्छेद इति नम्रः प्रणतो भूत्वा अनुनिनीषुः अनुनेतुमिच्छुः॥

तदनुनयमाह—

> ७९—अनेक-शो निर्जित-राजकस् त्वं,
> पितॄन्नताप्सीर् नृप-रक्त-तोयैः,॥
> संक्षिप्य संरम्भम्-असद्-विपक्षं,
> का ऽऽस्था ऽर्भके ऽस्मिंस्तव राम! रामे. ५२

अनेकश इत्यादि—संरम्भं क्रोधं संक्षिप्य उपसंहर। क्षिपेः लोटि मध्यमैकवचने रूपम्। श्यन्। एकमेकमिति विगृह्य। '२११०। सङ्ख्यैकवचनाच्च—।५।४।४३।' इति शस्। पश्चान्नञ्समासः। अनेकशोऽनेकप्रकारमिति क्रियाविशेषणमेतत्। निर्जितं पराजितं राजकं राज्ञां समूहो येन स निर्जितराजकः। '१२४६। गोत्रोक्ष—।४।२।३९।' इत्यादिना वुञ्। त्वं पुनः पितॄनताप्सीः प्रीणितवानसि। कैः—नृपरक्ततोयैः। '१२७१। तृप प्रीणने।' इत्यस्माल्लुङ्। सिच्। हलन्तलक्षणा वृद्धिः। असद्विपक्षम् असन्नविद्यमानो विपक्षो यस्मिन् संरम्भे। निर्जितराजकत्वात्। रामो विपक्ष इति चेदाह—कास्थाऽर्भकेऽस्मिंस्तव राम रामे। हे परशुराम अर्भके बालके रामे तव का आस्था क आदरोऽस्ति। नैवेत्यभिप्रायः॥

> ८०—अजीगणद् दाशरथं न वाक्यं
> यदा स दर्पेण, तदा कुमारः॥
> धनुर् व्यकार्षीद् गुरु-बाण-गर्भं,
> विजितांश्च तस्य. ५३

।४।३।१२०।' इत्यण् । वाक्यं वचनम् । यदा दर्पेण मदेन हेतुना स जामदग्न्यः नाजीगणत् न गणितवान् । '१९९६। गण संख्याने ।' इत्यस्मादन्तत्वान्न वृद्धिः । '२३१५। चङि ।६।१।११।' इति द्विर्वचनम् । '२५७३। ई च गणः । ।७।४।९७।' इति अभ्यासस्येकारः । तदा कुमारो रामो धनुर्व्यकार्क्षीत् आकृष्टवान् । '१०५९। कृष आकर्षणे ।' स्पृशमृशेत्यादिनोपसंख्यानेन सिचि पक्षे रूपम् । हलन्तलक्षणा वृद्धिः । '२९५। ष-ढोः कः सि ।८।२।४१।' इति कत्वम् । कृतदारकर्मापि पुत्रः पितरि जीवति कुमार इति व्यपदिश्यते । गर्भयतीति गर्भः । गुरुर्बाणो गर्भो यस्य धनुषः । लोकांश्च स्वप्रभावाद्विजितान् । तस्य परशुरामस्य । अलावीत् छिन्नवान् । लुनातेर्लुङि सिचि वृद्धौ रूपम् । समुच्छिद्यन्तामस्य लोका इति अमोघमस्त्रं मुक्तवानित्यर्थः । ततःप्रभृति तस्य सर्वं तेजोऽपहृतम् ॥

८१—जिते नृपाऽरौ, सुमनीभवन्ति
शब्दायमानान्य-शनैर-शङ्कम् ॥
वृद्धस्य राज्ञो ऽनुमते बलानि
जगाहिरे ऽनेक-मुखानि मार्गान् ॥ ५४ ॥

जित इत्यादि—जिते नृपारौ । परशुरामे बलानि सैन्यानि मार्गान् पथः । जगाहिरे अवष्टब्धवन्ति । वृद्धस्य राज्ञो दशरथस्यानुमते सति गच्छतेति । जामदग्न्यसंरम्भादसुमनांसि सुमनांसि सन्ति सुमनीभवन्ति बलानि । '२१२१। अरुर्मन—।५।४।५१।' इत्यादिना च्व्यावन्तस्य लोपे '२११८। अस्य च्वौ ।७।४।३२।' इतीत्वे रूपम् । शब्दायमानानि । अशनैः सुष्ठु शब्दं कुर्वाणानि । एवं जितस्तथा जितो नृपारिरिति । '२६७३। शब्द-वैर—।३।१।१७।' इत्यादिना क्यङ् । अशङ्कं निर्भयं जगाहिर इति क्रियाविशेषणम् । अनेकमुखानि पृथग्भूतानि पूर्वं भयेन बहुलीभूतत्वादनीकानां बहुवचनमिति ॥

८२—अथ पुरु-जव-योगान् नेदयन् दूर-संस्थं
दवयदति-रयेण प्राप्तमुर्वी-विभागम् ॥
क्रम-रहितमचेतन् नीरजीकारित-क्ष्मां,
बलमुपहित-शोभां तूर्णमायादयोध्याम् ॥५५॥

१—'प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु ॥ ११०९। पुरुहूः पुरु भूयिष्ठं स्फारं भूयश्च च भूरि च. ।' २—'ऽथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् ॥ ७३ । सत्वरं चपलं तूर्णम-विलम्बितमाशु च. ॥' ३—पद्येऽस्मिन्वृत्तं मालिनी । तल्लक्षणम्—वामभागीय षड्विंशतितमाङ्क(२६)-पद्य ——— म् ।

अथेत्यादि—अथेत्यानन्तर्ये। बलं दाशरथम्। तूर्णं शीघ्रम्। '३०६१। रुष्यमत्वर-।७।२।२८।' इत्यादिना पक्षे इडभावः। '२६५४। ज्वर-त्वर-।६।४।२०।' इति वकारोपधयोरूठ्। '३०१६। र-दाभ्याम्-।८।२।४२।' इति नत्वम्। अयोध्यामायात् आगतम्। आङ्पूर्वाद्धातेर्लङि रूपम्। पुरुर्महान् वेगो जवः तेन योगात्। पूर्यते वर्धते इति पुरुः। 'कुश्च' इत्यधिकृत्य 'पॄ-भिदि-व्यधि-' इत्यादिना कुप्रत्ययः। दूरसंस्थं दूरे सन्तिष्ठत इति कः। उर्वीविभागम्। नेदयन् अन्तिकं कुर्वन्। अन्तिकशब्दात् समीपवाचिनः तत्करोतीति णिच्। इष्ठवद्भावात् '२०१४। अन्तिक-बाढयोर्नेदसाधौ।५।३।६३।' इति नेदादेशः पश्चाल्लट्। शतरि शप् अयादेशः। प्राप्तं विषयीकृतं चोर्वीविभागं भूविभागम्। अतिरयेण अतिवेगेन। दवयत् दूरीकुर्वत् पश्चाद्भागेन। दूरशब्दात् पूर्ववण्णिचि इष्ठवद्भावे च '२५५५। स्थूल-दूर-।६।४।१५६।' इत्यादिना यणादिपरलोपः पूर्वस्य च गुणः। पश्चात्तथा एव लडादयः। क्लमरहितम् अपगतश्रमम्। अचेतत् कियद्दूरमागतोऽहमित्यबुध्यमानम्। '३९। चिती संज्ञाने।' इत्येतस्य शतरि रूपम्। अनीरजा नीरजाः कारितेति '२१२१। अरुर्मन-।५।४।५१।' इत्यादिना च्वावन्त्यलोपः। '२११८। अस्य च्वौ।७।४।३२।' इतीत्वम्। नीरजीकारिता क्ष्मा भूमिर्यस्यामयोध्यायां ताम्। सिक्तसंमृष्टभूतलामित्यर्थः। उपहितशोभाम् छत्रध्वजपताकाभिरारोपितशोभाम्॥

इति श्री-जयमङ्गलाऽऽख्यया व्याख्यया समलंकृते श्री-भट्टिकाव्ये-
प्रथमे प्रकीर्ण-काण्डे लक्षण-रूपे द्वितीयः परिच्छेदः (वर्गः),
तथा लक्ष्य-रूपे कथानके श्री-सीता-परिणयो नाम द्वितीयः
सर्गः पर्यवसितः।

तृतीयः सर्गः—

८३—वधेन संख्ये पिशिताऽशनानां
क्षत्राऽन्तकस्याऽभिभवेन चैव॥
आढ्यंभविष्णुर् यशसा कुमारः
प्रियंभविष्णुर् न स यस्य नाऽऽसीत्॥ १॥

वधेनेत्यादि—संख्ये संग्रामे पिशिताशनानां राक्षसानाम्। पिशितं मांसम् अशनं येषामिति। तेषां वधेन हननेन। '३२५३। हनश्च वधः।३।३।७६।' इति अप् प्रत्यये वधादेशः। कृद्योगे कर्मणि षष्ठी। क्षत्रान्तकस्य परशुरामस्य। अभिभवेन पराजयेन च '३२३२। ऋदोरप्।३।३।५७।' चैवशब्दो निपातसमुदायः समुच्चये। तेन हेतुभूतेन। यशसा आढ्यंभविष्णुः। अनाढ्य आढ्यो भूतः। '२९७४। कर्तरि भुवः-।३।२।५७।' इति खिष्णुच्। '२९४२। अरुर्द्विषद्-।६।

३।६७।' इति खुम्। कुमारो यस्य स प्रियंभविष्णुः। यस्यापि प्राक् प्रियो न जातः पश्चादपि तथैव न प्रियो भूतः स नासीत् न बभूव ॥

८४—ततः सुचेतीकृत-पौर-भृत्यो
'राज्ये ऽभिषेक्ष्ये सुतमित्य-नीचैः ॥
आघोषयन् भूमि-पतिः समस्तं
भूयोऽपि लोकं सुमनीचकार. ॥ २ ॥

तत इत्यादि—ततः प्रियंभविष्णुताया अनन्तरं भूमिपतिर्दशरथो लोकं सुमनीचकार। किमयं सम्यक् पालयिष्यति न वेति असुचेतसः पौरा भृत्याश्च जाताः ते सम्यक्पालनात् सुचेतसः कृता येन स सुचेतीकृतपौरभृत्यः। भूयोऽपि पुनरपि लोकं समस्तं सुमनीचकार। कथमित्याह—राज्ये राजकर्मणि पालनलक्षणे सुतं रामं अभिषेक्ष्ये तदभिषेकं करिष्यामीति। सिचेरुभयपदित्वा-त्तङ्। अनीचैर्महता ध्वनिना। आघोषयन् घोषणां कारयन्। सुचेतीसुमनीश-ब्दौ '२१२१। अरुर्मन–।५।४।५१।' इत्यादिना साधू ॥

८५—आदिक्षदादीप्त-कृशानु-कल्पं
सिंहासनं तस्य स-पाद-पीठम् ॥
सन्तप्त-चामीकर-वल्गु-वज्रं
विभाग-विन्यस्त-महार्घ-रत्नम्. ॥ ३ ॥

आदिक्षदित्यादि—तस्य रामस्य सिंहासनमादिक्षत् आदिष्टवान् एवंविधं कारयेति। दिशेः स्वरितेतो लुङि '२३३६। शल इगुपधात्–।३।१।४५।' इत्यादि-ना च्लेः क्सः। अकर्तृगामिक्रियाफलत्वात्तिप्। आदीप्तकृशानुकल्पं ज्वलिताग्नि-तुल्यम्। तस्य कारणमाह—सन्तप्तचामीकरवर्णानि उत्तप्तसुवर्णवर्णानि वज्राणि यस्मिन्। तथा विभागेषु विन्यस्तानि अतिमहार्घाणि रत्नानि पद्मरागादीनि यत्र। सपादपीठं सह पादपीठेन ॥

८६—प्रास्थापयत् पूग-कृतान् स्व-पोषं
पुष्टान् प्रयत्नाद् दृढ-गात्र-बन्धान् ॥
स-भर्म-कुम्भान् पुरुषान् समन्तात्
पत्काषिणस् तीर्थ-जलाऽर्थमाशु. ॥ ४ ॥

प्रास्थेत्यादि—तीर्थजलार्थं पुरुषान् प्रयत्नात् आदरेण। समन्तात् सर्वासु दिक्षु। आशु शीघ्रं प्रास्थापयत् प्राहिणोत्। प्रपूर्वस्तिष्ठतिर्गमने वर्तते तस्य हेतुम-ण्ण्यन्तस्य लङि रूपम्। पूगकृतान् अपूगाः पूगाः कृता इति। 'श्रेण्यादिषु च्व्यर्थ-

१ टीकनं (टिप्पणं) नोत्सहे कर्तुं प्रवासे नायकस्य मे ॥

वचनम्' इति समासः। सङ्गीकृतानित्यर्थः। स्वपोषंपुष्टान्। '३३६१। स्वे पुषः ।३।४।४०' इति णमुल्। '७८३। अमैवाव्ययेन ।२।२।२०' इति समासः यथाविध्यनुप्रयोगश्च। दृढो गात्रबन्धो येषां तान्। संयतकायान्। महाभारो द्वहनक्षमत्वात् सभर्मकुम्भान् ससुवर्णकलशान्। पत्काषिणः। पादौ कषितुं हिंसितुं शीलं येषामिति। '२९८८। सुप्यजातौ णिनिः–। ३।२।७८' । '९९२। हिमकाषिहतिषु च ।६।३।५४।' इति पदादेशः। पदातीनित्यर्थः। आश्विति 'कृवापाजि–' इत्यादिना उण्॥

८७—उक्षान् प्रचक्रुर् नगरस्य मार्गान्,
ध्वजान् बबन्धुर्, मुमुचुः ख-धूपान्, ॥
दिशश्च पुष्पैश्चकरुर् विचित्रै-
रर्थेषु राज्ञा निपुणा नियुक्ताः॥ ५ ॥

उक्षानित्यादि—ये निपुणा अर्थेषु कार्येषु राज्ञा दशरथेन नियुक्ताः अधिकृतास्ते नगरस्य मार्गान् पथः। उक्षान् सेकवतः प्रचक्रुः। उक्षणमुक्षा ।'३२८०। गुरोश्च हलः ।३।३।१०३।' इत्यकारः। सा विद्यते येषामिति '१९३३। अर्शआदिभ्योऽच् ।५।१।१२७।' '२२३७। इजादेश्च गुरुमतः–।३।१।३६।' इत्यादिना आम्प्रत्यये प्रचक्रुरित्यनुप्रयोगो न घटते। '२२३९। कृञ्चानुप्रयुज्यते ।३।१।४०' इत्यनुशब्दस्य व्यवहितनिवृत्त्यर्थत्वात्। ध्वजान् बबन्धुः उच्छ्रायितवन्तः। मुमुचुः खधूपान् आकाशे घटिकादिभिर्धूपान्मुमुचुः प्रमुक्तवन्तः। दिशश्च पुष्पैश्चकरुः छादितवन्तः। '१५०३। कॄ विक्षेपे।' इत्यस्य लिटि '२३८३। ऋच्छत्यॄताम् ।७।४।११।' इति गुणः। विचित्रैः नानाप्रकारैः॥

८८—मातामहाऽऽवासमुपेयिवांसं
मोहाद्-पृष्ट्वा भरतं तदानीम् ॥
तत् केकयी सोढुम-शक्नुवाना
ववार रामस्य वन-प्रयाणम्. ॥ ६ ॥

मातेत्यादि—तत्पूर्वोक्तमभिषेकसंविधानं सोढुमशक्नुवाना असहमाना केकयी रामस्य वनप्रयाणं ववार प्रार्थितवती राज्ञ इत्यर्थात्। सहेः शक्नोतावुपपदे '३१७७। शक-धृष–।३।४।६५।' इत्यादिना तुमुन्। तत्र नञा शक्त्यर्थस्य प्रतिषेधेऽपि न दोषः प्रतिषेधस्य बहिरङ्गत्वात्। शक्नोतेः परस्मैपदित्वात् शानज् नास्ति। '३१०९। ताच्छील्यवयोवचन–।३।२।१२९।' इत्यादिना चानश्। स्वादित्वाच्छ्नुः। '२७१। अचि श्नु-धातु–।६।४।७७।' इत्यादिना उवङ्। किं कृत्वेत्याह तदानीं देश किमेव क्रियते न वेति न भरत पृष्टवती दर्शयन्नाह वासमिति

मातुः पिता मातामहः । '१२४२। पितृव्य-मातुल-।४।२।३६।' इत्यादिना निपातनात् डामहच् । आवासः निलयम् । आवसत्यस्मिन्निति अधिकरणे घञ् । उपेयिवांसम् । '३०९८। उपेयिवाननाश्वाननूचानश्च ।३।२।१०९।' इत्यादिना निपातितः । मोहादज्ञानात् । दूतप्रेषणेनापृष्ट्वा । रामस्येति कर्तरि षष्ठी । वनाय प्रयाणं गमनमिति । चतुर्थीति योगविभागात् समासः । '५८५। गत्यर्थकर्मणि-।२।३।१२।' इत्यादिना चतुर्थी । परत्वात्कृल्लक्षणया षष्ठ्या भवितव्यमिति चेत् न । पुनर्द्वितीयाग्रहणात्परामपि षष्ठीं बाधित्वा द्वितीयैव यथा स्यादिति । यद्येवं द्वितीयैव स्यात् न चतुर्थी । नैष दोषः । द्वितीयाग्रहणस्योपलक्षणार्थत्वात् । तथा च वृत्तावुभयमुक्तं—ग्रामं गन्ता ग्रामाय गन्तेति ॥

८९—कर्ण-जपैराहित-राज्य-लोभा
स्त्रैणेन नीता विकृतिं लघिम्ना ॥
राम-प्रवासे व्यमृशन् न दोषं
जनाऽपवादं स-नरेन्द्र-मृत्युम्. ॥ ७ ॥

कर्ण इत्यादि—कर्णे जपन्ति कर्णेजपाः सूचकाः मन्थरादयः । '२९२७। स्तम्ब-कर्णयोः-।३।२।१३।' इत्यच् । '९७२। तत्पुरुषे कृति बहुलम् ।६।३।१४।' इति सप्तम्या अलुक् । तैराहितः आनायितो राज्यलोभो यस्याः सैवम् । स्त्रैणेन स्त्रिया अयम् । '१०७९। स्त्री-पुंसाभ्यां नञ्-स्नञौ-।४।१।८७।' इति नञ् । लघोर्भावो लघिमा । '१७८४। पृथ्वादि-।५।१।१२२।' इत्यादिना इमनिच् । टिलोपः । तेन विकृतिमन्यथात्वं नीता केकयी रामप्रवासे सति दोषं न व्यमृशत् नालोचितवती । '१५१९। मृश आमर्शने ।' इति तौदादिकस्य लङि रूपम् । किंस्वरूपं दोषम्—जनापवादं लोकवैमुख्यम् । राज्यार्हो ज्येष्ठः पुत्रोऽनया प्रव्राजित इति । नरेन्द्रस्य दशरथस्य मृत्युना सह वर्तमानम् ॥

९०—वसूनि देशांश्च निवर्तयिष्यन्
रामं नृपः संगिरमाण एव ॥
तया ऽवजज्ञे, भरताऽभिषेको
विषाद-शङ्कुश्च मतौ निचख्ने. ॥ ८ ॥

वसूनीत्यादि—रामं निवर्तयिष्यन् रामं निवर्तयितुं वसूनि द्रव्याणि देशांश्च सङ्गिरमाण एव प्रतिजानान एव दास्यामीति नृपो राजा कैकेय्या तदनङ्गीकरणादवजज्ञे अवज्ञातः । ज्ञा इत्ययं धातुरवपूर्वोऽवज्ञाने वर्तते । तस्मात्कर्मणि लिट् । '२३६३। गम-हन-।६।४।९८।' इत्युपधालोपः । तत्र वृत्तेर्हेतुमण्ण्यन्तात् क्रियार्थोपपदे लृट् । सङ्गिरणं च क्रिया । गिरेस्तौदादिकात् '२७२४। अवाद्ग्रः।१।३।५१।' इति अधिकृत्य '२७२५। समः प्रतिज्ञाने।१।३।५२।' इति तङ् । शानच् । '२३९०। ऋत इद्धातोः ।७।१।१००।' । '३१०५। आने मुक् ।७।२।८२।' इदं चापर-

मनुष्ठितं तथा भरतो राज्येऽभिषिच्यतामिति भरताभिषेको मतौ मनसि निच-खे निखातः। कर्मणि लिट्। '२३६३। गमहन-।६।४।९८।' इत्यादिना उपधा-लोपः। तथा विषादः शङ्कुरिव शल्यमिव निचख्ने। ज्येष्ठत्वात् नायं समभिषि-च्यत इति विषादः। संग्रामात्किल परिश्रान्तमानतं दशरथं केकयी परिचचार तेन परितुष्टेनोक्तं किं ते दास्यामीति। सा प्राह यदार्थयिष्यते तदा यूयं दास्यथेति सा तदवसरं बुद्धा वरद्वयं प्रार्थितवती। एको रामस्य वनगमनं द्वितीयो राज्ये भरतोऽभिषिच्यतामिति॥

९१—ततः प्रविव्राजयिषुः कुमार-
मादिक्षदस्याऽभिगमं वनाय॥
सौमित्रि-सीताऽनुचरस्य राजा
सुमन्त्र-नेत्रेण रथेन शोचन्॥९॥

तत इत्यादि—केकयीप्रार्थनानन्तरं राजा कुमारं रामं प्रविव्राजयिषुः प्रव्रज-न्तमेनं प्रव्राजयितुमिच्छुः व्रजेर्हेतुमण्ण्यन्तात्सन्। अस्य कुमारस्य। रथेन वना-भिगममभिगमनम्। '३२३४। ग्रह-वृ-दृ-निश्चि-गमश्च।३।३।५८।' इत्यप्। आदि-क्षत् आदिष्टवान्। अस्येति कर्तरि षष्ठी। वनायेति। '५८५। गत्यर्थकर्मणि—।२।३ ।१२। इति चतुर्थी। सौमित्रिसीतानुचरस्य लक्ष्मणसीतासहायस्य। सुमित्राया अपत्यम्। बाह्वादित्वादिञ्। सहचरत्वेनाभ्यर्हितत्वात् पूर्वनिपातः। अनु पश्चाच्च-रतीति अनुचरः। '२९३१। भिक्षा-सेनादायेषु च।३।२।१७।' इति चकारस्यानु-क्तसमुच्चयार्थत्वात् टः। अनुचरश्चानुचरी च। '९३३। पुमान् स्त्रिया।१।२।६७।' तावनुचरौ सौमित्रिसीते अनुचरौ सहायौ यस्य। कालापिकास्ततोऽन्यत्रापि पठन्ति अनधिकरणोपपदे चरेष्ट इत्यर्थः। नीयतेऽनेनेति नेत्रं लोचनम्। '३१-६२। दाम्नी—।३।२।१८२।' इत्यादिना ष्ट्रन्। सुमन्त्रनामा रथवाहको नेत्रमिव यस्य रथस्य तद्वशात्तस्य प्रवृत्तेः। शोचन् परिदेवयमानो राजा॥

९२—केचिन् निनिन्दुर् नृपम्-अशान्तं,
विचुक्रुशुः केचन साऽस्रमुच्चैः,॥
ऊचुस् तथाऽन्ये भरतस्य मायां,
धिक् केकयीमित्यपरो जगाद॥१०॥

केचिदित्यादि—राज्ञा वनगमने समादिष्टे सति केचिज्जना नृपं निनिन्दुः कुत्सितवन्तः। '६८। णिदिं कुत्सायाम्।' अप्रशान्तं वृद्धभावेऽपि स्त्रीवशम्। केचन केचित्सास्रं सबाष्पमुच्चैः सुष्ठु विचुक्रुशुः सुतरामाक्रन्दितवन्तः। तथान्ये भरतस्य मायां शाठ्यमूचुः उक्तवन्तः। तत्कृतोऽयं प्रयोगो येनात्मरक्षणार्थं माता-महनिवासे स्थित इति। अपरो धिक्केकयीं यथैवमनुष्ठितमिति जगाद गदितवान्। 'धिगुपर्यादिषु त्रिषु' इति धिग्योगे द्वितीया॥

९३—'गतो वनं श्वो भवितेति रामः,'
शोकेन देहे जनता ऽतिमात्रम्, ॥
धीरास् तु तत्र च्युत-मन्यवो ऽन्ये
दधुः कुमारा ऽनुगमे मनांसि. ॥ ११ ॥

गत इत्यादि—श्व आगामिनि दिवसे वनं गतो रामो भवितेति तास्। जनता जनसमूहः। '१२५१। ग्राम-जन-बन्धु-।४।२।४३।' इत्यादिना तल्। देहे दग्धा। कर्मणि लिट्। '२२६०। अत एकहल्-।६।४।१२०।'इत्येत्वाभ्यासलोपौ। गत इति भूतकालः श्वोभवितेति भविष्यत्कालेन संबध्यमानः साधुः। '२८२४। धातु-संबन्धे प्रत्ययाः ।३।४।१।' इति। ये तु तत्र धीराः ते च्युतमन्यवो विगत-शोकाः सन्तः कुमारानुगमे कुमारस्य पश्चाद्गमननिमित्तं मनांसि दधुः कृतवन्तः। राममनुव्रजाम इति। निमित्तात्कर्मसंयोगे सप्तमीति। मनांसीति कर्मणा योगात् ॥

९४—प्रस्थास्यमानावुपसेदुषस् तौ
शोशुच्यमानानिदमूचतुस् तान्, ॥
'किं शोचतेहा ऽभ्युदये बता ऽस्मान्
नियोग-लाभेन पितुः कृता ऽर्थान्, ॥ १२ ॥

प्रस्थेत्यादि—तौ रामलक्ष्मणौ प्रस्थास्यमानौ गमिष्यन्तौ। '२६८९। सम-व-प्र-वि-भ्यः स्थः।१।३।२२।' इति तङ्। जनान् इदं वक्ष्यमाणमूचतुः उक्तवन्तौ। ब्रुवीत्यर्थग्रहणात् वचेर्द्विकर्मकता। उपसेदुषस्तौ ढौकितवतः जनान्। '३०९७। भाषायां सद्-वस—।३।२।१८०।' इत्यादिना क्वसुः। शोशुच्यमानान् अत्यर्थं शोकं कुर्वतः। भृशार्थे यङ्। किमूचतुरित्याह—किं शोचतेति। हे जनाः। कस्मादस्मान् शोचत परिदेवयध्वम्। विधावपूर्वार्थप्रकाशने लोट्। इहाभ्युदये बतशब्दो विस्मये। तस्मिन् आश्चर्यभूते अभ्युदये वृद्धौ सत्याम्। कुत इत्याह—पितुर्नियोगलाभेन वनगमनाज्ञालाभेन कृतार्थान् लब्धप्रयोजनान्। कृतार्थत्वादशोच्या वयमित्यर्थः ॥

९५—असृष्ट यो, यश्च भयेष्वरक्षीद्,
यः सर्वदा ऽस्मानपुषत् स्व-पोषम्, ॥
महोपकारस्य किमस्ति तस्य
तुच्छेन यानेन वनस्य मोक्षः, ॥ १३ ॥

असृष्टेत्यादि—असृष्ट जनितवान्। सृजेर्दैवादिकस्यात्मनेपदित्वात् लुङि रूपम्। न तौदादिकस्य परस्मैपदित्वात् '२४०५।सृजि-दृशोः-।६।१।५८।'इत्यम्। यश्च भयेषु सत्सु अरक्षीत् पालितवान्। '७०६। रक्ष पालने।' इत्यस्य लुङि

रूपम् । यः सर्वदा सर्वकालम् । '१९६४। सर्वैकान्य—।५।३।१५।' इत्यादिना दाप्रत्ययः । यश्चापुषत् पुष्टवान् । स्वपोषं धनेनास्मानपुषत् । पुषेर्लुङि रूपम् ।'२३४३। पुषादि—।३।१।५५।' इत्यङ् । '३३३१ । स्वे पुषः ।३।४।४०।' इति णमुल् । '७८३। अमैवाव्ययेन ।२।२।२०।' इति समासः ।'२८२७। यथाविध्यनुप्रयोगश्च ।३।४।४।' तस्य पितुः संबन्धिनो महोपकारस्य किमस्ति मोक्षः प्रत्युपकारो नैवेति भावः । केनेत्याह—तुच्छेन असारेण वनस्य यातेन । यातेर्भावे ल्युट् । वनस्येति शेषसामान्ये षष्ठी । कृल्लक्षणायास्तु षष्ठ्या गत्यर्थकर्मणि चतुर्थ्या बाध्यमानत्वात् ॥

९६—विद्युत्-प्रणाशं स वरं प्रनष्टो,
यद्वोर्ध्व-शोषं तृण-वद् विशुष्कः, ॥
अर्थे दुरापे किमुत प्रवासे
न शासने ऽवास्थित यो गुरूणाम्. ॥ १४ ॥

विद्युदित्यादि—अर्थे कार्यविशेषे दुरापेऽपि कृच्छ्प्राप्येऽपि ।'३३०५। ईषद्दुःसुषु ।३।३।१२६।' इत्यादिना खल् । गुरूणां यच्छासनमादेशः तस्मिन् यो नावास्थित नावस्थितवान् । अवपूर्वात्तिष्ठतेर्लुङ् । '२६८९। समव—।१।३।२२।'इत्यादिना तङ् । २३८९। स्था-घ्वोरिच्च ।१।२।१७। 'इति किरवमित्वं च । '२३६९। ह्रस्वादङ्गात् ।८।२।२७।' इति सिचो लोपः । स वरं विद्युत्प्रणाशं प्रनष्टः । विद्युदिवोत्पत्त्यनन्तरमेव विनाशं गतः । ३३६६। उपमाने कर्मणि च ।३।४।४५।' इति चकारात् । '३३६४।कर्त्रोर्जीव-पुरुषयोः ।३।४।४३।' इत्यतः कर्तृग्रहणानुवृत्तौ कर्तृवाचिनि विद्युच्छब्द उपपदे णमुल् । '२२८७। उपसर्गादसमासे—।८।४।१४' इत्यादिना णत्वम् । यद्वेत्यथवा । स ऊर्ध्वशोषं तृणवद्विशुष्कः'।३३६५। ऊर्ध्वे शुषि- ।३।४।४४।' इत्यादिना णमुल् । उभयत्रामैवेत्यादिना समासः । '२८२७। यथाविध्यनुप्रयोगश्च ।३।४।४।' किमु प्रवासे किम्पुनः प्रवासविषये यच्छासनं तत्र तावदनवस्थितस्य सुतरामेव पूर्वोक्तं प्रयुज्यते ॥

९७—पौरा ! निवर्तध्वमिति न्यगादीत्,
'तातस्य शोकाऽपनुदा भवेत, ॥
मा दर्शताऽन्यं भरतं च मत्तो,'
निवर्तयेत्याह रथं स्म सूतम् ॥ १५ ॥

पौरा इत्यादि—हे पौराः ? यथागतं निवर्तध्वम् । विधौ लोट् । इति तान् न्यगादीत् उक्तवान् रामः । गदेः '२२८४। अतो हलादेः ।७।२।७।' इति वृद्धिः । '२२६६। इट ईटि ।८।२।२८।' इति सिचो लोपः । तातस्य पितुः । शोकापनुदाः शोकस्यापहर्तारो भवेत । तुन्दशोकयोरित्यादिना कः । भवतेर्विधौ प्रार्थनायां वा लिङ् । मध्यम भरतं च मत्तो मत्त २ अस्मद् '१९५३ ५३०' १३३७ प्रत्ययोत्तरपदयोश्च ७ २ ९८ इति

मदादेशः। अन्यं भरतं मा दर्शत मा द्रष्टारः स्थ। अपि तु योऽहं स एव भरतः स च प्रतिष्ठितः राज्यं पालयिष्यतीत्येव न्यगादीत्। दृशेर्माङि लुङ्। '२२६९। इरितो वा ।३।१।५७।' इत्यङ्। '२४०६। ऋ-दृशोऽङि गुणः ।७।४।१६।' निवर्तय रथमिति सूतं च सुमन्त्रमाह स्म। '२७७८। लट् स्मे ।३।२।११८।' इति लट्। '२४५०। ब्रुवः पञ्चानाम्—।३।४।८४।' इत्याहादेशः। तिपो णल्॥

९८—ज्ञात्वेङ्गितैर् गत्वरतां जनाना-
मेकां शयित्वा रजनीं स-पौरः॥
रक्षन् वने-वास-कृताद् भयात् तान्
प्रातश् छलेनाऽपजगाम रामः॥ १६॥

ज्ञात्वेत्यादि—निवर्तध्वमित्युक्ते ये तत्रानिवृत्ताः तेषां जनानां रामो गत्वरतां गमनशीलतां ज्ञात्वा। '३१४४। गत्वरश्च ।३।२।१६४।' इति निपातितः। तैरिङ्गितैरभिप्रायसूचकैश्चेष्टितैः। इङ्गतेर्भावे निष्ठा। वनेवास इति सप्तमीति योगविभागात् समासः। '९७६। शय-वास-वासिषु ।६।३।१८।' इति विभाषा-सप्तम्या अलुक्। तेन कृतात्सिंहादिभयात् रक्षन् पालयन् तान् पौरान् सपौरः पौरैः सह एकां रजनीं शयित्वा। '५५८। कालाध्वनोः—२।३।५।' इति द्वितीया। शयित्वेति '३३२२। न क्त्वा सेट् ।१।२।१८।' इति। कित्वप्रतिषेधात् गुणो भवति। प्रातः प्रातःकाले। छलेन सन्ध्यावन्दनादिव्याजेन अपजगाम गतवान्॥

९९—अस्राक्षुरस्रं करुणं रुवन्तो,
मुहुर्मुहुर् न्यश्वसिषुः कवोष्णम्,॥
हा राम! हा कष्टमिति ब्रुवन्तः
पराङ्-मुखैस् ते न्यवृतन् मनोभिः॥ १७॥

अस्राक्षुरित्यादि—ते पौरा राममपश्यन्तः। करुणं रुवन्तो विलपन्तः। '११०७। रु शब्दे।' इत्यस्य शतरि रूपम्। अस्रम् अश्रु। अस्राक्षुः मुक्तवन्तः। सृजेस्तौदादिकस्य परस्मैपदिनः सिचि '२४०५। सृजि-दृशोः—।६।१।५८।' इत्यम्। हलन्तलक्षणा वृद्धिः। '३२८। चोः कुः।८।२।३०।' '१३१। खरि च।८।४।५५।' इति चर्त्वम्। मुहुर्मुहुः भूयोभूयः कवोष्णमीषदुष्णमन्तःसन्तापात्। '१०३३। कवं चोष्णे।६।३।१०७।' इति कोः कवादेशः। न्यश्वसिषुः। श्वसेर्लुङ्। '२२९९। ह्मन्त—।७।२।५।' इत्यादिना श्वसेर्वृद्धिप्रतिषेधः। '२२८४। अतो हलादेर्लघोः।७।२।७।' इति विकल्पस्य प्राप्तत्वात्। हा राम हा कष्टं कृच्छ्रमिति ब्रुवन्तः। पराङ्मुखैः येन गतो रामस्तेन गतैर्मनोभिरित्थंभूतैः। न्यवृतन् निवृत्तवन्तः। '२३४५। द्युद्भ्यो लुङि।१।३।९१।' इति परस्मैपदविकल्पात्। द्युतादित्वादङ्॥

१००—सूतो ऽपि गङ्गा-सलिलैः पवित्वा
सहाऽऽश्वमात्मानमनल्प-मन्युः ॥
स-सीतयो राघवयोरधीयन्
श्वसन् कदुष्णं पुरमाविवेश. ॥ १८ ॥

सूत इत्यादि—सूतोऽपि सुमन्त्रः सहाश्वमश्वैः सह। अनल्पमन्युः प्रवृद्ध-शोकः। राघवयोः रामलक्ष्मणयोः। '१८८। सरूपाणा—।१।२।६४।' इत्येकशेषः। ससीतयोः सीतासहितयोः। अधीयन् स्मरन्। '११२०। इक् स्मरणे।' इत्यस्य शतरि रूपम्। यणादेशः। '६१३। अधीगर्थ—।२।३।५२।' इति कर्मणि षष्ठी। श्वसन्। कदुष्णं ईषदुष्णम्। '१०३३। कवं चोष्णे।६।३।१०७।' इति चकारात् कदादेशः। गङ्गातटात्प्रतिनिवृत्य पुरमयोध्यामाजगाम आगतवान्। गङ्गासलिलैः आत्मानं बाह्यमाभ्यन्तरं च पवित्रीकृत्य। '३०५०। पूङश्च।७।२।५१।' इति विकल्पेनेट्। '२०५१। पूङः क्त्वा च।१।२।२२।' इति कित्वप्रतिषेधात् गुणः ॥

१०१—प्रतीय सा पूर् ददृशे जनेन
द्यौर् भानु-शीतांशु-विनाकृतेव ॥
राजन्य-नक्षत्र-समन्विता ऽपि
शोकाऽन्धकार-क्षत-सर्व-चेष्टा. ॥ १९ ॥

प्रतीयेत्यादि—जनेन रामानुयायिना प्रतीय प्रतिनिवृत्य। पूरयोध्या ददृशे दृष्टा। कर्मणि लिट्। प्रतीय इति ईङ् गतावित्यस्य रूपं न पुनरिणः। तस्य हि तुकि प्रतीत्येति स्यात्। '३३३३। षत्वतुकोरसिद्धः।६।१।८६।' इत्येकादेशस्यासिद्धत्वात्। प्रतीयुषा सा ददृशे इति पाठान्तरम्। प्रतिनिवृत्तेन सा पूर्ददृशे दृष्टेत्यर्थः। अस्मिन् पाठे तु '३०९८। उपेयिवान्—।३।२।१०९।' इत्यादिना इणः क्सौ रूपं द्रष्टव्यमत्रोपसर्गस्यातन्त्रत्वात्। शोकोऽन्धकार इव शोकान्धकारः। तेन क्षता नीतानुष्ठेयकर्मणि चेष्टा परिस्पन्दो यस्यां पुरि सा तथोक्ता। राज्ञोऽपत्यानि। '११५३। राज-श्वशुराद्यत्।४।१।१३७।' राजन्याः क्षत्रियाः। '११५४। ये चाभावकर्मणोः।६।४।१६८।' इति प्रकृतिभावः। राजन्याः नक्षत्राणीव तैः समन्वितापि द्यौः भानुशीतांशुविनाकृतेव द्यौराकाशः यथा नक्षत्रसमन्वितापि रात्रौ भानुचन्द्राभ्यां विनाकृता रहिता अन्धकारच्युतसर्वचेष्टा तद्वत्सापि भानुचन्द्रस्थानीययोः राघवयोर्विरहात् ॥

१०२—विलोक्य रामेण विना सुमन्त्र-
मभ्योष्ट सत्वान् नृ-पतिश् च्युताऽऽशः ॥
मधूनि नैषीद् व्यलिपन् न गन्धैर्,
मनो-रमे न व्यवसिष्ट वस्त्रे. २०

त्रिलोक्येत्यादि—रामेण विना सुमन्त्रं विलोक्य दृष्ट्वा नृपतिर्दशरथः सत्त्वात् स्वभावादच्योष्ट च्युतः। च्यवतेरकर्मकाल्लुङ्। गतोऽपि मद्वचनमतिक्रम्य आगच्छेद्राम इति अस्य या आशा सा च्युता यस्य स च्युताशः। सत्त्वात् च्युतश्च मधूनि पातुं नैषीत् नेष्टवान्। '२२६८। नेटि।७।२।४।' इति सिचि वृद्धि-प्रतिषेधः। गन्धैश्चन्दनादिभिर्नालिपत्। लिपेः '२४१८। लिपि-सिचि-ह्वश्च।३।१।५३।' इत्यङ्। मनोरमे चेतोहारिणी वस्त्रे न व्यवसिष्ट न परिहितवान्। '१०९२। वसँ आच्छादने।' इत्यस्मात् लुङ्। अनुदात्तेत्त्वात्तङ्॥

> १०३—आसिष्ट नैकत्र शुचा, व्यरंसीत्
> कृताऽकृतेभ्यः क्षिति-पाल-भाग्-भ्यः, ॥
> स चन्दनोशीर-मृणाल-दिग्धः
> शोकाऽग्निना ऽगाद् द्यु-निवास-भूयम्.॥२१॥

आसिष्टेत्यादि—एकत्र स्थाने शुचा शोकेन नासिष्ट नोपविष्टः। आसेरात्मनेपदिनो लुङ्। कृतानि चाकृतानि चेति। '७३९। क्तेन नञ्विशिष्टेनानञ्।२।१।६०।' इति समासः। असमापितेभ्य इत्यर्थः। क्षितिपालं भजन्ते यानि दूतप्रेषणादीनि तेभ्यः क्षितिपालभाग्भ्यः। व्यरंसीत् विरतः। विमुखोऽभूदित्यर्थः। जुगुप्साविरामप्रमादार्थानामुपसंख्यानमिति अपादानसंज्ञा। रमेर्लुङ्। '२७४९। व्याङ्-परि-भ्यो रमः।१।३।८३।' इति तिप्। '२३७७। यम-रम–।७।२।७३।' इत्यादिना सगिटौ। स एवम्भूतो राजा चन्दनोशीरमृणालैः शोकाग्निप्रतीकारभूतैर्दिग्ध उपलिप्तोऽपि उद्वेगाग्निनैव द्युनिवासभूयं देवत्वमगात् गतवान्। दिहेर्निष्ठायां '३२५। दादेर्धातोर्घः।८।२।३२।' इति घः। '२२८०। झषस्तथोर्धोऽधः ८।२।४०।' । '५२। झलां जश् झशि।८।४।५३।' इति जश्त्वम्। दिवि निवासो येषां ते द्युनिवासाः देवाः तेषां भाव इति। '२८५५। भुवो भावे ३।१।१०७।' इति क्यप्॥

> १०४—विचुक्रुशुर् भूमि-पतेर् महिष्यः,
> केशाँल् लुलुञ्चुः, स्व-वपूंषि जघ्नुः, ॥
> विभूषणान्युन्मुमुचुः, क्षमायां
> पेतुर्, बभञ्जुर् वलयानि चैव. ॥ २२ ॥

विचुक्रुशुरित्यादि—भूमिपते राज्ञो महिष्यः पत्न्यः। 'अविमह्योष्टिषच्' इत्यौणादिकष्टिषच्। विचुक्रुशुः रुदितवत्य इत्यर्थः। हा स्वामिन्निति। तथा केशान् लुलुञ्चुः उत्पाटितवत्यः। स्ववपूंषि स्वशरीराणि जघ्नुस्ताडितवत्यः। विभूषणानि हारादीनि उन्मुमुचुर्मुक्तवत्यः। क्षमायां भुवि पेतुः। वलयानि अवैधव्यचिह्नानि बभञ्जुः चूर्णितवत्यः एते लिडन्ताः ॥

१०५—ताः सान्त्वयन्ती भरत-प्रतीक्षा
तं बन्धु-ता न्यक्षिपदाशु तैले, ॥
दूतांश्च राजाऽऽत्मजमानिनीषून्
प्रास्थापयन् मन्त्रि-मतेन यूनः. ॥ २३ ॥

ता इत्यादि—बन्धुता बन्धुसमूहः । '१२५१। ग्राम-जन-बन्धु-भ्यस्तल् ।४।२।४३।' ता महिषीः सान्त्वयन्ती संस्थापयन्ती । सान्त्वं करोतीति णिच् । तं दशरथं मृतं तैले न्यक्षिपत् निक्षिप्तवती । आशु शीघ्रं । मा भूत्पूतिरिति क्षिपेर्लुङ् । '२३४३। पुषादि-।३।१।५५।' इत्यङ् । कस्मात्तमक्षिपदित्याह—भरतप्रतीक्षा तेन संस्कारः कर्तव्य इति सा भरतं प्रतीक्षते । 'ईक्षि-क्षमिभ्यां च ।' इत्युपसंख्यानाण्णः । दूतान् प्रास्थापयत् प्रहितवती । राजात्मजं भरतमानिनीषून् आनेतुमिच्छून् । अन्यथा केकयीवैमुख्याद्भरतेऽपि वैमुख्याद्दूता अपि नानेतुमिच्छन्ति । तत्रापि मन्त्रिमतेन न स्वमतेन । यूनः तेषां गन्तुं समर्थत्वात् ॥

१०६—'सुप्तो नभस्तः पतितं निरीक्षां-
चक्रे विवस्वन्तमधः स्फुरन्तम्,' ॥
आख्यद् वसन् मातृ-कुले सखिभ्यः
पश्यन् प्रमादं भरतोऽपि राज्ञः. ॥ २४ ॥

सुप्त इत्यादि—भरतोऽपि मातृकुले वसन् सखिभ्यो मित्रेभ्यः आख्यत् कथितवान् । ख्यातेर्लुङ् । '२४३८। अस्यति-वक्ति-।३।१।५२।' इत्यादिना अङ् । क्रियाग्रहणं कर्तव्यमिति संप्रदानसंज्ञायां चतुर्थी । किमाख्यदित्याह—अहं सुप्तःसन् नभस्तो नभस्तलात् आकाशात्पतितं विवस्वन्तमादित्यं स्फुरन्तं चलन्तं निरीक्षांचक्रे निरीक्षितवान् । ईक्षेः '२२३७। इजादेः-।३।१।३६।' इत्याम् । उत्तमविषये सुप्तप्रमत्तावस्थायां चित्तव्याक्षेपात् परोक्षे लिट् । पश्यन् विलोकयन् । राज्ञो दशरथस्य । प्रमादमनिष्टम् ॥

१०७—अशिश्रवन्नात्ययिकं तमेत्य
दूता यदाऽर्थं प्रयियासयन्तः, ॥
आहिष्ट जाताऽञ्जिहिषस् तदाऽसा-
वुत्कण्ठमानो भरतो गुरूणाम्. ॥ २५ ॥

अशीत्यादि—दूता एत्य आगत्य भरतमातृकुलमित्यर्थः । आङ्पूर्वादिणः क्त्वाप्रत्ययस्य ल्यपि तुकि च रूपम् । यदा तं भरतमर्थं वचनमशिश्रवन् श्रावितवन्तः । अर्थ्यतेऽनेनेति णिच् घञ् । शृणोतेर्ण्यन्ताल्लुङि '२३१५। चङि ।६।१।११।' इति द्विर्वचनम् । '२५७८। स्रवति-शृणोति-।७।४।८१।' इत्यभ्यासस्येत्वम् आत्ययिकम् अत्ययो विनाश स प्र तदस्य

ठञ् । पिता ते म्लानस्त्वां द्रष्टुमिच्छतीति आत्ययिकं वचनम् । तमिति '५४० । गति-बुद्धि-।१।४।५२।' इत्यादिना कर्मसंज्ञा । शृणोतेः शब्दकर्मत्वात् अर्थमिति। '५३५। कर्तुरीप्सिततमं-।१।४।४९।' इत्यनेन । प्रयियासयन्तः प्रयातुमिच्छन्तं भरतं प्रयोजितवन्तः । सन्नन्तण्यन्तोऽयम् । तदा असौ भरतो जाताञ्जिहिषः । जाता अञ्जिहिषा गमनेच्छा यस्य सः । '१९३३। अहिँ गतौ।'२२६२। इदितो नुम्-।७।१।५८।' तस्मादंहितुमिच्छतीति सन्। इट् । '२१७६। अजादेर्द्वितीयस्य ।६।१।२।' इति हिशब्दो द्विरुच्यते । नकारस्य '२२४६। न न्द्राः-।६।१।३।' इति प्रतिषेधः । अभ्यासकार्यम् अनुस्वारपरसवर्णौ । ३२७९। अः प्रत्ययात् ।३।३।१०२।' इत्यकारप्रत्ययः । टाप् । आंहिष्ट गतवान् । तस्मादेवात्मनेपदिनो लुङ् । उत्कण्ठमानः स्मरन् । '२७२। मठिँ, २७३। कठिँ शोके।' इत्यस्मादात्मनेपदिनो रूपम् । अनेकार्थत्वाद्धातूनाम् । गुरूणां पितामहादीनाम् । '६१३। अधीगर्थ-।२।३।५२।' इति कर्मणि षष्ठी ॥

१०८—बन्धूनशङ्किष्ट समाकुलत्वा-
दासेदुषः स्नेह-वशादपायम्, ॥
गोमायु-सारङ्ग-गणाश् च सम्यङ्
ना ऽयासिषुर्, भीममरासिषुश्च. ॥ २६ ॥

बन्धूनित्यादि—दुःस्वप्नदर्शनेन अकस्माच्च पितृदूतागमनेन स्नेहवशात् चेतसि समाकुलत्वाद्भरतो बन्धूनशङ्किष्ट शङ्कितवान् उत्प्रेक्षितवानित्यर्थः । शङ्केरात्मनेपदिनो लुङि रूपम् । कीदृशान्—आसेदुषः अपायं विनाशं गतवतः । '३०९७। भाषायां सद्-वस-।३।२।१०८।' इत्यादिना क्वसुः । '२२६०। अत एक-हल्-।६।४।१२०।' इत्येत्वाभ्यासलोपौ । अस्मद्बन्धुः कश्चित् व्यसनमापन्नोऽभूदिति । गच्छतस्तस्य गोमायुसारङ्गगणाः शृगालमृगगणाश्च सम्यगनुकूलं नायासिषुः नागताः । यातेर्लुङि '२३७७। यम-रम-।७।२।७३।' इति सगिटौ । शृगालाः प्रदक्षिणं गताः मृगाश्च सव्यमित्यर्थः । भीममुद्वेगकरमरासिषुः रसिताः। रसेः परस्मैपदिनो लुङ् । '२२८४। अतो हलादेः-।७।२।७।' इति वृद्धौ रूपम् । न रासेः तस्यात्मनेपदित्वात् ॥

१०९—स प्रोषिवानेत्य पुरं प्रवेक्ष्यन्
शुश्राव घोषं न जनौघ-जन्यम्, ॥
आकर्णयामास न वेद-नादान्,
न चोपलेभे वणिजां पणाऽयान्. ॥ २७ ॥

स इत्यादि—स भरतः प्रोषिवान् मातामहकुलात् प्रोषितः सन् । '३०९७। भाषायां-।३।२।१०८।' इत्यादिना क्वसुः । यजादित्वात् सम्प्रसारणं द्विर्वचनम् । '३०९६ ।७ २ ६७ इति इट् प्रवे

क्ष्यन् गृहमित्यर्थात् पुरं प्रविष्टः । घोषं शब्दं न शुश्राव न श्रुतवान् । जनौघ-जन्यं जनसमूहेन जन्यमुत्पाद्यम् । 'शकि-शसि-चति-यति—।' इति जनेर्यत् । तथा वेदध्वनीन्नाकर्णयामास न श्रुतवान् । प्रातिपदिकाद्धात्वर्थे इति णिच् । तदन्तात् लिड्यामि । '२।३।१। अयामन्त—।६।४।५५।' इत्ययादेशः । न चोपलेभे नोपलब्धवान् । वणिजां पण्यजीविनाम् । पणायान् पणलाभान् । क्रयविक्रयरूप-व्यवहारस्योच्छिन्नत्वात् । पणन्ते इति वणिजः पणेरिजादेश्च व इत्यौणादिकः । पण्यन्त इति पणाः । '३२४३। नित्यं पणः परिमाणे ।३।३।६६।' इत्यप् । व्यव-हर्तव्याः ईयन्ते प्राप्यन्ते वणिग्भिरित्ययाः लाभाः । '३२३१। एरच् ।३।३।५६।' इति इणः कर्मणि अच् । पणानामयाः पणायाः तान् । पणायामिति पाठान्तरम् । वणिजां स्तुतिं संव्यवहारविषयां नोपलेभे । संव्यवहारकुशलाः साधव इति गुपादिषु स्तुत्यर्थपणिना साहचर्यात् पणेरपि तदर्थादेवायप्रत्ययः । '३२७१। अः प्रत्ययात् ।३।३।१०२।' इत्यकारः । टाप् । वणिजां प्रलापानिति तृतीयः पाठः । वणिक्प्रसारकलहानित्यर्थः ॥

११०—चक्रन्दुरुच्चैर् नृ-पतिं समेत्य
तं मातरो ऽभ्यर्णमुपागता ऽस्राः, ॥
पुरोहिता ऽमात्य-मुखाश् च योधा
विवृद्ध-मन्यु-प्रतिपूर्ण-मन्याः. ॥ २८ ॥

चक्रन्दुरित्यादि—तं भरतं गृहगतमभ्यर्णं समीपीभूतं समेत्य ढौकित्वा मातरः कौशल्याद्याः नृपतिमुच्चैरत्यर्थं चक्रन्दुः क्रन्दितवत्यः । हा स्वामिन् ? हा राजन् ! क गतोऽसीति । उपागतं प्राप्तमस्रमश्रुजलं यासां ताः एवंविधाः । युध्यन्त इति योधाः पचादित्वादच् । ते च तं समेत्य नृपतिं चक्रन्दुः । पुरो धी-यत इति पुरोहितः । '८९९। निष्ठा ।२।२।३६।' '३०७६। दधातेर्हिः ।७।४।४२।' अमाशब्दः सहार्थे । सह राज्ञा कार्येषु भवतीत्यमात्यः । 'अमेहक्वतसित्रेभ्यः' इति निपातात् । पुरोहितामात्यौ मुखं प्रधानं येषां योधानां ते पुरोहितामात्यमुखाः । अमात्यस्याजाद्यदन्तत्वेऽपि पुरोहितस्याभ्यर्हितत्वात् पूर्वनिपातः । विवृद्धमन्युना शोकेन प्रतिपूर्णे मन्ये गलशिरे येषामिति ॥

१११—दिदृक्षमाणः परितः स-सीतं
रामं यदा नैक्षत लक्ष्मणं च, ॥
रोरुद्यमानः स तदाऽभ्यपृच्छद्,
यथावदाख्यन्नथ वृत्तमस्मै. ॥ २९ ॥

दिदृक्षमाण इत्यादि—स भरतो यदा ससीतं रामं लक्ष्मणं च परितः सर्वतो दिदृक्षमाण द्रष्टुमिच्छन् [illegible] २७३१ ज्ञा-श्रु स्मृ-दृशां सनः [illegible] १ ३ ५७' इति तङ् '२६१३ [illegible] १ २ १०' इति सन किरवे '२४०५ सृजि-दृ-

शोः–।६।१।५८।' इत्यम् न भवति । नैक्षत न दृष्टवान् । तदा रोरुद्यमानः अत्यर्थं रुदन् । यङि रूपम् । अभ्यपृच्छत् पृष्टवान् । ऐक्षताभ्यपृच्छदिति भूतसामान्य-विवक्षा लङ् । अन्यथा कवेः परोक्षत्वात् लिट् स्यात् । अथैतस्मिन् प्रस्तावे यथावत् यादृशं वृत्तं भूतं तथावत् आख्यन् कथितवन्तः पुरोहितामात्यमुखा अस्मै भरताय । ख्यातेः '२४३८। अस्यति–।३।१।५२।' इत्यादिना च्लेरङ् । आतो लोपः ॥

११२–आबद्ध-भीम-भ्रुकुटी-विभङ्गः
शेश्वीयमानाऽरुण-रौद्र-नेत्रः ॥
उच्चैरुपालब्ध स केकयीं च,
शोके मुहुश् चाविरतं न्यमाङ्क्षीत् ॥ २० ॥

आबद्धेत्यादि—स भरत उच्चैर्महता ध्वनिना केकयीं च मुहुर्मुहुर्भूयो भूय उपालब्ध उपालब्धवान् । उपाङ्पूर्वो लभिरुपालम्भे वर्तते । तस्मादात्मनेपदिनो '२२८१। झलो झलि ८।२।२६।' इति सिज्लोपे धत्वजश्त्वे रूपम् । शोके च मन्यौ अविरतमजस्रं न्यमाङ्क्षीत् निमग्नः । मस्जेर्लुङि '२५१७। मस्जिनशोर्झलि ।७।१।६०।' इति नुम् । तत्रापि मस्जेरन्त्यादिनियमात् नुम् । संयोगादिलोपः । हलन्तलक्षणा वृद्धिः । हल्ग्रहणं समुदायप्रतिपत्त्यर्थमित्युक्तम् । कीदृशः । आबद्ध-भीमभ्रुकुटीविभङ्गः । भ्रमेश्च डुरित्यौणादिको डुः । कुटे स्त्रीलिङ्गे भावे कृशा-दिभ्य इतीः । तदन्तात् कृदिकारादिति ङीष् । भ्रुवोः कुटी कौटिल्यं भ्रुकुटी । '९९९। इको ह्रस्वोऽङ्यो गालवस्य ।६।३।६१।' इति ह्रस्वः । तस्या विभङ्गो विर-चनम् । आबद्धः कृतः प्रयत्नेनायासवृत्तेन भीमो भयानको भ्रुकुटीविभङ्गो येन यस्य वेति । शेश्वीयमाने अत्यर्थं शूयमाने अरुणे लोहिते रौद्रे भयानके नेत्रे यस्य सः । श्वयतेर्यङि '२४२०। विभाषा श्वेः ।६।१।३०।' इति वा सम्प्रसारणम् ॥

तमुपालम्भमाह—

११३–नृपाऽऽत्मजौ चिक्लिशतुः स-सीतौ,
ममार राजा, वि-धवा भवत्यः, ॥
शोच्या वयं, भूर्-नृपा, लघुत्वं
केकय्युपज्ञं बत बह्वनर्थम् ॥ २१ ॥

नृपेत्यादि—नृपात्मजौ रामलक्ष्मणौ ससीतौ सीतया सह चिक्लिशतुः क्लिष्टौ । ममार मृतो राजा । '२५३८। म्रियतेर्लुङ्-लिङोश्च ।१।३।६१।' इति नियमात्त-ङोऽभावः । विधवाः धवो भर्ता तेन विना भवत्यो जाताः । शोच्याः शोचनीया वयम् अयशोभाजनत्वात् । '२८७२। ऋ-हलोर्ण्यत् ।३।१।१२४।' शङ्क्या इति पाठान्तरम् । शङ्कनीया वयम् । एतत्कृतोऽयं प्रयोग इति । भूश्चानृपा न विद्य-ते नृपो यस्यामिति नञोऽस्त्यर्थानामिति बहुव्रीहि लघुत्वं राज्यप्रार्थनालक्षणं

केकय्युपज्ञम् । केकय्याः प्रथमतो ज्ञातं नान्यस्य कस्यचित्पूर्वं ज्ञातम् । उपज्ञायत इत्युपज्ञम् । '२८९८। आतश्चोपसर्गे ।३।१।१३६।' इति स्त्रियामङ् । कृल्लक्षणा षष्ठी केकय्या उपज्ञेति समासः । '८२४। उपज्ञोपक्रमं—।२।४।२१।' इति नपुंसकता । बत कष्टम् । बह्वनर्थं बहुदोषम् । क्लेशमरणाद्यनिष्टानां सम्भवात् ॥

भरतकृत एवायं प्रयोग इत्येतत्परिहरन्नाह—

११४—नैतन् मतं मत्कमिति ब्रुवाणः
सहस्र-शो ऽसौ शपथानशप्यत् ॥
उद्वाश्यमानः पितरं स-रामं
लुठ्यन् स-शोको भुवि रोरुदाऽवान् ॥ २२ ॥

नैतदित्यादि—यदेतत्केकय्यनुष्ठितं मतमभिप्रायः । न मत्कृतं तत् । नाहमस्य ग्रामणीर्न प्रभुरिति । अस्मच्छब्दात् '१८७८। स एषां ग्रामणीः।५।२।७८।' इति कन् । '१३७३। प्रत्ययोत्तरपदयोश्च ।७।२।९८।' इति मपर्यन्तस्य मादेशः । नास्मन्मतादनुष्ठितमनयेत्यर्थः । इत्येवं ब्रुवाणः सहस्रशो बहुवारानसौ भरतः शपथान् सम्प्रत्ययकारणवचनानि अशप्यत् कृतवान् । अनेकार्थत्वाद्धातूनां शपेर्दैवादिकस्य उभयपदिनो लङि रूपम् । उद्वाश्यमानः आह्वयन् । '१२३८। वाशृ शब्दे ।' दैवादिकः । अनुदात्तेत् । पितरं सरामं हा तात ! हा रामेति । लुठ्यन् भुवि लुठन् । '१२०१। लुठँ विलोडने ।' दैवादिकः परस्मैपदी । सशोक इति शाठ्यपरिहारार्थम् । रोरुदावान् अत्यर्थं रोदनं कुर्वन् । यङन्तात् '३२७९। अप्रत्ययः ।३।३।१०२।' इत्यकारः '२३०८। अतो लोपः ।६।४।४८।' '।२६३१। यस्य हलः ।६।४।४९।' स्त्रियामतष्टाप् । सा विद्यते यस्येति मतुप् ॥

११५—तं सुस्थयन्तः सचिवा नरेन्द्रं
दिधक्षयन्तः समुदूहुरारात् ॥
अन्त्याऽऽहुतिं हावयितुं स-विप्राश्
चिचीषयन्तोऽध्वर-पात्र-जातम् ॥ २३ ॥

तमित्यादि—सचिवा अमात्याः । कार्येषु सचन्ते समवयन्तीति सचेरिवन्निलौणादिक इवन् । तं भरतं सुस्थयन्तः सुस्थं कुर्वाणाः । तत्करोतीति णिच् । नरेन्द्रं दशरथं । समुदूहुः उद्वाहितवन्तः । शिबिकायामारोप्य । बहिरन्तर्भावितण्यर्थोऽत्र द्रष्टव्यः । यजादित्वात्सम्प्रसारणम् । आरात् नातिदूरे । दिधक्षयन्तः । दग्धुमिच्छन्तं भरतं प्रयोजितवन्तः । दहेः सनि '३२५। दादेर्धातोर्घः ।८।२।३२।' भष्भावश्चर्त्वं । प्रयोजकव्यापारे णिच् । अन्ते विनाशे भवा या आहुतिः । '१४२९। दिगादि—।४।३।५४।' इति यत् । तामन्त्याहुतिं । हावयितुमग्नौ प्रक्षेपयितुं । सविप्रा ब्राह्मणैः सहिताः सचिवाश्चिचीषयन्तः चेतुं निधातुमिच्छन्तः । किंतत्

स्रुवादीनां समूहम् ।

११६—उदक्षिपन् पट्ट-दुकूल-केतू-
न्नवादयन् वेणु-मृदङ्ग-कांस्यम्, ॥
कम्बूंश् च तारानधमन् समन्तात्,
तथाऽऽनयन् कुङ्कुम-चन्दनानि. ॥ ३४ ॥

उदेत्यादि—पट्टदुकूलविरचितान् केतून् ध्वजानुदक्षिपन् उच्छ्रितवन्तः ये नियुक्ताः। क्षिपेस्तौदादिकस्य ग्रहणम्। वेणुमृदङ्गकांस्यं वंशमुरजकांस्यतालमवादयन् वादितवन्तः। वदेर्ण्यन्तस्यैव प्रयोगः। '९१०। जातिरप्राणिनाम्।२।४।६।' इत्येकवद्भावः। न पुनस्तूर्याङ्गत्वात्। तत्रहि प्राणिनां तूर्याङ्गाणां द्वन्द्वैकवद्भावः। यथा मार्दङ्गिकपाणविकमिति। वृ'-तृ-वदि-हनि-कमि-कषि-भ्यः सः।' इत्यौणादिकः कंसशब्दः। तदर्थाय हितं कंसीयम्। त्रपुणा दृढद्रव्यम्। प्रकृतिविकारभावे छः। तस्य विकार इति। '१५४७। कंसीयपरशव्ययोर्यञञौ लुक् च ४।३।१६८।' इति छस्य लुक् यञ् च प्रत्ययः। कम्बून् शङ्खान्। तारान् उच्चैस्तरध्वनीन्। अधमन् शब्दितवन्तः। '२३६०। पा-घ्रा-।७।३।७८।' इत्यादिना धमादेशः। तथा कुङ्कुमचन्दनानि आनयन् आनीतवन्तः। सर्वत्र लङि रूपम्॥

अन्त्येष्टिं दर्शयन्नाह—

११७—श्रोत्राऽक्षि-नासा-वदनं स-रुक्मं
कृत्वाऽजिने प्राक्-शिरसं निधाय ॥
सञ्चित्य पात्राणि यथा-विधान-
मृत्विग् जुहाव ज्वलितं चिताऽग्निम् ॥ ३५ ॥

श्रोत्रेत्यादि—अजिने कृष्णसारचर्मणि प्राक् पूर्वं शिरो मूर्धा यस्येति तं प्राक्शिरसं शवं निधाय स्थापयित्वा पश्चात् श्रोत्राक्षिनासावदनम्। प्राण्यङ्गत्वादेकवद्भावः। वृतृवदीत्यादिसूत्रस्यानन्तरं नयतेराचेति प्रकृतेराकारे नासेत्यौणादिकं रूपम्। सरुक्मं ससुवर्णं कृत्वा। सञ्चित्य विन्यस्य अङ्गप्रत्यङ्गेषु। पात्राणि स्रुगादीनि। यथाविधानं यादृशं विधानमुक्तं गृह्यशास्त्रे। ऋत्विग्याजकः। ऋतौ यजतीति '३७३। ऋत्विग्-दधृग्-।३।२।५९।' इत्यादिना निपातितः। ज्वलितं चिताग्निम्। ज्वलनं चितं तदर्थमग्निं जुहाव जुहोति स्म॥

११८—कृतेषु पिण्डोदक-सञ्चयेषु,
हित्वाऽभिषेकं प्रकृतं प्रजाभिः ॥
प्रत्यानिनीषुर् विनयेन रामं
प्रायादरण्यं भरतः स-पौरः. ॥ ३६ ॥

कृतेष्वित्यादि—पिण्डोदकदानास्थिसञ्चयेष्वनुष्ठितेषु प्रजाभिः प्रकृतं प्रस्तुतमभिषेकमादिकर्मणि क्त हित्वा २३३१ जहातेश्च क्त्वि ७ ४ ४३'

इति हिरादेशः। रामं प्रत्यानिनीषुः प्रत्यानेतुमिच्छुः। विनयेन प्रसादनया न भयादरण्यं वनं प्रायात् गतवान्। भरतः सह पौरैः। अयोध्याभवैर्जनैर्मध्येकेन प्रसाद्यमानः कदाचिन्नागमिष्यतीति ॥

११९—शीघ्रायमाणैः ककुभोऽश्नुवानैर्
जनैर्-पन्थानमुपेत्य सृप्तैः ॥
शोकार्द-भूषैरपि भूश् चकासा-
ञ्चकार नागेन्द्र-रथाऽश्व-मिश्रैः ॥ ३७ ॥

शीघ्रेत्यादि—जनैर्हेतुभूतैर्भूश्चकासाञ्चकार शोभते स्म। कर्तुः क्रियाफल-योगेऽपि नात्मनेपदम्। आम्प्रत्ययवदित्यत्र पूर्वग्रहणानुवृत्तेः। चकासेश्च परस्मै-पदित्वादिति विधिनियमौ स्थितौ। शीघ्रायमाणैः अशीघ्रैः शीघ्रैर्भवद्भिर्झटिति गच्छद्भिरित्यर्थः। '२६६७। भृशादि-।३।१।१२।' इति क्यङ्। ङित्वात्तङ्। ककुभोऽश्नुवानैः दिशो व्याप्नुवद्भिः। अश्नोतेः सौवादिकस्य आत्मनेपदिनो रूपम्। अपन्थानमुपेत्य सृप्तैः बहुत्वादमार्गमपि गत्वा गतैः। '९४०। ऋक्पू-।५।४।७४।' इत्यादिना समासान्तः प्राप्तो '९५६। नञस्तत्पुरुषात् ।५।४।७१।' इति प्रतिषिद्धः सन् '९५७। पथो विभाषा ।५।४।७२।' इति विकल्पितः। शोकाद्धेतोरभूषैरन-लङ्कारैरपि चकासाञ्चकार। भूः भूमिः। भूषेति '३२८०। गुरोश्च हलः ।३।३।१०३।' इत्यकारप्रत्ययः। '११४८। चकासृ दीप्तौ' इत्यस्मात् कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थमित्याम्। नागेन्द्ररथाश्वमिति द्वन्द्वे एकवद्भावः। अल्पाच्तरस्य न पूर्वनिपातः। 'बहुष्वनियमः।' इति वचनात्। तेन सेनाङ्गत्वात् कृतैकवद्भावेन मिश्रैर्युक्तैः।'६९३। पूर्व-सदृश-।२।१।३१।' इत्यादिना तृतीयासमासः ॥

१२०—उच्चिक्यिरे पुष्प-फलं वनानि,
सस्नुः, पितॄन् पिप्रियुरापगासु, ॥
आरेटुरित्वा पुलिनान्यशङ्कं,
छायां समाश्रित्य विशश्रमुश्च ॥ ३८ ॥

उच्चीत्यादि—ते जनाः गच्छन्तः पुष्पफलं पुष्पाणि फलानि चेति '९१०। जातिरप्राणिनाम् ।२।४।६।' इत्येकवद्भावः। उच्चिक्यिरे उच्चितवन्तः। ञित्वात्तङ् कर्तुः क्रियाफलयोगात्। '२५२५। विभाषा चेः ।७।३।५८।' इति धातोः कुत्वम्। '२७२। एरनेकाचः-।६।४।८२।' इति यणादेशः। उच्चिच्यिर इति पाठान्तरं युक्तम्। वनानीति हेतुत्वेन '५३९। अकथितं-।१।४।५१।' कर्म। वनानि विध-इयन्तः फलानि जगृहुरित्यर्थः। ततः सस्नुः स्नातवन्तः। स्नातेर्लिटि '२२१४। उस्यपदान्तात् ।६।१।९६।' इति पररूपम्। पितॄन् पिप्रियुः उदकाञ्जलिना तर्पि-तवन्तः प्रीणातेर्लिटि इयङादेश आपगासु नदीषु एवद् कृत्वा पुलिनानि सैकतानि इत्वा आरेटु मारटिता मारेभुरिति पाठान्तरम्

कियन्तमपि कालमारमन्ति स्म। '२७४१। व्याङ्परि-भ्यो रमः।१।३।८३।' इति परस्मैपदम्। अशङ्कं विस्रब्धम्। छायां समाश्रित्य विशश्रमुः विश्रान्ताः॥

१२१—संप्राप्य तीरं तमसाऽऽपगाया
गङ्गाऽम्बु-सम्पर्क-विशुद्धि-भाजः॥
विगाहितुं यामुनमम्बु पुण्यं
ययुर् निरुद्ध-श्रमवृत्तयस् ते.॥ ३९॥

संप्राप्येत्यादि—तमसापगायाः तमसाख्यायाः आपगायाः नद्याः। अस्य-वि-चमि-तमि-नमि-रमि-लभि-तपि-पति-जनि-पणि-गहि-भ्योऽसच्। यस्याः स्मरणात्पापं ताम्यति सा तमसा। तरसा इति पाठान्तरम्। तत्र तरसा वेगेन आपगाया अर्थात्तमसाया नद्या गङ्गाम्बुसम्पर्कात् विशुद्धिं पवित्रतां भजते या तस्यास्तीरं कूलं सम्प्राप्य गत्वा ते जना निरुद्धश्रमवृत्तयः ययुः गताः। गङ्गेति गन् गम्यद्योरित्यौणादिको गन्। विगाहितुं विगाहिष्यामह इति कृत्वा। यामुनमम्बु यमुनाया इदं यमुनासम्बन्धि जलम्। पुण्यं पुण्यहेतुत्वात् पुण्ययुक्तत्वाद्वा॥

१२२—ईयुर् भरद्वाज-मुनेर् निकेतं,
यस्मिन् विशश्राम समेत्य रामः॥
च्युताऽशनायः फलवद्-विभूत्या
व्यस्यन्नुदन्यां शिशिरैः पयोभिः.॥ ४०॥

ईयुरित्यादि—भरद्वाजमुनेर्निकेतं आश्रममीयुः गताः। '२४५५। इणो यण् ।६।४।८१।' इति यत्वम्। अभ्यासस्य '२४५६। दीर्घ इणः किति ।७।४।६९।' इति दीर्घत्वम्। यस्मिन्निकेते रामो विशश्राम विश्रान्तः। समेत्य मिलित्वा। तमीयुर्जना इति योज्यम्। फलवद्विभूत्या फलवतां वृक्षाणां समृद्ध्या हेतभूतया च्युताशनायोऽपगतबुभुक्षः। '२६६१। अशनायो—।७।४।३४।' इत्यादिना निपातितः। व्यस्यन् उदन्यां वारयन्। असेर्दैवादिकस्य रूपम्। उदन्यां पिपासां शिशिरैः शीतलैः पयोभिः॥

१२३—वाचं-यमान् स्थण्डिल-शायिनश् च
युयुक्षमाणाननिशं मुमुक्षून्॥
अध्यापयन्तं विनयात् प्रणेमुः
पद्गा भरद्वाज-मुनिं स-शिष्यम्.॥ ४१॥

वाचमित्यादि—ते भरद्वाजमुनिं सशिष्यं शिष्यैः सह वर्तमानं प्रणेमुः प्रणमन्ति स्म। विनयात् विनयेन। अत एव पद्गाः पदातयः पादाभ्यां गच्छन्तीति। '३०११। अन्येष्वपि दृश्यते ।३।२।१०१।' इति डः। '९९२। हिमकाषिहतिषु च ६ ३ ५४ 'इति गमोत्तरपदे पद्‌आदेश पद्भिति

योगविभागाद्वा। कीदृशम्। अध्यापयन्तं पाठयन्तम्। कान् वाचंयमान् मौनव्रतान्। '२९५६ वाचि यमो व्रते। ३।२।५०' इति खच्। '२९५७ वाचंयम-पुरंदरौ च।६।३।६९' इति निपातनात् पूर्वपदस्य अमन्तता। स्थण्डिलशायिनः भूशायिनः। '१२१६। स्थण्डिलाच्छयितरि व्रते।४।२।१५' इति णिनिः। युयुक्षमाणान् योक्तुमिच्छतः। योगाभ्यासनिष्ठानित्यर्थः। अनिशमविच्छेदेन मुमुक्षून्मोक्षाभिलाषिण इत्यर्थः। अतएव योगाभ्यासमिच्छून्॥

१२४—आतिथ्यमेभ्यः परिनिर्विवप्सोः
कल्प-द्रुमा योग-बलेन फेलुः, ॥
धाम-प्रथिम्नो म्रदिमाऽन्वितानि
वासांसि च द्राघिम-वन्त्युदूहुः ॥ ४२ ॥

आतिथ्यमित्यादि—अतिथ्यर्थमातिथ्यमन्नपानादि। '२०९४। अतिथेर्ण्यः ।५।४।२६।' एभ्यो भरतादिजनेभ्यः इति संप्रदाने चतुर्थी। परिनिर्विवप्सोः निर्वप्तुमिच्छोर्दातुमिच्छोरित्यर्थः। निपूर्वो वपिर्दाने वर्तते। धामप्रथिम्नः। धाम्ना तेजसा प्रथिमा पृथुत्वं यस्य। तेजसो बहिर्निर्गतत्वात् शरीरस्य पृथुत्वं जायते। तस्य भरद्वाजमुनेर्योगबलेन समाधिबलेन।'१२५३। युजँ समाधौ।' इत्यस्य रूपम्। कल्पद्रुमाः फेलुः फलिताः। भक्ष्यान्नपानादिकमित्यर्थः।'२३०१। तॄ-फल-भज-त्रपश्च।६।४।१२२' इत्येत्वमभ्यासलोपश्च। वासांसि च वस्त्राणि उदूहुः उद्वहन्ति स्म। यजादित्वात् संप्रसारणम्। म्रदिमान्वितानि मृदुत्वमुपगतानि। द्राघिमवन्ति दैर्घ्ययुक्तानि। पृथुमृदुदीर्घशब्देभ्यस्तस्य भाव इत्यर्थे '१७८४। पृथ्वादिभ्य इमनिच्—।५।१।१२२।'। पृथुमृदुशब्दयोः '१७८५। र ऋतो हलादेः।६।४।१६१।' इति रादेशः। दीर्घशब्दस्य '२०१६ प्रिय-स्थिर—।६।४।१५७।' इत्यादिना द्राघादेशः पश्चान्मतुप्॥

१२५—आज्ञां प्रतीषुर्, विनयादुपास्थुर्,
जगुः स-रागं, ननृतुः स-हावम्, ॥
स-विभ्रमं नेमुरुदारमूचुस्
तिलोत्तमाऽऽद्या वनिताश्च तस्मिन्. ॥ ४३ ॥

आज्ञामिति—तस्मिंस्तपोवने तिलोत्तमाद्या वनिता दिव्यस्त्रियः आगता आज्ञामादेशं मुनेः प्रतीषुः प्रतीष्टवत्यः। चेटीभवत्य इत्यर्थः। प्रतिपूर्व इषिर्ग्रहणे वर्तते तस्य लिटि रूपम्। विनयादुपास्थुः उपस्थिताः। पादप्रक्षालनादिदानेन उपस्थानं कृतवत्यः। उपपूर्वात्तिष्ठतेर्लुङि सिच्।'२२२३। गाति-स्था—।२।४।७७' इति सिचो लुक् '२२२६ सिजभ्यस्तविदिभ्यश्च ३ ४ १०९ इति झेर्जुस्।
'२२१४ ६ १ ९६ इति पररूपम् जगु सराग सरक्त गीत

वत्यः। ननृतुः सहावं सशृङ्गारचेष्टं नर्तितवत्यः। सविभ्रमं नेमुः सविलासं प्रणताः। उदारमूचुः अग्राम्यमुक्तवत्यः॥

१२६—वस्त्राऽन्न-पानं शयनं च नाना
कृत्वाऽवकाशे रुचि-संप्रक्लृप्तम्॥
तान् प्रीति-मानाह मुनिस् ततः स्म-
'निवध्वमाध्वं, पिबताऽत्त शेध्वम्.'॥ ४४॥

वस्त्रेत्यादि—ततो वनितोपस्थानानन्तरमवकाशे प्रदेशे यथाभिमते वस्त्रान्नपानम्। सर्वो द्वन्द्वो विभाषैकवद्भवतीत्येकवद्भावः। शयनमित्यधिकरणे ल्युट्। नाना कृत्वा पृथक् कृत्वा। रुचिसंप्रक्लृप्तम्। यस्य यावदभिरुचितं तत्तथैव संपादितम्। '२३५०। कृपो रो लः।८।२।१८।'। प्रीतिमान्मुनिस्तान् भरतादीनाह स्म उक्तवान्। किमाह—निवध्वं परिधत्त वस्त्राणि। '१०९२। वसँ आच्छादने।' इत्यस्य विधौ लोट्। '५२। झलां जश् झशि।८।४।५३' इति सकारस्य दकारः। आध्वं उपविशत। आसेः पूर्ववत् दादेशः। अत्त खादत अन्नादिकम्। '१०८०। अदँ भक्षणे।' इत्यस्मात् लोट्। पानादिकं पिबत। पिबतेः '२३६०। पा-घ्रा—।३।७।७८।' इति सूत्रेण पिबादेशः। शेध्वम् स्वपित शयने। सर्वत्र विधौ लोट्॥

१२७—ते भुक्तवन्तः सु-सुखं वसित्वा
वासांस्युषित्वा रजनीं प्रभाते॥
द्रुतं समध्वा रथ-वाजि-नागैर्
मन्दाकिनीं रम्य-वनां समीयुः.॥ ४५॥

ते भुक्तेत्यादि—ते भरतादयः सुसुखमिति क्रियाविशेषणम्। भुक्तवन्तः सन्तो वासांसि। वसित्वा परिधाय। रजनीमुषित्वा रजनीं रात्रिं।'३०४६। वसति-क्षुधोः—।७।२।५२।' इतीट्। '५५८। कालाऽध्वनोः—।२।३।५।' इति द्वितीया। द्रुतं शीघ्रं प्रभाते मन्दाकिनीं नदीं समीयुः संभूय गताः। समध्वा अविच्छिन्नाध्वानः। सङ्गता अध्वन इति प्रादिसमासः। '९५३। उपसर्गादध्वनः ।५।४।८५।' इति समासान्तष्टच्। रथवाजीति द्वन्द्वैकवद्भावः। तेन सहिता नागा इति शाकपार्थिवादित्वात् समासः। अन्यथा सेनाङ्गत्वात् समुदायस्यैकवद्भावः स्यात्। रम्यवनां रमणीयकाननां रमणीयजलां वा॥

१२८—वैखानसेभ्यः श्रुत-राम-वार्तास्
ततो विशिङ्खान-पतत्रि-सङ्घम्॥
अभ्रं-लिहाऽग्रं रवि-मार्ग-भङ्गम्
आनंहिरे ऽद्रिं प्रति चित्र-कूटम्.॥ ४६॥

वैखानसेत्यादि—ततो

न्यः। चित्रकूटे रामोऽस्तीति श्रुतरामवार्ताः। चित्रकूटनामानमद्रिं पर्वतं प्रति '५५२। लक्षणेत्थम्भूताख्यान-।१।४।९०।' इत्यादिना कर्मप्रवचनीयसंज्ञा। '५४८। कर्मप्रवचनीययुक्ते-।२।३।८।' इति द्वितीया। तं लक्ष्यीकृत्य आजंहिरे जग्मुः। अंहतेर्लिटि द्विर्वचनम्। '२१७९। हलादिः शेषः।७।४।६०।' '२२४८। अत आदेः।७।४।७०।' इति दीर्घः। '२२८८। तस्मान्नुड् द्विहलः।७।४।७१।' इति नुट्। विशिश्रानपतत्रिसंघं कूजत्पक्षिगणम्। अभ्रंलिहाग्रं अभ्रस्पृक्शिखरम्। '२९४७। वहाऽभ्रे लिहः।३।२।३२।' इति खश्। '२९४२। अरुर्द्विषत्-।६।३।६७।' इत्यादिना मुम्। रविमार्गभङ्गम्। उच्चैस्तरत्वात् रवेर्मार्गभङ्गो यस्मिन्नद्राविति॥

१२९—दृष्ट्वोर्णुवानान् ककुभो बलौघान्
वितत्य शार्ङ्गं कवचं पिनह्य॥
तस्थौ सिसंग्रामयिषुः शितेषुः
सौमित्रिरक्षि-भ्रुवमुज्जिहानः॥ ४७॥

दृष्ट्वेत्यादि—बलौघान्दृष्ट्वा सौमित्रिस्तस्थौ स्थितः। अभ्यासस्य '२२५९ शर्पूर्वाः खयः।७।४।६१।' इति खयः शेषः। कीदृशः ककुभो दिश ऊर्णुवानान् आच्छादयतः। ऊर्णोतेरदादिकस्योभयपदिनः शानचि उवङादेशे च रूपम्। शार्ङ्गं शृङ्गस्य विकारं धनुर्वितत्य आरोपितगुणं कृत्वा। '३३३४। वा ल्यपि ।६।४।३८।' इत्यनुनासिकलोपः। कवचं पिनह्य बद्ध्वा। '१२४१। णहँ बन्धने।' इत्यस्य ल्यपि। अपिशब्दाकारलोपस्तु—'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः। धाञ्कृञोस्तनिनह्योश्च बहुलत्वेन शौनकिः॥' इति। सिसंग्रामयिषुः संग्रामयितुमिच्छुः। '२०७१। संग्रामँ युद्धे।' इति चौरादिको णिच्। तदन्तस्य सनि प्रथमस्यैकाचो द्विर्वचनम्। शितेषुः तीक्ष्णशरः। अक्षिणी च भ्रुवौ च अक्षिभ्रुवम्। '९४५ अचतुर-।५।४।७७।' इत्यत्र निपातितः। उज्जिहानः ऊर्ध्वं नयन्। '११६४। ओँहा-ङ् गतौ।' इत्यस्य जुहोत्यादिकस्य '२४९६। भृञामित्।७।४।७६।' इतीत्वम्॥

१३०—शुक्लोत्तरासङ्ग-भृतो वि-शस्त्रान्
पादैः शनैरापततः प्र-मन्यून्[1]॥
औहिष्ट तान् वीत-विरुद्ध-बुद्धीन्
विवन्दिषून् दाशरथिः स्व-वर्ग्यान्,॥ ४८॥

शुक्लेत्यादि—दाशरथिस्तान् स्ववर्ग्यान् स्ववर्गे भवान्। '१४४३। अशब्दे यत्खौ।४।३।६४।' इति यत्। आत्मीया अपि कदाचित् दुष्टबुद्धयो भवन्तीत्याह—वीतविरुद्धबुद्धीन्। औहिष्ट ऊहितवान्। ऊहतेरात्मनेपदिनो लुङि आट्

१ स-मन्यून् इति

बृद्धिः। तदेवाविरुद्धबुद्धित्वं दर्शयन्नाह—शुक्लोत्तरासङ्गभृतः शुक्लो य उत्तरा-सङ्गः उत्तरीयं तं बिभ्रतीति क्विप्। विशस्त्रान् निरायुधान्। पादैरापतत आग-च्छतो मुक्तवाहनत्वात्। शनैर्न त्वरया। प्रमन्यून् प्रकृष्टशोकान् आगतशोकान् वा। विवन्दिषून् वन्दितुमिच्छून्॥

१३१—स-मूल-काषं चकषू रुदन्तो
रामाऽन्तिकं बृंहित-मन्यु-वेगाः॥
आवेदयन्तः क्षिति-पालमुच्चैः—
कारं मृतं राम-वियोग-शोकात्॥ ४९॥

समूलेत्यादि—ते रामान्तिकं रामसमीपं प्राप्ताश्चकषुः विष्टवन्तः। समू-लकाषं समूलं कषित्वा भूमेरधोभागमुत्खन्य। '३३५५। निमूल-समूलयोः कषः।३।४।३४।' इति कषेर्णमुल्। '३३६७। कषादिषु यथाविध्यनुप्रयोगः।३।४।४।' रुदन्तः रोदनं कुर्वन्तः बृंहितमन्युवेगा विवृद्धशोकवेगाः। '७८६ बृहि वृद्धौ।' इत्यस्य रूपम्। रामवियोगशोकात् कारणात् क्षितिपालं दशरथमुच्चैःकारं कृत्वा। मृतं निधनंगतं आवेदयन्तः। '३३८१। अव्यये यथाभिप्रेताख्यान-।३।४।५९।' इति कृञो णमुल्। एतद्यथाभिप्रेताख्यानमिति नीचैराख्यातुमभिप्रेतत्वात् उच्चै-रावेदयन्ति॥

१३२—चिरं रुदित्वा करुणं स-शब्दं
गोत्राऽभिधायं सरितं समेत्य॥
मध्ये-जलाद् राघव-लक्ष्मणाभ्यां
प्रत्तं जलं द्व्यञ्जलमन्तिकेऽपाम्.॥ ५०॥

चिरमित्यादि—चिरं महान्तं कालं करुणं समन्यु सशब्दं प्रतिकृत्य रुदि-त्वा। '२६१७। र-लो-व्युपधाद्धलादेः-।१।२।२६।' इति किस्वे विकल्पिते '२६०९। रुद-विद-।१।२।८।' इत्यादिना किस्वम्। सरितं समेत्य नदीं संभूय गत्वा। मध्येजलात् जलस्य मध्यात् तस्माद्वा स्नात्वोत्थाय अवतीर्य। ल्यब्लोपे पञ्चमी। '६७२। पारे मध्ये षष्ठ्या वा।२।१।१८।' इत्यव्ययीभावः। अपञ्चम्या इति प्रतिषेधात् अन्न भवति। नाव्ययीभावादिति लुक्प्रतिषेधश्च। राघवलक्ष्मणा-भ्याम्। अपामन्तिके समीपे जलं प्रत्तं दत्तम्। '३०७८। अच उपसर्गात्तः।७।४।४७।' गोत्राभिधायं नामाभिधायम्। '३९०। द्वितीयायां च।७।२।८७।' इति णमुल्। द्व्यञ्जलमिति। अञ्जलिपरिच्छिन्नम्। जलमञ्जली द्वौ विगृह्य। तद्धितार्थे समासः '८०४। द्वि-त्रिभ्यामञ्जलेः।५।४।१०२।' इति टच्। ताभ्यां प्रत्येकमञ्ज-लिप्रदानात् द्वावञ्जली प्रमाणमस्येत्यस्मिन्वाक्ये प्रमाणप्रत्ययस्य प्रमाणे लुक् द्विगो-र्नित्यमिति लुक् तत समासान्तो न प्राप्नोति ॥

१३३—'अरण्य-याने सु-करे पिता मा
प्रायुङ्क्त, राज्ये बत दुष्-करे त्वाम्, ॥
मा गाः शुचं वीर !, भरं वहाऽमुम्,'
आभाषि रामेण वचः कनीयान्. ॥ ५१ ॥

अरण्ययान इत्यादि—अरण्याय यानं अरण्ययानं तस्मिन् सुकरे सुखसाध्ये पिता मां प्रायुङ्क्त नियुक्तवान्। युजे रौधादिकस्य लुङि रूपम्। कर्त्रभिप्राये '२७३५। प्रोपाभ्यां यजेः—१।३।६४।' इत्यात्मनेपदम्। राज्ये दुष्करे दुःखसाध्ये त्वां प्रायुङ्क्त। एवं च सति हेवीर, शुचं शोकं मा गाः। मा कार्षीरित्यर्थः। '२४५८। इणो गा लुङि।२।४।४५।'। '२२२३। गाति-स्था—।२।४।७७।' इति सिचो लुक्। बत इति खेदे। किन्तु भरममुं पितुर्नियोगम्। '९६४। भृ-ञ् भरणे।' इत्यस्मात् '३२३२। ऋदोरप्।३।३।५७।' वह संपादय। विधौ लोट्। एवं वचः रामेण कनीयान् अनुजो भ्राता भरतः आभाषि भाषितः। कर्मणि लुङ्। ब्रुवी-त्यर्थग्रहणात् द्विकर्मकता। अल्पशब्दादीयसुनि '२०११। युवाल्पयोः—।५।३।६४।' इत्यादिना कनादेशः॥

१३४—'कृती श्रुती वृद्ध-मतेषु धीमांस्
त्वं पैतृकं चेद् वचनं न कुर्याः, ॥
विच्छिद्यमानेऽपि कुले परस्य
पुंसः कथं स्यादिह पुत्र-काम्या. ॥ ५२ ॥

कृतीत्यादि—वृद्धानां पण्डितानां मतेषु श्रुतानि कृतानि चानुष्ठितानि येनेति। श्राद्धमनेनेत्यधिकृत्य '१८८८। इष्टादि।५।२।८८।' इतीनिः। क्तस्येन्विषयस्येति कर्मणि सप्तमी। स्वमते भावक्तान्तादस्त्यर्थे इन्। स त्वमेवंविधः धीमान् पैतृकं पितुरागतम्। '१४५८। पितुर्यच्च।४।३।७९।' इति चकाराद्दत्तछञि '१२२१। इसुसुक्तान्तात्कः।७।३।५१।' चेद्यदि वचनं न कुर्याः। मध्यमपुरुषैकवचने लिङि रूपम्। तदा विच्छिद्यमाने कुले वंशे परस्यापि अन्यस्यापि पुंसः। अपिशब्दो भिन्नक्रमः। कथं स्यादिह लोके पुत्रकाम्या आत्मनः पुत्रेच्छा नैवेत्यर्थः। पुत्रश-ब्दात् '२६६३। काम्यच्च।३।१।९।' इति काम्यच्। तदन्तादप्रत्ययः। टाप्॥

१३५—अस्माकमुक्तं बहु मन्यसे चेद्,
यदीशिषे त्वं न मयि स्थिते च, ॥
जिह्रेष्यं-तिष्ठन् यदि तात-वाक्ये,
जहीहि शङ्कां, व्रज, शाधि पृथ्वीम्.' ॥ ५३ ॥

अस्माकमित्यादि —— वचनं चेद् यदि बहु मन्यसे आद्रियसे। पितृतुल्यो भ्राता कथमेव न कुर्यामिति यदि

च मयि स्थिते नेशिषे न प्रभुत्वं करोषि। प्रभुस्त्वमहं त्वदाज्ञाकर इति। ईशेरादादिकस्य '२४३९। ईशः से।७।२।७७' इतीडागमः। गुरुवचनमनतिक्रमणीयं विशेषतस्तातवाक्यं तस्मिन्नतिष्ठन् वचनमकुर्वाणः यदि जिह्रेषि लज्जसे। '२४९०। श्लौ।६।१।१०' इति द्विर्वचनम्। एतन्निश्चित्याह—जहीहि शङ्कां त्यज विकल्पम्। व्रज गच्छ अयोध्याम्। शाधि पालय पृथ्वीम्। '२४९८। जहातेश्च।६।४।११६' इति इत्वे विकल्पिते। '२४९७। ई हल्यघोः।६।४।११३' इतीत्वम्। शासेः '२४८७। शा हौ।६।४।३५' इति शाभावः। तस्याभीयत्वेनासिद्धत्वात् '२४२५। हु-झल्भ्यो हेर्धिः।६।४।१०१'॥

१३६—'वृद्धौरसां राज्य-धुरां प्रवोढुं
कथं कनीयानहमुत्सहेय, ॥
मा मां प्रयुक्थाः कुल-कीर्ति-लोपे,'
प्राह स्म रामं भरतोऽपि धर्म्यम्. ॥ ५४ ॥

वृद्धौरसामित्यादि—भरतः प्राह। धूर्वहनशीला धूर्नयनशीला इत्यर्थः। अनेकार्थत्वाद्धातूनाम् '३१५७। भ्राज-भास—।३।२।१७७' इति क्विप्। '२६५५ राल्लोपः।६।४।२१' इति वलोपः। राज्यस्य सप्ताङ्गस्य धूर्धात्री। प्रकृतिरिति विगृह्य। '९४०। ऋक्-पूः—५।४।७४' इत्यकारप्रत्ययः। '८१२। परवल्लिङ्गं—।२।४।२६' इति धूरिति स्त्रीलिङ्गम्। ततष्टाप्। कीदृशीं वृद्धौरसां वृद्धो ज्येष्ठः औरसः पुत्रो यस्याम्। उरसा निर्मित इति छन्दसो निर्मित इत्यनुवृत्तौ '१६४६। उरसोऽण् च।४।४।९४' इत्यण्। तां तिष्ठति रामे प्रवोढुं कथमुत्सहे। कनीयान् सन्। नैवेत्यर्थः। '३१७७। शक-धृष—।३।४।६५' इत्यादिना वहेः सहावुपपदे तुमुन्। गर्हायां लडपिजात्वोरित्यनुवृत्तौ '२८००। विभाषा कथमि लिङ् च।३।३।१४३' इति लिङ्। सहेरुत्पूर्वस्य आत्मनेपदित्वात् सीयुट्। '२२५७। इटोऽत्।३।४।१०६'। '२३११ लिङः सलोपोऽनन्त्यस्य।७।२।७९' अतो मा मां प्रयुक्थाः मा नियोजय। '२२१९। माङि लुङ्।३।३।१७५'। '२२८१। झलो झलि।८।२।२६'। इति सिचो लोपः। कुलकीर्तिलोपे। लोपयतीति लोपः पचाद्यच्। रघुवंशस्य या कीर्तिः तस्या लोप इति समासः। पूर्वैरनाचरितत्वात्। एवं च धर्म्यं धर्मादनपेतं भरतोऽपि प्राह स्म उक्तवान्॥

पुनश्चाह—

१३७—'ऊर्जस्-वलं हस्ति-तुरङ्गमेतद्,
अमूनि रत्नानि च राज-भाञ्जि, ॥
राजन्यकं चैतदहं क्षितीन्द्रस्
त्वयि स्थिते स्यामिति शान्तमेतत्.' ॥ ५५ ॥

ऊर्जेत्यादि : ऊर्जस्वल बलवत्

ऊर्जनमूर्क् । संपदादित्वात् क्विप् । सा विद्यते यस्येति । '१९२१ । ज्योत्स्नात-मिस्रा-।५।२।११४।' इत्यादिना वलच् । असुरागसश्च । अमूनि च रत्नानि राज शास्त्रि राजगृह्याणि । एतच्च राजन्यकं क्षत्रियसमूहः । क्षितीन्द्रो राजा अः त्वयि स्थिते स्यामिति भवामीति शान्तमेतत् । स्यामिति निमन्त्रणे नियोगक-रणे लिङ् ॥

१३८—इति निगदितवन्तं राघवस् तं जगाद—

'व्रज भरत ! गृहीत्वा पादुके त्वं मदीये, ॥
च्युत-निखिल-विशङ्कः पूज्यमानो जनौघैः
सकल-भुवन-राज्यं कारया ऽस्मन्-मतेन' [1]॥५६॥

इतीत्यादि—इति एवं निगदितवन्तं उक्तवन्तं तं भरतं राघवो रामो जगाद उक्तवान् । किमित्याह—हे भरत मदीये पादुके उपानहौ गृहीत्वा त्वं व्रज गच्छ । विधौ लोट् । अस्मदस्त्यदादित्वे '१३३६। त्यदादीनि च ।१।१।७४।' इति वृद्ध-संज्ञायां तस्येदमर्थे '१३३७। वृद्धाच्छः।४।२।११४।' '१३७३। प्रत्ययोत्तरपदयोश्च ।७।२।९८।' इति मदादेशः । ततश्च पूज्यमानो जनौघैर्जनसमूहैः । च्युतनिखि-लविशङ्कः अपगताशेषविकल्पः । सकलभुवनराज्यं सर्वत्र भूमण्डले राज्यं कारय अनुष्ठापय । पादुके इति योज्यम् । अस्मन्मतेन अस्माकमभिप्रायेण । अत्र मदादेशो न भवति अस्मदो बहुवचनान्तस्य विवक्षितत्वात् । तत्र ह्येकवचन इति वर्तते । ननु कथं मदीय इत्यत्र मदादेशः बहुवचनान्तत्वादिति विरोधः । पादुके रामस्यैव तदस्मन्मतेन इत्यत्रापि एकवचनम् । आवयो रामलक्ष्मणयोर्मतेनेति षष्ठीसमासे न दोषः ॥

इति श्री-जयमङ्गलाऽऽख्यया व्याख्यया समलंकृते श्री-भट्टिकाव्ये—
प्रथमे प्रकीर्ण-काण्डे लक्षण-रूपे तृतीयः परिच्छेदः (वर्गः),
तथा लक्ष्य-रूपे कथानके श्री-राम प्रवासो नाम तृतीयः
सर्गः पर्यवसितः ।

चतुर्थः सर्गः—

१३९—निवृत्ते भरते धी-मानत्रे रामस् तपो-वनम् ॥
प्रपेदे, पूजितस् तस्मिन् दण्डकाऽरण्यमीयिवान्. ॥१॥

निवृत्त इत्यादि—धीमान् बुद्धिमान् अत्र स्थिते मयि कदाचिद्भरतः पुनरेष्यतीत्येवं बुद्धिमान् रामः अत्रेर्महर्षेस्तपोवनं प्रपेदे गतः । तस्मिंश्च तपोवने अर्घ्यपाद्यादिभिः पूजितः । दाण्डक्यो नाम भोजो भार्गवकन्यामहरत् । तच्छा-पात् पांसुवर्षेणाक्रान्तः सबन्धुराष्ट्रविनाशो यस्मिन् स्थाने तत्त्वोपलक्षितम्

[1] १—मालिनी-च्छन्द तल्लक्षणे (२६) श्लोकोक्त टीकन प्रेक्ष्यम्

अरण्यमभूत् । तदीयिवान् गतवान् । '३०९८। उपेयिवान्—।३।२।१०९।' इत्यत्र उपसर्गस्यातन्त्रत्वात्केवलादपीणः क्वसुः ॥

१४०—अटाट्यमानो ऽरण्यानीं स-सीतः सह-लक्ष्मणः ॥
बलाद् बुभुक्षुणोत्क्षिप्य जह्रे भीमेन रक्षसा. ॥ २ ॥

अटाट्येत्यादि—महदरण्यमरण्यानी । '५०५। इन्द्र-वरुण—।४।१।४९।' इत्यादिना हिमारण्ययोर्महत्त्वे ङीषानुकौ । तां अटाट्यमानः अत्यर्थमटन् रामः। 'सूचि-सूत्रि' इत्यादिना यङ् । ससीतः सहलक्ष्मणः '८४९। वोपसर्जनस्य ।५।३।८२।' इति विकल्पेन सभावः । बलात् बलवत्तया जह्रे हृतः । गृहीत इत्यर्थः । कर्मणि लिट् । उत्क्षिप्य उत्थाप्य हस्ताभ्यां केनापि रक्षसा । वैश्रवण-शापात् तुम्बुरुनाम्ना गन्धर्वेण राक्षसीभूतेन विराधाख्येन बुभुक्षुणा भोक्तुमिच्छुना । भीमेन भयानकेन । 'भियः षुक्' इत्यौणादिकषुगभावपक्षे रूपम् ॥

१४१—अवाक्-शिरसमुत्-पादं
कृतान्तेना ऽपि दुर्-दमम् ॥
भङ्क्त्वा भुजौ विराधाऽऽख्यं
तं तौ भुवि निचख्नतुः. ॥ ३ ॥

अवागित्यादि—तं विराधाख्यं राक्षसं । कृतान्तेनापि यमेनापि । दुर्दमं दुःखेन दम्यत इति खल् । तौ रामलक्ष्मणौ भुवि निचख्नतुर्निखातवन्तौ । कीदृशम् अवाक्शिरसं अधोमस्तकम् अवाक् शिरो यस्येति । ऊर्ध्वं पादौ यस्येति उत्पादम् । भुजौ भङ्क्त्वा मोटयित्वा । '३३३०। जान्त-नशां विभाषा ।६।४। ३२' इत्यनुनासिकलोपाभावपक्षे रूपम् ॥

१४२—आंहिषातां रघु-व्याघ्रौ शरभङ्गाऽऽश्रमं ततः ॥
अध्यासितं श्रिया ब्राह्मया शरण्यं शरणैषिणाम्. ॥४॥

आंहीत्यादि—ततो विराधवधानन्तरं रघुव्याघ्रौ शरभङ्गनाम्नो मुनेराश्रमम् आंहिषातां गतवन्तौ । अंहेर्लुङि रूपम् । अध्यासितं आश्रयीकृतम् । श्रिया लक्ष्म्या । ब्राह्मया ब्रह्मसम्बन्धिन्या । ब्रह्मण इयमित्यण् । '११५८। ब्राह्मोऽजातौ ६।४।१७१।' इति निपातनात् टिलोपः । '४७०। टिड्ढाणञ्—।४।१।१५।' इत्यादिना ङीप् । शरणे अवस्थाने साधु अनुकूलं शरण्यम् । '१६५०। तत्र साधुः ।४।४।९८।' इति यत् । शरणैषिणां शरणं त्राणमेषितुं शीलं येषाम् ॥

१४३—पुरो रामस्य जुहवाञ्चकार ज्वलने वपुः ॥
शरभङ्गः प्रदिश्याऽऽरात् सुतीक्ष्ण-मुनि-केतनम्. ॥५॥

पुर इत्यादि—शरभङ्गो रामस्य पुरः अग्रतः वपुः शरीरं ज्वलने अग्नौ

२४९१ भी-ह्री भृ-हुवा ३१३९' इति आम्

आसि श्लुभावे द्विर्वचनम् । किं कृत्वेत्याह–प्रदिश्य कथयित्वा । किम्–आरात् समीपे सुतीक्ष्णनाम्नो मुनेः केतनं आश्रमम् । तत्र वासमुपकल्पयेति ॥

तत्र किमत्रावस्थानमिति चेदाह—

१४४–'यूयं समैष्यथेत्यस्मि-
न्नासिष्महि वयं वने, ॥
दृष्टाः स्थ, स्वस्ति वो, यामः
स्व-पुण्य-विजितां गतिम्' ॥ ६ ॥

यूयमित्यादि—अपि नाम यूयं समैष्यथ आगमिष्यथ । आङ्पूर्व इण् आगमने वर्तते । '७३। एत्येधत्यूठ्सु ।६।१।८९।' इति वृद्धिः । इत्यस्मात्कारणात् । अस्मिन्वने वयमासिष्महि स्थिताः । आसेर्लुङि रूपम् । '८१८। अस्मदो द्वयोश्च ।१।२।५९।' इति चकारस्यानुक्तसमुच्चयत्वादेकत्वे बहुवचनम् । अस्मदागमने किं ते फलमिति चेदाह–दृष्टाः स्थ अधुना दृष्टा भवथ । अस्तेर्मध्यमपुरुषबहुवचने '२४६९। श्नसोरल्लोपः ।६।४।१११।' इत्यकारलोपः । स्वस्ति कल्याणम् । वः युष्मभ्यम् '।५८३। नमः-स्वस्ति–।२।३।१६।' इत्यादिना चतुर्थी । '४०५। बहुवचनस्य वस्नसौ ।८।१।२१।' स्वपुण्येन विजितां लब्धां गतिं जन्म । यामः व्रजामः । रामरूपेण विष्णुरवतीर्णः तं दृष्ट्वा यास्याम इत्यत्र वयं स्थिता इति ॥

१४५–तस्मिन् कृशानु-सादू-भूते सुतीक्ष्ण-मुनि-सन्निधौ ॥
उवास पर्ण-शालायां भ्रमन्ननिशमाऽऽश्रमान्, ॥७॥

तस्मिन्नित्यादि—तस्मिन् शरभङ्गे कृशानुसाद्भूते कार्त्स्न्येनाग्नीभूते । '२११२। विभाषा साति कार्त्स्न्ये ।५।४।५२।' इति सातिः । रामः सुतीक्ष्णस्य मुनेः सन्निधौ समीपे पर्णशालायां पर्णकुट्यामुवास उषितवान् । तत्र कृताधिवासस्य वृत्तिमाह–भ्रमन्ननिशमाश्रमान् पर्यटन् सदा तपोवनानि मुनीन् उपासितुम् ॥

१४६–वनेषु वासतेयेषु निवसन् पर्ण-संस्तरः ॥
शय्योत्थायं मृगान् विध्यन्नातिथेयो विचक्रमे ॥८॥

वनेष्वित्यादि—वासतेयेषु वसतौ साधुषु । '१६५६। पथ्यतिथि–।४।४।१०४।' इत्यादिना ढञ् । निवसन् शयानः । संस्तीर्यत इति संस्तरः । '३२३२। ऋदोरप् ।३।३।५७।' पर्णानि संस्तरो यस्येति पर्णसंस्तरः । शय्योत्थायं शय्याया उत्थाय । उत्पूर्वात्तिष्ठतेः । '३३७३। अपादाने परीप्सायां ।३।४।५२।' इति णमुल् । शय्यतेऽस्यामिति शय्या । '३२७६। संज्ञायां ।३।३।९९।' इत्यादिना क्यप् । त्वरया मुखधावनादीन्यपि न कृत्वा । मृगान्विध्यन् ताडयन् । '२४१२। ग्रहि-ज्या–६।१।१६।' इत्यादिना सम्प्रसारणम् । तत्रापि नात्मार्थं लुब्ध इत्याह –आतिथेयः अतिथौ साधुः । पूर्ववत् ढञ् । विचक्रमे विहरतिस्म । '२०११ वे पाद-विहरणे १।३।४१' इति तङ्

१४७—ऋग्-यजुषमधीयानान् सामान्यांश्च समर्चयन् ॥
बुभुजे देव-सात्-कृत्वा शूल्यमुख्यं च होम-वान्. ॥९॥

ऋग्यजुषमित्यादि—ऋक् च यजुश्च ऋग्यजुषम् । '९४५। अचतुर- ।५।४।७७।' इत्यादिना निपातितम् । '९२०। द्वन्द्वाचु-द-ष-हाऽन्तात् समाहारे ।५।४।१०६।' इति टच् । ऋग्वेदं यजुर्वेदं च अधीयानान् पठतः । इङोऽधि- पूर्वस्य लटि शानचि रूपम् । '६२७। न लोक-।२।३।६९।' इति षष्ठीप्रतिषेधः । सामान्यांश्च सामसु साधून् द्विजान् । '१६५०। तत्र साधुः ।४।४।९८।' इति यत् । '११५४। ये चाभावकर्मणोः ।६।४।१६८।' इति प्रकृतिभावः । समर्चयन् पूजयन् । शूल्यमुख्यं च मांसं बुभुजे भुक्तवान् । शूले उखायां च स्थाल्यां संस्कृतम् । '१२१८। शूलोखाद्यत् ।४।२।१७।' । '२७३७। भुजोऽनवने ।१।३।६६।' इति तङ् । किं कृत्वा-देवसात्कृत्वा देवेभ्यो दत्वा । तदधीनं कृत्वा । '२१२४। देये त्रा च ।५।४।५५।' इति चकारात् सातिश्च । होमवान् होमो विद्यते यस्येति । कृताग्निकार्य इत्यर्थः ॥

युग्मम् (१)—

१४८—वसानस् तन्त्रक-निभे सर्वाङ्गीणे तरु-त्वचौ ॥
काण्डीरः खाङ्गिकः शार्ङ्गी रक्षन् विप्रांस्तनुत्र-वान् १०

वसान इत्यादि—असौ रामो वनेष्वानभ्र भ्रान्तवानिति वक्ष्यमाणेन श्लोकेन सम्बन्धः । वसानः परिदधानः । '१०९२। वसँ आच्छादने ।' इत्यस्मात् शानच् । तरुत्वचौ वल्कले अत्यग्रे । तन्त्रकः '१८७०। तन्त्रादचिरापहृते ।५।२ ७०।' इति कन् । तन्निभे तत्तुल्ये । सर्वाङ्गीणे सर्वाङ्गाणि व्याप्नुवत्यौ । '१८०८ तत्सर्व-।५।२।७।' इत्यादिना खः । काण्डीरः काण्डोऽस्यास्तीति । '१९१८। काण्डाण्डादीरन्नीरचौ ।५।२।१११।' । खाङ्गिकः खड्गोऽस्यास्तीति । '१९२२। अत इनिठनौ ।५।२।११५।' खाङ्गिक इति पाठान्तरम् । तत्र खड्गः । '१६०७ प्रहरणं ।४।४।५७।' इति ठक् । शार्ङ्गी सधनुः । तनुत्रवान् तनुं शरीरं त्रायत इति तनुत्रम् । '२९१५। आतोऽनुपसर्गे कः ।३।२।३।' । संसर्गे मतुप् । पिनद्धकवच इत्यर्थः । स एवंविधो विप्रान् ब्राह्मणान् रक्षन् ॥

१४९—हित्वाऽऽशितङ्गवीनानि फलैर् येष्वाशितम्भवम् , ॥
तेष्वसौ दन्दशूकाऽरिर् वनेष्वानभ्र निर्-भयः.॥११॥

हित्वेत्यादि—आशितास्तृप्ता गावो येषु भवन्ति तृणप्रायत्वात् । '२०७९ अषडक्षा-।५।४।७।' इत्यादिसूत्रेण खः पूर्वपदस्य च मान्तत्वं निपात्यते । तान्यरण्यानि हित्वा येषु वनेषु फलैराशितम्भवमाशितस्य भवनं तृप्तिर्वर्तते

१—'द्वाभ्यां युग्ममिति प्रोक्तं, त्रिभिः श्लोकैर् विशेषकम्, ॥
कालापक चतुर्भिः स्यात् तदूर्ध्वं कुलकं स्मृतम्. १४'

।'२९६२। आशिते भुवः-।३।२।४५।' इत्यादिना भावे खच्। तेष्वानभ्र। '५९७। अभ्रँ, ५९८। वभ्रँ' इति गत्यर्थौ धातुः। लिटि '२२४८। अत आदेः।७।४।७०।' इति दीर्घे '२२८८। तस्मान्नुड्द्विहलः।७।४।७१।' इति नुट्। दन्दशूकारिः व्यालानां हन्ता।'२६३५। लुप-सद-।३।१।२४।' इत्यादिना दंशेर्यङ्। तदन्तात् '३१४६। यज-जप-।३।२।१६६।' इत्यादिना ऊकः॥

१५०—व्रातीन-व्याल-दीप्ताऽस्त्रः सुत्वनः परिपूजयन्॥

पर्षद्वलान् महा-ब्रह्मैराट नैकटिकाऽऽश्रमान्. ॥१२॥

व्रातीनेत्यादि—तेषु वनेषु भ्रमन् नैकटिकाश्रमानाट गतवान्। अटेरभ्यासस्य '२२४८। अत आदेः।७।४।७०।' इति दीर्घत्वम्। ग्रामस्यान्तिके क्रोशमात्रं त्यक्त्वा यतयो भिक्षवो ये निवसन्ति ते नैकटिकाः। '१६२४। निकटे वसति।४।४।७३।' इति ठक्। तेषामाश्रमांस्तपोवनानि। कीदृशः। व्रातीनव्यालदीप्तास्त्रः। नानाजातीयाः अनियतवृत्तयः शरीरमायास्य ये जीवन्ति ते व्रातास्तेषां यत्कर्म तदपि व्रातं तेन जीवन्ति इति व्रातीनाः। '१८२२। व्रातेन जीवति।५।२।२१।' इति खञ्। तेषां व्याला हिंस्राः उपघातकाः तेषु दीप्तास्त्रः ज्वलदायुधः। सस्मीति योगविभागात्सः। सुत्वनः सुतवतः परिपूजयन्। सोमपायिन इत्यर्थः। '३०९१। सुयजोर्ङ्वनिप्।३।२।१०३।' तुक्। '३५५। न संयोगात्—६।४।१३७।' इत्यल्लोपो न। पर्षद्वलानिति। 'पर्ष स्नेहने' अस्मात्पर्षते स्निह्यतीति। शृषगसोदिरित्यत्र पर्षेर्बाहुलकादौणादिको दिः पर्षत्। तत्र यदि '१९११। रजः-कृष्या-सुति-पर्षदो वलच्।५।२।११२।' इति तदा पर्षत् विद्यते येषां सुत्वनामिति वलच्। अत्र परिषीदतीति परिषत् क्विबन्तो यथा 'परिषदप्येषा गुणग्राहिणी' तदा परिषद्बलं सहायो येषामिति बहुव्रीहिः। महाब्रह्मैर्महाब्राह्मणैः '८०६। कुमहद्भ्यामन्यतरस्याम्।५।४।१०५।' इति टच्। तैः सहाट॥

युग्मकम् (२)—

१५१—परेद्यव्यद्य पूर्वेद्युरन्येद्युश् चाऽपि चिन्तयन्॥

वृद्धि-क्षयौ मुनीन्द्राणां प्रियं-भावुक-तामगात्॥१३॥

परेद्यवीत्यादि—परेद्यवि परस्मिन् आगामिनि दिवसे इत्यर्थः। अद्यैतस्मिन्नहनि। पूर्वेद्युः पूर्वस्मिन्नहनि अन्येद्युरन्यस्मिन्नहनि चिरातिक्रान्ते चिरगामिनि दिवसे परेद्यवीत्यादिषु दिवसेषु मुनीन्द्राणां वृद्धिक्षयौ उदयापचयौ चिन्तयन्। प्रियम्भावुकतां पूर्वं प्रियाप्रियस्वभावनिर्मुक्तत्वादतथाभूतः सन् प्रियो भवतीति प्रियम्भावुकः। आढ्यसुभगेत्यधिकृत्य '२९७४। कर्तरि भुवः खिष्णुच् खुकञौ।।३।२।५७।' इति खुकञ्। तद्भावः। तामगात् गतः। अर्थान्मुनीन्द्राणामेव। परेद्यव्यादयः शब्दाः '१९७०। सद्यः-परुत्-।५।३।२२' इत्यादिना निपातिताः॥

१५२—आ-निष्ठद्-गु जपन् सन्ध्यां प्रक्रान्तामायतीगवम्॥

पतत्त्रिभ्य. प्रबुद्धः प्रणमन् रविम्. १४

आतीत्यादि—जपन्मन्त्रमिति सामर्थ्यलभ्यम्। सन्ध्याकालोऽधिकरणम्। तेन अत्यन्तसंयोगे द्वितीया। सम्यक् ध्यायन्त्यस्यामिति। '३२८३। आतश्चोपसर्गे।३।३।१०६।' इत्यङ्। किमवधिं सन्ध्यामित्याह—प्रक्रान्तमायतीगवम्। आयत्यः आयान्त्यो भवन्ति यस्मिन् काले गावः अस्मिन्नायतीगवं आरब्धाम्। '६७१। तिष्ठद्गु-प्रभृतीनि—२।१।१७।' इत्यव्ययीभावसमासत्वात्साधुः। '६५७। नाव्ययीभावात्-।२।४।८३।' इति सप्तम्या अम्भावः। आङ्पूर्वादिणः शतरि '२४५५। इणो यण्।६।४।८१।' इति यणि ङीपि च रूपं आयतीति। गावोऽपि गोचरात् गोष्ठमायान्ति दिवसस्यार्धनाडिकावशेषे सन्ध्यापि तदैव प्रवर्तते। कियन्तमेवं जपन्नित्याह—आतिष्ठद्गु इति। तिष्ठन्ति गावो यस्मिन् काले दोहाय। गावो हि रात्रिप्रथमयामस्य नाडिकायामतीतायां विश्रान्ताः सत्यः इत्थाप्य दुह्यन्ते। आतिष्ठदिति '६६७। आङ् मर्यादाभिविध्योः।२।१।१३।' इत्यव्ययीभावः। '६७१। तिष्ठद्गु-प्रभृतीनि च।२।१।१७।' इति चकारस्यानुक्तसमुच्चयार्थत्वादव्ययीभावएव। पुनः समासान्तरं न भवति। प्रातस्तरामिति। प्रातरित्यव्ययं प्रभातवाचि। प्रकर्षविवक्षायां तरप्। तदन्तात् '२००४। किमेत्—।५।४।११।' इत्यादिना आम् अतिप्रभाते। पतत्रिभ्यः कुक्कुटादिभ्यः प्रथमं प्रबुद्ध उत्थितः। '६३९। पञ्चमी विभक्ते।२।३।४२।' इति पञ्चमी। रविमादित्यं प्रणमन् यदा चरति तदा प्रियम्भावुकतामगादिति पूर्वेण योज्यम्॥

१५३—ददृशे पर्ण-शालायां राक्षस्या ऽभीकया ऽथ सः, ॥
भार्योढं तमवज्ञाय तस्थे सौमित्रयेऽसकौ. ॥ १५ ॥

ददृश इत्यादि—पर्णानां शालायां स्थितः स रामः राक्षस्या ददृशे दृष्टः। कीदृश्या। अभीकया कामुक्या। '१८७४। अनुकाऽभिका—।५।२।७४।' इत्यादिना निपातितः। दृशेः कर्मणि लिट्। अथ दर्शनानन्तरं भार्योढं ऊढभार्यमूढा भार्या यस्येति। आहिताग्न्यादिषु दर्शनात् निष्ठान्तस्य परनिपातः। अवज्ञाय अनादृत्य। सज्ञार्थत्वात्। असकौ राक्षसी पापासौ। कुत्सायां '२०२५। अव्यय-सर्वनाम्नामकच्।५।३।७१।' सौमित्रये लक्ष्मणाय। '५३२। श्लाघ-ह्नुङ्।१।४।३४।'इत्यादिना सम्प्रदानसंज्ञा। तस्थे स्वाभिप्रायं मैथुनायाविष्कृतवती। '२६९०। प्रकाशनस्थेयाख्ययोश्च।१।३।२३।' इति प्रकाशने तङ्॥

कलापकम् (४)—

१५४—दधाना वलि-भं मध्यं कर्ण-जाह-विलोचना ॥
वाक्-त्वचेनाऽति-सर्वेण चन्द्र-लेखेव पक्षतौ ॥ १६ ॥

दधानेत्यादि—सा तं प्रार्थयाञ्चक्र इति वक्ष्यमाणेन सम्बन्धः। कीदृशी मध्यं स्तनजघनयोरन्तरम्। वलिभं वलयोऽस्मिन् सन्तीति। '१९४५। तुन्दिवलि—वटेर्भः।५।२।१३९।' दधाना धारयन्ती। कर्णजाहविलोचना। कर्णजाहं

१ (१४८) श्लोकोक्त टीकनं प्रेक्ष्यम्।

कर्णमूलसमीपमित्यर्थः । '१८२५। तस्य पाकमूल-।५।२।२४।' इत्यादिना जाहच्। कर्णजाहयोर्विश्रान्ते विलोचने यस्या इति सप्तम्युपमानेत्यादिना उपपदलोपी बहुव्रीहिः। वाक्त्वचेन वाक् च त्वक् चेति प्राण्यङ्गत्वादेकवद्भावः। '९२०। द्वन्द्वाच्चु-द्-ष-हान्तात्-।५।४।१०६।' इति टच्। अतिसर्वेण अतिक्रान्तेन सर्वम्। अत्यादय इति समासः। '६५५। एकविभक्ति चापूर्वनिपाते।१।२।४४।' इति सर्वशब्दस्योप-सर्जनत्वेऽपि पूर्वनिपातो न भवति अपूर्वनिपात इति प्रतिषेधात्। वाक्त्वचेन वाङ्मयेन माधुर्येण मार्दवेन चासाधारणेनोपलक्षितेनेत्यर्थः। इत्थम्भूते तृतीया। चन्द्रलेखेव पक्षतौ तनुत्वात्। पक्षोऽत्रार्धमासः। तस्य मूले प्रतिपदि। '१८२६। पक्षात्तिः।५।२।२५।' ॥

१५५—सु-पाद् द्विरद-नासोरू मृदु-पाणि-तलाऽङ्गुलिः ॥
प्रथिमानं दधानेन जघनेन घनेन सा ॥ १७ ॥

सुपादित्यादि—शोभनौ पादौ यस्याः असौ सुपात्। '८७९। सङ्ख्यासुपूर्वस्य।५।४।१४०।' इति पादान्तलोपः '४५७। पादोऽन्यतरस्यां।४।१।८।' इति यदा ङीप् नास्ति तदेत्थं रूपम्। द्विरदनासोरूर्द्विरदनासे इव करिपोतकराविव ऊरू यस्याः उपमानपूर्वो बहुव्रीहिः। '५२४। ऊरूत्तरपदादौपम्ये।४।१।६९।' इति ऊङ्। रद्यते अनेनेति रदः दन्तः। '३२९६। पुंसि संज्ञायां घः-।३।३।११८।' करणे। द्वौ रदौ यस्येति द्विरदः। मृदुपाणितलाङ्गुलिः। तलंच अङ्गुलिश्चेति द्वन्द्वः। तत्र घ्यन्ताल्पाच्तरयोः अल्पाच्तरस्य पूर्वनिपातः। पाण्योस्तलाङ्गुलि पाणितला-ङ्गुलि। मृदु पाणितलाङ्गुलि यस्य इति योज्यम्। प्रथिमानं पृथुतां दधानेन धारयता। घनेन उपचितेन जघनेनोपलक्षिता सा राक्षसी॥

१५६—उन्-नसं दधती वक्त्रं शुद्ध-दल्-लोल-कुण्डलम् ॥
कुर्वाणा पश्यतः शंयून् स्रग्विणी सु-हसाऽऽनना ॥१८॥

उन्नसमित्यादि—उच्यते अनेनेति वक्त्रम्। सर्वधातुभ्य औणादिकः ष्ट्रन्। तत्र वक्त्रशब्दो मुखैकदेशे वर्तमानोऽपि कविभिः समुदाये प्रयुज्यते। वक्त्रं मुख-मुन्नसं दधती। '४२७। नाभ्यस्ताच्छतुः।७।१।७८।' इति नुम् न भवति। उन्नता नासिका यस्मिन्निति। अत्र नासिकायाः संज्ञायां नसं चेत्यधिकृत्य '८५८। उपस-र्गाच्च।५।४।११९।' इत्यच्। नासिका च नसादेशमापद्यते। शुद्धदत् शुद्धाः शुक्ला दन्ता यस्मिंस्तच्छुद्धदत् '८८३। अग्रान्तशुद्ध-।५।४।१४५।' इत्यादिना ददादेशः। लोले चञ्चले कुण्डले यस्मिन् तत् लोलकुण्डलम्। पश्यतो जनान् शंयून् विद्य-मानसुखान् कुर्वाणा शं सुखं तदस्यास्तीति। '१९४४। कं-शं-भ्यां ब-भ-युस्ति-तु-त-यसः।५।२।१३८।' इति युस्। सित्वात्पदसंज्ञा। अनुस्वारः। अपश्यतो वा शंयून् कुर्वाणा पश्यतां तु पीडाकरी। स्रग्विणी मालावती। '१९२८। अस्माया-५।२।१२१।' इत्यादिना विनि हसन हस '२२२९ स्वन-ह-सोर्वा ३ ३ ६२' इत्यप् यस्या सा॥

१५७—प्राप्य चञ्चूर्यमाणा ऽसौ पतीयन्ती रघूत्तमम् ॥
अनुका प्रार्थयाञ्चक्रे प्रिया-कर्तुं प्रियं-वदा. ॥ १९ ॥

प्राप्येत्यादि—प्राप्य ढौकित्वा । चञ्चूर्यमाणा गर्हितमाचरन्ती । प्राणिनो हन्तव्या इति । चरेः'२६३५। लुप-सद—।३।१।२४' इत्यादिना भावगर्हायां यङ्। '२६३६। चर-फलोश्च ।७।४।८७' इत्यभ्यासस्य नुक् । '२६३७। उत्परस्यातः ।७।४।८८' इत्युत्वम् । '३५४। हलि च ।८।२।७७' इति दीर्घत्वम् । पतीयन्ती आत्मनः पतिमिच्छन्ती । '२६५७। सुप आत्मनः क्यच् ।३।१।८।' अनुका अभिलाषुका । '१८७४ । अनुका—।५।२।७४।' इत्यादिना निपातितः । रघूत्तमं लक्ष्मणं प्रार्थयाञ्चक्रे प्रार्थितवती । प्रियाकर्तुमनुलोमयितुम् । पतिर्मे स्या इति । '२१२४। सुखप्रियादानुलोम्ये ।५।४।६३।' इति डाच् । प्रियंवदा प्रियवादिनी । '२९५३। प्रिय-वशे वदः खच् ।३।२।३८।' ॥

तां प्रार्थनामाह—

२५८—'सौमित्रे ? मामुपायंस्थाः कम्रामिच्छुर् वशं-वदाम् ॥
त्वद्-भोगीनां सह-चरीम-शङ्कः पुरुषाऽऽयुषम्.'॥२०॥

सौमित्रे इत्यादि—हे सौमित्रे। इच्छुरेषणशीलः । '३१४९। विन्दुरिच्छुः ।३।२।१६९।' इति निपातितः । अशङ्कः निर्विकल्पः सन् । किं मां वञ्चयिष्यतीति । मामुपायंस्थाः परिणय । '२७९०। आशंसायां भूतवच्च ।३।३।१३२।'इति लुङ् । '२७२९। उपाद्यमः स्वकरणे ।१।३।५६।' इति तङ् । '२७३०। विभाषोपयमने ।१।२।१६।' इत्यकित्त्वपक्षे रूपम् । कम्राम् । '३१४७। नमि कम्पि—।३।२।१६७।' इत्यादिना रः । वशंवदाम् । अहं ते वश्येति वदन्तीम् । त्वद्भोगीनां त्वच्छरीराय हिताम् । अवैधव्यादिलक्षणयोगात् '१६७०। आत्मन्विश्वजन—।५।१।९।' इत्यादिना खः । सहचरीं सहगामिनीम् '२९२१। भिक्षा-सेना-दायेषु च ३।२।१७।' इति चकारस्यानुक्तसमुच्चयार्थत्वात् टप्रत्ययः । कियन्तं कालम्—पुरुषायुषं पुरुषस्यायुर्यावत् । '९४५ अचतुर—।५।४।७७।' इत्यादौ निपातितः । '६९१। अत्यन्तसंयोगे च ।२।१।२९।' इति द्वितीया । चरणक्रियायाः कृत्स्नसंयोगात् । यथा मासमुषित इति ॥

१५९—तामुवाच स—'गौष्ठीने वने स्त्री-पुंस-भीषणे ॥
अ-सूर्य-पश्य-रूपा त्वं किम-भीरुररायसे. ॥ २१ ॥

तामित्यादि—राक्षसीं लक्ष्मण उवाच उक्तवान् । किमित्याह–गौष्ठीने वने गोष्ठं भूतपूर्वं यस्मिन्वने । इदानीं नामापि न ज्ञायते । '१८११। गोष्ठात् खञ् भूतपूर्वे ।५।२।१७।' इति खञ् । स्त्रीपुंसभीषणे । स्त्री च पुमांश्चेति स्त्रीपुंसौ । '९४५। अचतुर—।५।४।७७' इत्यादौ निपातितौ । तयोर्भीषण इति षष्ठीसमासः । बिभेतेर्णिचि हेतुभये षुक् । तदन्तात् '२८४१। कृत्यल्युटो बहुलम् ।३।३।११३।' इति कर्तरि ल्युट । तस्मिन्नभीरुः सती किमित्यरायसे अत्यर्थमटसि ।

अर्तेः 'सूचि-सूत्रि–' इत्यादिना यङ् । '२६३३। यङि च ।७।४।३०।' इति गुणः '२४४६। न न्द्राः ।६।१।३।' इति प्रतिषेधस्य प्रतिषेधो यकारपरस्य न द्वित्वनिषेध इति रेफो द्विरुच्यते । भयशीला भीरुः । '३१५४। भियः क्रुक्लुकनौ ।३।२ १७४।' क्रियाशब्दत्वात् '४२१। ऊङुतः ।४।१।६६।' इति ऊङ् न भवति । अमनुष्यत्वाच्च । तथाहि लक्ष्मणेनामानुषीयमिति ज्ञाता । तथाच भङ्ग्या दर्शयन्नाह—असूर्यम्पश्यरूपा । अतिगोपनीयतया सूर्यमप्यलिषिद्धदर्शनं न पश्यतीति । '२९५१। अ-सूर्य-ललाटयोः–।३।२।३६।' इत्यादिना खश् । '२३६०। पाघ्रा–।७।३।७८।' इत्यादिना पश्यादेशः । असूर्यम्पश्यं रूपं यस्या इति समासः सा न पश्यतीति रूपमपि न पश्यतीत्युक्तम् ॥

१६०—मानुषानभिलष्यन्तो रोचिष्णुर् दिव्य-धर्मिणी ॥
त्वमप्सरायमाणेह स्व-तन्त्रा कथमञ्चसि. ॥ २२ ॥

मानुषानित्यादि—मनोरपत्यानि मानुषाः । '११८५। मनोर्जातावञ्यतौ षुक् च ।४।१।१६१।' तानभिलष्यन्ती कामयन्ती रन्तुमिच्छन्ती । '२३२१। वा भ्राश–।३।१७०।' इत्यादिना श्यन् । रोचिष्णुः रोचनस्वभावा । '३११६। अलङ्कृञ्–।३।२।१३६।' इत्यादिना इष्णुच् । अत एव दिव्यधर्मिणी । दिवि भवा दिव्या देवाः । राक्षसा अपि देवयोनित्वात् । तेषां धर्मः स्वभावः सोऽस्या अस्तीति । '१९३८। धर्म-शील–।५।२।१३२।' इत्यादिनेनिः । अप्सरायमाणा अप्सरा इवाचरन्ती । राक्षसभावं गोप्तुमिति भावः । 'उपमानादाचारे' इत्यधिकारे '२६६५। कर्तुः क्यङ् स-लोपश्च ।३।१।११।' 'ओजसोऽप्सरसो नित्यम्' इति वचनात् । इह वने स्वतन्त्रा कथमञ्चसि भ्रमसि । स्व आत्मा तन्त्रः प्रधानं यस्याः । अपराधीनत्वात् । अनयोक्त्या राक्षसीत्वं दर्शयति ॥

१६१—उग्रम्पश्या ऽऽकुले ऽरण्ये शालीनत्व-विवर्जिता ॥
कामुक-प्रार्थना-पट्वी पतिवत्नी कथं न वा. ॥ २३ ॥

उग्रमित्यादि—उग्रम्पश्यन्तीत्युग्रम्पश्याः । पापाशयत्वात् । शबराद्यः । '२९५२। उग्रम्पश्य–।३।२।३७।' इत्यादिना खश् निपात्यते । तैराकुले व्याप्ते अरण्ये । पतिवत्नी जीवत्पतिः कथं केन प्रकारेण न वा नैवं भवसीत्यर्थः । '४८९। अन्तर्वत्पतिवतोर्नुक् ।४।१।३२।' इत्यत्र पतिर्विद्यते अस्या इति मतुप् सिद्धः । जीवत्पत्यां मतुपो वत्वं निपात्यते । नुक् सूत्रेणैव विधीयते । ङीप्प्रत्ययस्तूगित्वादेव सिद्धः । शालीनत्वविवर्जिता । अधृष्टतया वर्जिता । शालाप्रवेशमर्हतीति '१८२१। शालीन-कौपीने–।५।२।२०।' इति खञ् निपात्यते । अधृष्टेऽभिधेये प्रवेशशब्दस्य लोपः । तस्य भावः शालीनत्वम् । कामुकः कामशीलः । '३१३४। लष-पत–।३।२।१५४।' इत्यादिना उकञ् । तस्य ——— पट्वी चतुरा । '५०२। वोतो ४ १ ४४ इति ङीष् ॥

१६२—राघवं पर्ण-शालायामिच्छा ऽनुरहसं पतिम्, ॥
यः स्वामी मम कान्ता-वानौपकर्णिक-लोचनः. ॥२४॥

राघवमित्यादि—रामं पर्णशालायामवस्थितं पतिमिच्छ । अनुरहसं विवेक-ग्राह्यमनुगतो रह इति विगृह्य '९४९। अन्ववतप्ताद्रहसः ।५।४।८१।' इत्यच्। यो राघवो ममापि स्वामी प्रभुः। '२९३२। स्वामिन्नैश्वर्ये ।५।२।१२६।' इति निपातितम्। कान्तावान् सभार्यः। प्रवृत्तसम्भोगोऽसौ नाहमिति दर्शयति। तमेव रूप-शौर्याभ्यां वर्णयन्नाह—औपकर्णिकलोचनः। कर्णयोः समीपमुपकर्णम्। समीपार्थेऽव्ययीभावः। तत्र प्रायभव इति। '१४१५। उपजानूपकर्णोपनीवेष्ठक् ।४।३।४०।' शेषमपि शब्दद्वयं प्रयोक्ष्यते। औपकर्णिके लोचने यस्य। कर्णान्तायतलोचन इत्यर्थः ॥

१६३—वपुश् चान्दनिकं यस्य, कार्णवेष्टकिकं मुखम्, ॥
संग्रामे सर्व-कर्मीणौ पाणी यस्यौपजानुकौ. ॥ २५ ॥

वपुरित्यादि—यस्य राघवस्य वपुः शरीरं चान्दनिकं चन्दनेन सम्पद्यते प्राप्तशोभं भवति। मुखं च कार्णवेष्टकिकम्। कर्णवेष्टकाभ्यां कर्णालङ्काराभ्यां कार्णवेष्टकिकम्। तत्रोभयत्र '१७६३। सम्पादिनि ।५।१।९९।' इति ठक्। पाणी हस्तौ संग्रामे युद्धे सर्वकर्मीणौ धनुःखड्गादिव्यापारकर्माणि व्याप्नुतः। '१८०८। तत्सर्वादेः—।५।२।७।' इति खः। औपजानुकौ आजानुकौ। आजानुलम्बावित्यर्थः। अत्र ठक्। '१२२१। इसुसुक्तान्तात्कः ।७।३।५१।' ॥

१६४—बद्धो दुर्बल-रक्षाऽर्थमसिर् येनौपनीविकः, ॥
यश् चापमाश्मन-प्रख्यं सेषुं धत्तेऽन्य-दुर्वहम्. ॥२६॥

बद्ध इत्यादि—येन असिः खड्गः औपनीविकः। नीविसमीपे प्रायेण भवतीति। स हि नीवीं प्राप्य वर्तमानः पार्श्वयोश्चोर्ध्वं निबद्धः। किमर्थं—दुर्बलरक्षार्थं दुर्बलरक्षायै इदमित्यस्मिन्नर्थे चतुर्थी। तदर्थेत्यादिना सः। तन्नार्थेन नित्यसमासः सर्वलिङ्गता च। यश्चापं धनुर्धत्ते धारयति। आश्मनप्रख्यम्। अश्मनो विकार इत्यण्। '११५५। अन् ।६।४।१६७।' इति प्रकृतिभावे प्राप्ते आश्मनो विकार उपसङ्ख्यानमिति टिलोपः पाक्षिकः। विभाषजोरित्यतो मण्डूकप्लुत्या विभाषाग्रहणानुवृत्तेर्विकारे वाच्ये। अन्यत्राश्मन एव भवति। आश्मनेन प्रख्या सादृश्यमस्य तदाश्मनप्रख्यमुपलघटितमिव। सेषुं सशरम्। अन्यदुर्वहं दुःखेनोह्यत इति खल्। रामादन्येन दुर्वहमित्यर्थः ॥

१६५—जेता यज्ञ-द्रुहां संख्ये धर्म-सन्तान-सूर् वने ॥
प्राप्य दार-गवानां यं मुनीनामभयं सदा.' ॥ २७ ॥

जेतेत्यादि—यज्ञाय द्रुह्यन्तीति यज्ञद्रुहो राक्षसाः। '२९७५। सत्सूद्विष—३।२।६१।' इत्यादिना क्विप्। तेषां संग्रामे जेता। तृजन्तोऽयम्। ततश्च कृत्य-

योगे कर्मणि षष्ठी। धर्मसन्तानसूः पूर्ववत् क्विप्। धर्मरत इत्यर्थः। वने वर्तमानानां मुनीनां वानप्रस्थादीनामित्यर्थः। तेषां भार्याग्निपरिग्रहात् यानि दारगवानि। दाराश्च गावश्चेति दारगवानि '९४५। अचतुर–५।४।७७।' इत्यादिना निपातितानि। दारयन्तीति दाराः। 'दारजारौ कर्तरि णिलुक्च' इति घञ्। तेषां च येनाभयं सदा दत्तमिति योज्यम्। येषामेव प्राप्तिक्रिया तेषामेवाभयमिति समानकर्तृकत्वम्॥

१६६—ततो वावृत्यमाना ऽसौ राम-शालां न्यविक्षत, ॥
'मामुपायंस्त रामे'ति वदन्ती सा ऽऽदरं वचः. ॥२८॥

तत इत्यादि—ततो लक्ष्मणवचनानन्तरमसौ राक्षसी वावृत्यमाना रामं वृण्वाना। '१२३५। वा वृतुँ वरणे।' इति दैवादिकः आत्मनेपदी। रामशालां रामस्य पर्णकुटीरं न्यविक्षत प्रविष्टा। विशेः '२३३६। शल इगुपधादनिटः क्सः ।३।१।४५।'। '२६८३। नेर्विशः ।१।३।१७।' इति तङ्। मामुपायंस्त रामेति हे राम अहं प्रार्थये भवान् मामुपायंस्त परिणयत्विति वाक्यभेदेन योज्यम्। '२७९०। आशंसायां भूतवच्च ।३।३।१३२।' इति लुङ्। '२७२९। उपाद्यमः स्वकरणे ।१।३।५६।' इति तङ्। '२७३०। विभाषोपयमने ।१।२।१६।'। इत्यकित्वपक्षे रूपम्। इत्येवं वचः सादरं वदन्ती॥

१६७—'अ-स्त्रीको ऽसावहं स्त्री-मान्, स पुष्यति-तरां तव ॥
पतिरित्यब्रवीद् रामस्—'तमेव व्रज, मा मुचः.'॥२९॥

अस्त्रीत्यादि—असौ लक्ष्मणोऽस्त्रीकः। न विद्यते अस्य स्त्रीति। '८३३। नद्यृतश्च ।५।४।१५३।' इति कप्। '८३५। न कपि ।७।४।१४।' इति ह्रस्वप्रतिषेधः। अहं पुनः स्त्रीमान् सभार्यः। प्रशंसायां मतुप्। स एव लक्ष्मणः। पुष्यतितराम् अतीव पुष्यति लक्ष्मणस्तव पतिः। '२००२। तिङश्च ।५।३।५६।' इति तरप्। '२००४। किमेत्ति–।५।४।११।' इत्याम्। तस्मात्तमेव लक्ष्मणं व्रज गच्छ। मा मुचः मा त्याक्षीः। मुचेर्लुङ् । लृदित्वादङ्। इति एवमब्रवीद्रामः उक्तवान्। आदादिकस्य ब्रूञो लङि '२४५२। ब्रुव ईट् ।७।३।९३।' इति ईटि रूपम्॥

१६८—लक्ष्मणं सा वृषस्यन्ती महोक्षं गौरिवा ऽगमत् ॥
मन्मथा ऽऽयुध-सम्पात-व्यथ्यमान-मतिः पुनः. ॥३०॥

लक्ष्मणमित्यादि—लक्ष्मणं पुनर्भूयोऽगमत्। लक्ष्मणं प्रति गता। यथा गौर्वृषस्यन्ती मैथुनेच्छावती महोक्षं महावृषम्। वृषस्यन्तीत्युपमानविशेषणमेतत्। तेन वृषं लब्धुमिच्छन्तीति क्यच्। '२६६९ अश्व-क्षीर–।७।१।५१।' इत्यादिना असुक्। तच्चाश्ववृषयोर्मैथुनेच्छायामिति। तद्वदागमस्। महोक्षमिति '९४५। अचतुर–।५।४।७७।' इत्यादिसूत्रेण निपातितम्। मन्मथस्यायुधानि शराः। आयुध्यन्ते एभिरित्यायुधानि [illegible] क तेषां सम्पातः संश्लेष तस्मात् [illegible] मतिर्मनो यस्या॥

१६९—तस्याः सासद्यमानाया लोलूया-वान् रघूत्तमः ॥
असिं कौक्षेयमुद्यम्य चकाराऽपन्नसं मुखम्. ॥ ३१ ॥

तस्या इत्यादि—सासद्यमानायाः समीपे गर्हितं सीदन्त्याः प्रविशन्त्याः। '२६३५। लुप-सद-।३।१।२४।' इत्यादिना यङ्। रघूत्तमो लक्ष्मणः। मुखमपनसमपगतनासिकं चकार। '८५८। उपसर्गाच्च।५।४।११९।' इत्यच्। नासिका च नसादेशमापद्यते। तत्र संज्ञायामिति नानुवर्तते। किं कृत्वा-कौक्षेयमसिमुद्यम्य उत्क्षिप्य। कुक्षौ भव इति '१४३३। दृति-कुक्षि-।४।३।५६।' इत्यादिना ढञ्। कौक्षेयः। लोलूयावान् अत्यर्थं लवनक्रियायुक्तः। लुनातीति लोलूया। यङन्ताद् '३२७९। अप्रत्ययात् ।३।३।१०२।' इत्यकारः। सा विद्यते यस्येति मतुप् ॥

१७०—'अहं शूर्प-णखा नाम्ना
नूनं ना ऽज्ञायिषि त्वया, ॥
दण्डो ऽयं क्षेत्रियो येन
मय्यपाती'ति सा ऽब्रवीत्. ॥ ३२ ॥

अहमित्यादि—सा राक्षसीत्यब्रवीत्। अहं शूर्पणखेति नाम्ना नूनमवश्यं त्वया नाज्ञायिषि न ज्ञातास्मि। ज्ञा इत्यस्मात्कर्मणि लुङ्। '२७५७। स्य-सि-।६।४।६२।' इत्यादिना अजन्तत्वात् चिण्वदिट्। '२७६१ आतो युक् ।७।३।३३।' इति युक्। '५१०। स्वाङ्गाच्च ।४।१।५४।' इति ङीषि प्राप्ते '५१४। नखमुखात् संज्ञायां ।४।१।५८।' इति प्रतिषेधः। '८५७। पूर्वपदात्संज्ञायां-।८।४।३।' इति णत्वम्। अज्ञाने कारणमाह—येनायं दण्डो नासाच्छेदनलक्षणो मय्यपाति पातितः। पातेः कर्मणि लुङ्। चिणादेशः '२२८२। अत उपधायाः ।७।२।११६।' इति वृद्धिः। '२३२९। चिणो लुक् ।६।४।१०४।' क्षेत्रियः परक्षेत्रे चिकित्स्यः परक्षेत्रे जन्मान्तरशरीरे यदि शक्यश्चिकित्सितुं तदा नासिकायाः सम्भवात्। '१८९२ क्षेत्रियच् परक्षेत्रे चिकित्स्यः ।५।२।९२।' इति निपातनम् ॥

१७१—पर्यशाप्सीद् दिवि-ष्ठा ऽसौ संदर्श्य भय-दं वपुः ॥
अपिस्फवच् च बन्धूनां निनङ्क्षुर् विक्रमं मुहुः ॥ ३३ ॥

पर्यशाप्सीदित्यादि—असौ राक्षसी पर्यशाप्सीत् आक्रुष्टवती। शपेरनिटः सिचि हलन्तलक्षणा वृद्धिः। शप उपालम्भन इति तङ् न भवति उपालम्भनं हि वाचा शरीरस्पर्शनम्। दिविष्ठा नभसि वर्तमाना। '९७२। तत्पुरुषे कृति बहुलम् ।६।३।१४।' इति सप्तम्या अलुक्। '२९१८। अम्बाम्ब-।८।३।९७।' इति षत्वम्। भयदं रौद्रं वपुः शरीरं संदर्श्य दर्शयित्वा। बन्धूनां विक्रमं शौर्यं मुहुः पुनः पुनः। अपिस्फवत् स्फीतीचकार। '२५७०। अर्तिह्री-।७।३।३६।' इत्यादिना णाविष्यनुत्नुसौ '२५९७। स्फायो वः ।७।३।४१।' इति वकारः। स्फाय-

तेश्चङि णिलोपः। ह्रस्वद्विर्वचनादि । अभ्यासस्य खयः शेषः । चर्त्वमित्वं च सन्वद्भावे। निनङ्क्षुः नष्टुमिच्छुरित्यर्थः। नशेः सनि '२५१७। मस्जि-नशोर्झलि ।७।१।६०।' इति नुम् ॥

१७२—खर-दूषणयोर् भ्रात्रोः पर्यदेविष्ट सा पुरः, ॥
विजिग्राहयिषू रामं दण्डकाऽरण्य-वासिनोः. ॥ ३४ ॥

खरेत्यादि—खरदूषणयोर्भ्रात्रोर्दण्डकारण्यवासिनोः पुरः अग्रतः पर्यदेविष्ट परिदेवनं कृतवतीति। '५३४। देवृँ देवने।' इत्यस्मादात्मनेपदिनः सेटो लुङि रूपम्। परिदेवने कारणमाह—विजिग्राहयिषुः रामं विग्राहयितुं योधयितुमिच्छुः। ग्रहेर्ण्यन्तस्य सन्नन्तस्य रूपम्। '१७३। रोरि।८।३।१४।' इति रेफलोपः। '१७४। ढ्रलोपे-।६।३।१११।' इति दीर्घत्वम् ॥

किं पर्यदेविष्ट इत्याह—

१७३—'कृते सौभागिनेयस्य भरतस्य विवासितौ ॥
पित्रा दौर्भागिनेयौ यौ, पश्यतं चेष्टितं तयोः.॥३५॥

कृते इत्यादि—भरतस्य कृते कार्यनिमित्तं राज्ये अभिषेक्तव्यमिति। सुभगा कैकयी तस्या अपत्यं सौभागिनेयः '११२३। स्त्रीभ्यो ढक् ।४।१।१२०।' कल्याण्यादीनामिनङ्। तत्र सुभगा दुर्भगा चेति पठ्यते। '११२३। हृद्भग-।७।३।१९।' इत्युभयपदवृद्धिः। पित्रा यौ विवासितौ निष्कासितौ दौर्भागिनेयौ कौसल्या सुमित्रा च दुर्भगे तयोरपत्ये रामलक्ष्मणौ तयोश्चेष्टितं नासाच्छेदनं पश्यतम्। विधौ प्रार्थनायां वा लोट्। थसस्तम् ॥

१७४—मम रावण-नाथाया
भगिन्या युवयोः पुनः ॥
अयं तापसकाद् ध्वंसः,
क्षमध्वं, यदि वः क्षमम्. ॥ ३६ ॥

ममेत्यादि—रावणो नाथः प्रभुर्यस्याः मम विशेषणम्। युवयोर्भगिन्या अयं तापसकात् कुतापसात्। कुत्सायां कन्। ध्वंसो नासिकाविनाशः। यदि वः युष्माकं गुरूणां क्षमं युक्तम् क्षन्तुमित्यर्थात्। युष्मदि गुरावेकेषामिति बहुवचनं तयोर्ज्येष्ठत्वात्। तर्हि क्षमध्वं उपेक्षध्वम्। रावण एव ज्ञास्यतीति भावः ॥

पुनरप्येजयितुमाह—

१७५—अ-संस्कृत्रिम-संव्यानावनुप्त्रिम-फलाशिनौ ॥
अ-भृत्रिम-परीवारौ पर्यभूतां तथापि माम्.'॥ ३७ ॥

असमित्यादि—संस्कारेण वापेन भरणेन च निर्वृत्तं संस्कृत्रिमम्। उप्त्रिमं भृत्रिमं च '३२६१ ड्वित क्त्रिः ३ ३ ८८' क्त्रेर्मम् नित्यम् '२५५० सम्परिभ्य ६ १ १३७' इति सुट् सम्पूर्वस्य क्वचिदभूषणेऽपीष्यते सस्कृत्रिम

न विद्यते येषामिति नञ्समासः । असंस्कृत्रिमाणि संव्यानानि परिधानानि उत्तरीयाणि ययोः । वल्कवाससावित्यर्थः । अनुप्तिमाणि फलानि अशनमाहारो ययोः तौ वन्यफलाहारौ न शालिभोजनौ । परिव्रियतेऽनेनेति घञ् '१०४४। उपसर्गस्य घञि–।६।३।१२२।' इति दीर्घः। मृगाणाममनुष्यत्वात्। अकृत्रिमः परीवारोऽनुजीविलोको ययोस्तौ मृगपरीवारौ। तथापि मां पर्यभूतां परिभूतवन्तौ। लुङि रूपम् ॥

१७६–'श्वःश्रेयसमवाप्तासि' भ्रातृभ्यां प्रत्यभाणि सा–॥
प्राणिवस् तव मानाऽर्थं, व्रजाऽऽश्वसिहि, मा रुदः. ॥

श्वःश्रेयसमित्यादि—श्वःशब्दः प्रशंसामाह । शोभनं श्रेय इति वाक्ये '९४८। श्वसोवसीयः श्रेयसः ।५।४।८०।' इत्यच् । मयूरव्यंसकादित्वात् सः । श्वःश्रेयसं कल्याणमवाप्तासि प्राप्स्यसि । भविष्यदनद्यतने लुट् । मारयावस्तावित्युक्तं भवति ताभ्यां भ्रातृभ्यां प्रत्यभाणि प्रतिभणिता सा । कर्मणि लुङ् । प्राणिवस्तव मानार्थम् । तव मानखण्डनं मा भूदिति जीवावः । '११४३।श्वसँ प्राणने' '११४४। अनँ च' । '२४७४।रुदादिभ्यः सार्वधातुके।७।२।७६।'इति इट्। '२४७८। 'अनितेः ।८।४।१९।' इति णत्वम् । तस्माद् व्रज यथास्थानं गच्छ । आश्वसिहि उद्वेगं त्यज । विधौ प्रार्थनायां वा लोट् । मा रुदः । '२२१९। माङि लुङ् ।३।३।१७५।' '२२६९। इरितो वा ।३।१।५७।' इत्यङ् यदा नास्ति तदा मा रोदीरिति ॥

१७७–जक्षिमो ऽनुपराधेऽपि
नरान् नक्तं-दिवं वयम्, ॥
कुतस्-त्यं भीरु ! यत् तेभ्यो
द्रुह्यद्भ्यो ऽपि क्षमामहे.' ॥ ३९ ॥

जक्षिम इत्यादि—वयं अनपराधेऽपि । नक्तं च दिवा च नक्तन्दिवम् । '९४५।अचतुर–।५।४।७७।'इति निपातितम्। नरान् जक्षिमो भक्षयामः । '११४५। जक्ष भक्ष-हसनयोः ।' इति भक्षार्थस्य '२४७४। रुदादिभ्यः–।७।२।७६।' इतीट् । '८१८। अस्मदो द्वयोश्च ।१।२।५९' इति द्वित्वे वयमिति बहुवचनम् । यत एवं हे भीरु ! संबुद्धौ गुणो न भवति 'संज्ञापूर्वको विधिरनित्यः' इति । कुतस्त्यम् कुत एतदागतम् । '१३२४। अव्ययात् त्यप् ।४।२।१०४।' अमेहक्वतसित्रेभ्य इति त्यप् । तेभ्यो नरेभ्यो द्रुह्यद्भ्योऽपि द्रोहं कुर्वाणेभ्योऽपि क्षमामहे । नैवेत्यर्थः । '५७५। क्रुध-द्रुह–।१।४।३७।' इति सम्प्रदानत्वम् । क्षमेर्गम्यमानो नञर्थस्तस्यासूयार्थत्वात् क्षमध्वं यदि वः क्षममित्यस्य प्रतिवचनम् ॥

१७८–तौ चतुर्दश-साहस्रबलौ निर्ययतुस् ततः ॥
पारश्वधिक-धानुष्क-शाक्तिक-प्रासिकाऽन्वितौ.॥४०॥

तावित्यादि—ततो निगदनादुत्तरकालं निर्ययतुर्निर्गतवन्तौ । चतुर्दशसहस्राणि परिमाण यस्य बलस्य तदस्य

मानविंशतिकसहस्त्रवसनादण् ।५।१।२७।' प्राग्वतेः । '१७५२। सङ्ख्यायाः संवत्सर ।७।३।१५।' इत्युत्तरपदवृद्धिः । चतुर्दशसाहस्रं बलं ययोः तौ । तथा पारश्वधिकधानुष्कयाष्टिकप्रासिकान्वितौ । परश्वधः प्रहरणमेषामिति '१६०८। परश्वधात् ठञ् ।४।४।५८।' तथा धनुः प्रहरणमेषां । यष्टिः प्रहरणमेषामिति '५६०९। शक्ति-यष्ट्योरीकक् ।४।४।५९।' प्रासः कुन्तः प्रहरणमित्यौत्सर्गिकष्ठक् । तत्र धनुषष्ठक् । १२२१। इसुसुक्तान्तात्कः ।७।३।५१।' ततः सेनाङ्गत्वात्कृतैकवद्भावः तेनान्वितावनुगतौ ॥

१७९—अथ सम्पततो भीमान् विशिखै राम-लक्ष्मणौ ॥
बहु-मूर्ध्नो द्वि-मूर्धांश्च त्रि-मूर्धांश् चा ऽहतां मृधे. ४१

अथेत्यादि—अथ एतस्मिन् प्रस्तावे रामलक्ष्मणौ मृधे संग्रामे विशिखैः शरैरहतां हतवन्तौ । हन्तिः परस्मैपदी तस्माल्लुङि तसस्ताम् । तस्य ङित्त्वे '२४२८। अनुदात्त-।६।४।३७।' इत्यादिना अनुनासिकलोपः । कान्-राक्षसान् । विशेषणोपादानात् विशेष्यप्रतिपत्तिः । प्रकृतत्वाद्वा । सम्पततोऽभिपततः । बहुमूर्ध्नो बहुशिरसः । तथा द्विमूर्धांस्त्रिमूर्धांश्च । '८५४। द्वि-त्रि-भ्यां ष मूर्ध्नः ।५।४।११५।' इति समासान्तः षः । अत एव भीमान् भयानकान् । त्रिमूर्धांश्चेत्यत्र '१४०। नश्छव्यप्रशान् ।८।३।७।' इति रुः । पूर्वस्य त्वनुनासिकः । '१३८। विसर्जनीयस्य सः ।८।३।३४।' इति श्चुत्वम् ॥

१८०—तैर् वृक्ण-रुग्ण-सम्भुग्न-क्षुण्ण-भिन्न-विपन्नकैः ॥
निमग्नोद्विग्न-संह्रीणैः पप्रे दीनैश् च मेदिनी. ॥ ४२ ॥

तैरित्यादि—तैः राक्षसैर्मेदिनी पप्रे पूरिता । '११३५। प्रा पूरणे ।' इत्यस्मात्कर्मणि लिट् । वृक्णैः छिन्नैः । रुग्णैः भग्नहस्तपादैः । सम्भुग्नैः वक्रीकृतदेहैः । क्षुण्णैः सम्पिष्टशरीरैः । भिन्नैः विदारितैः । विपन्नकैः नष्टैः । '२०३१। अनुकम्पायां कन् ।५।३।७६।' निमग्नैः परिभूतैः । उद्विग्नैर्भीतैः । संह्रीणैर्लज्जितैः । वयमपीदृशीं दशां प्राप्ता इति । दीनैः हा मातः हा भ्रातरित्येवं भाषमाणैः । तत्र वृश्चि-रुजि-भुजि-मस्जि-विजि-भ्यो निष्ठायां '३०१९। ओदितश्च ।८।२।४५।' इति नत्वम् । '३७८। चोः कुः ।८।२।३०।' इति कुः । क्षुदि-भिदि-पदि-भ्यो '३०१६। र-दाभ्यां—।८।२।४२।' इति दस्य च नः । संह्रीण इति '३०३७। नुद-विद—।८।२।५६।' इत्यादिना । '१२०९। दी-ङ् क्षये ।' इत्यस्य स्वादय ओदितः इति '३०१९। ओदितश्च ।८।२।४५।' इति नत्वम् ॥

१८१—के-चिद् वेपथुमासेदुर् अन्ये दवथुमुत्तमम्, ॥
स-रक्तं वमथुं केचिद्, भ्राजथुं न च के-चन. ॥ ४३ ॥

केचिदित्यादि—तेषां मध्ये केचित् वेपथुं कम्पम् । '३९३। टु-वेपृँ कम्पने ।' आसेदुः प्राप्ताः । अन्ये महान्तम् । '१२३६। टु-दु उप तापे केचिद्वमथु छर्दनं सरक्तं सशोणितम् ९०६ टु-वमँ उद्गिरणे भ्राजथुं

शोभां नैव केचन न केचिदपि '८०८। टु-भ्राजृ दीप्तौ।' सर्वत्र '३२६७। द्वितो-ऽथुच्। ३।३।८९।' ॥

१८२—मृगयुमिव मृगोऽथ दक्षिणेर्मा,
दिशमिव दाह-वतीं मरावुदन्यन्, ॥
रघु-तनयमुपाययौ त्रि-मूर्धा,
विषभृदिवोग्र-मुखं पतत्रि-राजम्, ॥ ४४ ॥

मृगयुमित्यादि—अथैतस्मिन् राक्षसविध्वंसनप्रस्तावे त्रिमूर्धः त्रिशिरा नाम राक्षसः रघुतनयमुपाययौ उपागतः। मृगयुमिव लुब्धकमिव। मृगान् यातीति मृगयुः। मृगय्वादयश्चेत्यौणादिककुप्रत्ययान्तः। दक्षिणेर्मा दक्षिणे ईर्मं व्रणं यस्येति। '८३५। दक्षिणेर्मा लुब्धयोगे।५।४।१२६।' इत्यनिच्। यथा मृगो लुब्धकव्रणि-तदक्षिणाङ्गः तमेव मरणायोपयाति। दिशमिव दाहवतीं यथा दिशं दावाग्नियुतां मरौ निर्जले देशे मृग उदन्यन् उदकपानाभिलाष उपयाति। उदकमिच्छति। '२६५७। सुप आत्मनः-।३।१।८।' इति क्यच्। उदकस्योदन् भावः। '२६६१। अशनायो-।७।४।३४।' इत्यादिना निपातितः। तदन्ताल्लट् शतृप्रत्ययः। विषभृ-दिव यथा विषधरः सर्पं उग्रमुखं भीषणमुखं पतत्रिराजं गरुडमुपयाति तद्वत्तमि-ति। '७८८। राजाऽहःसखिभ्यष्टच्।५।४।९१।' ॥

१८३—[2]शित-विशिख-निकृत्तकृत्स्न-वक्त्रः
क्षिति-भृदिव क्षिति-कम्प-कीर्ण-शृङ्गः ॥
भयमुपनिदधे स राक्षसानाम्
अ-खिल-कुल-क्षय-पूर्व-लिङ्ग-तुल्यः ॥ ४५ ॥

शितेत्यादि—त्रिमूर्धा राक्षसानां भयमुपनिदधे उपनिहितवान्। कीदृशः शितविशिखैस्तीक्ष्णविशिखैः निकृत्तानि छिन्नानि कृत्स्नानि सर्वाणि वक्त्राणि मुखा-नि यस्य सः। क्षितिभृदिव भूधर इव। कीदृशः क्षितिकम्पकीर्णशृङ्गः क्षितेर्भूमेः कम्पेन कीर्णानि क्षिप्तानि शृङ्गाणि यस्य क्षितिभृतः। अखिलस्य सर्वस्य कुलस्य क्षये विनाशे यत् पूर्वं लिङ्गं तेन तुल्यः असावप्यखिलराक्षसक्षयस्य पूर्वलिङ्गतुल्यः॥

इति श्री-जयमङ्गलाऽऽख्यया व्याख्यया समलंकृते श्री-भट्टिकाव्ये—
प्रथमे प्रकीर्ण-काण्डे लक्षणरूपे चतुर्थः परिच्छेदः (वर्गः),
तथा लक्ष्य-रूपे कथानके श्री-राम-प्रवासो नाम चतुर्थः
सर्गः पर्यवसितः।

१—सर्गान्तत्वाद् वृत्त-भेदः। तदर्धसमजातौ 'पुष्पिताग्रा' नाम। तल्लक्षणम्—"अयुजि न-युग-रेफ-तो यकारो, युजि च न-जौ जर-गाश्च पुष्पिताग्रा॥" इति-वृत्तरत्नाकरे भट्ट-केदारः। २—(१८२) श्लोक-स्थं टीकनं प्रेक्ष्यम्।

पञ्चमः सर्गः—

१८४—निराकरिष्णू वर्तिष्णू वर्धिष्णू परतो रणम् ॥
उत्पतिष्णू सहिष्णू च चेरतुः खर-दूषणौ. ॥ १ ॥

निरेत्यादि—खरदूषणौ रणं परितः समन्तात्। 'अभित–' इत्यादिना द्वितीया। चेरतुः भ्रान्तौ। निराकरिष्णू शत्रुनिराकरणशीलौ। वर्तिष्णू अभिमुखं वर्तनशीलौ न पलायनशीलौ। वर्धिष्णू मायया महाप्राणोद्भावनशीलौ। उत्पतिष्णू नभ उत्पतनशीलौ। सहिष्णू शस्त्रप्रहारसहनशीलौ। सर्वत्र '३११६। अलंकृञ्–।३।२।१३६।' इत्यादिना इष्णुच् ॥

१८५—तौ खड्ग-मुसल-प्रास-चक्र-बाण-गदा-करौ ॥
अकार्ष्टामायुध-च्छायं रजः-सन्तमसे रणे. ॥ २ ॥

तावित्यादि—रणे रणभूमौ रजःसन्तमसे। सङ्गतं तमः सन्तमसम्। '९४७। अवसमन्धेभ्यस्तमसः ।५।४।७९।' इत्यच्। रजसा सन्तमसं अस्मिन् इति रजःसन्तमसं तस्मिन् रजसा कृतान्धकारे तौ खरदूषणौ आयुधच्छायमायुधबाहुल्यमकार्ष्टाम् कृतवन्तौ। आयुधानां छायेति '८२५। छाया-बाहुल्ये ।२।४।२२।' इति नपुंसकत्वे ह्रस्वत्वम्। खड्गादीनां बाणान्तानां द्वन्द्वैकवद्भावं कृत्वा पश्चात्तेन सहिता गदेति शाकपार्थिवादित्वात् सः। अन्यथा समुदायस्य '९१०। जातिरप्राणिनाम् ।२।४।६।' इत्येकवद्भावेन नपुंसकलिङ्गता स्यात् बाणगदमिति। खड्गमुसलप्रासचक्रबाणगदाः करे येषामिति समासे प्रहरणार्थेभ्य इत्यादिना करशब्दस्य परनिपातः ॥

१८६—अथ तीक्ष्णाऽऽयसैर् बाणैरधि-मर्म रघूत्तमौ ॥
व्याधं व्याधम-मूढौ तौ यम-सात्-चक्रतुर् द्विषौ. ॥३॥

अथेत्यादि—अथैतस्मिन् संग्रामे रघूत्तमौ रामलक्ष्मणौ कर्तृभूतौ। कर्मभूतौ द्विषाविति। '२९७५। सत्सूद्विष–।३।२।६१।' इत्यादिना क्विप्। यमसाच्चक्रतुः यमाधीनौ कृतवन्तौ। '२१२५। तदधीनवचने ।५।४।५४।' इति सातिः। तीक्ष्णायसैर्बाणैः। तीक्ष्णमायसं फलं येषामिति। व्याधं व्याधं विद्ध्वा विद्ध्वा। '३३४३। आभीक्ष्ण्ये णमुल् ।३।४।२२।' तत्र '३३२०। समानकर्तृकयोः पूर्वकाले ।३।४।२१।' इति वर्तते। 'आभीक्ष्ण्ये द्वे भवतः' इति द्विर्वचनम्। अधिमर्मेति विभक्त्यर्थेऽव्ययीभावः। अमूढौ सावधानौ रामलक्ष्मणौ ॥

मर्मवेधमेवाह—

१८७—हत-बन्धुर् जगामाऽसौ ततः शूर्प-णखा वनात् ॥
पारे-समुद्रं लङ्कायां वसन्तं रावणं पतिम्. ॥ ४ ॥

हतेत्यादि—असौ शूर्पणखा हतबन्धु ततो वनाद्दण्ड

कारण्यात् रावणं पतिं प्रभुं शरणं जगाम गतवती । पारेसमुद्रम् । समुद्रस्य पार इति '६७२। पारे मध्ये षष्ठ्या वा ।२।१।१८।' इत्यव्ययीभावः । तत्सन्नियोगेन पूर्वपदस्यैकारान्तत्वम् । पश्चात्सप्तमी । '६५७। नाव्ययीभावात् २।४।८३।' इत्यम्भावः । समुद्रस्य पारे स्थितायां लङ्कायां वसन्तं रावणमिति ॥

१८८–संप्राप्य राक्षस-सभं चक्रन्द क्रोध-विह्वला, ॥
नाम-ग्राहमरोदीत् सा भ्रातरौ रावणाऽन्तिके. ॥५॥

संप्राप्येत्यादि—सा शूर्पणखा राक्षससभं संप्राप्य ढौकित्वा । राक्षसानां सभेति '८२६। सभा राजा-।२।४।२३।' इत्यादिना नपुंसकता । चक्रन्द क्रन्दनं कृतवती । क्रोधविह्वला क्रोधविवशा । भ्रातरौ खरदूषणावरोदीत् रुदितवती । नामग्राहं नाम गृहीत्वा । भ्रातरौ खरदूषणाविति । '३३८०। नाम्न्यादिशिग्रहोः ।३।३।५८।' इति णमुल् । अत्र नामग्रहणविशिष्टाया रोदनक्रियाया व्याप्तुमिष्टत्वाद्रुदिः सकर्मकः । रावणान्तिके रावणसमीपे । सप्तम्यधिकरणे चेति चकाराद्दूरान्तिकार्थेभ्य इति सप्तमी ॥

तयोः किं जातमिति रावणेन पृष्टाह—

१८९–'दण्डकानध्यवात्तां यौ वीर ! रक्षः-प्रकाण्डकौ, ॥
नृभ्यां संख्येऽकृषातां तौ स-भृत्यौ भूमि-वर्धनौ. ॥६॥

दण्डकानित्यादि—हे वीर ! दण्डकान् दण्डकारण्यसन्निवेशान् अध्यवात्ताम् अध्युषितवन्तौ । '१०७४। वसँ निवासे ।' इत्यस्माल्लुङ् । हलन्तलक्षणा वृद्धिः । '२३३२। सः सि ।७।४।४९।' इत्यादिना धातुसकारस्य तत्वम् । '२२८१। झलो झलि ।८।२।२६।' इति सिचो लोपः । रक्षःप्रकाण्डकौ प्रशस्तौ राक्षसौ । '७४७। प्रशंसा-वचनैश्च ।२।१।६६।' इति समासः । ततः स्वार्थे कन् 'स्वार्थिकाश्च प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते' इति नपुंसको न भवति । अन्यथा रूढिशब्दाः प्रशंसावचना आविष्टलिङ्गत्वादन्यलिङ्गेऽपि जातिशब्दे स्वलिङ्गोपादानादेव समानाधिकरणाः स्युः । यथा गोप्रकाण्डमिति । तौ नृभ्यां मनुष्याभ्यां सङ्ख्ये युद्धे भूमिवर्धनावकृषातां कृतौ । कर्मणि लुङ् । अचिण्वद्भावे रूपम् । वर्धते इति वर्धनौ । '२८४१। कृत्यल्युटो बहुलम् ।३।३।११३।' इति कर्तरि ल्युट् । भूमेर्वर्धनाविति सः । भस्मीकृतशरीरस्य भूमौ लीयमानत्वात् । सभृत्यौ नैकाकिनौ ॥

१९०–विग्रहस् तव शक्रेण बृहस्पति-पुरोधसा ॥
सार्धं कुमार-सेनान्या, शून्यरा चाऽसीति को नयः. ७

विग्रह इत्यादि—बृहस्पतिः पुरोधा मन्त्री यस्य शक्रस्य तेन । कार्येषु पुरो धीयत इति पुरोधाः । पुरःपूर्वाद्धाञः सर्वधातुभ्योऽसुन् । तथा कुमारः कार्तिकेयः सेनानीर्यस्य । सेनां नयतीति '२९७५। सत्सू-द्विष-।३।२।६१।' इत्यादिना क्विप् । तेन शक्रेण सार्धं सह तव विग्रह आसीत् । इदानीं कार्यनिपुणाभावात्

शून्यश्चासि '२१९१। तासस्त्योर्लोपः।७।४।५०।' इति सकारलोपः। तस्मात्कोनयः। नय एव न भवतीत्यर्थः॥

तदेव दर्शयन्नाह—

१९१—यद्यहं नाथ! ना ऽयास्यं विनासा हत-बान्धवा, ॥
ना ऽज्ञास्यस् त्वमिदं सर्वं प्रमाद्यंश् चार-दुर्-बलः.८

यदित्यादि—विनासा विगता नासा यस्याः। नासैव नासिकेति '८३४। केऽणः।७।४।१३।' इति ह्रस्वत्वे रूपं, तस्या नसादेशस्य विधीयमानत्वादत्र संभव एव नास्ति। विनसेति पाठान्तरम्। तत्र विगता चासौ नासिका च विनासिका। तत इत्थम्भूतलक्षणायां तृतीयायां '२२८। पद्दन्नोमास्–।६।१।६३।'इत्यादिना नसादेशः। विगतया नासिकयोपलक्षितेत्यर्थः। विगता नासिका अस्या इति बहुव्रीहिणा व्याख्याने अञ्नासिकेत्यादिना अच् नसादेशश्च प्राप्नुतः। तस्य संज्ञाविषयत्वादुपसर्गाच्चेत्यसंज्ञायां विधीयमानो न भवति वेर्ग्रो वक्तव्य इति ग्रादेशो बाधकः। हे नाथ! यद्यहं विनासा हतबान्धवा नायास्यं न याताऽभविष्यम्, तदा तदिदं सर्वं भ्रात्रोर्वधं नासाच्छेदं च नाज्ञास्यः न ज्ञातोऽभविष्यः। क्रियातिपत्तौ लृङ्। अज्ञाने कारणमाह—प्रमाद्यन् विषयेषु प्रमादं गच्छन्। चारदुर्बलः चारहीनः। चारा हि चक्षू राज्ञां कार्याकार्यज्ञानाय लोके। चरतीति चरः पचाद्यच्। चर एव चारः '२१०६। प्रज्ञादि–।५।४।३८।' इत्यण्॥

१९२—करिष्यमाणं विज्ञेयं कार्यं, किं नु कृतं परैः, ॥
अपकारे कृते ऽप्यज्ञो विजिगीषुर् न वा भवान्. ॥९॥

करिष्यमाणमित्यादि—परैः शत्रुभिरपचयचिकीर्षया करिष्यमाणं कार्यं विज्ञेयम्। किं नु कृतमेव यत्तदवश्यमेव विज्ञेयमित्यर्थः। त्वं पुनः परैरपकृतोऽपि अज्ञोऽविदितस्वरूपः। अतो विजिगीषुर्न वा भवान्। अतो न राज्यं संभावयतीत्यर्थः॥

१९३—वृतस् त्वं पात्रे-समितैः
खट्वाऽऽरूढः प्रमाद-वान् ॥
पान-शौण्डः श्रियं नेता
ना ऽत्यन्तीन-त्वमुन्मनाः. ॥ १० ॥

वृत इत्यादि—अत्यन्तं गामिनीति '१८१२। अवारपार–।५।२।११।' इत्यादिना खः। तस्य भावोऽत्यन्तीनत्वम्। नैवात्यन्तीनामत्यन्तगामिनीं श्रियं नेता न प्रापणशीलः। '३११५। तृन्।३।२।१३५।' इति ताच्छीलिकस्तृन्। '६२७। न लोक–।२।३।६९।' इति षष्ठीप्रतिषेध यद्यपि महोदय राज्य प्राप्तवानसि तथापि न : यत पानशौण्ड

पाने प्रसक्तः।'७१८। सप्तमी शौण्डैः ।२।१।४०' इति सः। अत एव प्रमादवान्। अतोऽपि खट्वारूढः उत्पथप्रस्थितः। '६८८। खट्वाक्षेपे ।२।१।२६' इति द्वितीया सः। तत एव पात्रेसमितैः भोजन एव सन्निहितैः अनुजीविभिर्वृतः। '७२५। पात्रेसमितादयश्च ।२।१।४८' इति क्षेपे सः॥

१९४—अध्वरेष्वग्निचित्वत्सु सोमसुत्वत आश्रमान्॥
अत्तुं महेन्द्रियं भागमैति दुश्च्यवनोऽधुना, ॥ ११ ॥

अध्वरेष्वित्यादि—त्वय्येवम्भूतेऽधुना दुश्च्यवन इन्द्रः आश्रमानैति आगच्छति। आङ्पूर्वस्येणः '७३। एत्येधत्यूठ्सु ।६।१।८९' इति वृद्धिः। सोमसुत्वतः सोमं सुनोतीति '३०००। सोमे सुञः ।४।२।९०' इति क्विप्। सोमसुतः सन्ति येष्वाश्रमेष्विति मतुप्। '१८९६। तसौ मत्वर्थे ।१।४।१९' इति भत्वे तकारस्य जश्त्वं न भवति। '१८९८। झयः ।८।२।१०' इति मतोर्वत्वम्। किमर्थमैतीत्याह- अत्तुं भक्षयितुं महेन्द्रियं भागम्। महेन्द्रो देवता अस्येति। '१२३१। महेन्द्राद्घाणौ च ।४।२।२९' इति घः। क अध्वरेषु यज्ञेषु। अग्निचित्वत्सु। अग्निं चितवन्तोऽग्निचितः आहिताग्नयः। '३००१। अग्नौ चेः ।३।२।९१' इति क्विप्। ते सन्ति येष्विति पूर्ववन्मतुप्॥

१९५—आमिक्षीयं दधि-क्षीरं पुरोडाश्यं तथौषधम्॥
हविर् हैयङ्गवीनं च नाऽप्युपघ्नन्ति राक्षसाः. ॥१२॥

आमीत्यादि—दध्ना सहितं शृतं पय आमिक्षा। तस्मै हितमामिक्षीयम्। '१६६४। विभाषा हविरपूपादिभ्यः ।५।१।४' इति छयतौ। दधि च क्षीरं चेति। '९१६। विभाषा वृक्ष-।२।४।१२' इत्यादिना व्यञ्जनत्वादेकवद्भावः। पुरोडाशाय हितमौषधं नीवारतण्डुलादि पुरोडाश्यम्। अपूपादित्वाद्यत्। ओषधिरेवौषधम्। '२१०५। ओषधेरजातौ ।५।४।३७' इत्यण्। तण्डुलानामजातित्वात्। 'स्वार्थिकाश्च प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते' इति नपुंसकलिङ्गता। हविः हूयत इति हविः। 'अर्चि-शुचि'इत्यौणादिक इस्। हैयङ्गवीनं घृतम्। ह्योगोदोहस्य विकार इत्यर्थे '१८२४। हैयङ्गवीनं संज्ञायाम् ।५।२।२३' इति निपातनात् खञ् हियंगवादेशश्च। तानि नाप्युपघ्नन्ति राक्षसाः त्वय्युदासीने सति॥

इदानीं कार्यप्रदर्शनेन प्रोत्साहयितुमाह—

१९६—युव-जानिर् धनुष्-पाणिर् भूमिन्-ष्ठः ख-विचारिणः॥
रामो यज्ञ-द्रुहो हन्ति काल-कल्प-शिलीमुखः ॥१३॥

युवेत्यादि—युवतिः यौवनवती जाया यस्य युवजानिः। '८७२। जायाया निङ् ।६।१।७६।' वलि लोपः। '८३१। स्त्रियाः पुंवत्—।६।३।३४' इत्यादिना स्त्रीप्रत्ययो निवर्तते धनुष्पाणि पाणौ धनुर्यस्य।

परनिपातः। भूमिष्ठः भूमौ तिष्ठन्तीति भूमिष्ठः। नाकाशचरः। '२९१६। सुपि स्थः।३।२।४।' इति कः।'२९१८। अम्बाम्ब-।८।३।९७।' इत्यादिना षत्वम्। कालकल्पशिलीमुखः मृत्युतुल्यशरः। रामो यज्ञ-द्रुहो राक्षसान् हन्ति खविचारिणः आकाशविचरणशीलान्। '२९८८। सुप्यजातौ।३।२।७८।' इति णिनिः॥

१९७—मांसान्योष्ठाऽवलोप्यानि साधनीयानि देवताः॥
अश्नन्ति, रामाद् रक्षांसि बिभ्यत्यश्नुवते दिशः॥१४॥

मांसेत्यादि—ओष्ठावलोप्यानि ओष्ठाभ्यां छेद्यार्हाणि शक्यानि वा। अर्हार्थे शक्यार्थे वा कृत्यः। '६९५। कृत्यैरधिकार्थवचने।२।१।३२।' इति सः। साधनीयानि यज्ञस्य साधनाय हितानि। '१६६५। तस्मै हितम्।५।१।५।' इति छः। सावनीयानीति पाठान्तरम्। तत्र सवनं स्नानं तद्योगात्स्नातकोपि तथोच्यते तत्र भवः सावनो यज्ञः। '१६६५। तस्मै हितम्।५।१।५' इति छः। तानि मांसानि देवता अश्नन्ति भुञ्जते न राक्षसा रक्षांसि किन्तु रामाद्बिभ्यति। '४४४। वा नपुंसकस्य।७।१।७९।' इति शतुर्नुमभावपक्षे रूपम्। दिशोऽश्नुवते व्याप्नुवन्ति॥

१९८—कुरु बुद्धिं कुशाऽग्रीयामनुकामीन-तां त्यज,॥
लक्ष्मीं परम्परीणां त्वं पुत्र-पौत्रीण-तां नय.॥ १५॥

कुर्वित्यादि—कुशाग्रीयां कुशाग्रमिव सूक्ष्माम्। '२०६०। कुशाग्राच्छः। ५।३।१०५।' इति इवार्थे छः। स्थूलबुद्धिर्मा भूदित्यर्थः। अनुकामीनतां त्यज यथेच्छगामितां त्यज। '१८१२। अवार-पार-।५।२।११।' इत्यादिना खः। परम्परीणां परांश्च परतरांश्च अनुभवतीत्यर्थे परशब्दात् '१८११। परोवर-।५।२।१०।' इत्यादिना खः परंपरादेशश्च। तां लक्ष्मीं क्रमायातां त्वं पुत्रपौत्रीणतां नय पुत्रांश्च पुत्रांश्चानुभवतीति खः। तस्य भावः। पुत्रपौत्रानुगामिनीं कुर्वित्यर्थः॥

१९९—सहाय-वन्त उद्युक्ता बहवो निपुणाश् च याम्॥
श्रियमाशासते, लोलां तां हस्ते-कृत्य मा श्वसीः॥१६॥

सहेत्यादि—यां च श्रियं त्वदीयां शौर्योपात्तां सहायवन्तः ससहाया उद्युक्ता उत्साहवन्तो निपुणाः कुशला आशासते इच्छन्ति। '१०९१। आङः शासु इच्छायाम्' इत्यादादिकस्यात्मनेपदिनो रूपम्। '२२५८। आत्मनेपदेष्वनतः।७।१।५।' इत्यादादेशः। तां हस्तेकृत्य स्वीकृत्य। मा श्वसीः आश्वासं मा कार्षीः। चञ्चलत्वात्। यदाह लोलामिति। '२२९९' ह्यन्त-क्षण-श्वस-जागृ-णि-।७।२।५।' इति वृद्धिप्रतिषेधः। '२२६६। इट ईटि।८।२।२८।' इति सिचो लोप '७७८ नित्य हस्ते पाणौ १४७७' इति गतिसञ्ज्ञायां समासे ल्यबादेश॥

तां लोलतां दर्शयन्नाह—

२००—लक्ष्मीः पुं-योगमाशंसुः
कुलटेव कुतूहलात् ॥
अन्तिके ऽपि स्थिता पत्युश्
छलेनाऽन्यं निरीक्षते. ॥ १७ ॥

लक्ष्मीरित्यादि—त्वयैवं न मन्तव्यम् अन्यैः प्रार्थ्यमानापि न मां परित्यजतीति । यतः छलेन व्याजेन अन्यं निरीक्षते । किमर्थं—पुंयोगमाशंसुः अभिलषन्ती । '३१४८। सनाशंस-भिक्ष उः ।३।२।१६८।' कुतूहलात् कोऽस्य विशेष इति । स्नेहादन्तिके अदूरेऽपि स्थिता पत्युः । '६११। दूराऽन्तिकार्थैः—२।३।३४।' इत्यादिना षष्ठी । कुलटेव बन्धकीव । शकन्ध्वादिषु दर्शनात्पररूपम् ॥

युवजानिरित्युक्तं तद्योषित्प्रलोभनायाह—

२०१—योषिद्-वृन्दारिका तस्य दयिता हंस-गामिनी ॥
दूर्वा-काण्डमिव श्यामा न्यग्रोध-परिमण्डला. ॥१८॥

योषिदित्यादि—योषिच्चासौ वृन्दारिकाचेति । '७४१। वृन्दारक-।२।१।६२।' इत्यादिना सः रूपेण प्रियेत्याह—दयिता प्रिया । प्रशस्तत्वे कारणमाह—हंस इव गन्तुं शीलं यस्याः । '२९८१। कर्तर्युपमाने ।३।२।७९।' इति णिनिः । दूर्वाकाण्डमिव श्यामा दूर्वास्तम्बं तदिव श्यामा । न्यग्रोधपरिमण्डला । '७३४। उपमानानि-।२।१।५५।' इत्यादिना सः ॥

२०२—नाऽऽस्यं पश्यति यस् तस्या,
निंस्ते दन्त-च्छदं न वा, ॥
संशृणोति न चोक्तानि,
मिथ्याऽऽसौ विहितेन्द्रियः. ॥ १९ ॥

नास्यमित्यादि—तस्या आस्यं मुखं यो न पश्यति । दन्तच्छदं ओष्ठम् । छाद्यते अनेनेति घः । '३२९७। छादेर्घेऽद्व्युपसर्गस्य ।६।४।९६।' इति ह्रस्वः । दन्तानां छदं नवा निंस्ते न चुम्बति । '१०९६। णिसिँ चुम्बने ।' इत्यादादिक आत्मनेपदी । '२२६२। इदितो नुम् धातोः ।७।१।५८।' उक्तानि उदितानि न संशृणोति । '२६९९। समो गम्य-।१।३।२९।' इत्यादिना तङ् न भवति । अकर्मकादित्यविकारत् । मिथ्यासौ विहितेन्द्रियः । वृथैव तस्य वेधसा विहितानि इन्द्रियाणि चक्षुरादीनि ॥

१—स्तनौ सु-कठिनौ यस्या, नितम्बे च विशालता, ॥
मध्ये क्षीणा भवेद् या सा न्यग्रोध १ ॥

२०३—सारो ऽसाविन्द्रियाऽर्थानां,
यस्यां ऽसौ तस्य नन्दथुः, ॥
तल्पे कान्ताऽन्तरैः सार्धं
मन्ये ऽहं धिङ् निमज्जथुम्. ॥ २० ॥

सार इत्यादि—इन्द्रियार्थानां मध्ये सारोऽसौ दयिता इन्द्रियार्थः। रूपाद्यतिशययोगात्। यस्यासौ संपद्यते तस्य नन्दथुः आनन्दश्चेतसः। तल्पे शयनीये यस्य कान्तान्तरैरन्यस्त्रीभिः सार्धं निमज्जथुं शयनम्। सर्वत्र '३२६७। ट्वितोऽथुच् ।३।३।८९।' तस्य धिक् कुत्सितमहं मन्ये । 'उभसर्वतसोः' इत्यादिना धिग्योगे द्वितीया। तथा सार्धं शोभनमित्यर्थादुक्तं भवति ॥

२०४—न तं पश्यामि, यस्यां ऽसौ
भवेन् नोद्वेजया मतेः ॥
त्रैलोक्येनाऽपि विन्दस् त्वं
तां क्रीत्वा सुकृती भव. ॥ २१ ॥

न तमित्यादि—सर्वथा न तं पश्यामि जानामि जगति यस्य संबन्धिन्याः मतेश्चेतसः उद्वेजया उत्कम्पिकासौ न भवेत्। चित्तक्षोभजनिकेत्यर्थः। उद्वेजयतीति '२९००। अनुपसर्गाल्लिम्प–।३।१।१३८।' इति कर्तरि शः कृद्योगे कर्मणि षष्ठी। तस्मात् त्रैलोक्येनापि। त्रयश्च ते लोकाश्च त्रिलोकाः। त एव त्रैलोक्यम्। चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्। 'स्वार्थिका अतिवर्तन्ते' इति नपुंसकत्वम्। तेनापि तां क्रीत्वा लब्ध्वा विन्दस्त्वं सुकृती भव पण्डितो भव। आढ्यो वा भव। पाण्डित्यमस्य त्रैलोक्यमात्रेणापि स्त्रीरत्नं क्रीत्वा लब्धमिति। विन्दतीति तेनैव सूत्रेण शः ॥

अन्या अपि स्त्रियः सन्तीति चेदाह—

२०५—नैवेन्द्राणी, न रुद्राणी,
न मानवी, न रोहिणी, ॥
वरुणानी न, नां ऽग्नायी
तस्याः सीमन्तिनी समा.' ॥ २२ ॥

नैवेत्यादि—तस्यास्तु सीतायाः । '६३०। तुल्यार्थैरतुलोपमाभ्याम् ।२।३।७२।' इति षष्ठी। न काचित् सीमन्तिनी स्त्री समा तुल्या। 'सीमन्तः केशवेशे' इति पररूपत्वम्। अन्यत्र सीमान्तः। स विद्यते यस्या इति इनिः। इन्द्राणी इन्द्रभार्या। न सम्यक् किं पुनरन्या। तथा रुद्राणी रुद्रभार्या। वरुणानी वरुणभार्या। '५०५। इन्द्र-वरुण–।४।१।४९।' इत्यादिना आनुक्। मानवी मनुभार्या। '४९५ मनोरौ वा ४ १ ३८' इत्यौकार। अग्नायी अग्निभार्या।

'४९७। वृषाकप्यग्नि-कुसित-कुसिद्–।४।१।३७।' इत्यादिना ऐरिति सर्वत्र '५०४। पुंयोगादाख्यायां ।४।१।४८।' इति ङीष् । रोहिणी चन्द्रभार्या । रोहितशब्दात् '४९६। वर्णादनुदात्तात्–।४।१।३९।' इत्यादिना ङीष् नकारश्च । वरुणानी न नाभार्यीत्यत्र प्रतिषेध एकः पूर्वेण योज्यः द्वितीयः परेणेति । न चाभार्यीति पाठान्तरम् ॥

२०६–प्रत्यूचे राक्षसेन्द्रस् ताम्–
'आश्वसिहि, बिभेषि किम्, ॥
त्यज नक्तञ्चरि ! क्षोभं,
वाचाटे ! रावणो ह्यहम्. ॥ २३ ॥

प्रत्यूच इत्यादि—राक्षसेन्द्रो रावणः । राक्षसीं प्रत्यूचे । प्रतिवचनमुक्तवान् । आश्वसिहि खेदं त्यज । '२४७४। रुदादि–।७।२।७६।' इत्यादिना इट् । बिभेषि किमर्थं तापसकात् । हे नक्तञ्चरि ! मद्विषये क्षोभं रोषं त्यज । वाचाटे बहुभाषिणि । '१९२१। आलजाटचौ बहुभाषिणि ।५।२।१२५।' यस्माद्रावणोऽहम् । अनेनात्मोत्कर्षमावेदयति ॥

तमेव स्फुटयन्नाह—

२०७–मामुपास्त दिदृक्षा-वान्
याष्टीक-व्याहतो हरिः ॥
आज्ञा-लाभोन्मुखो दूरात्
काक्षेणा ऽनादरेक्षितः ॥ २४ ॥

मामित्यादि—मामुपास्त सेवितवान् । हरिरिन्द्रः । दिदृक्षावान् द्रष्टुमिच्छावान् । आत्मदर्शनेच्छावानित्यर्थः । दूरादेव याष्टीकैः वेत्रग्राहिभिर्व्याहतोऽपसारितः । '६९४। कर्तृ–करणे कृता–। २।१।३२।' इति सः । यष्टिः प्रहरणमेषामिति '१६५९। शक्ति-यष्ट्योरीकक् ।४।४।५९।' । आज्ञालाभे किमभिधास्यतीत्युत्सुक उन्मुखः तत्परः । सप्तमीति योगविभागात् सः । अनादरेक्षितः अवज्ञाविलोकितः । काक्षेण कुदृष्ट्या । '१०३०। का पथ्यक्षयोः ।६।३।१०४।' इति कुशब्दस्य कादेशः । यदि तत्पुरुष इत्यनुवर्तते तदा कुत्सितमक्षमिति विग्रहः । अक्षशब्दस्येन्द्रियसामान्याभिधायित्वेऽपि ईक्षितशब्दोपपदत्वाच्चक्षुषि वर्तते । अथ तत्पुरुष इति नानुवर्तते सामान्येनादेशस्तदा कुत्सितमक्षि यस्येति । '८५२। बहुव्रीहौ सक्थ्यक्ष्णोः–।५।४।११३।' इति षच् । काक्षेण मयेत्यर्थः ॥

२०८–विरुग्णो-दग्र-धाराऽग्रः कुलिशो मम वक्षसि ॥
अ-भिन्नं शत-धा ऽऽत्मानं मन्यते बलिनं बली.॥२५॥

विह्वलेत्यादि—विह्वलानि अवसन्नानि कुण्ठितानि उदग्राणि महान्ति धाराग्राणि यस्य स कुलिशो वज्रः मम वक्षसि पतितः सन् । बली । आत्मानमभिन्नं शतधा शतप्रकारम् । '१९८८। संख्याया विधार्थे धा ।५।३।४२।' बलिनं मन्यते । अहो बलवानहं न येन शतधा भग्न इति । तस्य देवतारूपत्वात् बलमस्त्येव । आत्मानं बलिनं मन्यत इवेत्युत्प्रेक्षा ॥

२०९—कृत्वा लङ्का द्रुमाऽऽलानमहमैरावतं गजम् ॥
बन्धने ऽनुपयोगि-त्वान् नतं तृण-वदत्यजम्. ॥२६॥

कृत्वेत्यादि—एष्वालीयत इत्यालानम् । अधिकरणे ल्युट् । '२५०९। विभाषा लीयतेः ।६।१।५१।' इत्यात्वम् । लङ्काद्रुमा आलानानि यस्यैरावताख्यस्य गजस्य तं कृत्वा । नतं नम्रमुखम् । तृणमिव मत्वा । सोऽहमत्यजं त्यक्तवान् । बन्धनेऽनुपयोगित्वात् प्रयोजनाभावात् ॥

२१०—आहोपुरुषिकां पश्य
मम, सद्-रत्न-कान्ति-भिः ॥
ध्वस्ताऽन्धकारे ऽपि पुरे
पूर्णेन्दोः सन्निधिः सदा. ॥ २७ ॥

आहो इत्यादि—अहोपुरुषस्य भावः । मनोज्ञादित्वाद्वुञ् । आहोपुरुषिका कार्यसिद्धावपि तत्साधने वृत्तिः । तां मम शूर्पणखे पश्य । सद्रत्नकान्तिभिः ध्वस्तान्धकारेऽपि पुरे पूर्णेन्दोः पूर्णचन्द्रस्य सन्निधिः सदा सन्निधानं । न पुनस्तेन कृत्यं रत्नप्रभाभिरेव तत्कृत्यस्य कृतत्वात् ॥

२११—हृत-रत्नश् च्युतोद्योगो रक्षोभ्यः कर-दो दिवि ॥
पूतक्रतायीमभ्येति सत्रपः किं न गोत्र-भित्. ॥ २८ ॥

हृतेत्यादि—हृतोच्चैःश्रव आदिरत्नो गोत्रभिदिन्द्रः । अत एव च्युतोद्योगः । दिवि वर्तमानोऽपि रक्षोभ्यः करदः । राजग्राह्यं वित्तं प्रयच्छन् । पूतक्रतायीं शचीं '४९३। पूतक्रतोरै च ।४।१।३६।' इति ङीष् । पुंयोगादाख्यायामिति । सत्रपः सव्रीडः । किं नाभ्येति न ढौकते ॥

२१२—अ-तुल्य-महसा सार्धं रामेण मम विग्रहः ॥
त्रपा-करस्, तथाप्येष यतिष्ये तद्-विनिग्रहे.' ॥२९॥

अतुल्येत्यादि—तदेवंविधस्य मम अतुल्यमहसा अतुल्यतेजसा रामेण सह विग्रहस्त्रपाकरः । '२९३४। कृञो हेतु—।३।२।२०।' इत्यादिना टः । तथापि त्वत्प्रार्थनया । एष च यतिष्ये तद्विनिग्रहे विविधनिग्रहविषये तस्य यतिष्ये यत्नं करिष्यामि '२७८९ वर्तमान-सामीप्ये ३ ३ १३१ इति विकल्पेन ऌटो विधानात् ॥

२१३–उत्पत्य खं दशग्रीवो मनो-यायी शिताऽस्त्र-भृत् ।
समुद्र-सविधाऽऽवासं मारीचं प्रति चक्रमे. ॥ ३० ॥

उत्पत्येत्यादि—उक्त्वैवं खमाकाशमुत्पत्य मारीचं प्रति चक्रमे । यत्र मारीचो राक्षसस्तत्र गत इत्यर्थः । '२७१६। अनुपसर्गाद्वा ।१।३।४३।' इति क्रमेस्तङ् । मनोवदाशु यातुं शीलमस्येति । '२९८९। कर्तर्युपमाने ।३।२।७९।' इति णिनिः । शिताऽस्त्रभृत् गृहीततीक्ष्णचन्द्रहासः । समुद्रस्य सविधे समीपे आवासो यस्य मारीचस्य । सह विधेन सविधमिति व्युत्पत्तिमात्रं शब्दस्तत्समीपवाची ॥

२१४–सम्पत्य तत्-सनीडेऽसौ तं वृत्तान्तमशिश्रवत्, ॥
त्रस्नुनाऽथ श्रुताऽर्थेन तेनाऽगादि दशाऽऽननः.॥२१॥

सम्पत्येत्यादि—असौ दशग्रीवः तत्सनीडे मारीचस्य समीपे । अत्रापि सह नीडेनेति व्युत्पत्तिमात्रम् । समेत्य यात्वा । तं वृत्तान्तम् शूर्पणखाकथितमशिश्रवत् श्रावितवान् । शृणोतेर्ण्यन्तस्य लुङि रूपम् । तेन मारीचेन श्रुतार्थेन त्रस्नुना त्रसनशीलेन दशाननः अगादि उक्तः । कर्मणि लुङ् ॥

२१५–'अन्तर्धत्स्व रघु-व्याघ्रात् तस्मात् त्वं राक्षसेश्वर!, ॥
यो रणे दुरुपस्थानो हस्त-रोधं दधद् धनुः, ॥ ३२ ॥

अन्तरित्यादि—हे राक्षसेश्वर त्वं तस्माद्रघुव्याघ्रादन्तर्धत्स्व अन्तर्हितो भव व्यवहितो भवेति यावत् । दधातेर्लोटि '२४८३। श्नाभ्यस्तयोः–।६।४।११२।' इत्याकारलोपः । अभ्यासस्य '२५०१। दधस्तथोश्च ।८।२।३८।' इति भष्भावः । '५९१। अन्तर्धौ येना–।१।४।२८।' इत्यपादानसंज्ञा । यस्मात् स रामः रणे दुरुपस्थानः दुःखेन उपस्थीयते उपगम्यत इति । आतो युच् । यतो हस्तरोधं दधद्धनुः हस्तेन रुद्ध्वा सदैव यो धनुर्धत्ते स कथं दुरुपस्थानो न भवति । हस्तशब्दे तृतीयान्त उपपदे '३३७०। सप्तम्यां चोपपीड-रुधः-कर्षः ।३।४।४९।' इति णमुल् । चकारेण तृतीयायाः समुच्चितत्वात् '७८४। तृतीयाप्रभृतीन्यन्यतरस्याम् ।२।२।२१।' इति सः ॥

तदेव दुरुपस्थानत्वं स्फुटयन्नाह—

२१६–भवन्तं कार्तवीर्यो यो हीन-सन्धिमचीकरत्, ॥
जिगाय तस्य हन्तारं स रामः सार्वलौकिकम्.॥३३॥

भवेत्यादि—यः कार्तवीर्यः कृतवीर्यस्यापत्यं सहस्रबाहुः भवन्तं हीनसन्धिमचीकरत् । हीनेन दुर्बलेन यः सन्धिः तं भवन्तं कारितवान् । तेन हीनत्वम् । बलान्निर्जित्य कारित इति दुरुपस्थानमुक्तम् । '५४१। हृ-क्रोरन्यतरस्याम् ।१।४।५४।' इति द्विकर्मकता । तस्य कार्तवीर्यस्य यो हन्ता परशुरामः । कृद्योगे कर्मणि षष्ठी । तेन हि तस्याग्निहोत्रधेनुमपहृत्य गच्छतः परशुना बाहुसहस्रं छिन्नम् तस्य हन्तारं स रामो जिगाय जितवान् । जयतेर्लिटि धातुजकारस्य

'२३३१। सँल्लिटोर्जः ।७।३।५७।' इति कुत्वम् । सार्वलौककं सर्वलोके विदितम् । '१७१०। लोक-सर्वलोकाभ्यां ठञ् ।५।१।४४।' । '१४३८ अनुशतिकादि—।७।३।२०।' इत्युक्तत्वादुभयपदवृद्धिः । सार्वलौकिक इति पाठान्तरम् । अत्र राम इति योज्यम् ॥

२१७—यमा॒ऽऽस्य-दृश्वरी तस्य ताडका वेत्ति विक्रमम्, ॥
शूरं-मन्यो रणाच् चा॒ऽहं निरस्तः सिंह-नर्दिना. ३४

यमेत्यादि—तस्य रामस्य विक्रमं ताडका वेत्ति ज्ञातवती । '२७८९। वर्तमानसामीप्ये—।३।३।१३१।' इति भूते लट् । कीदृशी यमास्यदृश्वरी । तच्छरताडिता यममुखं दृष्टवती मृतेत्यर्थः । '३००४। दृशेः क्वनिप् ।३।२।९४।' '४५७। वनो र च ।४।१।७।' इति ङीब्रेफौ । अहमपि शूरम्मन्यः शूरमात्मानं मन्यमानः '२९९३। आत्ममाने खश्च ।३।२।८३।' सिंहनर्दिना रामेण सिंह इव नर्दतीति '२९८९। कर्तुर्युपमाने—।३।२।७९।' इति णिनिः । रणान्निरस्तः बहिष्कृत इत्यर्थः ॥

२१८—न त्वं तेना॒ऽन्वभाविष्ठा,
ना॒ऽन्वभावि त्वया ऽप्यसौ, ॥
अनुभूतो मया चा॒ऽसौ,
तेन चा॒ऽन्वभविष्यहम्, ॥ ३५ ॥

न त्वमित्यादि—तेन रामेण त्वं नान्वभाविष्ठाः । त्वमनेन नानुभूतः । कर्मणि लुङ् । थासि '२७५७। स्य-सिच्—।६।४।६२।' इत्यादिना चिण्वदिट् वृत्वम् । नान्वभावि त्वयाऽप्यसौ नानुभूतः । येनैवमुच्यते । अत्र '२७५८। चिण् भाव-कर्मणोः ।३।१।६६।' इति चिण् । अनुभूतो मया चासौ । चशब्दः पुनरित्यर्थे । मया पुनरसावनुभूतः न शक्यो जेतुमिति । तेन रामेण चान्वभविष्यहमनुभूतोऽहम् । तेन सह योद्धुमक्षम इति । अत्र चिण्वद्भावो न कृतः किन्तु लुङि उत्तमपुरुषैकवचने वलादिलक्षण इट् । तेन वृद्ध्यभावात् गुण एवेति ॥

२१९—अध्यङ् शस्त्र-भृतां रामो,
न्यङ्ङस् तं प्राप्य मद्-विधाः, ॥
स कन्या-शुल्कमभनङ्
मिथिलायां मखे धनुः ॥ ३६ ॥

अध्यङित्यादि—शस्त्रभृतां मध्ये रामोऽध्यङ् अधिकः । अध्यञ्चत्याधिक्येन वर्तत इति '३७३। ऋत्विग्—।३।२।५९।' इत्यादिना क्विन् तस्मिन् लुप्ते 'अनुनासिकलोपे '३६१। उगिदचां—।७।१।७०।' इति नुम् । तस्यानुस्वारपरसवर्णत्वे कृते च हल्ङ्यादिसंयोगान्तलोपौ । नकारस्य '३७७। क्विन्प्रत्ययस्य कुः ।८।२।६२।' इति कुत्वेन ङकार । तं तादृशं प्राप्य मद्विधा न्यञ्चो हीना । निशब्दोऽग्राचो

भावे वर्तते। न्यञ्च इति पूर्ववत् क्विन्। अनुनासिकलोपः। नुम्। अल्लोपो नास्ति अहल्त्वात् कुत्वं च नास्ति अपदसंज्ञत्वात्। यो मिथिलायां महद्धनुरभनक् भग्नवान् सोऽस्मादपि कारणात् शस्त्रभृतामध्यक्षः। भञ्जेर्लङि '२५४४। श्नान्नलोपः ६।४।२३।' हल्ङ्यादिलोपः। कुत्वं च। कन्याशुल्कं कन्यामूल्यम्। तद्धि यो रौद्रं धनुरारोपितगुणं करोति तस्मै कन्या दीयत इति मूल्यीकृत्य स्थापितम्।

२२०—सं-वित्तः सह-युध्वानौ तच्-छक्तिं खर-दूषणौ, ॥

यज्वानश् च स-सुत्वानो, यानगोपीन् मखेषु सः. ॥३७

संवित्त इत्यादि—नाहमेव रामशक्तिमवैमि अपि तु खरदूषणावपि संवित्तः ज्ञातवन्तौ। '२७८९। वर्तमानसामीप्ये—।३।३।१३१।' इति भूते लट्। सकर्मकत्वात् '२६९९। समो गम्यृ—।१।३।२९।' इत्यादिना लङ् न भवति तत्राकर्मकादिति वर्तते। सहयुध्वानौ सह तेन युद्धवन्तौ। '३००६। सहे च।३।२।९६।' इति युधेः क्वनिप्। यज्वानश्चाहिताग्नयः ससुत्वानः सोमयाजिसहिताः। '३०११। सु-यजोर्ङ्वनिप्।३।२।१०३।' संविदन्तीति वचनविपरिणामेन योज्यम्। यामगोपीत् अरक्षीत् मखेषु स रामः। लुङि रूपम्। तथा मखद्रुहो राक्षसान् घ्नतो रामस्य शक्तिं ज्ञातवन्तः॥

२२१—सुख-जातः सुरा-पीतो
नृ-जग्धो माल्य-धारयः ॥
अधि-लङ्कं स्त्रियो दीव्य,
मा ऽऽरब्धा बलि-विग्रहम्.' ॥ ३८ ॥

सुखेत्यादि—यत एवं दुरुपस्थानः स तस्माद्बलिना रामेण विग्रहं माऽऽरब्धाः मा कार्षीः। रभेराङ्पूर्वात् '२२१९। माङि लुङ्।३।३।१७५।' थास्। '२२८१। झलो झलि।८।२।२६।' इति सिज्लोपः। '२२८०। झषस्तथोर्धोऽधः।८।२।४०।' '५२। झलां जश् झशि।८।४।५३।' किं कार्यमित्याह—अधिलङ्कं लङ्कायामधि। विभक्त्यर्थेऽव्ययीभावः। स्त्रियो दीव्य क्रीड। लोटि रूपम्। '५६२। दिवः कर्म च।१।४।४३।' इति कर्मसंज्ञायां '२०२। वाऽम्-शसोः।६।४।८०।' इतीयङ्। कीदृशः। सुखजातः। जातं सुखमस्येति बहुव्रीहिः। कृतासवपानत्वात्। यदाह—सुरापीतः पीतमदिरः। नृजग्धः भुक्तमानुषः। निष्ठायामदो जग्धिः। पूर्ववद्धत्वम्। एषु वाहिताग्न्यादिदर्शनात् परनिपातः। माल्यं धारयतीति माल्यधारयः। '२९००। अनुपसर्गात् लिम्प—।३।१।१३८।' इत्यादिना शः॥

२२२—तं भीतं-कारमाक्रुश्य रावणः प्रत्यभाषत— ॥

'यात-यामं विजितवान् स रामं यदि, किं ततः ॥३९॥

तमित्यादि—तं मारीचं पूर्वोक्तं निराकुर्वन् रावणः प्रत्यभाषत प्रत्युक्तवान्। लङि रूपम्। भीतं कृत्वा भीतोऽसीति '३३११ कर्मण्या

क्रोशे ।३।४।२५।' कृजः खमुञ् । यातयामं गतवयसम् । यदि विजितवान् रामो दाशरथिः । किं ततः किं तापसः शूरः ॥

२२३—अघानि ताडका तेन
लज्जा-भय-विभूषणा, ॥
स्त्री-जने यदि तच्च् श्लाघ्यं,
धिग् लोकं क्षुद्र-मानसम्. ॥ ४० ॥

अघानीत्यादि—तेन रामेण ताडका अघानि व्यापादिता । हन्तेः कर्मणि लुङ् । लज्जा च भयं च विभूषणं यस्याः । स्त्रीत्वाच्च शौर्यम् । एवंविधाया अनेन रामेण यदि गर्ह्यमपि हननं स्त्रीजने श्लाघ्यं श्लाघनीयम् । '६२९। कृत्यानां कर्तरि वा ।२।३।७१।' इति तृतीया । तं धिक् लोकं क्षुद्रमानसं हीनमानसम् ॥

२२४—यद् गेहे-नर्दिनमसौ शरैर् भीरुमभाययत् ॥
कु-ब्रह्म-यज्ञ-के रामो भवन्तं, पौरुषं न तत्. ॥४१॥

यद्गेह इत्यादि—असौ रामो यद्भवन्तं भीरुं शरैरभाययत् भायितवान् । षुगात्मनेपदे न भवतः भयहेतोरभावात् । अत्र हि शरेभ्यो भयम् नतु रामात् । तत् किम् । पौरुषकारः किमसौ । युवादित्वादण् । गेहेनर्दिनं गेह एव नर्दिनम् । '७२५। पात्रे-समितादयश्च ।२।१।४८।' इति सः । कुब्रह्मयज्ञके । कुत्सिता ब्रह्माणः कुब्रह्माः । कुः पापार्थे इति सः । '८०६। कु-महद्भ्यामन्यतरस्याम् । ५।४।१०५।' इति समासान्तष्टच् । तेषां कुत्सितो यज्ञः । तस्मिन् सति कुत्सायां कन् । तेन शूरम्मन्योऽहं रणात्तेन निरस्तः इत्यपुष्कलमुक्तम् ॥

२२५—चिर-कालोषितं जीर्णं कीट-निष्कुषितं धनुः ॥
किं चित्रं यदि रामेण भग्नं क्षत्रिय-काऽन्तिके. ॥४२॥

चिरेत्यादि—यदि रामेण क्षत्रियकान्तिके । कुत्सितक्षत्रियसमीपे । भग्नं धनुः किं तच्चित्रमाश्चर्यम् । क्षत्रिया जनकादयः तस्य कुत्सायां कन् । क्षत्रियकस्यान्तिके । दूरान्तिकार्थयोगे षष्ठीसमासं विधाय पश्चात् । '६३३। सप्तम्यधिकरणे च ।२।३।३६।' इति चकाराद्दूरान्तिकार्थेभ्यश्चेति सप्तमी । किमिति न चित्रमित्याह—चिरकालमुषितमिति । '५५८। कालाऽध्वनोः-।२।३।५।' इति द्वितीयां विधाय । '६९१। अत्यन्त-संयोगे च ।२।१।२९।' इति द्वितीयासमासः । जीर्णं चिरकालोषितत्वात् । '१२०५। जॄष् वयो-हानौ' । निष्ठा । '२३९०। ॠत इद्धातोः ।७।१।१००।' इको '२५४। हलि च ।८।२।७७।' इति दीर्घः ।'३०१६। र-दाभ्याम्-।८।२।४२।' इति निष्ठानत्वम् । कीटैर्घुणैर्निष्कुषितं खादितम् । निरः कुष '३०४५। इण् निष्ठायाम् ७ २ ४७' इतीट् ॥

२२६—वन-तापसके वीरौ विपक्षे गलिताऽऽदरौ ॥
किं चित्रं यदि साऽवज्ञौ मम्रतुः खर-दूषणौ. ॥४३॥

वनेत्यादि—वने तापसो वनतापसः। कुत्सायां कन्। तस्मिन् वनतापसके रामे सावज्ञत्वाद्गलितादरौ विपक्षे किमयं करिष्यतीत्यवज्ञयैव योधितवन्तौ खरदूषणौ वीरौ यदि मम्रतुः मृतौ को दोषः किं चित्रम्। '२५३८। म्रियतेर्लुङ्लिङोश्च ।१।३।६१।' इति नियमात् लिट्यात्मनेपदं न भवति ॥

२२७—त्वं च भीरुः सु-दुर्बुद्धे! नित्यं शरण-काम्यसि, ॥
गुणांश् चाऽपह्नुषेऽस्माकं, स्तौषि शत्रूंश् च नः सदा.

त्वं चेत्यादि—हे दुर्बुद्धे! त्वं पुनः भीरुश्च भवसि नित्यं शरणकाम्यसि। आत्मनोऽनिशं शरणमिच्छसि। आत्मेच्छायां काम्यच्। अस्माकं च सतो गुणानपह्नुषे अपनयसि। '११५६। ह्नुङ् अपनये' आदादिकः। ङित्त्वात्तङ्। शत्रूंश्च नोऽस्माकं स्तौषि। स्तौतेः '२४४३। उतो वृद्धिर्लुकि हलि ।७।३।८९।' ॥

२२८—शीर्षच्-छेद्यमतोऽहं त्वा करोमि क्षिति-वर्धनम्, ॥
कारयिष्यामि वा कृत्यं विजिघृक्षुर् वनौकसौ.' ४५

शीर्षेत्यादि—यत एवंविधस्त्वं दुष्टः अतोऽहम्। '४०७। त्वा-मौ द्वितीयायाः ।८।१।२३।' इत्याष्टमिकलक्षणेन त्वादेशः। शीर्षच्छेद्यं शीर्षच्छेदार्हम्। '१७३०। शीर्षच्छेदाद्यत् ।५।१।६५।' क्षितिवर्धनं करोमि। शिरश्छित्वा व्यापादयामीत्यर्थः। अथवा कृत्यं करणीयम्। '२८७१। विभाषा कृ-वृषोः ।३।१।१२०।' इति क्यप्। कारयिष्यामि। '५४१। हृ-क्रोः—१।४।५३।' इति द्विकर्मकता। विजिघृक्षुः विग्रहीतुमिच्छुः। '२६१०। सनि ग्रह-गुहोश्च ।७।२।१२।' इतीट्प्रतिषेधः। '२६०९। रुद-विद—।१।२।८।' इत्यादिना सनः कित्त्वे '२४१२। ग्रहि-ज्या—।६।१।१६।' इत्यादिना संप्रसारणम्। '३२४। हो ढः ।८।२।३१।'। '३२६। एकाचो बशो भष्-।८।२।३७।'। '२९५। षढोः कः सि ।८।२।४१।' वनौकसौ रामलक्ष्मणौ। वनमोको गृहं ययोः। '६२७। न लोक—।२।३।६९।' इति कर्मणि षष्ठ्याः प्रतिषेधः॥

२२९—तमुद्यत-निशाताऽसिं
प्रत्युवाच जिजीविषुः ॥
मारीचो ऽनुनयंस् त्रासाद्
'अभ्यमित्र्यो भवामि ते. ॥ ४६ ॥

तमित्यादि—तं रावणं एवमुक्तवन्तम्। निशात इति '३०७५। शाच्छोरन्यतरस्याम् ।७।४।४१।' इतीत्वाभावपक्षे रूपम्। उद्यत उत्थापितः निशात-

भवामि ते । अमित्रस्याभिमुखमभ्यमित्रम्यत्राभिमुख्येऽव्ययीभावः । अभ्यमित्र-मलंगामीत्यस्मिन्नर्थे '१८१८। अभ्यमित्राच्छ च ।५।२।१७।' इति चकाराद्यत्खौ चेति यत् । त्वदमित्राभिमुखं गच्छासीत्यर्थः । अनुनयन् अनुकूलयन् । किमर्थं जिजीविषुः जीवितुमिच्छुः ॥

२३०—हरामि राम-सौमित्री मृगोभूत्वा मृग-द्युवौ, ॥
उद्योगमभ्यमित्रीणो यथेष्टं त्वं च सं-तनु.' ॥ ४७ ॥

हरेत्यादि—अहं मृगो भूत्वा रामसौमित्री हरामि । देशान्तरं प्रापयामि, आखेटकाभिरतत्वात् । यदाह मृगद्युवौ मृगैर्दीव्यत इति क्विप् । '२५६१। च्छ्वोः शूडनुनासिके च ।६।४।१९।' इति चकारात् क्वौ च ऊठ् यणादेशः । उवङ् । मृगद्युताविति पाठान्तरम् । तत्र 'द्यु अभिगमने' मृगान् द्यौति अभिगच्छतीति क्विप् । त्वं च यथेष्टं यथारुचि । तमुद्योगं संतनु विस्तारं कुर्वित्यर्थः । तनोते-र्लोटि '२३३४। उतश्च—।६।४।१०६।' इति हेर्लुक् । अभ्यमित्रीणः अमित्राभिमुखमलंगामी। '१८१८। अभ्यमित्राच्छ च ।५।२।१७।'इति चकाराद्यत्खौ चेति खः॥

२३१—ततश् चित्रीयमाणो ऽसौ हेम-रत्न-मयो मृगः ॥
यथामुखीनः सीतायाः पुप्लुवे बहु लोभयन्. ॥ ४८ ॥

तत इत्यादि—उक्तानन्तरमसौ मारीचो मायामृगीभूतः सन् हेमरत्नमयः रत्नं च हेम चेति विगृह्य । '१५२३। मयड्वैतयोर्भाषायाम्—।४।३।१४३।' इति विकारे मयट् । निर्मलत्वात् । सीताया अग्रतो यथामुखीनः प्रतिबिम्बाश्रय इव भूत्वा पुप्लुवे भ्रमति स्म । इवशब्दलोपो द्रष्टव्यः । '१८०७। यथामुखसंमुखस्य दर्शनः खः ।५।२।६।' । बहु लोभयन् सुष्ठु स्पृहां जनयन् । यतश्चित्रीयमाणः आश्चर्यं भवन् । हेमरत्नमयत्वात् । '२६७५। नमोवरिव—।३।१।१९।' इत्यादिना क्यच् । 'चित्र-ङ् आश्चर्ये' । ङकारस्यात्मनेपदार्थत्वात् शानच् । अवयवकृतं लिङ्गं समुदायस्य भवतीति ॥

२३२—तेना ऽदुद्यूषयद् रामं मृगेण मृग-लोचना ॥
मैथिली विपुलो रस्कं प्रावुवूर्षुर् मृगा ऽजिनम्. ॥४९॥

तेनेत्यादि—तेन मृगेण मैथिली सीता राममदुद्यूषयत् क्रीडितुमिच्छन्तं प्रयुक्तवती गृह्यतामयमिति । इवन्तस्य दिवेः '२६१८। सनीवन्त—।७।२।४९।' इत्यादिना यदा नेट् तदा '२५६१। च्छ्वोः शूट्—।६।४।१९।' द्विर्वचनम् । तस्मात् सन्नन्तण्यन्तात् लङि रूपम् । मृगलोचना मृगस्य लोचने इव लोचने यस्याः । मध्यमपदलोपी सः । विपुलोरस्कं विस्तीर्णवक्षस्थलम् । '८८९। उरःप्रभृतिभ्यः कप् ।५।४।१५१।' । किमर्थमदुद्यूषयत् मृगाजिनं मृगचर्म प्रावुवूर्षुः प्रावरीतु-मिच्छु । प्राक्पूर्वस्य '२६२५ इट् सनि वा ७ २ ४१' इत्यनिट्पक्षे '२४१४

अज्झनगमां सनि ।६।४।१६।' इति दीर्घः । '२२९४। उदोष्ठ्यपूर्वस्य ।७।१।१०२।' इत्युत्वम् । रपरत्वम् । '४२३। वोरुपधाया दीर्घ इकः ।८।२।७६।' द्विर्वचनम् । '२११। इण्कोः ।८।३।५७।' इति षत्वम् । रेफस्येण्ग्रहणेन ग्रहणाद्दन्त्योष्ठ्योऽपि वकार ओष्ठ्यग्रहणेन गृह्यते ॥

२३३—योग-क्षेम-करं कृत्वा सीताया लक्ष्मणं ततः ॥
मृगस्याऽनुपदी रामो जगाम गज-विक्रमः. ॥ ५० ॥

योगेत्यादि—ततो शुश्रूषानन्तरं रामो जगाम । योगक्षेमौ शरीरस्थितिपालने करोतीति '२९३४। कृञो हेतु-।३।२।२०।' इत्यादिना हेतौ टः । ग्रहणवता तदन्तविधेरभावात् '२९६१। क्षेमप्रियमद्रे ऽण् च ।३।२।४४।' इत्यण्खचौ न भवतः। सीतायाः स्थितिपालनहेतुभूतं लक्ष्मणं कृत्वा रामः मृगस्यानुपदी अन्वेष्टा '१८९०। अनुपद्यन्वेष्टा—।५।२।९०।' इति निपातनात् साधुः । गजविक्रमः । गजगमनमिव गमनं यस्येत्यर्थः ॥

२३४—स्थायं स्थायं क्वचिद् यान्तं
क्रान्त्वा क्रान्त्वा स्थितं क्वचित् ॥
वीक्षमाणो मृगं रामश्
चित्र-वृत्तिं विसिष्मिये. ॥ ५१ ॥

स्थायमित्यादि—मृगं चित्रवृत्तिमद्भुतशरीरचेष्टं वीक्षमाणो रामो विसिष्मिये विस्मितः । ष्मिङो ङित्वादात्मनेपदम् । षोपदेशत्वाच्चाभ्यासेणः परस्य सस्य षः । चित्रवृत्तितां दर्शयन्नाह—स्थायं स्थायं स्थित्वा स्थित्वा । क्वचित् प्रदेशे यान्तं क्रान्त्वा क्रान्त्वा । क्वचित्प्रदेशे उत्प्लुत्योत्प्लुत्य स्थितम् । आभीक्ष्ण्ये णमुलि क्त्वाणमुलौ द्विर्वचनं च ॥

२३५—चिरं क्लिशित्वा मर्मा-विद् रामो विलुभित-प्लवम् ॥
शब्दायमानमव्यात्सीत् भय-दं क्षणदा-चरम्. ॥५२॥

चिरमित्यादि—रामः क्षणदाचरं मारीचमव्यात्सीत् विद्धवान् । व्यधेर्लुङि हलन्तलक्षणा वृद्धिः । मर्माविद्रामः मर्माणि विध्यतीति क्विप् । '१०३७। नहि-वृति-।६।३।११६।' इत्यादिना पूर्वपदस्य दीर्घत्वम् । चिरं क्लिशित्वा महान्तं कालमायस्य । अत्यन्तसंयोगे द्वितीया । '३०४९। क्लिशः क्त्वा-निष्ठयोः।७।२।५०।' इति विकल्पेनेट् । तत्र '२६१७। रलो व्युपधात्-।१।२।२६।' इति कित्त्वविकल्पे '३३२६। मृड-मृद-।१।२।७।' इत्यादिना कित्त्वम् । विलुभितप्लवं व्याकुलितगमनम् । '३०४८। लुभो विमोहने । ७।२।५४।' इतीट् । विमोहनं व्याकुलीकरणम् । शब्दं कुर्वाणम् । '२६७३। शब्द-वैर-।३।१।१७।' इति क्यङ् भयदं निशाचरम् शब्दविशेषणं वा ॥

२३६—श्रुत्वा विस्फूर्जथु-प्रख्यं निनादं परिदेविनी ॥
मत्वा कष्ट-श्रितं रामं सौमित्रिं गन्तुमैजिहत्. ॥५३॥

श्रुत्वेत्यादि—विस्फूर्जथुप्रख्यं वज्रनिर्घोषतुल्यम्। '२४४। टु-ओ स्फूर्जा वज्र-निर्घोषे'। '३२६७। ट्वितोऽथुच् ।३।३।८९।' निनादं शब्दम्। '३२४१। नौ गद-नद-।३।३।६४।' इति विकल्पनात् पक्षे घञ्। श्रुत्वा मैथिली कष्टश्रितं कृच्छ्रप्राप्तं रामम्। '६८६। द्वितीया श्रित-।२।१।२४।' इत्यादिना सः। मत्वा बुद्ध्वा। कृच्छ्रप्राप्तेन रामेण मृतमिति परिदेविनी परिदेवनशीला शङ्कमाना। '३१२२। संपृचानुरुध-।३।२।१४२।' इत्यादिना घिनुण्। सौमित्रिं गन्तुमैजिहत्। ईहां कारितवती। ईहेर्ण्यन्तात् लुङि द्विर्वचनेऽचीति स्थानिवद्भावादजादेर्द्वितीयस्येति हिशब्दस्य द्विर्वचनम्। अभ्यासकार्यं च ॥

२३७—'एष प्रावृषि-जाऽम्भो-द-
नादी भ्राता विरौति ते, ॥
ज्ञातेयं कुरु सौमित्रे !
भयात् त्रायस्व राघवम्.' ॥ ५४ ॥

एष इत्यादि—एष ते भ्राता रौति। '२४४३। उतो वृद्धिः-।७।३।८९।' इत्यौकारः। प्रावृषि जातः प्रावृषिजः। '३००७। सप्तम्यां जनेर्डः ।३।२।९७।' '९७३। प्रावृट्-।६।३।१५।' इत्यादिना सप्तम्या अलुक् स चाम्भोदश्चेति विशेषणमिति सः। तद्वन्नदतीति '२९८९। कर्तर्युपमाने ।३।२।७९।' इति णिनिः। तस्मात् सौमित्रे! ज्ञातेयं ज्ञातिभावं तत्कर्म वा कुरु। '१७९२। कपि-ज्ञात्योर्ढक्। ।५।१।१२७।' तेन भयात्त्रायस्व राघवम् ॥

२३८—'राम-संघुषितं नैतत्, मृगस्यैव विवञ्चिषोः ॥
राम-स्वनित-सङ्काशः स्वान', इत्यवदत् स ताम्. ५५

रामेत्यादि—रामसंघुषितं रामशब्दितमेतन्न भवति। '१८५९। घुषिँर् विशब्दार्थः।' तस्य निष्ठायां '३०६९। रुष्यमत्वर-।७।२।२८।' इत्यादिना विकल्पेनेट्। मृगस्य विवञ्चिषोः छलयितुमिच्छोः। '१९८। वञ्चु गतौ।' भौवादिकः। तस्यानेकार्थत्वात्। प्रलम्भन इति चौरादिकस्याण्यन्तस्य वा प्रयोगः। येषामनित्यण्यन्ताश्चुरादय इति दर्शनं तेषां मतेनात्रापि सिध्यति। एष स्वानो ध्वानः। '३२३९। स्वन-हसोर्वा ।३।३।६२।' इति पक्षे घञ्। कीदृशः रामस्वनितसङ्काश [illegible] वा सीतां [illegible] उक्तवान्। स लक्ष्मणः ॥

२३९—'आप्यान-स्कन्ध-कण्ठांऽसं
रुषितं सहितुं रणे ॥
प्रोर्णुवन्तं दिशो बाणैः
काकुत्स्थं भीरु! कः क्षमः ॥ ५६ ॥

आप्येत्यादि—'१०३३। प्यै-ङ् वृद्धौ।' अस्मादाङ्पूर्वात् '३०१७। संयोगादेरातो धातोर्यण्वतः।८।२।४३।' इति निष्ठातो नः। ओ-प्यायी वृद्धाविलस्य वा रूपम्। '३०१९। ओदितश्च ८।२।४५।' इति निष्ठानत्वम्। पीभावस्तु आङ्पूर्वस्य स्वन्धूधसोरिति वचनात् इह न भवति आप्यानस्कन्ध इति। आप्यानं स्थूलं स्कन्धकण्ठांसं यस्य काकुत्स्थस्य। बाहुशिखरमंसः तस्य पश्चिमो भागः स्कन्धः। तं रुषितं क्रुद्धम्। रणे संग्रामे सहितुं हे भीरु कातरे! कः क्षमः शक्तः। अपि तु न कोऽपीत्यर्थः। क्षमेः शक्नोत्यर्थत्वात् तदुपपदे '३१७७। शक-धृष-।३।४।६५।' इत्यादिना तुमुन्। '२३४०। तीष-सह-।७।२।४८।' इत्यादिना वेट्। ककुत्स्थस्यापत्यं काकुत्स्थः। '१११५। शिवादिभ्योऽण् ।४।१।११२।' कस्मान्न क्षम इत्याह—प्रोर्णुवन्तं दिशो बाणैः। यतः सर्वाः दिशः बाणैः छादयन्तम्। ऊर्णोतेः शतरि उवङ्। क्षमत इति क्षमः। पचाद्यच् ॥

२४०—देहं विभ्रक्षुर-स्त्राऽग्नौ मृगः प्राणैर् दिदेविषन् ॥
ज्या-घुष्ट-कठिनाऽङ्गुष्ठं राममायान् मुमूर्षया. ॥५७॥

देहमित्यादि—एष मृगो राममायात् आगतवान्। यातेर्लङि रूपम्। किमर्थं देहं शरीरं अस्त्राग्नौ अस्त्रे अग्नाविव। विभ्रक्षुः भ्रष्टुमिच्छुः। भ्रस्जेः '२६१८। सनीवन्तर्ध-।७।२।४९।' इत्यत्रेडभावपक्षे '३८०। स्कोः संयोगाद्योः-।८।२।२९।' इत्यनेन सलोपे षत्वकुत्वयोश्च रूपम्। प्राणैर्दिदेविषन् क्रीडितुमिच्छन्। '५६२। दिवः कर्म च ।१।४।४३।' इति चकारात् करणसंज्ञा। '२६१८। सनीवन्त-।७।२।४९।' इतीड्पक्षे रूपम्। ज्यया गुणेन घुष्टौ निघृष्टौ अत एव कठिनौ अङ्गुष्ठौ सव्यापसव्यकर्षणाद्यस्य। '३०६३। घुषिरविशब्दने ।७।२।२३।' इति निष्ठायामनिट्। मुमूर्षया मर्तुमिच्छया। मृङः सनि '२४९४। उदोष्ठ्यपूर्वस्य ।७।१।१०२।' इत्युत्वम्। '३२७९। अ प्रत्ययात् ।३।३।१०२।' ॥

२४१—शत्रून् भीषयमाणं तं रामं विस्मापयेत कः, ॥
मा स्म भैषीस्, त्वया ऽद्यैव कृताऽर्थो द्रक्ष्यते पतिः.'

शत्रूनित्यादि—तं रामं शत्रून् भीषयमाणं भीतान् कुर्वाणम्। '२५९५। भियो हेतुभये षुक् ।७।३।४०।'। '२५९४। भी-स्म्योर्हेतुभये ।१।३।६८।' इति तङ्। विस्मापयेत कः क्षुभितचित्तं कुर्यात्। नैवेत्यर्थः। '२५९६। नित्यं स्मयतेः ।६।१।५७।' इति णावात्वम्। '२५७०। अर्तिह्री-।७।३।३६।' इत्यादिना पुक्। निमन्त्रणे नियोगे वा लिङ्। पूर्ववदात्मनेपदम्। तस्मान्मा स्म भैषी· मा भूर्भी-

ता '२२२० स्मोत्तरे लङ् च ।३।३।१७६।' इति चकारात् लुङ् । सिचि वृद्धिः । त्वया अद्यैव कृतार्थः पूर्णमनोरथः पतिर्द्रक्ष्यते । दृशेः कर्मणि लृट् ॥

२४२—'यायास् त्वमिति कामो मे, गन्तुमुत्सहसे न च, ॥
इच्छुः कामयितुं त्वं माम्', इत्यसौ जगदे तया.॥५९॥

याया इत्यादि—तदन्वेषणाय यायास्त्वमिति कामोऽभिलाषः । '२८१०। कामप्रवेदनेऽकच्चिति ।३।३।१५३।' इत्यकच्चित्युपपदे लिङ् । न च गन्तुमुत्सहसे । '३१७७। शक-धृष—।३।४।७५।' इति तुमुन् । तस्मान्नूनं मां कामयितुमिच्छुः एषणशीलः । '३१७६। समानकर्तृकेषु तुमुन् ।३।३।१५८।' । '३१४९। बिन्दुरिच्छुः ।३।२।१६९।' इति निपातनात्साधुः । इत्येवमसौ लक्ष्मणो जगदे गदितस्तया सीतया ॥

२४३—मृषोद्यं प्रवदन्तीं तां सत्य-वद्यो रघूत्तमः ॥
निरगात् 'शत्रु-हस्तं त्वं यास्यसी'ति शपन् वशी.॥६०॥

मृषोद्यमित्यादि—मां कामयितुमिच्छुरित्येतन्मृषोद्यम् मृषावादम् । '२८६५। राजसूय—।३।१।११४।' इत्यादिना भावे क्यप् । यजादित्वात् सम्प्रसारणम् । प्रवदन्तीं तां सीताम् । रघूत्तमो लक्ष्मणः । शपन् शत्रुहस्तं त्वं यास्यसीति शापं प्रयच्छन् । भौवादिकोऽत्र शपिर्न दैवादिकः । निरगात् निर्गतः । तस्मादुटजादित्यर्थात् । कथं मृषोद्यमित्याह—वशी वशनं वशः इन्द्रियसंयमनम् । 'वशिरण्योरुपसंख्यानम्' इत्यप् । स यस्यास्ति स वशी जितेन्द्रियः । अत एव सत्यवद्यः अवितथवादी । शत्रुहस्तं यास्यसीति सत्यं वदतीति '२८४१। कृत्य-ल्युटो बहुलम् ।३।३।११३।' इति कर्तरि यत् । '२८५४। वदः सुपि क्यप् च ।३।१।१०६।' इति चकाराद्यत् । भावे वा यतं विधायाच् अर्शआदित्वात् ॥

कालापकम् (४)—

२४४—गते तस्मिन्, जल-शुचिः
शुद्ध-दन् रावणः शिखी ॥
जञ्जपूको ऽक्ष-माला-वान्
धारयो मृद्लाबुनः ॥ ६१ ॥

गत इत्यादि—तस्मिन् लक्ष्मणे गते सति रावणः सीतामूच इति वक्ष्यमाणेन सम्बन्धः । कीदृशः जलशुचिः स्नात इत्यर्थः । शुद्धदन् निर्मलदशनः शुद्धा दन्ता यस्य '८८३ अग्रान्त ५ ४ १४५' इत्यादिना दन्तस्य ददादेश शिखा

१—(१४८) श्लोकोक्त टीकन प्रत्ययम्

अस्यास्तीति शिखी परिव्राजकः। व्रीह्यादित्वादिनिः। जंजपूकः पापाशयत्वात् गर्हितं जपतीति। '२६३५। लुप-सद-।३।१।२४।' इति यङ्। '२६३८। जप-जभ-।७।४।८६।' इत्यभ्यासस्य नुक्। '३१४६। यज-जप-दशां यङः।३।२।१६६।' इत्यूकः। अक्षमालावान् अक्षसूत्रयुक्तः। संसर्गे मतुप्। धारयतीति धारयः। '२९००। अनुपसर्गात्-।३।१।१३८।' इति शः। कस्य मृद्लाबुनः। 'नजि लम्बेर्नलोपश्च' इत्यौणादिक ऊकारे प्रत्यये अलाबूः। तस्य विकारः फलमिति '१५११। ओरञ् ।४।३।१२९।'। तस्य फले लुक्। नपुंसकह्रस्वत्वम्। मृत्पूर्णमलाबु इति मध्यमपदलोपी सः। कृत्प्रयोगे कर्मणि षष्ठी। '३२०। इकोऽचि विभक्तौ।७।१।७३।' इति नुम्॥

२४५—कमण्डलु-कपालेन शिरसा च मृजा-वता॥
संवस्य लाक्षिके वस्त्रे मात्राः संभाण्ड्य दण्ड-वान् ६२

कमेत्यादि—कमण्डलुना कपालेन च '९१०। जातिरप्राणिनाम्।२।४।६।' इति द्वन्द्वैकवद्भावः। मृजावता निर्मलेन शिरसा च उपलक्षित इत्थम्भूते तृतीया। संवस्य परिधाय। 'वस्त्रात्समाच्छादने' इति '२६७७। मुण्डमिश्र-।३।१।२१।' इत्यादिना णिच्। लाक्षिके वस्त्रे। लाक्षया रक्ते। '१२०३। लाक्षा-रोचनात्-।४।२।२।' इत्यादिना ठक्। मात्राः कमण्डल्वादिकं सम्भाण्ड्य समाचित्य राशीकृत्येत्यर्थः। 'भाण्डात् समाचयने' इति '२६७६। पुच्छ-भाण्ड-।३।१।२०।' इत्यादिना णिङ्। दण्डवान् गृहीतत्रिदण्डः संसर्गे मतुप्॥

२४६—अधीयन्नात्म-विद् विद्यां धारयन् मस्करि-व्रतम्॥
वदन् बह्वङ्गुलि-स्फोटं भ्रू-क्षेपं च विलोकयन्॥६३॥

अधीत्यादि—मा कुरुत कर्माणि शान्तिर्वः श्रेयसीत्येवं घोषयन्ति ये मस्करिणः परिव्राजकाः। तेषां व्रतमकृच्छ्रमसौ धारयन्। '१०६८। मस्कर-मस्करिणौ-।६।१।१५४।' इति परिव्राजके सुट्। आत्मविदां योगिनाम्। विद्यामुपनिषदमधीयन् जपन् '३११०। इङ्धार्योः-।३।२।१३०।' इतीङो धारेश्च अकृच्छ्रवति कर्तरि शतृप्रत्ययः। अन्तरा बहु प्रभूतं वदन्। अङ्गुलिस्फोटं पुनः पुनः स्फोटिकान्दत्वा भ्रूक्षेपं च विलोकयन् भ्रूवावुत्क्षिप्योत्क्षिप्य विलोकयन्। उभयत्रापि '३३७६। स्वाङ्गेऽध्रुवे ३।४।५४।' इति णमुल्॥

२४७—संदिदर्शयिषुः साम निजुन्हूषुः क्षपाट-ताम्॥
चंक्रमा-वान् समागत्य सीतामूचे—'सुखाभव.'॥६४॥

सदीत्यादि इह भय मा भूदिति साम सान्त्व संदिदर्शयिषु सदर्शयि-

क्रमेः '२६३४। नित्यं कौटिल्ये गतौ ।३।१।२३।' इति यङ् । '२६४३। नुगतः –।७।४।८५।' इत्यभ्यासस्य नुक् ।'३२७९। अः प्रत्ययात् ।३।२।१०२।' इत्याकारः । '२३०८। अतो लोपः ।६।४।४८।' । '२६३१। यस्य हलः ।६।४।४९।' टाप् । सा यस्यास्ति चंक्रमावान् । कुटिलगतिमानित्यर्थः । समागत्य ढौकित्वा । सीतामूचे । किमित्याह–सुखाभवेति अनुकूला भवेत्यर्थः । यदहं प्रार्थये तत्र प्रतिकूला न भवेति भावः । '२१३४। सुखप्रियादानुलोम्ये ।५।४।६३।' इति कृभ्वस्तियोगे डाच् ॥

युग्मम्—

२४८–सायंन्तनीं तिथि-प्रण्यः पङ्कजानां दिवा-तनीम् ॥
कान्तिं कान्त्या सदा-तन्या ह्रेपयन्ती शुचि-स्मिता.

सायमित्यादि—का त्वमिति वक्ष्यमाणेन संबन्धः सायं दिनावसानं तत्र भवां कान्तिम् । यदा षोऽन्तकर्मणीत्येतस्मात् घञ्प्रत्ययान्तः तदा '१३९१। सायंचिरं–।४।३।२४।' इति टुट्युलौ तुट् च मकारान्तत्वं च निपात्यते । यदा सायंशब्दो मकारान्तः तदाप्यव्ययत्वादेव प्रत्ययागमौ स्याताम् । कस्येत्यपेक्षायां तिथिप्रण्यः चन्द्रमसः पञ्चदश कलाः तासां वृद्धिह्रासाभ्यां पञ्चदश तिथीः प्रणयति प्रवर्तयति । '२९७५। सत्सू-द्विष–।३।२।६१।' इति क्विप् । '२२८७। उपसर्गादसमासे–।८।४।१४।' इति णत्वम् । '२७२। एरनेकाचः ।६।४।८२।' इति यणादेशः । पङ्कजानां च कान्तिं कीदृशीं । दिवातनीं दिवाभवाम् । कान्त्या त्वदीयया सदातन्या सदाभवया ह्रेपयन्ती लज्जयन्ती । दिवातन्याः सायन्तन्याश्च सदाभवत्वात् । जिह्रेतेः '२५७०। अर्ति–।७।२।३६।' इत्यादिना णौ पुक् । शुचिस्मिता शुभ्रहासा ॥

२४९–का त्वमेकाकिनी भीरु ! निरन्वय-जने वने, ॥
क्षुध्यन्तोऽप्यघसन् व्यालास् त्वाम-पालां कथं न वा.

का त्वमित्यादि—का त्वं देवी मानुषी राक्षसी वेति । एकाकिनी असहाया । '१९९८। एकादाकिनिच्चासहाये ।५।३।५२।' इति आकिनिच् । भीरु इत्यामन्त्रणं भयप्रकृतित्वात् स्त्रीणाम् । निरन्वया निरनुगमा जना यस्मिन्वने यत्र न कथंचिन्मनुष्याणां सम्भवः । क्षुध्यन्तोऽपि बुभुक्षमाणा अपि । दिवादित्वात् श्यन् । व्याला हिंस्रा व्याघ्रादयः कथं वा त्वां नाघसन् न भक्षितवन्तः । अदेः '२४२७। लुङ्सनोर्घस्लृ ।२।४।३७।' लृदित्वात् च्लेरङ् । क्षुध्यन्तो नावसन्निति पाठान्तरम् । तत्र कथं न वा अपरिचितानेवावसन् इति योज्यम् । अपालां सतीं अविद्यमानः पालो यस्या इति । '१७२६। पाल रक्षणे' इति चौरादिकः । पालयतीति पालः । पचाद्यच् । यदा प्रयोजकविवक्षा तदा पातेर्लुगागमो णौ वक्तव्य इति लुक् । तद ॥

**२५०–हृदयं-गम-मूर्तिस् त्वं सुभगं-भावुकं वनम् ॥
कुर्वाणा भीममप्येतद् वदा ऽभ्यैः केन हेतुना. ॥६७॥**

हृदयमित्यादि—केन हेतुना इदं वनमभ्यैः अभिगतासि वद कथय । अभिपूर्वादिणो लङ् । मध्यमपुरुषैकवचनम् । '२२५४। आडजादीनाम् ।६।४।७२। । '२६९। आटश्च ।६।१।९०।' इति वृद्धिः । हृदयं गच्छति या मूर्तिः शरीरमत्यन्तसौन्दर्यात् । '२९६४। गमश्च ।३।२।४७।' इति खच् । सा एवंविधा मूर्तिर्यस्याः सा त्वं भीममप्येतद्वनं सुभगम्भावुकं सर्वस्यैवाप्रियं प्रियं कुर्वाणा । असुभगं भूत्वा सुभगं भवतीति '२९७४। कर्तरि भुवः–।३।२।५७।' इति खुकञ् ॥

**२५१–सुकृतं प्रिय-कारी त्वं कं हरस्युपतिष्ठसे, ॥
पुण्य-कृच् चाटु-कारस् ते किङ्करः सुरतेषु कः. ॥६८॥**

सुकृतमित्यादि—सुकृतं पुण्यकारिणं शोभनं कृतवानिति '२९९९। सुकर्म-पाप–३।२।८८।' इत्यादिना क्विप् । कं रहसि विजने त्वमुपतिष्ठसे उपश्लिष्यसि । संगतकरणे लङ् । प्रियकारी अनुकूलवर्तिनी सती । प्रियमनुकूलं करोतीति '२९६१। क्षेम-प्रिय-मद्रेऽण् च ३।२।४४।' इति अण् '४७०। टिड्ढाणञ्–।४।१।१५।' इत्यादिना ङीप् । पुण्यकृत् कृतपुण्यः । तस्य पूर्ववत् क्विप् । चाटुकारः प्रियवाक्यकरः । '२९३७। न शब्दश्लोक–३।२।२३।' इत्यादिना टे प्रतिषिद्धेऽणेव भवति । ईदृशस्ते किङ्करः दासः । '२९३५। दिवा-विभा–।३।२।२१।' इति टः । किंयत्तद्बहुषु कृञोऽज्विधानमिति तस्त्रीविषये द्रष्टव्यम् । सुरतेषु शोभनरतेषु । '३०९०। नपुंसके भावे क्तः ।३।३।११४।' । '२४२८। अनुदात्तो–।६।४।३७।' इत्यादिनानुनासिकलोपः । अनेनोभयरुचिराख्याता ॥

**२५२–परि-पर्युदधे रूपमा-द्यु-लोकाच् च दुर्-लभम्. ॥
भावत्कं दृष्टवत्स्वैतदसास्वधि सु-जीवितम्. ॥ ६९ ॥**

परीत्यादि—एतद्रूपं भावत्कं भवत्या इदमिति '१३१९। भवतष्ठक्छसौ । ।४।२।११३।' इति 'ठक्छसौ । 'ठक्छसोश्चोपसंख्यानम्' इति पुंवद्भावः । '१२-२१। इसुसुक्तान्तात्कः ।७।३।५१।' दुर्लभं परिपर्युदधेः '५९६। अपपरी वर्जने । ।१।४।८८।' इति कर्मप्रवचनीयसंज्ञायां द्वितीयायां प्राप्तायां '५९८ पञ्चम्यपाङ्परिभिः ।२।३।१०।' इति पञ्चमी । '६६६। अप-परि-बहिरञ्चवः पञ्चम्या ।२।१-।१२।' इति विभाषासमासश्च । असमासपक्षे '२१४१। परेर्वर्जने ।८।१।५।' इति द्विर्वचनम् । उदधिं वर्जयित्वा चतुरुदधिमेखलायां भुवि दुर्लभमाद्युलोकाच्च स्वर्गलोकान्तं च यावत् दुर्लभमत्रापि पूर्ववत्पञ्चमी । तादृशं दृष्टवत्स्वस्मासु अधि सुजीवितमसद्विषये आधिक्येन सुजीवितम् । अहो वा सुजीवितमिति अहोशब्दार्थे अधिशब्दो वर्तते ॥

२५३–आपीत-मधुका भृङ्गैः सुदिवेवाऽरविन्दिनी ॥
सत्-परिमल-लक्ष्मीका नाऽपुंस्काऽसीति मे मतिः

आपीतेत्यादि—परि सर्वतो मार्जनमिति परिमलः। कलत्रपक्षेत्यधिकृत्य मृजेष्टिलोपश्चेति कलप्रत्यय औणादिकः। इह सुरतोपभोगविमर्दः परिमलोऽभिप्रेतः। तस्य लक्ष्मीः त छृतत्वात्। सती विद्यमाना परिमलशोभा यस्याः।'८८९। उरःप्रभृतिभ्यः कप्।५।४।१५१।' सा त्वमपुंस्का अविद्यमानभर्तृका नासीति मे मतिः। पूर्ववत्कप्। किमिव सुदिवेवाऽरविन्दिनी पद्मिनी। शोभनं दिवा नीहाराद्यभावाद्दिवा दिवसं यस्याः। '८६०। सुप्रात–।५।४।१२०।' इत्यादिना अच्। आपीतमधुका भृङ्गैः आपीतं मधु यस्याः। '८९१। शेषाद्विभाषा ।५।४।१५४।' इति कप्। यथेयं सत्परिमललक्ष्मीका तथा त्वमपीति॥

२५४–मिथ्यैव श्रीः श्रियं-मन्या, श्रीमन्-मन्यो मृषा हरिः, ॥
साक्षात्-कृत्याऽभिमन्येऽहं त्वां हरन्तीं श्रियं श्रियः ७१

मिथ्यैवेत्यादि—श्रियः श्रियं रूपसम्पदं हरन्तीमभिभवन्तीं त्वां साक्षात्कृत्य प्रत्यक्षीकृत्य। विभाषा कृञीत्यनुवर्तमाने '७७५। साक्षात्प्रभृतीनि च।१।४।७४।' इति गतिसंज्ञा। गतिसमासे ल्यबादेशः। अहमभिमन्ये किं मिथ्या श्रीः श्रियंमन्या अहमेव श्रीर्नान्येति मन्यमाना श्रीर्मिथ्या नैव श्रीः किन्तु त्वमेवेति। '२९९३। आत्ममाने खश्।३।२।८३।' । '२५०५। दिवादिभ्यः श्यन्।३।१।६९।' । '२९९४। इच एकाचोऽम्प्रत्ययवच्च।६।३।६८।' इत्यम्भावः। तस्यामः प्रत्ययत्वान्मलोपाभावः। '१९०। न विभक्तौ तुस्माः।१।३।४।' इति वचनात्। अचीतीयङादेशः। क्विबन्ता धातुत्वं न जहतीति क्विबचीत्यादिना श्रयतेरौणादिकः क्विप्। हरिश्चात्मानं श्रीमन्तं मन्यमानो मृषा न श्रीमानित्यहमभिमन्ये॥

२५५–नोदकण्ठिष्यताऽत्यर्थं, त्वामैक्षिष्यत चेत् स्मरः, ॥
खेलायन्ननिशं नापि सजूः-कृत्य रतिं वसेत्, ॥ ७२ ॥

नोदेत्यादि—स्मरभार्या रतिः सापि रूपेण निकृष्टेति दर्शयति। चेत् यदि स्मरः त्वामैक्षिष्यत दृष्टवानभविष्यत् तदा अत्यर्थं नोदकण्ठिष्यत रतिं प्रति भृशमुत्कण्ठितो नाभविष्यत्। '६५२। ईक्ष दर्शने' इति, '२७३। कठि शोके' इति भौवादिकात् क्रियातिपत्तौ लृङ्। नापि रतिं स्वभार्यां सजूःकृत्य सहायीकृत्य वसेत्, अपि तु परित्यजेत्। अत्र क्रियातिपत्तिर्न विवक्षिता किन्तु हेतुहेतुमद्भावः। नापि रतिं सजूःकृत्य वसेत् यदि त्वामीक्षेतेति हेतुपदमभ्यूह्य हेतुमद्भावदर्शनात्। ऊर्यादिषु 'सजूः सहार्थः' इति वचनात् गतिसंज्ञा। खेलायन् अनिशं क्रीडन् सर्वदा

यच्छ॥

२५६—वल्गूयन्तीं विलोक्य त्वां
स्त्री न मन्तूयतीह का, ॥
कान्तिं नाऽभिमनायेत
को वा स्थाणु-समो ऽपि ते. ॥ ७३ ॥

वल्गित्यादि—त्वां वल्गूयन्तीं शोभमानां विलोक्य न मन्तूयति स्त्रीह का। इह जगति का स्त्री न मन्तूयेत् कुप्येत् । सर्वदा कुप्यत्येव ईर्ष्यायुक्तत्वात् स्त्रीणाम् । असम्भावने लिङ् । वल्गु-मन्तुशब्दाभ्यां कण्ड्वादित्वाद्यक् । को वा को नाम स्थाणुसमोऽपि काष्ठतुल्योऽपि गुणदोषानभिज्ञत्वात्ते तव कान्तिं विलोक्य नाभिमनायेत पूर्वमदृष्टत्वादनभिमनाः सन् अभिमनाः सचेता न भवेत् । पूर्ववल्लिङ् । अभिमनसो भृशादित्वात्क्यङ् सलोपश्च । महादेवतुल्यो वा आस्तामन्यः सोऽपि तावदभिमनायेत् ॥

२५७—दुःखायते जनः सर्वः, स एवैकः सुखायते, ॥
यस्यौत्सुकायमाना त्वं न प्रतीपायसेऽन्तिके. ॥७४॥

दुःखेत्यादि—स एवैको जनः सुखायते सुखं वेदयते । यस्यान्तिके समीपे न त्वं प्रतीपायसे न प्रतिकूलवर्तिनी भवसि । उत्सुकायमाना सती । यस्य पुनरन्तिके उत्सुकायमाना प्रतीपायसे स सर्वो जनः दुःखायते दुःखं वेदयते । सुख-दुःखशब्दाभ्यां '२६७४। सुखादिभ्यः कर्तृवेदनायाम् ।३।१।१८।' इति क्यङ् । उत्सुक-प्रतीपशब्दाभ्यां भृशादित्वात् ॥

२५८—कः पण्डितायमानस् त्वा-
मादायाऽऽमिष-सन्निभाम् ॥
त्रस्यन् वैरायमाणेभ्यः
शून्यमन्ववसद् वनम्.' ॥ ७५ ॥

क इत्यादि—पण्डितायमानः अपण्डितः कथमपि पण्डितो भवन् । भृशादित्वात् क्यङ् । त्वामामिषसन्निभां सर्वजनप्रार्थनीयत्वात् । आदाय गृहीत्वा कः शून्यं वनमन्ववसत् । शून्ये वने अवसदित्यर्थः । '५४४। उपान्वध्याङ्वसः ।१।४।४८।' इति कर्मसंज्ञा । कीदृशः । त्रस्यन् बिभ्यत् । वैरायमाणेभ्यः वैरं कुर्वाणेभ्यः । '२६७२। शब्द-वैर—।३।१।१७।' इत्यादिना क्यङ् । '५८८। भीत्रार्थानाम्—।१।४।२५।' इत्यपादानसंज्ञा ॥

२५९—ओजायमाना तस्यां ऽर्घ्यं प्रणीय जनकाऽऽत्मजा ॥
उवाच दश-मूर्धानं साऽऽदरा गद्गदं वचः ॥ ७६ ॥

ओजेत्यादि—एवमुक्तवति रावणे जनकसुता दशमूर्धानमुवाच । दश मूर्धान शिरांसि यस्य ' प्रणीय दत्त्वा मतिधियमिति ।

शेषत्वेन विवक्षितत्वात् षष्ठी । ओजायमाना ओज इवाचरन्ती '२६६५। कर्तुः क्यङ् सलोपश्च ।३।१।११।' 'ओजसोऽप्सरसो नित्यम्' इति वचनात् । मां माभिभूदित्यतितेजस्विनी भवन्तीत्यर्थः । किमुवाच वचो वक्ष्यमाणम् । सादरा सती । परिव्राजक इति । गद्गदमनभिव्यक्तमसंस्कृतत्वात् ॥

कालापकम् (४)—

२६०—'महा-कुलीन ऐक्ष्वाके वंशे दाशरथिर् मम ॥
पितुः प्रियं-करो भर्ता क्षेम-कारस् तपस्विनाम्. ॥७७॥

महेत्यादि—यदुक्तं तेन कं रहस्युपतिष्ठस इति अस्य प्रतिवचनं मम भर्ता महाकुलीनः महाकुलस्यापत्यमिति । '११६४। महाकुलादञ्-खञौ ।४।१।१४१।' इति खञ् । किमादित्यवंशसंभवः । किं सोमवंशसंभवो वा महाकुलस्यापत्यमित्याह । ऐक्ष्वाके वंशे इक्ष्वाकूणामयमैक्ष्वाकः ।११४५। दाण्डिनायन—।६।४।१७४।' इत्यादिना टिलोपनिपातनम् । अन्ये तत्र सन्तीत्याह । दाशरथिः दशरथस्यापत्यं यः स मम भर्ता । महाकुलीनः कीदृशः । पितुः प्रियंकरः अनुकूलकारी । तपस्विनां च क्षेमकारः । '२९६१। क्षेमप्रियमद्रेऽण् च ।३।२।४४।' इति चकारात् खच् ॥

२६१—निहन्ता वैर-काराणां सतां बहु-करः सदा ॥
पारश्वधिक-रामस्य शक्तेरन्त-करो रणे. ॥ ७८ ॥

निहन्तेत्यादि—वैरकाराणां शत्रूणाम् । वैरपूर्वात् कृञः '२९२७। न शब्द-श्लोक-।३।२।२३।' इत्यादिना टे प्रतिषिद्धे अणेव भवति । निहन्तेति तृजन्तस्य प्रयोगः । तत्र कर्मणि षष्ठी । सतां धर्मे स्थितानां बहुकरः बहुकार्यं करोतीति । '२९२५। दिवा-विभा—।३।२।२१।' इति टः । स्त्रीविवक्षायां तु 'किं-यत्तद्बहु-षु—' इति करोतेरच् । आङ्परयोः 'खनिशृभ्यां डिच्च' इत्यौणादिकः कुः परशुशब्दः । तत्पर्याय एवाव्युत्पन्नः परश्वधशब्दः । स प्रहरणं यस्य '१६०८। परश्वधाट्ठञ्च ।४।४।५८।' तस्य परशुरामस्य सम्बन्धिन्याः शक्तेः सामर्थ्यस्यान्तकरो विनाशयिता । अन्तं करोतीति पूर्ववट्टः । रणे संग्रामे तत्र भवः ॥

२६२—अध्वरेष्विष्टिनां पाता पूर्ती कर्मसु सर्वदा ॥
पितुर् नियोगाद् राज-त्वं हित्वा योऽभ्यागमद् वनम्॥

अध्वरेष्वित्यादि—इष्टमेभिरिति इष्टिनो यज्वानः । '१८८८। इष्टादिभ्यश्च ।५।२।८८।' इतीनिः । किमिष्टवतः । अध्वरान् कर्माणि तत्र 'क्तस्येन्विषयस्य—' इति कर्मणि सप्तमी । अध्वरेष्विष्टिनामिति कर्मणि षष्ठी कृद्योगे । पाता रक्षिता । पूर्ती कर्मसु सर्वदा । पृणोतेर्निष्ठायां '२४९४। उदोष्ठ्यपूर्वस्य ।७।१।१०२।' इत्युत्वम् । '३०४०। न ध्या-ख्या—।८।२।५७।' इत्यादिना निष्ठानत्वप्रतिषेधः । पूर्तमनेनेति पूर्ववदिनिः । किं पूर्तमिति सर्वदा श्राद्धादिकर्मणि । पूर्ववत्सप्तमी स राजत्वं राज्यम् हित्वा सक्त्वा । आभि-

मुख्येन आगतवान् । लुङ् । च्लेरङि रूपम् । पितुर्नियोगात् । नायोग्यत्वात् । स मे भर्तेति योज्यम् ॥

२६३–पतत्रि-क्रोष्टु-जुष्टानि रक्षांसि भय-दे वने ॥
यस्य बाण-निकृत्तानि श्रेणी-भूतानि शेरते. ॥ ८० ॥

पतत्रीत्यादि—यस्य बाणैर्निकृत्तानि छिन्नानि रक्षांसि भयदे वने दीर्घनिद्रया शेरते स मम भर्तेति योज्यम् । शेरत इति '२४४२। शीङो रुट् ।७।१।६।' कीदृशानि । अश्रेणयः श्रेणयो भूतानि । '७६२। ऊर्यादिच्विडाचश्च ।१।४।६१।' इति च्व्यन्तानां '७६१। कुगतिप्रादयः ।२।२।१८।' इति सः । '२१२०। च्वौ च ।७।४।२६।' इति दीर्घः । च्व्यर्थानां तु '७३८। श्रेण्यादयः कृतादिभिः ।२।१।५९।' इत्ययं विषयः । पतत्रिभिः क्रोष्टुभिश्च जुष्टानि परिवृतानि ॥

२६४–दीव्यमानं शितान् बाणानस्यमानं महा-गदाः ॥
निघ्नानं शात्रवान् रामं कथं त्वं नाऽवगच्छसि.॥८१॥

दीव्येत्यादि—शितांस्तीक्ष्णान् बाणान् । दीव्यमानं क्षेप्तुं शक्तं तच्छीलं वा । अनेकार्थत्वाद्धातूनां दिवेः '३१०९। ताच्छील्य-वयोवचन—।३।२।१२९' इत्यादिना शानच् । '२०५। दिवादिभ्यः श्यन् ।३।१।६९' महागदाः अस्यमानं क्षेप्तुं शक्तं तच्छीलं वा । पूर्ववच्छानच् । शात्रवान् शत्रून् । प्रज्ञादित्वादण् । निघ्नानं हन्तुं शक्तं तच्छीलं वा । पूर्ववत् प्रत्ययः । हन्तेः '२६६३। गमहन—।६।४।९८।' इत्युपधालोपः । '३५८। हो हन्तेः—।७।३।५४।' इति कुत्वम् । एवंविधं रामं कथं नावगच्छसि । तेन कर्मणा सर्वलोकविदितत्वादिति भावः ॥

२६५–भ्रातरि न्यस्य यातो मां मृगाविन् मृगयामसौ, ॥
एषितुं प्रेषितो यातो मया तस्या ऽनु-जो वनम्.॥८२॥

भ्रातरीत्यादि—यद्येवं क्वासावित्याह । असौ [illegible]ो मां भ्रातरि न्यस्य अर्पयित्वा मृगयामाखेटकं यातः । मृगेः स्वार्थिको [illegible] । अदन्तत्वाच्च गुणो न भवति । तदन्तात् '३२७७। कृञः श च ।३।३।१००' इत्यधिकृत्य 'परिचर्या-परिसर्या मृगयाटाट्यानामुपसंख्यानम्' इति भावे श[illegible]यः । यक् । अल्लोपाभावश्च । टाप् । मृगान्विध्यतीति मृगावित् । क्वासौ [illegible]तेति चेदाह । तस्यानुजः कनिष्ठो मया प्रेषितः सन् यातो वनम् । अनु प[illegible] इति । '३४२२। अन्येभ्योऽपि दृश्यते ।३।२।१३०।' इति डः । अनौ [illegible]मकर्मण्यपि भवति । किमर्थं एषितुम् । तमेव ज्ञातुम् । '१२०२। इषँ [illegible]स्य रूपम् । ज्ञानार्थत्वात् । प्रेषित इति तस्यैव रूपम् ॥

२६६–अथा ऽऽयस्यन् कषाय[illegible]

स्फ्र-स्वेद [illegible]

संदर्शिताऽऽन्तराकूतस्
तामवादीद् दशाननः. ॥ ८३ ॥

अथेत्यादि—अथैवमुक्तो जानक्या दशाननस्तामवादीत् उक्तवान् । आयस्यन् क्रोधाविष्टत्वात् शरीरं खेदयन् । '२२८६। यसुँ प्रयत्ने' इति दैवादिकः परस्मैपदी । क्रोधादेव कषायाक्षः । '८५२। बहुव्रीहौ सक्थ्यक्ष्णोः—।५।४।११३।' इति षच् । स्यन्नः सृतः स्वेदकणैरुल्बणः उद्भटः व्याप्त इत्यर्थः । स्यन्देर्निष्ठायां रूपम् । संदर्शितमान्तरमन्तर्गतमाकूतमभिप्रायो येन स एवंविधः ॥

२६७—'कृते कानिष्ठिनेयस्य ज्यैष्ठिनेयं विवासितम् ॥
को नग्न-मुषित-प्रख्यं बहु मन्येत राघवम्. ॥ ८४ ॥

कृत इत्यादि—कनिष्ठाया अपत्यं ज्येष्ठाया अपत्यमिति '११२३। स्त्रीभ्यो ढक् ।४।१।१२०' । '११३१। कल्याण्यादीनामिनङ् ।४।१।१२६।' तयोः कल्याण्यादिषु पठितत्वात् । कनिष्ठासुतस्य भरतस्य कृते निमित्ते । ज्येष्ठायाः सुतः निरुपयोगितया विवासितः विसर्जितः । विपूर्वस्य वसतेर्हेतुमण्ण्यन्तस्य निष्ठायां रूपम् । तं नग्नमुषितप्रख्यं यथा कश्चिन्मुषितो नग्नो भवति तद्वद् भूतम् । '७२६। पूर्वकाल—।२।१।४९।' इति सः तयोः पूर्वापरकालत्वात् । राजदन्तादित्वात्परनिपातः । ईदृशं राघवं को बहु मन्येत श्लाघेत । नैवेत्यर्थः ॥

२६८—राक्षसान् बटु-यज्ञेषु पिण्डी-शूरान् निरस्तवान् ॥
यद्यसौ कूप-माण्डूकि ! तवैतावति कः स्मयः ॥ ८५ ॥

राक्षसानित्यादि—अध्वरेष्विष्टिनामित्यस्योत्तरमाह । यद्यसौ राक्षसान् पिण्डीशूरान् पिण्ड्यामेव शूरान् । भोजने एव शूरान् । '७२५। पात्रेसमितादयश्च ।२।१।४८।' इति सः । बटुयज्ञेषु कुब्राह्मणयज्ञेषु । निरस्तवान् तिरस्कृतवान् । हे कूपमाण्डूकि कूपे माण्डूकीव । पूर्ववत् सः । '११२२। ढक् च मण्डूकात् । ।४।१।११९।' इति चकारादण् वापत्ये । एतावति स्वल्पे वस्तुनि तव कः स्मयः । नैव युज्यते ॥

मत्पराक्रमे तु युक्तः । तत्रापि मम न युक्तं वक्तुमित्याह—

२६९—मत्-पराक्रम-संक्षिप्त-राज्य-भोग-परिच्छदः ॥
युक्तं ममैव किं वक्तुं दरिद्राति यथा हरिः ॥ ८६ ॥

मत्परेत्यादि—राज्यभोगादयः परिच्छदो हस्त्यश्वादिः स मत्पराक्रमेण संक्षिप्तोऽपहृतो यस्य हरेरिन्द्रस्य स यथा दरिद्राति निरर्थको भवति तन्ममैव किं वक्तुं युक्तमात्मगुणवादस्य लज्जाकरत्वात् । दरिद्रातेरादादिकत्वाच्छपो लुक् ॥

२७०—निर्-लज्जो वि-मदः स्वामी
धनानां हृत पुष्पकः ।

अध्यास्ते ऽन्तर्-गिरं यस्मात्,
कस् तन् मा ऽवैति कारणम्. ॥ ८७ ॥

निर्लङ्क इत्यादि—यस्मात्कारणात् धनानां स्वामी धनदः । अन्तर्गिरमध्यास्ते अध्यासितवान् । गिरेः कैलासस्यान्तर्मध्ये । विभक्त्यर्थेऽव्ययीभावः । '६८२। गिरेश्च सेनकस्य ।५।४।११२।' इति टच् । '५४२। अधि शीङ्-स्थाऽऽसाम्–।१।४।४६।' इति कर्मसंज्ञा । तेन '३५८। तृतीयासप्तम्योर्बहुलम् ।२।४।८४।' इत्यम्भावो न भवति । '६५७। नाव्ययीभावात्–।२।४।८३।' इत्यमेव भवति । तत्कारणं मम पराक्रमं मां वा को नावैति न जानाति । कीदृशः । निर्लङ्कः लङ्कातो निष्क्रान्तः । 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' इति सः । '६५५। एकविभक्ति च–।१।२।४४।' इत्युपसर्जनसंज्ञायां ह्रस्वत्वम् । हृतपुष्पकः हृतं आच्छिन्नं पुष्पकाख्यं विमानं यस्य । अत एव विमदोऽपेतदर्पः । लङ्का पुष्पकं च धनदस्यासीत् तदाच्छित्त्वा अनेन गृहीतमिति ॥

२७१–भिन्न-नौक इव ध्यायन्
मत्-तो बिभ्यद् यमः स्वयम् ॥
कृष्णि-मानं दधानेन
मुखेना ऽऽस्ते निरुद्यतिः. ॥ ८८ ॥

भिन्नेत्यादि—स्वयं साक्षान्मत्तो बिभ्यत् त्रस्यन् यमो वैलक्षण्यात् मुखेन कृष्णिमानं कृष्णवर्णत्वम् । '१७८७। वर्णदृढादिभ्यश्च ।५।१।१२३।' इति चकारादिमनिच् । दधानेन धारयता । इत्थम्भूते तृतीया । निरुद्यतिः निरुद्यमः आस्ते । उत्पूर्वाद्यमेः '३२७२। स्त्रियां क्तिन् ।३।३।९४।' अनुनासिकलोपः । कीदृशः । ध्यायन् चिन्तयन् । 'किं ममापतितं यदहमनेन हृतसर्वस्वः' इति । भिन्ननौक इव विपन्नपोतवणिगिव । '८८९। उरःप्रभृतिभ्यः कप् ।५।४।१५१।' ॥

एवं स्वपौरुषं प्रदर्श्य स्वीकर्तुमाह—

२७२–समुद्रोपत्यका हैमी पर्वताऽधित्यका पुरी ॥
रत्न-पारायणं नाम्ना लङ्केति मम मैथिलि ! ॥ ८९ ॥

समुद्रेत्यादि—हे मैथिलि ! लङ्केति नाम्ना मम पुरी । कीदृशी । समुद्र एवोपत्यका आसन्ना यस्याः सा समुद्रोपत्यका । समुद्रस्य पर्वतोपत्यकात्वात् । समुद्रोपत्यकेति समासे साधुत्वं न भवति । यतः संज्ञाधिकारात् पर्वतस्यासन्ने अधिरूढे उपाधिभ्यां त्यकन्प्रत्ययान्तयोरुपत्यकाधित्यकाशब्दयोः साधुत्वमुक्तम् । 'प्रतिषेधे त्यकन उपसंख्यानम्' इति '४६३। प्रत्ययस्थात्–।७।३।४४।' इतीकारो न भवति । हैमी हेमविकारा । '१५३२। प्राणिरजतादिभ्योऽञ् । ४।३।१५४।' पर्वताधित्यका । त्रिकूटपर्वतस्योपरि स्थिता । रत्नपारायणं यत्र रत्नानां पारमवसानमयन्ते बुध्यन्ते तत्परीक्षका   नमिस्तथ ॥

दुर्गावस्थितत्वानभिभवनीयतां स्त्रोपचयात्सम्भूतां कथयन् प्रलोभयति—

२७३—आवासे सिक्त-संमृष्टे गन्धैस् त्वं लिप्त-वासिता ॥

अर्पितोरु-सुगन्धि-स्रक् तस्यां वस मया सह. ॥९०॥

आवास इत्यादि—तस्यां पुर्यां आवासे गृहे । आवसत्यस्मिन्निति अधिकरणे घञ् । मया सह त्वं वस । प्रार्थनायां लोट् । सिक्तसंमृष्टे पूर्वं सिक्ते पश्चात्संमृष्टे । गन्धैर्लिप्तवासिता सती पूर्वं लिप्ता चन्दनादिभिर्गन्धैः पश्चाद्वासिता धूपिता । संमृष्टादिभिः '७२६। पूर्वकाल—।२।१।४९।' इत्यादिना सः । अर्पिता न्यस्ता उर्वी महती सुगन्धिस्रक् सुरभिमाला यस्यां सा त्वम् ॥

किमिति त्वया सह वसामीति चेदाह—

२७४—संगच्छ पौंस्नि ! स्त्रैणं मां युवानं तरुणीं शुभे ! ॥

राघवः प्रोष्य-पापीयान्, जहीहि तम-किं-चनम्.॥९१॥

संगच्छेत्यादि—हे पौंस्नि पुमांसमर्हति तद्धिता वा । अर्हार्थे हितार्थे वा '१०७९। स्त्री-पुंसाभ्यां नञ्-स्नञौ—।४।१।८७।' स्त्रीप्रत्यये 'नञ्-स्नञीकक्ख्युंस्तरुण-तलुनानामुपसंख्यानम्' इति । मां युवानं तरुणं संगच्छ अङ्गीकुरु । गमेः प्रार्थनायां लोट् । '२४००। इषु-गमि—।७।३।७७।' इत्यादिना छत्वम् । '२६९९। समो गम्यृच्छि—।१।३।२९।' इत्यादिना तङ् न भवति सकर्मकत्वात् । विशेषतः स्त्रैणं स्त्रियै हितमर्हन्तं वा । पूर्ववत्प्रत्ययः । तरुणी युवती सती शुभे कल्याणि शोभत इति इगुपधलक्षणः कः । ममापि तादृशो भर्तास्तीति चेदाह—राघवः प्रोष्यपापीयानिति । पापशब्दात् '२०२०। विन्मतोर्लुक् ।५।३।६५।' इति ईयसुन् लुक्च मतुपः । प्रोष्यपापीयानिति '७५४। मयूरव्यंसकादयः ।२।१।७२।' इति सः । देशान्तरं यात्वा पापवत्तरः । तमकिञ्चनं दरिद्रम् । न विद्यते किंचन यस्येति । 'सर्वनामाव्ययसंज्ञाया उपसर्जनप्रतिषेधः' इति वचनान्नाव्ययसंज्ञा । तेन न विभक्तिलोपः । जहीहि त्यज । ईत्वस्य '२४९८। जहातेश्च ।६।४।११६।' इति वा वचनाद्विकल्पः ॥

२७५—अश्नीत-पिबतीयन्ती प्रसिता स्मर-कर्मणि ॥

वशे-कृत्य दश-ग्रीवं मोदस्व वर-मन्दिरे. ॥ ९२ ॥

अश्नीतेत्यादि—अश्नीतपिबतेति '७५४। मयूरव्यंसक—।२।१।७२।' इत्यादित्वात् सः । तत्र हि 'आख्यातमाख्यातेन क्रियासातत्ये' इति पठ्यते । सततमश्नीत पिबतेत्येवं भृत्यजनानादेष्टुमिच्छतीति '२६५७। सुप आत्मनः क्यच् । ३।१।८' अश्नीतपिबतीयन्ती । प्रसिता स्मरकर्मणि आधिक्येन प्रवृत्ता कामव्यापारे । '६४१। प्रसितोत्सुकाभ्यां तृतीया च ।२।३।४४।' इति चकारात् सप्तमी । वशेकृत्यानुवर्तिनं दशग्रीवं कृत्वा । '७७५। साक्षात्प्रभृतीनि च ।१।४।७४।' इति गतिसंज्ञा मोदस्व हर्षं भजय वरमन्दिरे श्रेष्ठगृहे स्थिता ।

२७६—मा स्म भूर् ग्राहिणी भीरु, गन्तुमुत्साहिनी भव, ॥
उद्भासिनी च भूत्वा मे वक्षःसंमर्दिनी भव.' ॥ ९३ ॥

मा स्मेत्यादि—हे भीरु! मा स्म भूर्ग्राहिणी प्रतिकूला मा भूः। न यास्या-मीत्यमुमर्थं गृह्णामीति कृत्वा। '२२२०। स्मोत्तरे लङ् च ।३।३।१७६।' इति चकारात् लुङ्। गन्तुमुत्साहिनी उद्युक्ता भव। '३१७७। शक-धृष—।३।४।६५।' इत्यादिना तुमुन्। उत्साहिनीति सहोपपदत्वात्। ततश्चालंकृतशरीरत्वादुद्भासि-नी शोभमाना भूत्वा नोऽस्माकं वक्षःसंमर्दिनी स्तनाभ्यामुरःस्थलस्य पीडिका भव। ग्रहोत्साहोद्भाससंमर्दानां ग्रहादिषु पठितत्वात् कर्तरि णिनिः। '३०६। ऋन्नेभ्यो ङीप् ।४।१।५।' ॥

२७७—तां प्रातिकूलिकीं मत्वा जिहीर्षुर् भीम-विग्रहः ॥
बाहूपपीडमाश्लिष्य जगाहे द्यां निशा-चरः. ॥ ९४ ॥

तामित्यादि—यदैवमभिधीयमाना न प्रतिपन्ना तदा तां प्रातिकूलिकीं प्रतिकूलवर्तिनीं मत्वा ज्ञात्वा। ओजःसहोम्भसा वर्तते इत्यधिकृत्य प्रतिकूलं वर्तते इत्यस्मिन्नर्थे '१५७८। तत्प्रत्यनुपूर्व—।४।४।२८।' इत्यादिना ठक्। जिहीर्षुः हर्तुमिच्छुः। भीमविग्रहः भीषणशरीरः। दुष्टराक्षसशरीररूपः। सुखेन ह्रियत इति बाहूपपीडमाश्लिष्य बाहुभिरुपपीड्य। '३३७०। सप्तम्यां चोपपीड—।३।४।४९।' इति चकारात् तृतीयान्त उपपदे णमुल्। जगाहे रथेनोत्पत्य द्यामा-काशं निशाचरो गाहते स्म। दिवशब्दसमानार्थो द्योशब्द औणादिकः। गमेर्डो इत्यत्र द्युतेश्चेति वचनात्। '२८५। औतोऽम्शसोः ।६।१।९३।' इत्यात्वम्। कालापिनस्तु दिवशब्दादेव व्युत्पादयितुं सूत्रमधीयते वाम्येति। दिवः अमि विकल्पेनाकारादेश इति ॥

२७८—त्रस्यन्तीं तां समादाय यतो रात्रिं-चराऽऽलयम् ॥
तूष्णीं भूय भयादासांचक्रिरे मृग-पक्षिणः. ॥ ९५ ॥

त्रस्यन्तीमित्यादि—त्रस्यन्तीं च तां तद्रूपदर्शनात् समादाय गृहीत्वा यातो गच्छतो रावणात्। यातेः शतरि पञ्चम्या रूपम्। किं यातो रात्रिंचराल-यं लङ्काम्। रात्रौ चरतीति '२९३०। चरेष्टः ।३।२।१६।'। '१००८। रात्रेः कृति विभाषा ।६।३।७२।' इति मुम्। तस्माद्रावणाद्यद्भयं ततो भयात् तूष्णीम्भूय। '३३८५। तूष्णीमि भुवः ।३।४।६३।' इति '७८५। क्त्वा च ।२।२।२२।' इति समासे ल्यबादेशः। आसांचक्रिरे आसिताः। '२३२४। दयायासश्च ।३।१। ३७।' इत्याम्। मृगपक्षिणः मृगाश्च पक्षिणश्च। समानजातीयानामिति वचना-देकवद्भावोऽत्र न भवति ॥

२७९—उच्चै रारस्यमानां तां कृपणां राम-लक्ष्मणौ ॥
जटायुः प्राप पक्षीन्द्रः परुषं रावणं वदन्. ॥ ९६ ॥

इति प्रकीर्ण-काण्डः प्रथमः समाप्तः ॥

उच्चैरित्यादि—तां सीतां जटायुः पक्षीन्द्रः। रावणं परुषं निष्ठुरं वदन् आप आसवान्। कीदृशीम्। उच्चै रारत्यमानाम्। 'हा राम, हा लक्ष्मण' इति शब्दौ द्वौ उच्चैर्महता ध्वनिना पुनः पुना रसन्तीमित्यर्थः। रसेः शब्दकर्मकत्वात् क्रियासमभिहारे यङ्। कृपणां दीनाम्॥

॥ इति प्रकीर्ण-काण्डम्॥

॥ अतः परमधिकार-काण्डम्॥

तत्र प्रथमं टाधिकारः—

इतः परमधिकारकाण्डमुच्यते। यत्र प्राधान्येनैकैकमधिकृत्य लक्षणं प्रदर्शितं तदधिकारकाण्डम्। शेषलक्षणेषु प्रकीर्णकमेव द्रष्टव्यम्। एवं च कृत्वा अन्तरान्तरा तत्सूचनार्थं प्रकीर्णकश्लोकाभिधानम्। अत्र च काण्डे निर्दिष्टसंज्ञकाश्चत्वारः परिच्छेदाः। तत्र प्रथमे आद्यं टप्रत्ययमधिकृत्योच्यते। सर्गार्थस्य विवक्षितस्यापरिसमाप्तत्वात् तमेवाभिसन्धायाह—

२८०—'द्विषन् वने-चराऽग्र्याणां त्वमादाय-चरो वने॥
अग्रे-सरो जघन्यानां मा भूः पूर्व-सरो मम॥ ९७॥

द्विषन्नित्यादि—एवञ्च कृत्वा मिश्रक उच्यते द्वयोरप्यत्र प्राधान्येन विवक्षितत्वात्। परुष वदन्। कीदृशम्। हे द्विषन्! मा भूः पूर्वसरो ममेति। ममाग्रतो भूत्वा मा गा इत्यर्थः। पूर्वं सरतीति '२९३३। पूर्वे कर्तरि।३।२।१९।' इति टः। यतस्त्वमग्रेसरो जघन्यानाम्। अग्रेसरतीति '२९३२। पुरोऽग्रतः—।३।२।१८।' इत्यादिना टः। जघन्य इति '२०५८। शाखादिभ्यो यः।५।३।१०३।' इतीवार्थे यः। पापानां प्रथमस्त्वम्। कुतः आदायचरो वने। आदाय चरतीति '२९३१। भिक्षा-सेना–।३।२।१७।' इत्यादिना। वने चरन्तीति वनेचराः। अधिकरणे चरेष्टः। तेषामग्र्याः प्रधाना ऋषयः। तानादाय चरसि भक्षयसि। कर्मणि षष्ठी॥

२८१—यशस्-कर-समाचारं ख्यातं भुवि दया-करम्॥
पितुर्वाक्य-करं रामं धिक् त्वां दुन्वन्तमत्रपम्॥९८॥

यशस्करेत्यादि—रामं दुन्वन्तमुपतापयन्तमत्रपं निर्लज्जं धिक् त्वाम्। गर्हा। '१२३६। टुदुँ उपतापे' इत्यस्य सौवादिकस्य शतरि '२३८७। हुश्नुवोः सार्वधातुके।६।४।८७।' इति यणादेशे रूपम्। कीदृशं रामम्। यशस्करसमाचारम्। समाचरणं समाचारः चरितं भावे घञ्। यशस्करोतीति यशस्करः। '२९३४। कृञो हेतु–।३।२।२०।' इत्यादिना टः। '१३८। विसर्जनीयस्य सः।८।३।३४।' यशस्करणहेतुभूतः समाचारो यस्य। ख्यातं भुवि प्रसिद्धं दयाकरं करुणाकरणशीलम्। ताच्छील्ये टः। पितुर्वाक्यकरं पितुर्वचनानुष्ठाने अनुकूलम्। आनुकूल्ये टः॥

२८२—अहमन्त-करो नूनं ध्वान्तस्येव दिवा-करः ॥

तव राक्षस ! रामस्य नेयः कर्म-करोपमः ॥ ९९ ॥

अहमित्यादि—हे राक्षस ! अहं तव नूनमवश्यमन्तकरः विनाशयिता । कीदृशः । रामस्य नेयो वश्यः । '२८४२। अचो यत् ।३।१।९७।' कर्मकरोपमः भृतकतुल्यः । '२९३६। कर्मणि भृतौ ।३।२।२२' इति टः । ध्वान्तस्येव दिवा-करः । यथान्धकारस्यान्तकरो दिवाकरः सूर्यः तथा । अन्तकरदिवाकरौ '२९३५। दिवा-विभा—३।२।२१।' इति टप्रत्ययान्तौ । एवमुक्त्वा खं पपातेति सम्बन्धः ॥

२८३—सतामरुष्-करं पक्षी वैर-कारं नराऽशिनम् ॥

हन्तुं कलह-कारोऽसौ शब्द-कारः पपात खम् ॥१००॥

सतामित्यादि—एवमुक्त्वा असौ जटायुः पक्षी खमाकाशं पपात पतितः। किमर्थं नराशिनं राक्षसं हन्तुं हनिष्यामीति । कीदृशं राक्षसं । सतामरुष्करं धर्मे स्थितानां पीडाकरम् । अरुःशब्दः पीडोपलक्षणपरः । '२९३५। दिवा वि-भा—३।२।२१।' इति टः । वैरकारं वैरकरणशीलम् । कलहकारः पक्षी कलहयितुमनुकूलः । अनयोः '२९३७। न शब्द-श्लोक—३।२।२३।' इति टे प्रतिषिद्धेऽणेव भवति । कर्मण्यणः प्रासिरस्तीति टाधिकार उदाहृतः । कियत्खं पपात । यावति दूरे शब्दपातस्तावत्खमिति ॥

॥ टाधिकारः समाप्तः ॥

अतः परं प्रकीर्णकाः ।

इतः प्रकीर्णकश्लोकानाह—

२८४—धुन्वन् सर्व-पथीनं खे वितानं पक्षयोरसौ ॥

मांस-शोणित-संदर्शं तुण्ड-घातमयुध्यत ॥ १०१ ॥

धुन्वन्नित्यादि—असौ पक्षी अयुध्यत युध्यते स्म । युधेर्दैवादिकस्य लङि रूपम् । तुण्डघातमिति क्रियाविशेषणम् । तुण्डेन चञ्च्वा घातो हननं यस्मिन् युद्ध इति '३४५८। करणे हनः ।३।४।३७।' इति न णमुल् '३३६७। कषादिषु यथाविध्यनुप्रयोगः ।३।४।४६।' इति वचनात् अहिंसार्थत्वाच्च तदारम्भस्य यथा पादघातं भूमिं हन्तीति । '३३६८। हिंसार्थानां च समानकर्मकाणाम् ।३।४।४८।' इत्यनेनापि न भवति समानकर्मकताभावात् । अकर्मकत्वाद्युधेः । तेन भावे घञ् । धुन्वन् कम्पयन् खे आकाशे पक्षयोर्वितानम् । सर्वपथीनं सर्वः पन्था इति '७२६। पूर्वकाल—।२।१।४९।' इत्यादिना सः । '९४०। ऋक्-पूः—५।४।७४।' इति समासान्तोऽकारः । सर्वपथान् व्याप्नोतीति '१८०८। तत्सर्वादेः-५।२।७।' इत्यादिना खः । मांसशोणितसन्दर्शं कार्त्स्न्येन मांसं शोणितं च दृष्ट्वा । '३३५०। कर्मणि दृशि-विदोः साकल्ये ।३।४।२९।' इति णमुल् । '७८३। असे-वाख्येन २।२ २० ' इति स

२८५—न बिभाय, न जिह्राय, न चक्राम, न विव्यथे ॥
आघ्नानो विध्यमानो वा रणान् निववृते न च. ॥१०२॥

नेत्यादि—आघ्नानः पक्षी प्रहरन्। '२६९५। आङो यमहनः ।१।३।२०।' इति तङ्। न बिभाय न भीतः। तस्मान्न जिह्राय न लज्जितः। सम्यङ् मया न हत इति न चक्राम न क्रान्तः। न विव्यथे। '२३५३। व्यथो लिटि ।७।४। ६८।' इति सम्प्रसारणम्। जितश्रमत्वात्। विध्यमानो वा। वाशब्दश्चार्थे। परेण हन्यमानश्च न विव्यथे न पीडां भेजे। सत्त्वाधिकत्वात् रणाच्च न निववृते न निवृत्तः। अभग्नोत्साहत्वात्॥

२८६—पिशाच-मुख-धौरेयं स-च्छत्र-कवचं रथम् ॥
युधि कद्-रथ-वद् भीमं बभञ्ज ध्वज-शालिनम्. १०३

पिशाचेत्यादि—युधि संग्रामे पक्षी रथं बभञ्ज भग्नवान्। तस्य पुष्पकादन्यत्वात्। तथा हि कद्रथवत् कुत्सितरथमिव। '१०२८। रथ-वदयोश्च ।६।३। १०२।' इति कद्रादेशः। धुरं वहन्ति धौरेया अश्वाः। '१६२८। धुरो यड्ढकौ ।४।४।७७।'। पिशाचस्येव मुखं येषां ते धौरेया यत्र रथे तं पिशाचमुखधौरेयम्। सच्छोभनं छत्रं कवचं च यस्मिन्। तं भीमं भयानकं तथा धुर्यत्वात्। ध्वजशालिनं ध्वजवन्तम्। शालिन्शब्दः किन्प्रत्ययान्तस्तद्वन्तमाह। अन्यस्त्वाह ध्वजेन शालितुं श्लाघयितुं शीलमस्येति णिनिः। अनेकार्थत्वाद्धातूनामिति॥ एते प्रकीर्णकाः॥

अतः परं आमधिकारः।

इतः प्रभृत्याममधिकृत्याह—

२८७—संत्रासयांचकाराऽरिं, सुरान् पिप्राय पश्यतः, ॥
स त्याजयांचकाराऽथ सीतां विंशति-बाहुना. ॥१०४॥

सन्त्रासयामित्यादि—अथैतस्मिन् युद्धप्रस्तावे स पक्षी सीतां विंशतिबाहुना रावणेन त्याजयांचकार त्याजितवान्। गत्यादिषु त्यजेरसंग्रहात् तृतीयैव भवति। कस्मात्त्याजितवानित्याह। सन्त्रासयांचकारारिं यस्मादरिं रावणं त्रासितवान्। अकर्मकत्वात् त्रासेण्यन्तावस्थायामरेः कर्मत्वम्। आभ्यां हेतुमण्ण्यन्ताभ्याम् '२३०६। कास्प्रत्ययात्—३।१।३५।' इत्यादिना आम्। आमोऽमित्वमदन्तत्वात्। '२२३८। आमः।२।४।८१।' इति लुक्। '२३११। अयामन्त—६।४।५५।' इत्यादिना अयादेशः। आमकारान्तस्य कृत्संज्ञायां प्रातिपदिकत्वे प्रथमैकवचनम्। तस्य '४५२। अव्ययात्—।२।४।८२।' इति लुक्। स्वरादिषु 'अम् आम्' इति पठितत्वादव्ययत्वम्। आमन्तस्यानभिव्यक्तपदार्थत्वात् '२२-

 ३१४०' इत्यादिना लिट्परस्य कृञो ऽनुप्रयोग। कर्त्रे

भिप्रायाभावाभावेऽनुप्रयोगे तङ् न भवति। सुरांश्च पश्यतो युद्धं जटायुः पि-प्राय प्रीणितवान्। शत्रुत्रासनं सीतात्याजनं च देवानां प्रीतेः कारणम् ॥

२८८—अ-सीतो रावणः कासांचक्रे शस्त्रैर् निराकुलः, ॥
भूयस् तं भेदिकांचक्रे नख-तुण्डाऽऽयुधः खं-गः. १०५

असीत इत्यादि—असीतः परित्यक्तसीतो रावणः आकाशस्थः कासांचक्रे कुत्सितमभिहितवान्। एह्येहीति विहगाधिपेति। '६६६। कासृँ शब्दकुत्सायाम्' इत्यनुदात्तेत्। '२३९६। कास्-।३।१।३५।' इत्यादिना आम्। शस्त्रैः। इत्थम्भूते तृतीया। निराकुलः पूर्वं बाहुभिः सीताग्रहणे व्याकुलत्वात्। भूयः पुनरपि। खगः पक्षी। डप्रकरणे '३०११। अन्येष्वपि दृश्यते ।३।२।१०१।' इति वचनात् गमेर्डः। तं निशाचरं बेभिदांचक्रे। अत्यर्थं भिन्नवान्। बेभिद्यतेर्यङन्तादाम्। नख-तुण्डान्येवायुधानि यस्य ॥

२८९—हन्तुं क्रोध-वशादीहांचक्राते तौ परस्परम्, ॥
न वा पलायांचक्रे विर् दयांचक्रे न राक्षसः. ॥ १०६ ॥

हन्तुमित्यादि—तौ पक्षि-रावणौ क्रोधवशात् क्रोधाधीनतया परस्परमन्योन्यं हन्तुमीहांचक्राते चेष्टां कृतवन्तौ। '२२३७। इजादेः—।३।१।३६।' इत्यादिना आम्। विः पक्षी। जनि-वसिभ्यामित्यधिकृत्य 'वेञो डिच्च' इत्यौणादिक इञ्। न वा नैव। वाशब्द एवार्थे। पलायांचक्रे पलायितः। '२३२६ उपसर्गस्यायतौ ।८।२।१९।' इति लत्वम्। राक्षसश्च न दयांचक्रे न दयतेस्म। पक्षिणं खल्वहं कथं व्यापादयामीति। उभयत्रापि '२३२४। दयायासश्च। ।३।१।३७।' इत्याम् ॥

२९०—उपासांचक्रिरे द्रष्टुं देव-गन्धर्व-किन्नराः, ॥
छलेन पक्षौ लोलूयांचक्रे क्रव्यात् पतत्रिणः. ॥१०७॥

उपेत्यादि—देवगन्धर्वकिन्नरा द्रष्टुं युद्धं द्रक्ष्याम इति उपासांचक्रिरे उपगताः। पूर्ववदाम्। क्रव्यात् रावणः। क्रव्यं मांसमत्तीति क्रव्यात्। '२९७७। अदोऽनन्ने ।३।२।६८।' इति विट्। पतत्रिणः पक्षिणः पक्षौ लोलूयांचक्रे अत्यर्थं लूनवान्। यङ्प्रत्ययान्तत्वादाम्। छलेन मायया प्रसह्य जेतुं न शक्यत इति। भल्लेनेति पाठान्तरम् ॥

१—'१२२५। शराऽर्के-विहगाः खगाः।' २—'५३३। पतत्रि-पत्रि-पतग-पतत्-पत्ररथाऽण्डजाः। नगौको-वाजि विकिर-वि-विष्किर-पतत्रयः ॥' ३—'६७। राक्षसः कौणप क्रव्यात् क्रव्यादोऽस्रप आशर इति सर्वत्र ना० अ०

२९१–प्रलुठितमवनौ विलोक्य कृत्तं
दश-वदनः ख-चरोत्तमं प्रहृष्यन् ॥
रथ-वरमधिरुह्य भीम-धुर्यं
स्व-पुरमगात् परिगृह्य राम-कान्ताम् ॥१०८॥

प्रलुठितमित्यादि—खचराः पक्षिणः । खे चरन्तीति अधिकरणे '२९३०। चरेष्टः ।३।२।१६।' तेषामुत्तमं जटायुं कृत्तं छिन्नं लूनपक्षत्वात् । अवनौ भुवि प्रलुठितं विलोक्य प्रहृष्यन् हर्षं प्राप्नुवन् निवृत्तो विघ्नकारीति दशाननो रथवरं स्मरणात् प्राप्तं पुष्पकाख्यमारुह्य भीमधुर्यं रामकान्तां सीतां तथैव परिगृह्य स्वपुरमगात् गतवान् ॥

इति श्री-जयमङ्गलाऽऽख्यया व्याख्यया समलंकृते श्री-भट्टिकाव्ये-
द्वितीयेऽधिकार-काण्डे लक्षण-रूपे पञ्चमः परिच्छेदः (वर्गः),
तथा लक्ष्य-रूपे कथानके सीता-हरणः श्री-राम-प्रवासो
नाम पञ्चमः सर्गः पर्यवसितः ॥ ५ ॥

षष्ठः सर्गः—

अत्राधिकारस्यापरिसमाप्तत्वात्तमेवाममधिकृत्याह—

२९२–ओषांचकार कामाऽग्निर् दश-वक्त्रमहर्-निशम् ॥
विदांचकार वैदेहीं रामादन्य-निरुत्सुकाम् ॥ १ ॥

ओषांचकारेत्यादि—अथशब्दो वक्ष्यमाणतृतीयश्लोके यः सोऽत्र द्रष्टव्यः । अथ तस्मिन् सीतापरिग्रहे जाते कामाग्निः कामो ऽग्निरिव दशवक्त्रं दशाननमोषांचकार ददाह । '७४६। उषँ दाहे' । '२३४१। उष-विद्–।३।१।३८।' इत्याम् । अहर्निशं अहश्च निशा च । 'सर्वो द्वन्द्वो विभाषैकवद्भवति' इत्येकवद्भावात् । '५५८। कालाध्वनोरत्यन्तसंयोगे ।२।३।५।' इति द्वितीया । अह्नो नकारस्य '१७२। रो ऽसुपि ।८।२।६९।' इति रत्वम् । कस्माद्ददाह इत्याह । रावणो वैदेहीमन्यनिरुत्सुकां रामादन्यस्मिन् सर्वत्र निरभिलाषां विदांचकार अगुणत्वं विदेस्तथेति विदेरकारान्तनिपातनात् गुणाभावः ॥

२९३–प्रजागरांचकारारेरीहास्वनिशमादरात्, ॥
प्रबिभयांचकाराऽसौ काकुत्स्थादभिशङ्कितः ॥ २ ॥

प्रजागरांचकारेत्यादि—अरे रामस्य ईहासु चेष्टासु । '३२८०। गुरोश्च– ।३।३।१०३।' इत्यकारः । आदरादादरेण प्रजागरांचकार जागरितवान् । शत्रुचि-

१—(१८२) श्लोकस्य टीकन प्रेक्ष्यम्,

कीर्पितज्ञानपरो बभूवेत्यर्थः । पूर्ववदाम् । अनिशम् अविच्छेदेन । (अनिशमिति निशाक्रियाविच्छेदो नास्ति यस्मिन् प्रजागरण इति । निशेति क्रियाविच्छेदोपलक्षणम् । प्रायेण हि निशायां क्रियाणामप्रवर्तनम् ।) किमिति जागरितवानित्याह । काकुत्स्थादसौ प्रबिभयांचकार प्रभीतवान् । '२४९१। भी ह्री–।३।१।३९।' इत्यादिनाम् । श्लुवत्कार्ये धातोर्गुणायादेशौ । अभिशङ्कितः किमयं करिष्यतीति ॥

२९४—न जिह्रयांचकारा ऽथ सीतामभ्यर्थ्य तर्जितः. ॥
नाप्यूर्जां बिभरामास वैदेह्यां प्रसितो भृशम्. ॥ ३ ॥

न जिह्रयांचकारेत्यादि—सीतामभ्यर्थ्य याचित्वा न जिह्रयांचकार न लज्जितः । तर्जितः भर्त्सितो ऽपि तयैवेत्यर्थात् । नाप्यूर्जां बलं बिभरामास धारितवान् । '२२३९। कृञ्–।३।१।४०।' इति प्रत्याहारग्रहणादस्तेरप्यनुप्रयोगः । ह्रीधातोर्गुणायादेशौ । '११६२। डुभृञ् धारण-पोषणयोः' उभयत्रापि पूर्ववदाम् श्लुवच्च । कथं न धारितवान् इत्याह । वैदेह्यां प्रसितः प्रसक्तः । भृशमत्यर्थम् ॥

२९५—विदांकुर्वन्तु रामस्य वृत्तमित्यवदत् स्वकान्, ॥
रक्षांसि रक्षितुं सीतामाशिषच्च प्रयत्नवान्. ॥ ४ ॥

विदांकुर्वन्त्वित्यादि—स्वकानात्मीयान् शुकसारणादीन् अवददुक्तवान् । किमित्याह—रामस्य वृत्तमनुष्ठितं किं तस्येहागन्तुमुद्यमोऽस्ति न वेति विदांकुर्वन्तु । '२४६५। विदांकुर्वन्त्वित्यन्यतरस्याम् ।३।१।४१।' इति निपातितम् । सीतां रक्षितुं रक्षांसि आशिषदादिष्टवान् । शासः '२३८२। सर्ति–।३।१।५६।' इत्यङ् । '२४८६। शास इदङ्हलोः ।६।४।३४।' इति शासेरुपधाया इत्वं '२४१०। शासि-वसि–।८।३।६०।' इति षत्वम् । प्रयत्नवान् प्रयत्नपरः । आमधिकारो गतः॥

अथ प्रकीर्णकाः—

अथ प्रकीर्णश्लोकानाह—

२९६—रामो ऽपि हत-मारीचो निवर्त्स्यन् खर-नादिनः ॥
क्रोष्टून् समशृणोत् क्रूरान् रसतो ऽशुभ-शंसिनः. ॥ ५ ॥

राम इत्यादि—हतमारीचो रामो ऽपि निवर्त्स्यन् प्रत्यागमिष्यन् । वलादिलक्षण इटि प्राप्ते '२३४८ । न वृद्भ्यः–।७।२।५९।' इतीण्निषेधः । क्रोष्टून् शृगालान् । रसतः शब्दायमानान् । समशृणोत् संश्रुतवान् । सकर्मकत्वात् '२६९९। समो गम्यृच्छि–।१।३।२९।' इत्यात्मनेपदं न भवति । लङि रूपम् । क्रूरान् भीषणान् । यतः खरनादिनः खरवन्नदन्ति । '२९८९ । कर्तरि–।३।२।७९।' इति णिनि अशुभशंसिन —————— ॥

२९७—आशङ्कमानो वैदेहीं खादितां निहतां मृताम् ॥
स शत्रु-घ्नस्य सोदर्यं दूरादायान्तमैक्षत. ॥ ६ ॥

आशङ्कमान इत्यादि—तथाविधाशुभश्रवणादाशङ्कमानो वितर्कयन् वैदेहीं किं खादितां निशाचरादिना। ततः निहतां त्यक्तप्राणाम्। अहो स्वयमेवायुःक्षयान्मृतां वा। स रामः शत्रुघ्नस्य सोदर्यं भ्रातरम्। '११६०। सोदराद्यः ।४।४।१०९।' आयान्तमागच्छन्तमारादैक्षत दृष्टवान्। ईक्षेर्लङि रूपम् ॥

२९८—सीतां सौमित्रिणा त्यक्तां सध्रीचीं त्रसुमेकिकाम् ॥
विज्ञायां ऽमंस्त काकुत्स्थः—'क्षये क्षेमं सु-दुर्लभम्.' ७

सीतामित्यादि—सौमित्रेरेकाकिनो दृष्ट्वाऽवश्यमनेन त्यक्तेति तां विज्ञाय ज्ञात्वा काकुत्स्थो रामः। क्षये गृहे। क्षीयते ऽस्मिन्निति अधिकरणे ऽच्। क्षेमं कल्याणम्। सुदुर्लभं सुदुःखेन लभ्यत इति। '३३०५। ईषद्—।३।३।१२६।' इत्यादिना खल्। अमंस्त ज्ञातवान्। कथं क्षये क्षेमं सुदुर्लभमिति आह—सध्रीचीं सहचारिणीं न क्वचिदेकाकिनीं तिष्ठन्तीम्। सहाञ्चतीति '३७३। ऋत्विग्—।३।२।५९।' इत्यादिना क्विन्। '४२२। सहस्य सध्रिः ।६।३।९५।' इत्यञ्चतौ वप्रत्यये सहस्य सध्र्यादेशः। 'अञ्चतेश्चोपसंख्यानम्' इति ङीप्। '४१६। अचः ।६।४।१३८।' इत्यकारलोपः। '४१७। चौ ।६।३।१३८।' इति दीर्घः। कुतः त्रसुं त्रसनशीलाम्। क्रियाशब्दत्वादूङ् न भवति। एकिकां लक्ष्मणेन त्यक्तत्वात्। '११९८। एकादाकिनिच्चासहाये ।५।३।५२।' इति चकारात्कन्। '४६३। प्रत्ययस्थात्—।७।३।४४।' इतीत्वम् ॥ ॥ एते प्रकीर्णकाः ॥

अतः परं दुहादिः—

इतो द्विकर्माधिकारः—

२९९—सो ऽपृच्छल् लक्ष्मणं सीतां याचमानः शिवं सुरान्, ॥
रामं यथास्थितं सर्वं भ्राता ब्रूते स्म विह्वलः ॥ ८ ॥

सोऽपृच्छदित्यादि—'५३९। अकथितं च ।१।४।५१।' इत्यत्र दुहियाचीत्यादिश्लोकेस्थान् धातून् प्रयुङ्क्ते कविः। तत्र रामोऽपृच्छत् सीतामिति प्रधानं कर्म लक्ष्मणमित्यकथितं कर्म। याचमानः प्रार्थयमानः। शिवं कल्याणम्। अर्थात् सीतायाः शिवं प्रधानं कर्म सुरान् देवान् इत्यकथितं कर्म। भ्राता लक्ष्मणः सर्वं यथावत् स्थितं ब्रूते स्म उक्तवान्। सर्वमिति प्रधानं कर्म राममित्यकथितम् ॥

१—'५९७ समानोदर्य-सोदर्य-सगर्भ्य-सहजाः समाः।' इति ना० अ०।

२—'१३५४। निलयाऽपचयौ क्षयौ।' इति ना० अ०।

३—दुह्-याच्-पच्-दण्ड्-रुधि-प्रच्छि-चि-ब्रू-शासु-जि-मथ्-मुषाम्, कर्मयुक् स्याद-कथितं तथा स्यान् नी ह-कृष्-वहाम्. १

२००—संदृश्य शरणं शून्यं भिक्षमाणो वनं प्रियाम् ॥
प्राणान् दुहन्निवाऽऽत्मानं शोकं चित्तमवारुधत्. ९

संदृश्येत्यादि—रामः शरणं गृहं शून्यं संदृश्य दृष्ट्वा। शोकं चित्तमवारुधत् चित्तं शोकं प्रवेशयत्। कीदृशः प्रियां जानकीं वनं भिक्षमाणः। प्राणान् दुहन्निव त्यजन्निव। प्राणानिति प्रधानं कर्म आत्मानमित्यकथितम्। आत्मनः प्राणान् त्यजन्निव ॥

२०१—'गता स्यादवचिन्वाना कुसुमान्याश्रम-द्रुमान्. ॥
आ यत्र तापसान् धर्मं सुतीक्ष्णः शास्ति, तत्र सा.१०

गतेत्यादि—यत्र यस्मिंस्तपोवने सुतीक्ष्णो नाम ऋषिः धर्मं शास्ति शिक्षयति। धर्ममिति प्रधानं कर्म तापसानित्यकथितम्। तत्र तपोवने गता स्यात्। सम्भावने लिङ्। आकारो निपातः स्मरणे। किं कुर्वती कुसुमान्यवचिन्वाना। कुसुमानीति प्रधानं कर्म आश्रमद्रुमानित्यकथितम्। अवचिन्वानेति चिनोतेः कर्त्रभिप्राये तङ्। दुह्यादिर्दण्डको गतः ॥

इति दुहादिर्द्विकर्मकः।

अतः परं प्रकीर्णकाः—

प्रकीर्णकानाह—

२०२—आः, कष्टं, बत, ही-चित्रं, हूं, मातर्, दैवतानि धिक्,
हा पितः!, क्वाऽसि हे सु-भ्रु!,' बह्वेवं विललाप सः,

आः कष्टमित्यादि—शोकेनाक्रान्तमना विलपन्नाह—आः पीडायाम्। पितृवियोगपीडितः आः इत्याह। अस्मद्वियोगेन पिता प्राणांस्त्यक्तवानित्यभिप्रायः। कष्टमित्याह। कष्टं कृच्छ्रम्। भर्तृमरणादस्मद्वियोगाच्च मातुः कावस्थेत्यभिप्रायेणाह बत इति। बतशब्दः खेदे। सौमित्रिरपि तया सीतया अन्यादृशः सम्भावित इति विस्मितो हीत्याह। हीशब्दो विस्मये। यदि नाम स्त्रिया मूर्खतया तथाभिहितं सौमित्रिणा विदुषा कथं तादृशः शापो दत्त इत्यभिप्रायेणाह चित्रमिति। चित्रमाश्चर्ये। यदेवंविधो ऽपि स्खलतीति। सर्वमेव दुर्जातं कैकेयीप्रभवमिति क्रुध्यन् हूं मातरित्याह। हूंशब्दः क्रोधे। अथवा सर्वमेतत् दैवचेष्टितं न ममानुष्ठितमित्यभिप्रायेणाह धिग्दैवतानीति। धिक् कुत्सायाम्। प्राणांस्त्यक्तवन्तमपि पितरं पुनरहं द्रष्टासीत्यभिप्रायेणाह। हा पितः क्व द्रष्टव्यो ऽसीति। हा शोके। हे सीते क्व गतासीति। भ्रूशब्दात् 'अप्राणिजातेः—' इत्यादिनोङ्। उवर्णान्तमात्रस्य विधानाद्बहुव्रीहिः। उपसर्जनत्वं च। पुनः स्त्रियामूङ्। '७५। अन्तादिवच्च ।६।१।८५।' इति पूर्वं प्रत्यन्तवत्त्वात् प्रातिपदि-

---

१ १२५९ **शरणं गृह**—रक्षित्रो इति ना० म०।

कत्वम् । अतः सम्बुद्धौ ह्रस्वत्वम् । विललाप स एवं कृत्वा बहुनेकप्रकारं विलापं कृतवान् ॥

२०३—इहाऽऽसिष्टाऽशयिष्टेह सा, स-खेलमितोऽगमत्, ॥
अग्लासीत् संस्मरन्नित्थं मैथिल्या भरताऽग्रजः, ॥१२॥

इहेत्यादि—इह प्रदेशे आसिष्ट उपविष्टा । '१९५८। इदमो हः ।५।३।११।' । '१९४९। इदम इश् ।५।३।३।' इह । अशयिष्ट शयितवती । आसेः शीङश्च लुङ् । सखेलं सलीलम् । इतः प्रदेशादगमत् गतवती इत्थमेवंप्रकारम् । मैथिल्याः स्मरन् । '६१३। अधीगर्थ—२।३।५२।' इति कर्मणि षष्ठी । भरताग्रजो रामो ऽग्लासीत् ग्लानिं गतः । ग्लायतेर्लुङ् । '२३७७। यम-रम—।७।२।७३।' इति सगिटौ ॥

२०४—'इदं नक्तं-तनं दाम पौष्पमेतद् दिवा-तनम्, ॥
शुचेवोद्बध्य शाखायां प्रग्लायति तयाविना. ॥ १३ ॥

इदमित्यादि—नक्तंतनं निशाभवं इदं दाम पुष्पमाला पुनर्दिवातनं दिवसभवम् । '१३९१। सायम्–।४।३।२३।' इत्यादिना ट्युट्युलौ तुट् च । पौष्पं पुष्पाणामिति तस्येदमित्यण् । शुचेव शोकेनेव । सम्पदादित्वात्क्विप् । शाखायामुद्बध्य । आत्मानमित्यर्थात् । प्रग्लायति ग्लानिं गच्छति । ग्लायतेः शित्यायादेशः । शाखायां प्रलम्बमानं ग्लानिं गच्छन्तं वीक्ष्येदमुत्प्रेक्षितम् । कुतः शोकात्तया विना सीताविच्छेदेन ॥

२०५—ऐक्षिष्महि मुहुः सुप्तां यां मृताऽऽशङ्कया वयम्, ॥
अ-काले दुर्मरमहो, यज् जीवामस् तया विना, ॥१४॥

ऐक्षिष्महीत्यादि—यां वयमैक्षिष्महि ईक्षितवन्तः । ईक्षेः सेटो लुङ् । मुहुः सुप्तां अविच्छिन्ननिद्रत्वात् । मृताशङ्कयेति अनिष्टशंसित्वात् प्रियजनहृदयस्य इदानीं तया विना अहो वयं यज्जीवामस्तदकाले दुर्मरणमिति विललाप । जीवितस्यापूर्णकाले । दुःखेन मरणमिति भावे खल् ॥

२०६—अ-क्षेमः परिहासोऽयं. परीक्षां मा कृथा मम, ॥
मत्तो माऽन्तर्धिथाः सीते ! मा रंस्था जीवितेन नः, ॥

अक्षेम इत्यादि—परिहसनं परिहासः क्रीडा । अयमक्षेमो न कल्याणकरः । मम परीक्षां किं मामपश्यन् दुःखित आस्ते न वेति मा कृथाः मा कार्षीः । अपि तु दर्शयात्मानम् मा निलीयस्व । '२३६८। उश्च ।१।२।१२।' इति कित्त्वाद्गुणाभावः । '२३६९। ह्रस्वादङ्गात् ।८।२।२७।' इति सिचो लोपः । तस्माद्धेतोः सीते मान्तर्धिथाः । अन्तर्हिता मा भूः । '५९१। अन्तर्धौ–।१।४।२८।' इत्यपादानसंज्ञायां 'पञ्चम्यास्तसिः' । '१२७३। प्रत्ययोत्तरपदयोश्च ।७।२।९८।' इति मदादेश लुङि '२३८५ स्था घ्वोरिच्च १ २ १७' इति सिच किद्वमित्त्वं च ।

'२३६९। ह्रस्वात्–।८।२।२७।' इति सिचो लोपः। नो ऽस्माकं जीवितेन मा रंस्थाः क्रीडां मा कार्षीः। रमेरात्मनेपदित्वात्तङ् ॥ एते प्रकीर्णकाः ॥

अतःपरं सिजधिकारः—

सिचं सापवादमधिकृत्याह—

२०७—अहं न्यवधिषं भीमं राक्षसं क्रूर-विक्रमम्, ॥
मा घुक्षः पत्युरात्मानं, मा न श्लिक्षः प्रियं प्रिये. १६

अहमित्यादि—यतोऽहं राक्षसं मारीचं क्रूरविक्रमं भीमं भयानकं न्यवधिषं निहतवानस्मि। हन्तेः '२४३४। लुङि च ।२।४।४३।' इति वधादेशः। अदन्तत्वाद्वृद्ध्यभावः। तस्मान्मा घुक्षः न गोपय पत्युरात्मानम्। अन्तर्धाविस्यपादानत्वम्। '२५५। ल्यल्यात्परस्य ।६।१।११२।' इत्युत्वम्। गुहेः '२३३६। शल इगुपधादनिटः क्सः ।३।१।४५।'। '३२४। हो ढः ।८।२।३१।' भष्भाव-कत्व-षत्वानि। सिपश्च विसर्जनीयः। मा न श्लिक्षः मा न परिरब्धाः अपितु श्लिष्य प्रियं माम्। हे प्रिये। '२५१४। श्लिष आलिङ्गने ।३।१।४६।' इति क्सः ॥

२०८—मा स्म द्राक्षीर् मृषा दोषं, भक्तं मां मातिचिक्लिशः, ॥
शैलं न्यशिश्रियद् वामा, नदीं नु प्रत्यदुद्रुवत्. ॥ १७ ॥

मा स्मेत्यादि—मृषा दोषं व्यलीकं दोषं मा द्राक्षीः। मयीत्यर्थात् '२२२०। स्मोत्तरे लङ् च ।३।३।१७६।' इति चकाराल्लुङ्। '२३३६। शल इगुपधात्–।३।१।४५।' इति क्सस्य '२४०७ न दृशः ।३।२।४७।' इति निषेधः। '२२६९। इरितो वा ।३।१।५७।' इत्यङभावे सिच्। '२४०५। सृजि–दृशोः–।६।१।५८।' इत्यम्। हलन्तलक्षणा वृद्धिः। '२९४। व्रश्च–।८।२।३६।' इत्यादिना षत्वम्। यतोऽहं भक्तस्ततो मां भक्तं मातिचिक्लिशः नातिक्लेशय। क्लिशेर्ण्यन्तात् सिपि। '२३१२। णि-श्रि–।३।१।४८।' इत्यादिना चङ्। णिलोप-ह्रस्व-द्विर्वचनानि। पुनर्विकल्पयन्नाह। मयि दोषदर्शनाद्वामा मत्प्रतिकूलवर्तिनी सती शैलं नु पर्वतं कमप्यशिश्रियदाश्रिता उत नदीं प्रत्यदुद्रुवत् प्रतिगतेत्यर्थः। नुशब्दो वितर्के। पूर्ववच्चङ् ॥

२०९—ऐ वाचं देहि. धैर्यं नस् तव हेतोरसुस्रुवत्. ॥
त्वं नो मतिमिवाऽधासीर् नष्टा, प्राणानिवाऽदधः.

ऐ वाचमित्यादि—ऐशब्दो निपातो ऽभिमुखीकरणे वर्तते। वाचं देहि। प्रार्थनायां लोट्। '२४७१। घ्वसोरेद्धौ–।६।४।११९।' इत्येत्वम्। किमिति चेदाह। धैर्यं नो ऽस्माकं धीरता तव हेतोरसुस्रुवत् गलितम्। नष्टा अदर्शनं गता सती त्वं नोऽस्माकं मतिं बुद्धिमधासीरिव पीतवतीव। बुद्धेरपगमात्। '२३७५। विभाषा धेट्-श्व्योः ।३।१।४९।' इति यदा न चङ् तदा '२३७७। यम-रम–।७।२।७३।' इति सगिटौ। प्राणानदधः पीतवती। कायस्याचेष्टत्वात्। चङि रूपम् '२३८२ आतो लोप ६ ४ ६४ ॥

२१०–रुदतो ऽशिश्वयच् चक्षु–
रास्यं हेतोस् तवा ऽश्वयीत्, ॥
म्रिये ऽहं, मां निरास्थश् चेन्,
मा न वोचश् चिकीर्षितम्. ॥ १९ ॥

रुदत इत्यादि—तवार्थे त्वां पश्यामीति रुदतो मम चक्षुरशिश्वियत् उच्छूनम्। आस्यं मुखं चाश्वयीत्। '२३७५। विभाषा धेट्-श्व्योः ।३।१।४९।' इति चङ्-सिचौ। चङीयङ्। '२२९९। ह्म्यन्त-।७।२।५।' इति न वृद्धिः। '२२६६। इट ईटि ।८।२।२८।' इति सिचो लोपः। गुणायादेशौ। मां निरास्थश्चेद्यदि मम दर्शनं निरस्तवती त्वं तदा म्रिये ऽहम्। '२५३८। म्रियतेर्लुङ्लिङोश्च ।१।३।६१।' इति चकाराच्छित्वात्मनेपदम् '२३६७। रिङ्-श-यग्-।७।४।२८।' इति रिङ्। अतो यत्त्वया चिकीर्षितं कर्तुमिष्टं तन्मा नावोचः मा नाभाषिष्टाः अपि तु ब्रूहि। '२४३८। अस्यति-वक्ति-।३।१।५२।' इत्यङ्। '२४५४। वच उम् ।७।४।२०।' ॥

२११–लक्ष्मणा ऽऽचक्ष्व, यद्याख्यत्
सा किञ्चित् कोप-कारणम्, ॥
दोषे प्रतिसमाधान–
मज्ञाते क्रियतां कथम्. ॥ २० ॥

लक्ष्मणेत्यादि—हे लक्ष्मण! यदि सा किञ्चित्कोपकारणमाख्यदुक्तवती। इदं तेनाप्रियमाचरितम्। पूर्ववदङ्। तदाचक्ष्व कथय। अज्ञाते दोषे अनिर्धारिते प्रतिसमाधानं कथं क्रियतां अनुष्ठीयतां। नैवेति भावः। कर्मणि लोट्। '२३६७। रिङ्-।७।४।२८।' इत्यादिना रिङ् ॥

२१२–इह सा व्यलिपद् गन्धैः, स्नान्तीहाऽभ्यषिचज् जलैः,
इहा ऽहं द्रष्टुमाह्व तां,' स्मरन्नेवं मुमोह सः ॥ २१ ॥

इहेत्यादि—इह प्रदेशे सा सीता गन्धैर्व्यलिपत् समालिप्तवती। मामात्मानं चेत्यर्थात्। इह स्नान्ती क्रीडापूर्वकमभ्यषिचत्। हस्तयन्त्रमुक्तसलिलेन मामभिमुखं सिक्तवतीत्यर्थः। '२२७६। प्राक्सितात्-।८।३।६३।' इति षत्वम्। इह द्रष्टुं तामाह्वं आहूतवान्। '२४१८। लिपि-सिचि-ह्वश्च ।३।१।५३।' इति च्लेरङ्। एवं स्मरन् मुमोह मोहं गतवान् ॥

२१३–तस्यां ऽलिपत शोकाऽग्निः स्वान्तं काष्ठमिव ज्वलन्,
अलिप्तैवा ऽनिलः शीतो वने तं, न त्वजिह्लदत्. २२

१—'६५२। वक्त्रा ऽऽस्ये वदनं तुण्डमाननं लपनं मुखम्।' इति ना० अ०।
२—'१५२ चित्तं तु चेतो हृदयं स्वान्तं हृन् मानसं मन [इति ना० अ०।

तस्येत्यादि—तस्य रामस्य स्वान्तं मनः । '३०५८। क्षुब्ध-स्वान्त-।७।२।१८।' इत्यादिना निपातितम् । शोकाग्निः शोको ऽग्निरिव । अलिपत्त दीपितवान् । परस्मैपदेषु '२४१८। लिपि-।३।१।५३।' इत्यादिना नित्ये प्राप्ते '२४१९। आत्मनेपदेष्वन्यतरस्याम् ।३।१।५४।' इति विकल्पेनाङ् । '२१५८। स्वरितञितः-।१।३।७२।' इति क्रियाफलविवक्षायामात्मनेपदम् । काष्ठमिव स्वान्तं ज्वलन् अभिवर्धमानः । अनिलो वायुः शीतो ऽपि सन् वने तं राममलिप्तेव दीपितवानिव । अङभावपक्षे '२२८१। झलो झलि ।८।२।२६।' इति सिचो लोपः । ननु नैवाजिह्लदत् ह्लादितवान् । शोकाग्नेरुद्दुद्दत्वात् । ह्लादेर्ण्यन्तात् । '२३१२। णिश्रि-।३।१।४८।' इति चङ् ॥

२१४–स्नानभ्यषिचतां ऽम्भो ऽसौ रुदन् दयितया विना ॥
तथा ऽभ्यषिक्त वारीणि पितृभ्यः शोक-मूर्च्छितः २३

स्नानित्यादि—असौ रामो दयितया विना । शोकमूर्च्छितः शोकेन मोहं नीतः । स्नातुमारब्धः । मूर्च्छेर्हेतुमण्ण्यन्तस्य रूपम् । '११२६। ष्णा शौचे' शतृप्रत्ययः । रुदन् अश्रु विमुञ्चन् । अम्भः सलिलं अभ्यषिचत क्षिप्तवान् । शिरस्यञ्जलिना । तथा स्नातः पितृभ्यो वारीणि अभ्यषिक्त दत्तवान् । सिञ्चेः पूर्ववद्विभाषाऽङ् । सिचिरत्रोत्सर्गे वर्तते । ततश्चार्थान्तरवृत्तित्वाज्जलस्य कर्मत्वम् । अभ्युक्षणे तु करणत्वं यथा जलेन सिञ्चतीति ॥

२१५–तथा ऽऽर्तो ऽपि क्रियां धर्म्यां
स काले नां ऽमुचत् क्वचित्, ॥
महतां हि क्रिया नित्या
छिद्रे नैवां ऽवसीदति. ॥ २४ ॥

तथेत्यादि—स रामस्तेन प्रकारेणार्तोऽपि क्वचिदपि धर्म्यां क्रियां काले नामुचत् न त्यक्तवान् । यतो महतां सत्यपि छिद्रे व्यसने नित्या क्रिया नावसीदति नापयाति । आङ्पूर्वादर्तेर्ऋणोतेर्वा निष्ठायां ऋति धातौ वृद्धिः । मुचेः लृदनुबन्धत्वादङ् । '३२७७। कृञः श च ।३।३।१००।' रिङियङौ ॥

२१६–आह्वास्त स मुहुः शूरान्, मुहुराह्वत राक्षसान्, ॥
'एत सीताद्रुहः संख्ये, प्रत्यर्थयत राघवम्, ॥ २५ ॥

आह्वास्तेत्यादि—पुनः पुनरभिभवितुं शूरानाह्वास्त आहूतवान् तथा राक्षसानाह्वत । पूर्ववद्विकल्पः । '२७०४। स्पर्धायामाङः ।१।३।३१।' इत्यात्मनेपदम् । कथमाहूतवानित्याह । हे सीताद्रुहः सीताहिंसकाः शूरा राक्षसा वा एत आगच्छत । आङ्पूर्वादिणो लोट् । संख्ये संग्रामे । राघवं प्रत्यर्थयत प्रत्यर्थिनं कुरुत ।

१—'८६९ । युद्धमायोधनं जन्यं प्रधनं प्रविदारणम् । मृधमास्कन्दनं संख्यं समीकं सांपरायिकम् ॥' इति ना० अ० ।

प्रत्यर्थिन्शब्दात्तत्करोतीत्यर्थे णिच्। तदन्ताल्लोटः परस्मैपदम्। '२०५१। अर्थ याच्ञायाम्' इत्यस्य तु स्वार्थिकण्यन्तस्य सर्वदाऽऽत्मनेपदित्वात् प्रत्यर्थयध्वमिति स्यात्॥

३१७—स्व-पोषमपुषद् युष्मान् या पक्षि-मृग-शावकाः! ॥
अद्युतच् चेन्दुना सार्धं, तां प्रब्रूत, गता यतः.'॥२६॥

स्वपोषमित्यादि—हे मृगपक्षिणां शावकाः पोताः! या सीता युष्मान् स्वपोषमपुषत् पुष्टवती। '३३६१। स्वे पुषः ।३।४।४०।' इति णमुल्। '२८२७। यथाविध्यनुप्रयोगश्च ।३।४।४।' '२३४३। पुषादि-३।१।५५।' इत्यङ्। तां प्रब्रूत कथयत। यतो यत्र। आद्यादित्वात्तसिः। गता सत्यद्युतत् द्योतते स्म। पूर्ववदङ्। इन्दुना सार्धम्। चन्द्रमसा तुल्यकान्तित्वात्॥

३१८—गिरिमन्वसृपद् रामो लिप्सुर् जनक-संभवाम्, ॥
तस्मिन्नायोधनं वृत्तं लक्ष्मणायाऽशिषन् महत्—२७

गिरिमित्यादि—गिरिमन्वसृपत् लक्ष्यीकृत्य गतः। लृदित्त्वादङ्। किमर्थं लब्धुमिच्छुः '२६२३। सनि मी-मा-।७।४।५४।' इत्यादिना इस्। '२६२०। अत्र लोपः-।७।४।५८।' इत्यभ्यासलोपः। '१२१। खरि च ।८।४।५५।' इति चर्त्वम्। जनकसम्भवाम्। सम्भवत्यस्मादिति सम्भवः। '३२३२। ऋदोरप् ।३।३।५७।'। जनकः सम्भवो यस्यास्तस्माद्वा संभवो यस्यास्तां सीताम्। तस्मिन् गिरौ आयोधनं युद्धं महदतिशयत्वात् वृत्तं लक्ष्मणायाशिषत्कथितवान्। क्रियायोगे चतुर्थी। '२३८२। सर्ति-।३।२।५६' इत्यादिनाऽङ्। '२४८६। शास इदङ्-हलोः ।६।४। ३४।' इतीत्वम्। '२४१०। शासि-वसि-।८।३।६०।' इति षत्वम्॥

कथमकथयदित्याह—

३१९—'सीतां जिघांसू सौमित्रे! राक्षसावारतां ध्रुवम्, ॥
इदं शोणितमभ्यग्रं संप्रहारेऽच्युतत् तयोः. ॥ २८॥

सीतामित्यादि—(इत्येवं लक्ष्मणायाशिषदिति श्लोकचतुष्टयं यावत् सम्बध्यते) हे सौमित्रे! सीतां हन्तुमिच्छन्तौ राक्षसावारतामागताविति ध्रुवं निश्चितम्। अर्तेराङ्पूर्वात्पूर्ववदङ्। '२४०६। ऋ-दृशोऽङि-।७।४।१६।' इति गुणः। कीदृशौ सीतां जिघांसू हन्तुमिच्छू। हन्तेः सनि '२६१४। अज्झनगमां सनि ।६।४।१६।' इति दीर्घः। '२४३०। अभ्यासाच्च ।७।३।५५।' इति कुत्वम्। तथाहि। तयोः सीताद्वेषानुनयाभ्यां संप्रहारे युद्धे इदं शोणितम् अच्युतत् गलितम्। '४१ च्युतिर् क्षरणे'। अकर्मको ऽत्र। "२२६९। इरितो वा ।३।१। ५७।' इत्यङ्। अभ्यग्रं प्रत्यग्रम्॥

१—(३१६) श्लोक-स्थं टीकनं प्रेक्ष्यम्। २—'८७० अक्षियां समराऽनीक-रणा कलह विग्रहौ ऽभिसम्पात-कलि-संस्फोट-संयुगा इति ना० अ०

३२०—इदं कवचमच्योतीत्, साऽश्वो ऽयं चूर्णितो रथः, ॥
एह्यमुं गिरिमन्वेष्टुमवगाहावहे द्रुतम्. ॥ २९ ॥

इदमित्यादि—इदं कवचमच्योतीत् भ्रष्टम्। अङभावे सिजेव भवति। अयं रथः साश्वश्चूर्णित आस्ते। यतश्चैवं तस्मादेहि आगच्छ द्रुतम्। किं पश्चाद्विलम्बसे। अमुं गिरिमवगाहावहे विलोडयावः। किमर्थं अन्वेष्टुम्। सीतामित्यर्थात्। एतत्सर्वं पर्वतसमीपे कथ्यते॥

३२१—मन्युर् मन्ये ममा ऽस्तम्भीद्,
विषादो ऽस्तभदुद्युतिम्, ॥
अजारीदिव च प्रज्ञा,
बलं शोकात् तथाजरत्. ॥ ३० ॥

मन्युरित्यादि—मन्युः शोकः। मन्ये धमन्यौ। (क्रन्दतः उच्छूने)। अस्तम्भीत् स्तब्धवान्। विषाद उद्युतिमस्तभत्। अत्र पक्षे अनुनासिकलोपः। प्रज्ञा च तत्त्वविवेकिनी बुद्धिः अजारीत् विवेकवैकल्यात् जीर्णेव। तथाशब्दः समुच्चये। बलं शोकादजरत् जीर्णम्। स्वकार्याकरणात्। '२४०६। ऋदृशोऽङि—।७।४।१६।' इति गुणः। '२२९१। जॄ-स्तम्भु—।३।१।५८।' इत्यादिना सिजङौ॥

३२२—गृध्रस्येहाश्वतां पक्षौ कृत्तौ, वीक्षस्व लक्ष्मण! ॥
जिघत्सोर् नूनमापादि ध्वंसो ऽयं तां निशा-चरात्.'

गृध्रस्येत्यादि—हे लक्ष्मण। इह प्रदेशे गृध्रस्य पक्षौ कृत्तौ छिन्नौ। अश्वतां शूनौ। पूर्ववदङि '२४२१। श्वयतेरः।७।४।१८।' इति। वीक्षस्व नूनमवश्यं सीतां जिघत्सोरत्तुमिच्छोर्गृध्रस्य। अदेः '२४२७। लुङ्-सनोर्घस्लृ। २।४।३७।' निशाचरादयं ध्वंसः पक्षच्छेद आपादि उत्पन्नः। कर्तरि लुङ्। '२५१३। चिण् ते पदः।३।१।६०।' इति च्लेश्चिणादेशः। तशब्दस्य '२२२९। चिणो लुक् ।६।४।१०४।' ॥

३२३—क्रुद्धो ऽदीपि रघु-व्याघ्रो[1], रक्त-नेत्रो ऽजनि क्षणात्, ॥
अबोधि दुःस्थं त्रैलोक्यं, दीप्तैरापूरि भानु-वत्. ॥३२॥

क्रुद्ध इत्यादि—तदेवं रघुव्याघ्रो रामः क्रुद्धो अदीपि दीप्तवान्। क्षणाच्च रक्तनेत्रो ऽजनि जातः। '२५१२। जनि-वध्योश्च।७।३।३५।' इति न वृद्धिः। त्रैलोक्यं निहन्मि यस्मिन् हन्यमाने सीताद्रुहो ऽपि नश्यन्ति इत्यभिप्रायेण दुःस्थमबोधि बुध्यते स्म। किंवा रामस्य दारा ह्रियन्ते तदान्येषु का कथा इति दुःस्थं त्रैलोक्यमबोधि। दीप्तैस्तेजोभिर्हेतुभिरापूरि वर्धते स्म। भानुवदादित्यवत्।

१—'११०४। स्युरुत्तर- पदे व्याघ्र-पुङ्गव-र्षभ-कुञ्जराः॥ सिंह-शार्दूल-नागाऽऽ-द्याः पुंसि श्रेष्ठार्थ-गोचराः।'

दीप्तैरिति भावे निष्ठा । सर्वत्र कर्तरि लुङ् । '२३२८। दीप-जन–।३।१।६१।' इत्यादिना चिण् ॥

३२४–अतार्य्यस्योत्तमं सत्वमप्यायि कृत-कृत्य-वत् , ॥
उपाचायिष्ट सामर्थ्यं तस्य संरम्भिणो महत्. ॥ ३३ ॥

अतायीत्यादि—अस्य रामस्य उत्तमं सत्वमभिप्रायः शोकव्यसनयोरविकारित्वात् अतायि सन्ततं नान्तरा विच्छिद्यते स्म । अप्यायि बृंहितम् । कृतकृत्यवत् समाप्तक्रियवत् । हस्ततलस्थं शत्रुवधं मन्यमानस्य । उभयत्रापि पूर्ववच्चिण् । तस्य रामस्य संरम्भिणः शत्रुविषये क्षुभितचित्तस्य सामर्थ्यं बलं महदुपाचायिष्ट स्वयमेवोपचीयते स्म । चिनोतेः '२७६८। अचः कर्मकर्तरि ।३।१।६२।' इति वा चिण् । पक्षे चिण्वदिट् ॥

३२५–अदोहीव विषादो ऽस्य, समरुद्धेव विक्रमः, ॥
समभावि च कोपेन, न्यश्वसीच्च ऽऽयतं मुहुः. ३४

अदोहीत्यादि—अस्य रामस्य विषादः प्रागुत्पन्नो ऽदोहीव स्वयं क्षरित इव । अथवा अदोहीव प्रपूर्यते स्मेव । '२७६९। दुहश्च ।३।१।६३।' इति चिण् । विक्रमः पुरुषकारः समरुद्धेव स्वयं संरुध्यते स्म इव । '२७६६। कर्मवत्–।३।१।८७।' इत्यादिना कर्मवद्भावेन प्राप्तस्य चिणः '२७७०। न रुधः ।३।१।६४।' इति निषेधः । तेन सिजेव भवति । '२२८१। झलो झलि ।८।२।२६।' इति सिचो लोपः । '२२८०। झषस्तथोर्धो ऽधः ।८।२।४०।' । '५२। झलां जश् झशि ।८।४।५३।' इति धत्व-जश्त्वे । कोपेन च समभावि सम्भूतम् । '२७५९। चिण् भावकर्मणोः ।३।१।६६।' इति भावे चिण् । त्रैलोक्यदौःस्थ्यावबोधाज्जातखेदः सन् आयतं दीर्घं न्यश्वसीत् निःश्वसितवान् । '२२९९। ह्यन्त–।७।२।५।' इति वृद्धिर्न भवति । मुहुरिति सर्वत्र योज्यम् ॥ ॥ इति सिजधिकारः ॥

३२६–अथा ऽऽलम्ब्य धनू रामो जगर्ज गज-विक्रमः[1], ॥
'रुणध्मि सवितुर् मार्गं, भिनद्मि कुल-पर्वतान्[2]. ॥३५॥

श्नम्-प्रकरणं कथ्यते—

इतः प्रभृति श्नम्-प्रकरणमधिकृत्याह—

अथेत्यादि—अथानन्तरं रामो धनुरालम्ब्य गृहीत्वा जगर्ज विस्फूर्जितवान् । धनू राम इति '१७४। ढ्लोपे–।६।३।१११।' इति दीर्घः । '२३५। गर्ज गर्जने' । किं जगर्ज । सवितुः सूर्यस्य मार्गं पन्थानं रुणध्मि आवृणोमि । शरैरित्यर्थात् । '२५४३। रुधादिभ्यः श्नम् ।३।१।७८।' तथा भिनद्मि विदारयामि कुलपर्वतान् ॥

१—'८६८। **विक्रमस्** त्वतिशक्तिता ।' इति ना० अ० । २—'महेन्द्रो मलयः सह्यः शुक्तिमान् ऋक्षपर्वतः । विन्ध्यश्च पारियात्रश्च सप्तैते **कुलपर्वताः** ॥

३२७—रिणच्मि जलधेस् तोयं, विविनच्मि दिवः सुरान्, ॥
क्षुणद्मि सर्पान् पाताले, छिनद्मि क्षणदा-चरान्. ३६

रिणच्मीत्यादि—जलधेस्तोयं रिणच्मि रिक्तीकरोमि । '१५३५। रिचिँर् विरेचने ।' दिवः स्वर्गात् सुरान् विविनच्मि पृथक्करोमि । '१५३६। विचिँर् पृथग्भावे ।' क्षुणद्मि चूर्णयामि सर्पान् पाताले । '१५३७। क्षुदिँर् पेषणे' । '१९७। अट्कु-प्वाङ्—।८।४।२।' इति णत्वम् । छिनद्मि क्षणदाचरान् राक्षसान् द्विधा करोमि । '१५३४। छिदिँर् द्वैधीकरणे' ॥

३२८—यमं युनज्मि कालेन समिन्धानो ऽस्त्र-कौशलम्, ॥
शुष्क-पेषं पिनष्म्युर्वीमखिन्दानः स्व-तेजसा. ॥ ३७॥

यममित्यादि—यममपि कालेन तदधीनेन मृत्युना युनज्मि सम्बध्नामि । अस्त्रकौशलं समिन्धानः संवर्धयन् । '१५४२। ञि-इन्धी दीप्तौ' । आत्मनेपदिनो लटः शानच् । '२५४४। श्नसोरल्लोपः ।६।४।२३।' । '२४६९। श्नसोरल्लोपः ।६।४।१११।' उर्वीं शुष्कां कृत्वा चूर्णयामि । '१५४६। पिष्लृँ संचूर्णने' ।'३३५६। शुष्कचूर्णरूक्षेषु पिषः ।३।४।३५।' इति णमुल् । अखिन्दानः स्वतेजसा दैन्यमभजन् अपरिश्राम्यन् । '१५४३। खिदँ दैन्ये' । पूर्ववल्लोपः ॥

३२९—भूतिं तृणद्मि यक्षाणां, हिनस्मीन्द्रस्य विक्रमम्, ॥
भनज्मि सर्व-मर्यादास्, तनच्मि व्योम विस्तृतम्३८

भूतिमित्यादि—यक्षाणां भूतिं सम्पदं तृणद्मि उत्सादयामि । '१५४०। उ-तृदिँर् हिंसाऽनादरयोः' । इन्द्रस्य विक्रमं हिनस्मि अपनयामि । '१५५०। हिंसि हिंसायाम्' । '२२६२। इदितो नुम्—।७।१।५८।' तस्य श्नसोरल्लोपः । सर्वमर्यादाश्च व्यवस्थाः सर्वेषां भनज्मि मर्दयामि । '१५४७। भञ्जो आमर्दने ।' '२५४४। श्नसोरल्लोपः ।६।४।२३।' । तनच्मि व्योम विस्तृतं सङ्कोचयामि । '१३-३१। स्तृञ् आच्छादने' सौवादिकस्य रूपं न '१५६९। स्तॄञ् आच्छादने' इति क्रैयादिकस्य । '१५५२। तञ्चूँ सङ्कोचे' । '१५४४। श्नसोरल्लोपः ।६।४।२३।' ॥

कस्मादेवं प्रवृत्तस्त्वमिति चेदाह—

३३०—न तृणेह्मीति लोको ऽयं मां विन्ते निष्-पराक्रमम्,' ॥
एवं वदन् दाशरथिरपृणग् धनुषा शरम्. ॥ ३९ ॥

न तृणेह्मीत्यादि—न तृणेह्मि न मारयामि इति कृत्वा। '१५४९। तृहँ हिंसि हिंसायाम्' । श्नम् । '२५४५। तृणह इम् ।७।३।९२।' अयं लोको मां निष्पराक्रमं निर्वीर्यं विन्ते विचारयति । '१५४४। विदँ विचारणे' इत्यस्मादात्मनेप-

१—'३०२ । सर्वंसहा वसुमती वसुधोर्वी वसुंधरा । गोत्रा कुः पृथिवी पृथ्वी क्ष्माऽवनिर् मेदिनी मही ॥' इति ना० अ० । २—'८० । 'द्यो-दिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम् । नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम् ॥' इति ना० अ० ।

दिनः श्नम् । अल्लोपः । एवमुक्तेन प्रकारेण वदन् दाशरथिः धनुषा शरम् अपृणक् पृणक्ति स्म । '१५५७। पृची संपर्के' । लङि श्नम् । हल्ङ्यादिलोपः । कुत्वम् ॥ इति श्नम्-विकरणनिदर्शनम् ॥

इतः प्रकीर्णकश्लोकानाह—

२३१—न्यवर्तयत् सुमित्रा-भूस् तं चिकीर्षुं जगत्-क्षयम्, ॥
ऐक्षेतामाश्रमादाराद् गिरिकल्पं पतत्रिणम् ॥ ४० ॥

न्यवर्तयदित्यादि—तं रामं जगत्क्षयं चिकीर्षुं कर्तुमिच्छुम् । सुमित्राभूर्लक्ष्मणो न्यवर्तयत् निवर्तितवान् । 'भ्रातः अलं कोपेन, त्वया सार्धं कः संग्रामे युद्धं दातुं समर्थः ? यदत्र युक्तं तत्प्रतिविधीयताम्' इति । भवनं भूः । सम्पदादित्वात् क्विप् । सुमित्रायां भूर्यस्य । ऐक्षेतां रामलक्ष्मणौ दृष्टवन्तौ । लङि रूपम् । पक्षिणं गिरिकल्पं महाप्रमाणत्वात् । आश्रमादारात् समीपे । '६११। दूरान्तिकार्थैः—।२।३।३४।' इति पञ्चमी ॥

२३२—तं सीता-घातिनं मत्वा हन्तुं रामो ऽभ्यधावत, ॥
'मा वधिष्ठा जटायुं मां सीतां रामा ऽहमैक्षिषि.' ४१

तमित्यादि—तं सीताघातिनं सीता हतानेनेति मत्वा रामो हनिष्यामीत्यभ्यधावत । '६४३। धावुँ गति-शुद्ध्योः' । इत्यस्माल्लङि स्वरितेत्त्वादात्मनेपदम् । तं हन्तुमुद्यतं रामं जटायुराह मा वधिष्ठा इति । 'हे राम मां जटायुं मा वधिष्ठा मा वधीः' । 'वध बन्धने' इत्यस्मादनेकार्थत्वादात्मनेपदिनः सेटो लुङि रूपं, न हन्तेः तस्य परस्मैपदित्वात् । सत्यप्याङि '२६९५। आङो यमहनः ।१।३।२८।' इत्यात्मनेपदं न भवति तत्राकर्मकादित्यनुवृत्तेः । स्वनामपरिकीर्तनं तव पितुरहं सखेति ख्यापनार्थम् । सीतामैक्षिषि दृष्टवानहम् । लुङुत्तमैकवचने रूपम् । अतो मां मा वधिष्ठाः ॥

२३३—उपास्थितैवमुक्ते तं सखायं राघवः पितुः, ॥
पप्रच्छ जानकी-वार्तां संग्रामं च पतत्रिणम्, ॥
ततो रावणमाख्याय द्विपन्तं पततां वरः ॥ ४२ ॥

उपास्थितेत्यादि—पक्षिणैवमुक्ते सति राघवस्तं व्रणभङ्गाद्यनुष्ठानेन उपास्थित परिचरितवान् । सङ्गतकरणे आत्मनेपदम् । '२३८९। स्थाघ्वोरिच्च ।१।२।१७।' इतीत्वम् । '२३६९। ह्रस्वादङ्गात् ।८।२।२७।' इति सिचो लोपः । पितुः सखायमिति सखिशब्दस्य द्वितीयैकवचने रूपम् '२५३। सख्युरसम्बुद्धौ ।७।१।९२।' इति णित्वाद्वृद्धिरायादेशौ । पप्रच्छ पृष्टवान् । तं पक्षिणं जटायुम् । किं

---

१ १४५१ **आराद्** दूरसमीपयो इति ना० म०

२—(२८९) श्लोकोक्त **टीकनं** प्रेक्ष्यम्

जानकीवार्तां संग्रामं च। तत उपस्थानानन्तरं रावणं द्विषन्तम् '३११। द्विषोऽमित्रे।३।२।१३१।' इति शतृप्रत्ययः। आख्याय सीता रावणेन हृतेति कथयित्वा। पततां पक्षिणां वरो जटायुर्ममारेति परेणान्वयः॥

३३४—व्रण-वेदनया ग्लायन् ममार गिरि-कन्दरे, ॥
तस्याग्न्यम्बु-क्रियां कृत्वा प्रतस्थाते पुनर् वनम्. ॥४३॥

व्रणेत्यादि—व्रणकृता वेदना पीडा। मध्यमपदलोपी समासः। तथा ग्लायन् ग्लानिं गच्छन्। शतर्यायादेशः। ममार मृतः। क गिरिकन्दरे यं गिरिमन्वसृपत् तस्य निम्नप्रदेशे। कन्दं रातीति (कं दारयतीति) व्युत्पत्तिमात्रम्। तस्य जटायोरग्न्यम्बुक्रियां दाहमुदकदानं च कृत्वा पुनर्भूयो वनमरण्यं प्रतस्थाते प्रस्थितौ। '२६८९। समव-प्र-विभ्यः—।१।३।२२।' इत्यात्मनेपदम्॥

३३५—सत्वानजस्रं घोरेण बलाऽपकर्षमश्नता ॥
क्षुध्यता जगृहाते तौ रक्षसा दीर्घ-बाहुना. ॥ ४४ ॥

सत्वानित्यादि—तौ रामलक्ष्मणौ रक्षसा राक्षसेन जगृहाते गृहीतौ। कर्मणि लिट्। किंनाम्ना दीर्घबाहुना। अन्वर्था चेयं संज्ञा। एक एकेन बाहुना द्वितीयो द्वितीयेनेति। क्षुध्यता बुभुक्षमाणेन घोरेण भीमेन। सत्वान् अजस्रं सदा। नञ्पूर्वाजसः '३१४७। नमिकम्पि—।३।२।१६७।' इति रः। अश्नता भुञ्जानेन। किं कृत्वा बलापकर्षं बलादाकृष्येव पाकादिकमनपेक्ष्य। '३३७३। अपादाने परीप्सायाम्।३।४।५२।' इति णमुल्॥

३३६—भुजौ चकृततुस् तस्य निस्त्रिंशाभ्यां रघूत्तमौ, ॥
स छिन्न-बाहुरपतद् विह्वलो ह्वलयन् भुवम्. ॥४५॥

इति प्रकीर्णकाः।

भुजावित्यादि—रघूत्तमौ रामलक्ष्मणौ तस्य योजनबाह्वोः बाहू यथास्थानमागतौ चकृततुः छिन्नवन्तौ। '१५२९। कृती छेदने'। इत्यस्य रूपम्। काभ्यां निस्त्रिंशाभ्यां खड्गाभ्याम्। निर्गतस्त्रिंशतोऽङ्गुलिभ्य इति वाक्ये 'डच्प्रकरणे संख्यायास्तत्पुरुषस्योपसंख्यानम्' इति त्रिंशच्छब्दाड्डज्विधिः 'निरादयः—' इति समासः। टिलोपः। स छिन्नबाहुः कृत्तभुजः सन्। अपतत् पतितः। पतेर्लङि रूपम्। लृदित्त्वादङ्। विह्वलो व्याकुलः भुवं भूमिं ह्वलयन्। '८६२। ह्वल चलने'। घटादित्वे ह्रस्वत्वम्॥ इति प्रकीर्णकाः॥

१—'२५८। अम्भोऽर्णस्-तोय-पानीय-नीर-क्षीराऽम्बु-शम्बरम्।' इति ना० अ०।

२ ८५४ खड्गे तु निस्त्रिंश ... रिष्टय। इति ना० अ०

अथ कृत्याऽधिकारः—

इतः परं कृत्याधिकारः—

३३७—प्रष्टव्यं पृच्छतस् तस्य कथनीयमवीवचत् ॥
आत्मानं वन-वासं च जेयं चा ऽरिं रघूत्तमः. ॥४६॥

प्रष्टव्यमित्यादि—स योजनबाहुः निहतो रामं पप्रच्छ 'को भवान्, कस्य पुत्रः, कथं तव वनवासः, कस्माच्चोद्विग्नः सन् भ्रमसि' इति । प्रष्टव्यं प्रश्नार्हं पृच्छतस्तस्य । '२७३४। तव्यत्-तव्यानीयरः ।३।१।९६।' इति तव्यत् । '२९४। व्रश्च—।८।२।३६।' इति षत्वम् । ष्टुत्वं च । रघूत्तमस्तदानीं कथनीयं कथनार्हं प्रश्नानुरूपम् । तेनैवानीयर् । अवीवचद्वक्ति स्म । '१९८५। वचँ भाषणे ।' चौरादिकः । स्वार्थिको णिच् लुङ् चङ् । णिलोपः ह्रस्वः । द्विर्वचन-सन्वद्भावेत्वदीर्घत्वानि । किं तदित्याह—आत्मानं अहं रामो दाशरथिरिति । वनवासं पितुरादेशात् वनवासः । जेयं चारिं जेतव्यं यः कनकमृगच्छलेन रावणः सीतामपहृतवानिति ॥

३३८—'लभ्या कथं नु वैदेही, शक्यो द्रष्टुं कथं रिपुः, ॥
सह्यः कथं वियोगश् च, गद्यमेतत् त्वया मम.' ॥४७॥

लभ्येत्यादि—कथं केन प्रकारेण उपायेन लभ्या वैदेही प्राप्या । '२८४४। पोरदुपधात् ।३।१।९८।' इति यत् । शत्रुः केन प्रकारेण द्रष्टुं शक्यः । '३१७७। शक-धृष—।३।४।६५।' इत्यादिना तुमुन् । वियोगश्चायं सीतायाः कथं केन प्रकारेण सह्यः सोढव्यः । '२८४७। शकि-सहोश्च ।३।१।९९।' इति यत् । गद्यमेतत् कथनीयमेतत् । '२८४८। गद-मद—।३।१।१००।' इत्यादिना यत् । ममेति शेषविवक्षायां षष्ठी ॥

३३९—'अहं राम ! श्रियः पुत्रो मद्य-पीत इव भ्रमन्, ॥
पाप-चर्यो मुनेः शापाज् जात' इत्यवदत् स तम्. ४८

अहमित्यादि—हे राम! अहं श्रियः पुत्रः मद्यपीत इव । '९००। वाहिताग्न्यादिषु ।२।२।३७।' इति निष्ठान्तस्य परनिपातः । कार्याकार्यविवेकाभावात्पापचर्यो राक्षसः । मुनेः स्थूलशिरसः शापाज्जात उत्पन्नः । माद्यत्यनेनेति मद्यं चरितव्यं चर्यमेतौ पूर्ववद्यत्प्रत्ययान्तौ । पापं चर्यं यस्येत्यवदत् स योजनबाहुस्तं रामम् । वाक्यार्थोऽत्र कर्म ॥

३४०—'प्रयातस् तव यम्यत्वं शस्त्र-पूतो ब्रवीमि ते, ॥
रावणेन हृता सीता लङ्कां नीता सुरारिणा. ॥ ४९ ॥

प्रयात इत्यादि—इदानीं तव यम्यत्वं वश्यत्वं प्रयातः । यमेः पूर्ववत् यत् । शस्त्रेण पावित सन् ब्रवीमि ते तुभ्य कथयामि

कवचनस्य '४०१। ते-मयावेकवचनस्य ।८।१।२२।' इति ते आदेशः। क्रियायोगे चतुर्थी। कथनीयमाह—रावणेन सुरारिणा हृता सीता लङ्कां नीता॥

वैदेही प्राप्या कथमिति यमुपायं पृष्टवान् तं कथयन्नाह—

३४१—ऋष्यमूके ऽनवद्यो ऽस्ति पण्य-भ्रातृ-वधः कपिः॥
सुग्रीवो नाम, वर्यो ऽसौ भवता चारु-विक्रमः॥५०॥

ऋष्यमूक इत्यादि—ऋष्यमूकपर्वते सुग्रीवो नाम कपिः चारुविक्रमो महापराक्रमोऽस्ति। असौ भवता वर्यो वरणीयः प्रार्थनीयः '१९९५। वरँ ईप्सायाम्' इति चौरादिकात्स्वार्थिकण्यन्तात् '२८४२। अचो यत् ।३।१।९७' यद्वा '२८४९। अवद्य-पण्य-।३।१।१०१।' इत्यत्र वृङो वर्येति स्त्रियामनिरोधे अप्रतिबन्धे निपातितत्वात्। सततप्रवर्तिनी अनिरोध्या वर्या प्रीतिर्यस्येत्यर्शआद्यच्। स च भवता सह वर्यः प्रीतिमान् समानव्यसनत्वात्। यतः पण्यभ्रातृवधः सः पण्यो विक्रेतव्यो भ्रातुर्वालिनो वधो येन। यद्येवं सदा कथं मया पापीयान् वर्य इत्यत आह—अनवद्यः अगर्हणीयः। दारापहारित्वेन आततायिनो भ्रातुर्वधेन निर्दोषत्वादिति भावः॥

३४२—तेन वह्येन हन्तासि त्वमर्यं पुरुषाऽशिनाम्॥
राक्षसं क्रूर-कर्माणं शक्राऽरिं दूर-वासिनम्.॥५१॥

तेनेत्यादि—तेन सुग्रीवेण त्वं राक्षसं हन्तासि निहनिष्यसि। वह्येन वहत्यभिप्रेतमनेनेति '२८५०। वह्यं करणम् ।३।१।१०२।' इति यत्। कीदृशमर्यं स्वामिनम्। पुरुषाशिनां राक्षसानाम्। '२८५१। अर्यः स्वामि-वैश्ययोः ।३।१।१०३।' इति यन्निपात्यते। क्रूरकर्माणं पापाचारं शक्रारिं रावणम्। यद्येवमहमेव हन्तुं समर्थ इत्यभिप्रायेणाह—दूरवासिनं समुद्रान्तरितवासित्वात् एकाकिना हन्तुं न शक्यत इति भावः॥

यद्यनवद्यस्तदा कथमस्य पण्यो भ्रातृवध इत्याह—

३४३—आस्ते स्मरन् स कान्ताया हृताया वालिना कपिः॥
वृषो यथोपसर्याया गोष्ठे गोर् दण्ड-ताडितः.॥५२॥

आस्ते इत्यादि—वालिना हृतायाः कान्तायाः स्मरन्नास्ते। कोऽन्यः सम्भवेत् यस्तं हत्वा त्वया मां योक्ष्यते, '६१३। अधीग्-।२।३।५२।' इति कर्मणि षष्ठी। कस्येव वृषो यथा उपसर्याया आसन्नगर्भकालायाः गोः स्मरन् गोष्ठे

१—'११००। कुपूय-कुत्सिताऽवद्य-खेट-गर्ह्याऽणकाः समाः।' २—'४७। इन्द्रो मरुत्वान् मघवा बिडौजाः पाकशासनः॥ वृद्धश्रवाः सुनासीरः पुरुहूतः पुरंदरः जिष्णुर् लेखर्षभः शक्रः शतमन्युर् दिवस्पतिः ३ '९५९] प्रजने ' इति

आस्ते । '२८५२। उपसर्या काल्या प्रजने ।३।१।१०४।' इति निपातितम् । दण्ड-ताडितः सन् दण्डस्थानीयोऽत्र वाली ॥

३४४—तेन सङ्गतमार्येण रामा ऽजर्यं कुरु द्रुतम्. ॥

लङ्कां प्राप्य ततः पापं दश-ग्रीवं हनिष्यसि. ॥ ५३ ॥

तेनेत्यादि—हे राम! तेन वानरेण संगतं सख्यं अजर्यं अनपायम् । न जीर्यत इत्यस्मिन् वाक्ये '२८५३। अजर्यं संगतम् ।३।१।१०५।' इति निपातितम् । आदौ विशेष्यत्वेनोपात्तं संगतं तद्विशेषणमजर्यं कुरु द्रुतं यावत्तस्यानेन युष्मद्विधेन संगतं न भवति । आर्येण सदाचारेण । '२८७२। ऋ-हलोर्ण्यत् ।३।१।१२४।' ततः सङ्गतात् लङ्कां प्राप्य गत्वा पापं पापीयांसं रावणं हनिष्यसि ॥

ननु यावत्कार्यं न सिध्यति तावत्संगतं गच्छति कृतकृत्यस्तु नैवेत्यत आह—

३४५—अनृतोद्यं न तत्रास्ति, सत्य-वद्यं ब्रवीम्यहम्. ॥

मित्र-भूयं गतस् तस्य रिपु-हत्यां करिष्यसि. ॥ ५४ ॥

अनृतोद्यमित्यादि—सत्यमुद्यत इति कर्मणि यत् । अहं सत्यं वचो ब्रवीमीत्यर्थः । अनृतोद्यं तत्र सुग्रीवे नास्ति । अनृतमसत्यं उद्यं वचनं अनृतोद्यम् । भावे क्यप् । यजादित्वात्संप्रसारणम् । उभयत्रापि '२८५४। वदः सुपि क्यप् च ।३।१।१०६।' इति चकाराद्यत् । यस्मादेवं तस्मान्मित्रभूयं मित्रभावं गतः । '२८५५। भुवो भावे ।३।१।१०७।' क्यप् । रिपुहत्यां करिष्यसि '२८५६। हनस्त च ।३।१।१०८।' इति क्यप् तकारश्चान्तादेशः ॥

३४६—आदृत्यस् तेन वृत्येन स्तुत्यो जुष्येण संगतः ॥

इत्यः शिष्येण गुरुवद् गृध्यमर्थमवाप्स्यसि. ॥ ५५ ॥

आदृत्य इत्यादि—तेन संगतः सन् गृध्यमभिलषणीयमवाप्स्यसि । '२८५९। ऋदुपधात्—।३।१।११०।' इति क्यप् । कीदृशः कीदृशेनेत्याह—आदृत्यः आदरणीयः । वृत्येन वरणीयेन । स्तुत्यः स्तवार्हः । जुष्येण सेव्येन हनूमत्प्रभृतीनाम् । क इव शिष्येण गुरुरिव । यथोपाध्यायः शिष्येण शासनीयेन इत्यः अनुगम्यस्तद्वदिति । '२८५७। एति-स्तु-शास्वृ—।३।१।१०९।' इत्यादिना क्यप् । ह्रस्वस्य तुक् ॥

३४७—नाऽखेयः सागरो ऽप्यन्यस् तस्य सद्-भृत्य-शालिनः,

मन्युस् तस्य त्वया मार्ग्यो, मृज्यः शोकश् च तेन ते.'

नाखेय इत्यादि—तस्य सुग्रीवस्य सद्भृत्यशालिनः हनूमदादिभृत्ययुक्तस्य । '२८६१। भृञो ऽसंज्ञायाम् ।३।१।११२।' इति क्यप् । अन्यो द्वितीयः सागरो-

१—'६५२ ग्रीवायां शिरोधि कन्धरेत्यपि २ १४५७ गर्हा

ऽपि नाखेयो न खननीयः अपि तु खननीय एव । अपिशब्दः सम्भावनायाम् । तस्य कारणं सद्भृत्यशालित्वम् । '२८६०। ईच खनः ।३।१।१११।' इति क्यबीकारौ । तस्य मन्युस्त्वया मार्ग्योऽपनेयः । ते तव तेन च शोको मृज्यः '।२८६२। मृजेर्विभाषा ।३।१।११३।' इति यद्विकल्पे क्यप् ॥

३४८—स राजसूय–याजीव तेजसा सूर्य-सन्निभः ॥
अ-मृषोद्यं वदन् रुच्यो जगाहे द्यां निशा-चरः. ॥५७॥

स इत्यादि—स निशाचरो द्यामाकाशं जगाहे गतः । राजसूययाजीव । राज्ञा सूयते राजा वा अनेन सूत इति राजसूयः क्रतुः । तेनेष्टवान् स राजसूययाजी । '२९९६। करणे यजः ।३।२।८५।' इति णिनिः । तद्वदित्यर्थः । रुच्यः प्रियो जातो रामस्येत्यर्थात् । '२८६५। राजसूय–।३।१।११४।' इत्यादिना क्यबन्ता राजसूयादयः ॥

३४९—अ-कृष्ट-पच्याः पश्यन्तौ ततो दाशरथी लताः ॥
रत्नाऽन्न-पान-कुप्यानामाटतुर् नष्टसंस्मृती. ॥ ५८ ॥

अकृष्टपच्या इत्यादि—ततो निशाचरगमनानन्तरं दाशरथी रामलक्ष्मणावाटतुर्गतवन्तौ । कीदृशौ । नष्टा संस्मृतिः ययोः । केषां संस्मृतिः रत्नान्नपानकुप्यानाम् । रत्नान्नपानानि प्रसिद्धानि । कुप्यं स्वर्णरजताभ्यामन्यत् वस्तु तत् । संज्ञायां क्यप् । गुपेरादेः गकारस्य ककारः । कर्मणि षष्ठी । लताः पश्यन्तौ । कृष्टे पच्यन्ते इति कृष्टपच्याः । पूर्ववत् क्यप् । पश्चान्नञ्समासः । स्वयमेव पच्यन्ते यास्ता इत्यर्थः ॥

३५०—समुत्तरन्तावव्यथ्यौ नदान् भिद्योद्ध्य-सन्निभान् ॥
सिध्य-तारामिव ख्यातां शबरीमापतुर् वने. ॥ ५९ ॥

समुत्तरन्तावित्यादि—तौ तस्मिन् वने शबरीमापतुः प्राप्तवन्तौ । अव्यथ्यौ न व्यथेते इति पूर्ववत् क्यप् । परिश्रमवर्जितावित्यर्थः । नदान् समुत्तरन्तौ । कीदृशान् सिद्योध्यसन्निभान् । भिद्योद्ध्यौ नदविशेषौ । '२८६६। भिद्योद्ध्यौ– ।३।१।११५।' इति पूर्ववत् निपातितम् । भिनत्ति कूलमिति भिद्यः । उज्झत्युदकमिति उद्ध्यः । '१३८८ उज्झँ उत्सर्गे' । दकारात्परस्य धकारो निपात्यते । तत्सदृशान् नदान् । सिध्यतारामिव ख्याताम् । सिध्यन्त्यस्मिन्निति सिध्यः । '२८६७। पुष्य-सिध्यौ नक्षत्रे ।३।१।११६।' इति निपातनात् । पुष्याख्यां तारामिव ख्यातां शबरीम् ॥

३५१—वसानां वल्कले शुद्धे
विपूयैः कृत-मेखलाम् ॥

१—'९७७। स्यात् कोशश्च हिरण्यं च हेम-रूप्ये कृताऽकृते । ताभ्यां यदन्यत् तत् कुप्यम् ॥' इति ना० अ० ।

क्षामामञ्जन-पिण्डाऽऽभा
दण्डिनीमजिनाऽऽस्तराम् ॥ ६० ॥

वसानामित्यादि—वसानां परिदधानां वल्कले त्वचौ । विपूयैर्मुञ्जैः कृत-मेखलां कृतकटिसूत्राम् । यद्यपि विपूर्वस्य पवतेर्विपूय इत्यादिना मुञ्जे निपातितं, तथापि मुञ्जानामनुपहतत्वं ज्ञापयितुं विपूयैरिति विशेषणं, पवित्रैरित्यर्थः । मुञ्जशब्दस्तदानीं सामान्यमाह ।.विपूयैरित्युक्ते मुञ्जैरित्युपादानमनर्थकम् । एवं कृत्वा पाठान्तरमुच्यते वसानां वल्कले शुद्धे विपूयैरिति । क्षामां कृशाम् । '३०३१। क्षायो मः ।८।२।५३।' इति निष्ठामत्वम् । अञ्जनपिण्डस्येवाभा यस्या अस्तीति तां कृष्णाम् । दण्डिनीं गृहीतदण्डाम् । आस्तीर्यत इति आस्तरः '३२३२। ऋदोरप् ।३।३।५७।' अजिनमास्तर उत्तरासङ्गो यस्यास्तामजिनास्तराम् ॥

३५२—प्रगृह्य-पद-वत् साध्वीं स्पष्ट-रूपाम-विक्रियाम् ॥
अ-गृह्यां वीत-कामत्वाद् देव-गृह्याम-निन्दिताम् ६१

प्रगृह्येत्यादि—अविक्रियामजातविकारां अत एव स्पष्टरूपाम् । एवं च साध्वीं साधुचरिताम् । किमिव प्रगृह्यपदवत् । यस्य पदस्य प्रगृह्यसंज्ञा तत् पदं प्रगृह्यम् । '२८६९ । प्रत्यपिभ्यां ग्रहेः ।३।१।११८।' इत्यनुवृत्तौ '२८७०। पदा-स्वैरि-।३।१।११९।' इत्यादिना अपूर्वाद्ग्रहेः पदे ऽभिधेये क्यप् । यथा तत्पदम-विकाररूपत्वात् स्पष्टं साधु च । '९०। प्लुतप्रगृह्या अचि—।६।१।१२५।' इति प्रकृ-तिभावेन स्वरसन्ध्यभावादित्यर्थः । कथमजातविक्रियेति चेदाह—अगृह्यां ग्रहेर-स्वैरविषये क्यप् । गृह्या अस्वैरिणी अस्वतन्त्रा न भवतीत्यगृह्या । कस्मात् वीत-कामत्वात् । वीतरागा हि स्वतन्त्रा भवन्ति । देवगृह्याममरपक्षाम् । पक्षविषये क्यप् । एवं चानिन्दितामगर्हिताम् ॥

३५३—धर्म-कृत्य-रतां नित्यम-वृष्य-फल-भोजनाम् ॥
दृष्ट्वा तामभुचद् रामो युग्याऽऽयात इव श्रमम् ॥६२॥

धर्मकृत्यरतामित्यादि—पुण्यकर्मरतां नित्यम् । अवृष्यफलभोजनाम् । अवृष्याणीन्द्रियाविकारनिमित्तानि फलानि भोजनं यस्याः '२८७१। विभाषा कृ-वृषोः ।३।१।१२०।' इति क्यप् । दृष्ट्वा तां तथाविधाम् । श्रममभुचत् मुक्तवान् । तद्दर्शनाह्लादितत्वात् । युग्यायात इव वाहनं प्राप्त इव क्यप् । '२८७३। युग्यं च पत्रे ।३।१।१२१।' इति निपातितम् ॥

३५४—स तामूचे ऽथ—'कच्चित् त्वममावास्या-समन्वये ॥
पितॄणां कुरुषे कार्यम-पाक्यैः स्वादुभिः फलैः. ॥६३॥

स इत्यादि—अथानन्तरं त्यक्तश्रमः स रामः तां शबरीमूचे उक्तवान् । कच्चित्त्वं किं त्वं पितॄणां कुरुषे कार्यम् । ण्यद्भावपक्षे '२८०२। ऋ-हलोर्ण्यत्

१ '७५४ अजिनं चर्म कृत्ति स्त्री' इति ना० म०

३।१।१२४।' कदा अमावास्यासमन्वये अमावास्यायाः सम्प्राप्तौ अमावास्यायामित्यर्थः। '२८७४। अमावस्यदन्यतरस्याम् ।३।१।१२२।' इति निपातनम्। तत्र हि अमाशब्दे उपपदे वसेर्धातोरमा सह वसतो यस्मिन्काले सूर्याचन्द्रमसौ इति काले ऽधिकरणे ण्यत्। तस्मिन्नन्यतरस्यां वृध्यभावः। कैः फलैः। स्वादुभिः मिष्टैः। अपचनीयैः अनुपहतत्वात् '२८७२। ऋहलोर्ण्यत् ।३।१।१२४।'॥

३५५–अवश्य-पाव्यं पवसे कच्चित् त्वं देव-भार्ग्यविः, ॥
आसाव्यमध्वरे[1] सोमं द्विजैः[2] कच्चिन् नमस्यसि. ६४

अवश्यपाव्यमित्यादि—देवभाक् देवान् भजत इति '२९७६। भजो ण्विः ।३।२।६२।' तद्भविः कच्चित् किं पवसे पवित्रीकरोषि मन्त्रादिना। '११९। हयो हो ऽन्यतरस्याम् ।८।४।६२।' इति हकारस्य पूर्वसवर्णः। '१०३५। पूङ् पवने' इति भौवादिकः। कीदृशमवश्यपाव्यमवश्यम्भावेन पावयितव्यमित्यर्थः। '२८८६। ओरावश्यके ।३।१।१२५।' इति ण्यत्। '७५४। मयूरव्यंसकादयः–२।१।७२।' इति समासः। 'लुम्पेदवश्यमः कृत्ये तुं काम-मनसोरपि' इति मकारलोपः। सोममौषधिविशेषम्। आसाव्यमभिषवार्हं। आङ्पूर्वात्सुनोतेः'२८८७। आसुयु-वपि–३।१।१२६।' इत्यादिना ण्यत्। अध्वरे यज्ञे द्विजैः सह कच्चित्त्वं नमस्यसि नमस्करोषि॥

३५६–आचाम्यं संध्ययोः कच्चित्[3] सम्यक् ते न प्रहीयते, ॥
कच्चिदग्निमिवा ऽऽनाय्यं[4] काले संमन्यसे ऽतिथिम्. ॥

आचाम्यमित्यादि—प्रभाते ऽपराह्णे च सन्ध्ययोर्यदाचाम्यमुपस्पर्शनम्। पूर्ववत् ण्यत्। कच्चित्सम्यक् यथावत्तत्र न प्रहीयते न तस्य हतिर्भवति। काले आतिथ्योचिते काले कच्चित् अतिथिं संमन्यसे पूजयसि। अग्निमिवानाय्यम् यथा अग्निं आनाय्यम्। दक्षिणाग्निं मन्यसे तद्वत्। '२८८८ आनाय्यो नित्ये ३।१।१२७।' इति नयतेराङ्पूर्वस्य ण्यदायादेशौ निपात्येते॥

३५७–न प्रणाय्यो जनः कच्चिन् निकाय्यं[5] ते ऽधितिष्ठति ॥
देव-कार्य-विघाताय धर्मद्रोही महोदये ! ॥ ६६ ॥

१—'७१९ यज्ञः सवोऽध्वरो यागः सप्ततन्तुर् मखः क्रतुः।' इति ना० अ०। २—'१२३६। दन्त-विप्रा ऽण्डजा द्विजाः।' इति ना० अ०। द्विज-शब्दार्थास्त्रयः सुन्दरीवचनेन—'द्विज-राज-शिरो-मणेर्भिदां द्विज-राज-ध्वज-शालिनश्च यः। कलयेन् मनसाऽपि, पात्यते ऽन्तक-भृत्यैः खलु तद्-द्विजाऽऽवलिः॥' इति कोशावतंसः। [1]द्विजो विप्रः। [2]द्विजो ऽण्डजः पक्षी। [3]द्विजो दन्तः। ३—'१४७९। कच्चित् काम-प्रवेदने।' ४—'६९७। यो गार्हपत्यादानीय दक्षिणाग्निः प्रणीयते। तस्मिन्नानाय्यः।' ५—'३२४। गृहाः पुंसि च भूम्न्येव निकाय्य-निलयाऽऽलयाः।' सर्वत्र ना० अ०।

न प्रणाय्य इत्यादि—महानुदयः स्वर्गापवर्गाणां यस्याः सा तथा हे महोदये! देवकार्यविघाताय देवकार्यं विहनिष्यामीति। '२१८०। भाववचनाच्च।३।३।११।' इति भविष्यति घञ्। '५८२। तुमर्थाच्च भाववचनात् २।३।१५।' इति चतुर्थी। प्रणाय्यो ऽसंमतो जनः। '२८८९। प्रणाय्यो ऽसंमतौ।३।१।१२८।' इति निपातितम्। कच्चित् निकाय्यं गृहं ते तव नाधितिष्ठति नाधिवसति। '२८९०। पाय्य—३।१।१२९।' इत्यादिना निवासे चिनोतेर्निपूर्वात् ण्यदायादेशौ आदेः कुत्वं च। '५४२। अधि-शीङ्-स्थाऽऽसां कर्म।१।४।४६।' इति कर्मसंज्ञा। धर्मद्रोही धर्मद्रोहशीलः॥

३५८—कुण्ड-पाय्य-वतां[1] कच्चिदग्निचित्या-वतां तथा॥
कथाभी रमसे नित्यमुपचाय्य-वतां शुभे!॥ ६७॥

कुण्डपाय्यवतामित्यादि—कुण्डेन पीयते ऽत्र क्रतौ कुण्डपाय्यः क्रतुः। '२०९१। क्रतौ कुण्डपाय्य-संचाय्यौ।३।१।१३०।' इति निपातितम्। कच्चित्कथाभी रमसे। '१७४। ढ्लोपे—६।३।१११।' इति दीर्घः। तथाग्निचित्यावतां आहिताग्निकानां कथाभी रमसे। '२८९३। चित्याग्निचित्ये च।३।१।१३२।' इति निपात्यते। अग्निचयनमग्निचित्या। भावे क्यप्। तुक्। तद्वतां यथोपचाय्यवतां उपचीयते इत्युपचाय्यो ऽग्निः। '२८९२। अग्नौ परिचाय्य-।३।१।१३१।' इति निपातितः। उपपूर्वाच्चिनोतेर्ण्यदायादेशौ। तद्वतां कथाभी रमसे शुभे कल्याणि॥

इति कृत्याधिकारः॥

अथ प्रकीर्णकाः—

अतः परं प्रकीर्णकाः—

३५९—वर्धते ते तपो भीरु! व्यजेष्ठा विघ्न-नायकान्,॥
अजैषीः काम—संमोहौ, संप्राप्था विनयेन वा.॥६८॥

वर्धत इत्यादि—हे कातरचित्ते तव तपो वर्धते तस्य च ये विघ्नास्तेषां ये नायकाः प्रणेतारस्तान् व्यजेष्ठाः जितवत्यसि। लुङि '२६८५। विपराभ्यां जेः।१।३।१९।' इत्यात्मनेपदम्। कामसंमोहौ कच्चिदजैषीः जितवत्यसि। '२२९७। सिचि वृद्धिः—।७।२।१।' विनयेन वा संप्राप्थाः संप्राप्तासि। कर्मणि लुङ्। '२२८१। झलो झलि।८।२।२६।' इति सिचो लोपः। अत्रानुक्तमपि कच्चिदिति पदमर्थाद्योज्यम्॥

३६०—नाऽऽयस्यसि तपस्यन्ती, गुरून् सम्यगतूतुषः॥
यमान् नोदविजिष्ठास् त्वं, निजाय तपसे ऽतुषः' ६९

१—'१२७ पिठर- स्थाल्युखा कुण्डम्' इति ना० अ०।

नायस्यसीत्यादि—तपस्यन्ती तपश्चरन्ती कच्चिन्नायस्यसि न खिद्यसे। तपश्चरणशीलीभूतेत्यर्थः। '२६७१। कर्मणो रोमन्थ—।३।१।१५।' इति क्यङ्। 'तपसः परस्मैपदं च।' गुरून् आचार्यादीन् सम्यक् यथावदनुवृत्त्याऽतूतुषः तोषितवत्यसि। तुषेर्ण्यन्तस्य लुङि रूपम्। चङि णिलोपादि। यमान्मृत्योर्नोद्विजिष्ठाः नाभैषीः। पुण्यकृतां न मृत्युभयमित्यर्थः। ओविजेरात्मनेपदम्। लुङि सिच इट्। '२५३६। विज इट्।१।२।२।' इति सिचो ङित्त्वे न गुणः। निजायात्मीयाय तपसे। अतुषः तुष्टवत्यसि। '२३४३। पुषादि—।३।१।५५।' इत्यङ्॥

३६१—अथाऽर्घ्यं मधुपर्काऽऽद्यमुपनीयाऽऽदरादसौ ॥
अर्चयित्वा फलैरर्च्यौ सर्वत्राऽऽख्यदनामयम्[१]. ॥७०॥

अथेत्यादि—अथानन्तरमसौ शबरी अर्घ्यमर्घार्थम्। '२०९३। पादार्घाभ्यां च।५।४।२५।' इति यत्। मधुपर्काद्यम्। दधिमधुमिश्रमुदकं मधुपर्कः तदाद्यं आदौ भवमाद्यं तदुपनीयादरात् फलैरर्चयित्वा। अर्च्यौ अर्चनार्हौ ण्यत्। रामलक्ष्मणौ सर्वत्रोक्तेषु अनामयं कल्याणं आख्यत्कथितवती। '२४३८। अस्यति—।३।१।५२।' इत्यङ्॥

इति प्रकीर्णकाः।

अतः परं कृदधिकारः—

अथ कृदधिकारमाह—कृत्यानां कृदन्तभावे ऽपि भावकर्मणोः कृत्या इति विशेषप्रतिपादनार्थः पृथगधिकारः। शेषास्तु कृतः कर्त्तरि भवन्ति '७८१। तत्रोपपदं सप्तमीस्थम्।३।१।९२।' इत्येतदधिकृतम्। यत्रैतन्नावतिष्ठते तान् कृतो दर्शयन्नाह—

३६२—'सख्यस्य तव सुग्रीवः कारकः कपि-नन्दनः, ॥
द्रुतं द्रष्टासि मैथिल्याः,' सैवमुक्त्वा तिरो ऽभवत्. ॥

सख्यस्येत्यादि—सा शबरी तिरो ऽभवदन्तर्भूता। एवमुक्त्वा। किं तदित्याह—तव सख्यस्य सखित्वस्य। '१७९१। सख्युर्यः।५।१।१२६।' कर्मणि षष्ठी। कारकः सुग्रीवः। '२८९५। ण्वुल्-तृचौ।३।१।१३३।' इति ण्वुल्। त्वया सह मैत्रीं करिष्यति। कपिनन्दनः कपीनां नन्दयिता। '२८९६। नन्दि-ग्रहि—।३।१।१३४।' इत्यादिना ल्युः। कृद्योगे षष्ठी। ततो द्रुतं द्रष्टासि मैथिल्याः। पूर्ववत्कर्त्तरि तृच् कर्मणि षष्ठी। असीति वर्तमाने लट्॥

३६३—नन्दनानि मुनीन्द्राणां रमणानि वनौकसाम् ॥
वनानि भेजतुर् वीरौ ततः पाम्पानि राघवौ. ॥७२॥

१—'६१३। अनामयं स्यादारोग्यम्।' इति ना० अ०।

नन्दनानीत्यादि—तत उक्तादनन्तरं वीरौ राघवौ रामलक्ष्मणौ वनानि भेजतुः सेवितवन्तौ । एत्वाभ्यासलोपौ '२३०१ । तृ-फल—।६।४।१२२।' इत्यादिना । पाम्पानीति पम्पाया अदूरम् । '११८२। अदूरभवश्च ।४।२।७०।' इत्यण् । मुनीन्द्राणां नन्दनानि प्रमोदकारीणि । वनौकसां वनेचराणाम् । '१३०२। उचँ समवाये ।' अस्मादौणादिको ऽसुन् । पृषोदरादित्वाद्वर्णविपर्ययः । वनमोको येषां तेषां रमणानि रतिजनकानि । '२८९६। नन्दि—।३।१।१३४।' इत्यादिना ल्युः । कर्मणि षष्ठी ॥

२६४—'भृङ्गाऽऽली-कोकिल-क्रुङ्भिर्
वाशनैः पश्य लक्ष्मण ! ॥
रोचनैर् भूषितां पम्पा-
मस्माकं हृदयाविधम् ॥ ७३ ॥

भृङ्गालीत्यादि—हे लक्ष्मण! पम्पां पश्य । अस्माकं हृदयाविधम् । चेतःपीडयन्तीम् । हृदयं विध्यतीति क्विप् । '२४१२। ग्रहि-ज्या—।६।१।१६।' इत्यादिना संप्रसारणम् । '१०३७। नहि-वृति—।६।३।११६।' इति पूर्वपदस्य दीर्घः । भूषितां काभिः भृङ्गालीभिः भ्रमरपङ्क्तिभिः । कोकिलैः क्रुङ्भिः क्रौञ्चैः । वाशनैः कूजद्भिः । रोचनैः शोभनैः । क्रुङ् इति '३७३। ऋत्विग्—।३।२।५९।' इत्यादिना क्विन् । निपातनसामर्थ्यादनुनासिकलोपाभावः । '५४ संयोगान्तस्य लोपः ।८।२।२३।' । '३७७ । क्विन्प्रत्ययस्य—।८।२।६२।' इति कुत्वम् ॥

२६५—परिभावीणि ताराणां पश्य मन्थीनि चेतसाम् ॥
उद्भासीनि जले-जानि दुन्वन्त्य-दयितं जनम् ॥७४॥

परिभावीणीत्यादि—जलेजानि पद्मानि पश्य । '९७२। तत्पुरुषे कृति—।६।३।१४।' इत्यादिना ऽलुक् सप्तम्याः । उद्भासीनि भासमानानि । अत एव ताराणां परिभावीणि तिरस्कर्तॄणि । ततश्चेतसां मन्थीनि पीडाकराणि । अतो जनमदयितं प्रियारहितं दुन्वन्ति । '१३३६। टुदुँ उपतापे' सौवादिकः । मन्थोद्भासपरिभूभ्यो ग्रहादित्वाण्णिनिः ॥

२६६—सर्वत्र दयिताऽधीनं सु-व्यक्तं रामणीयकम्, ॥
येन जातं प्रियाऽपाये कद्-वदं हंस-कोकिलम् ॥७५॥

सर्वत्रेत्यादि—हे लक्ष्मण! सर्वत्र यत्किञ्चिद्रामणीयकं रमणीयस्य भावः । '१७९७। योपधाद्—।५।१।१३२।' इति वुञ् । तत्सर्वं दयिताधीनं दयितायत्तम् । '२०७९। अषडक्ष—।५।४।७।' इत्यादिनाध्युत्तरपदात्खः । सुव्यक्तं स्पष्टम् । कुतः येन प्रियाया अभावे सति हंसकोकिलं हंसाश्च कोकिलाश्चेति शकुनित्वात् द्वन्द्वैकवत्त्वम् कद्वद वदतीति पचाद्यच् । कुत्सितं वदतीति

'१०२८। रथ-वदयोश्च ।६।३।१०२।' इति कोः कदादेशः । दयितायां सत्यां मधुरप्रलापमासीदित्यर्थः ॥

३६७—पक्षिभिर् वितृदैर् यूना
शाखिभिः कुसुमोत्किरैः ॥
अ-ज्ञो यो,यस्य वा ना ऽस्ति
प्रियः, प्रग्लो भवेन् न सः. ॥ ७६ ॥

पक्षिभिरित्यादि—'१५४०। उत्तृदिर् हिंसाऽनादरयोः।' इत्यस्मादिगुपधलक्षणः कः। यूना वितृदैः हिंसकैः पक्षिभिः शाखिभिर्वृक्षैश्च । ग्रीह्यादित्वादिनिः। कुसुमोत्किरैः। उत्किरन्ति उत्क्षिपन्तीत्युत्किराः। पूर्ववत्कः। कुसुमानामुत्किराः। कृद्योगलक्षणां षष्ठीं विधाय समासः। तैर्हेतुभूतैः करणभूतैर्वा। स प्रग्लो न भवेत्। प्रकर्षेण ग्लायते प्रग्लः। '२८९८। आतश्चोपसर्गे ।३।१।१३६।' इति कः। यो ऽज्ञः गुणदोषानभिज्ञः। जानातीति ज्ञः पूर्ववत्कः। यस्य वा प्रियो जनो नास्ति तस्य प्रयोजनाभावः सर्वत्र विवेकित्वात्। प्रीणातीति प्रियः। पूर्ववत् कः ॥

३६८—ध्वनीनामुद्धमैरेभिर् मधूनामुद्धयैर् भृशम् ॥
आजिघ्रैः पुष्प-गन्धानां पतगैर् ग्लपिता वयम् . ॥७७॥

ध्वनीनामित्यादि—पतङ्गैर्भ्रमरैर्ग्लपिताः पीडिताः वयम्। 'ग्ला-स्ना-वनु-वमां च' इति मित्वात् ह्रस्वः। 'पतेरङ्च् पक्षिणि' इत्यौणादिकः। कीदृशैः ध्वनीनामुद्धमैः ध्वनीन् कुर्वद्भिः। '२३६०। पा-घ्रा-ध्मा—।७।३।७८।' इति धमादेशः। मधूनामुद्धयैः मधूनि पुनः पुनः पिबद्भिः। '९६८। धेट् पाने' इत्यस्यायादेशः। आजिघ्रैः पुष्पगन्धानां पुष्पगन्धान् जिघ्रद्भिः। पूर्ववज्जिघ्रादेशः। सर्वत्र '२८९९। पा-घ्रा-ध्मा-धेट्-दृशः शः ।३।१।१३७।' इति शः। कृद्योगलक्षणा षष्ठी ॥

३६९—धारयैः कुसुमोर्मीणां पारयैर् बाधितुं जनान् ॥
शाखिभिर् हा हता भूयो हृदयानामुदेजयैः. ॥७८ ॥

धारयैरित्यादि—हा कष्टं शाखिभिर्द्रुमैर्भूयोऽत्यर्थं वयं हताः। कीदृशैः हृदयानामुदेजयैः चेतसामुत्कम्पकैः। धारयैः कुसुमोर्मीणां कुसुमनिचयान् धारयद्भिः। जनान् मद्विधान् बाधितुं पीडयितुं पारयद्भिः समर्थैः। '९६६। धृञ् धारणे', '११६०। पॄ पालन-पूरणयोः', '२३३। एजृ कम्पने च।' एभ्यो णिजन्तेभ्यः '२९००। अनुपसर्गाल्लिम्प-विन्द—।३।१।१३८।' इत्यादिना शः ॥

१—'३५३। वृक्षो महीरुहः शाखी विटपी पादपस् तरुः। अनोकहः कुटः शालः पलाशी द्रु-द्रुमागमाः॥' इति ना० अ०।

२७०—ददैर् दुःखस्य माऽदृग्भ्यो धायैरामोदमुत्तमम् ॥
लिम्पैरिव तनोर् वातैश् चेतयः स्याज् ज्वलो न कः,

ददैरित्यादि—वातैर्ददैः दुःखस्य दुःखं ददद्भिः । केभ्यो माऽदृग्भ्यः । अस्मादृशेभ्यो विरहिभ्यः । '४२९। त्यदादिषु दृशो ऽनालोचने कञ्च ।३।२।६०।' इति किन् । '१०१७। दृग्-दृश-वतुषु ।६।३।८९।' इत्याकारः । धायैरामोदमुत्तमं आमोदं प्रियासङ्गमेन हर्षं यावद्भिरहिभ्यो दत्तस्य दुःखस्य धायैः पोषकैरित्यर्थः । उत्तममिति क्रियाविशेषणम् । उत्तममामोदं धायैः कुसुमानां परिमलं धारयद्भिरिति व्याख्याने अनित्यत्वात् कृत्प्रयोगे कर्मषष्ठ्यभावः । लिम्पैरिव तनोः शरीरं लिम्पद्भिरिव । वातैर्हेतुभिः । को नाम विरहाग्निना यश्चेतयमानः ज्वलन्नग्निरिव न स्यात् । किन्तु भवेदेवेति भावः । ददैर्धायैरिति '२९०३। श्याद्व्यधा-।३।१।१४१।' इति आकारान्तलक्षणे शे प्राप्ते '२९०१। ददाति-दधात्योः—।३।१।१३९। इति शाणौ भवतः । शे आतो लोपः । णे चातो युक् । लिम्पश्चेतय इति '२९००। अनुपसर्गात्—।३।१।१३८।' इति शः । ज्वल इति '२९०२। ज्वलितीकसन्तेभ्यो णः ।३।१।१४०।' इति णस्य विकल्पनात्पचाद्यच् ॥

२७१—अवश्याय[1]-कणाऽऽस्रावाश् चारु-मुक्ता-फल-त्विषः ॥
कुर्वन्ति चित्त-संस्रावं चलत्-पर्णाऽग्र-संभृताः ॥८०॥

अवश्यायेत्यादि—अवश्यायत इत्यवश्यायः तस्य कणा बिन्दवः । आस्रवन्तीत्यास्रावाः क्षरन्तः । '२९०३। श्याद्व्यधा—।३।१।१४१।' इति णः कर्तरि । तयोर्विशेषणसमासे राजदन्तादित्वात्परनिपातः । ते कुर्वन्ति चित्तसंस्रावम् । संस्रवतीति संस्रावः । पूर्ववत् णः । चित्तं संस्रावं चलत्कुर्वन्ति इत्यर्थः । पूर्ववत् समास- परनिपातौ । कीदृशाश्चलत्पर्णाग्रसंभृताः संगलिताः । अत एव चारुमुक्ताफलत्विषः दर्शनीयमुक्ताफलानुकारिणः । सीताहारस्थमुक्ताफलानि स्मारयन्तीत्यर्थः ॥

२७२—अवसायो भविष्यामि दुःखस्याऽस्य कदा न्वहम्, ॥
न जीवस्याऽवहारो मां करोति सुखिनं यमः ॥८१॥

अवसाय इत्यादि—कदा नु काले अहं दुःखस्यानुभूयमानस्य अवसायोऽन्तकरो भविष्यामि येन जीवस्यावहारो ऽवहर्ता यमो मां सुखिनं न करोति मारयतीत्यर्थः । अवस्यति इति अवसायः । '१२२२। षो ऽन्तकर्मणि ।' अवहरतीत्यवहारः । '२९०३। श्याद्व्यधा—।३।१।१४१।' इति सर्वत्र णः । युक् ॥

२७३—दह्ये ऽहं मधुनो लेहैर् दावैरुग्रैर् यथा गिरिः, ॥
नायः कोऽत्र स, येन स्यां वर्ता ऽहं विगत-ज्वरः ८२

[1] १—'१०१ अवश्यायस् तु नीहारस् तुषारस् तुहिनं हिमम् । प्रालेयं मिहिका च ।' इति ना० अ०

दह्य इत्यादि—मधुनो लेहैर्भृङ्गैः अहं दह्ये। '२९०३। श्याद्व्यधा–३।१।१४१।' इति णः। दावैर्वनाग्निभिरुग्रैः प्रचण्डैर्यथा गिरिर्दह्यते तद्वत्। अत्र को नायः नयतीति नायः उपायः ईप्सितप्रापकः। उभयत्र '२९०४। दु-न्योः–।३।१।१४२।' इति णः। येन नायेन विगतज्वरः विगतपीडः स्यामिति। आशंसायां लिङ्। बत खेदे॥

२७४—समाविष्टं ग्रहेणेव ग्राहेणेवा ऽऽत्तमर्णवे॥
दृष्ट्वा गृहान् स्मरस्येव वनाऽन्तान् मम मानसम्. ८३

समाविष्टमित्यादि—वनान्तान् वनपर्यन्तान्। स्मरस्य कामस्य गृहमिव। उन्मादकत्वात्। '२९०६। गेहे कः। ३।१।१४४।' इति ग्रहेः कः। अर्धर्चादिपाठात् पुँलिङ्गता। दृष्ट्वा मम स्थितस्येत्यर्थात् योज्यम्। अन्यथा कथं समानकर्तृकत्वम्। मानसं चेतः ग्रहेणाङ्गारकादिना। समाविष्टमिव विगृहीतमिव। '२९०५। विभाषा ग्रहः ।३।१।१४३।' इति णप्रत्ययः। अचोऽपवादः। तत्र व्यवस्थितविभाषाविज्ञानात् जलचरे ग्राहः ज्योतिषि ग्रह इति जलचरे वाच्येऽचोपवादो णप्रत्ययः ज्योतिषि वाच्ये ऽच् प्रत्ययः। ग्राहेणेवात्तमर्णवे। अर्णः पानीयं यत्रास्तीति। '१९१६। केशाद्वो ऽन्यतरस्याम् ।५।२।१०९' इत्यत्र 'अर्णसो लोपश्च' इति भूम्नि नित्ययोगे ऽतिशायने वा वः सलोपश्च। अर्णवे समुद्रे वर्तमानेन ग्राहेण नक्रादिना आत्तं गृहीतम्। आङ्पूर्वस्य दाञः '३०७८। अच उपसर्गात्तः ।७।४।४७।'॥

२७५—वाताऽऽहति-चलच्-छाखा नर्तका इव शाखिनः॥
दुःसहा ही परिक्षिप्ताः क्वणद्भिरलि-गाथकैः॥ ८४॥

वातेत्यादि—ही कष्टं एते शाखिनः नर्तका इव। '२९०७। शिल्पिनि ष्वुन् ।३।१।१४५।' दुःसहा दुःखेन सह्यन्त इति '३३०५। ईषद्–।३।३।१२६।' इत्यादिना खल्। नर्तकैः साधर्म्यमाह। वाताहतिचलच्छाखा वाताहतिभिः चलन्त्यः शाखा बाहुलता इव येषां ते। अलयो भ्रमराः क्वणन्तः। गाथका गायना इव। '२९०८। गस्थकन् ।३।१।१४६।' तैश्च परिक्षिप्ता परिवेष्टिता इति॥

२७६—एक-हायन-सारङ्ग-गती रघु-कुलोत्तमौ॥
लवकौ शत्रु-शक्तीनामृष्यमूकमगच्छताम्.॥ ८५॥

एकहायनेत्यादि—रघुकुलोत्तमौ रामलक्ष्मणौ। ऋष्यमूकमगच्छतां गतवन्तौ। लङि रूपम्। हायनः संवत्सरः स एको यस्य सारङ्गस्य मृगस्य तस्येव गतिर्ययोः शीघ्रगामित्वात्। '२९१०। हश्च व्रीहि-कालयोः ।३।१।१४८।' इति हा धातोर्ण्युट्। आतो युक्। तौ शत्रुशक्तीनां लवकौ अपनेतारौ। '२९११।

१—'भूम-निन्दा-प्रशंसासु नित्ययोगेऽतिशायने।' इति मत्वर्थीय इत्यर्थः।
२—'१५२। संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत् समाः।' इति ना० अ०।

ग्रु-सृ-ल्वः समभिहारे-।३।१।१४९' इति वुन्। तत्र समभिहारग्रहणं साधुकारित्वोपलक्षणार्थम् ॥

३७७—तौ वालि-प्रणिधी मत्वा सुग्रीवोऽचिन्तयत् कपिः, ॥
'बन्धुना विगृहीतोऽहं भूयासं जीवकः कथम्.' ॥८६॥

तावित्यादि—तौ रामलक्ष्मणौ वालिनः प्रणिधी चरौ मत्वा सुग्रीवः कपिरचिन्तयत् चिन्तितवान्। प्रणिधीयते नियुज्यते कार्येषु प्रणिधिः। '३२७०। उपसर्गे घोः किः ।३।३।९२।' बन्धुना भ्रात्रा विगृहीतो विरोधितः सन् कथं जीवको भूयासमिति। आशंसायां लीङ्। जीवेः '२९१२। आशिषि च ३।१।-१५०।' इति वुन् ॥

इति निरुपपदकृदधिकारः।

इतः प्रभृति '७८१। तत्रोपपदं सप्तमीस्थम् ।३।१।९२।' इति अस्योपस्थापनेन कृतो दर्शयन्नाह—

३७८—स शत्रु-लावौ मन्वानो राघवौ मलयं गिरिम् ॥
जगाम स-परीवारो व्योम-मायमिवोत्थितम्. ॥८७॥

स इत्यादि—स सुग्रीवः सपरीवारः सपरिकरः। '१०४४। उपसर्गस्य घञि- ।६।३।१२२।' इति दीर्घः। कपीनाममनुष्यत्वात्। मलयं गिरिं जगाम। राघवौ शत्रुलावौ शत्रून् लुनातीति '२९१३। कर्मण्यण् ।३।२।१।' शत्रूणामुन्मूलकाविति मन्वानोऽवगच्छन्। '१५६६। मनु अवबोधने' इत्यस्मादात्मनेपदिनः' २४६६। तनादिकृञ्भ्य उः ।३।१।७९।' व्योममायमिवोत्थितं व्योम आकाशं मिमीत इति '२९१४। ह्वावामश्च ।३।२।२।' इत्यण्। नभः परिच्छेत्तुमिवोत्थितं कियत्प्रमाणमस्येति ॥

३७९—शर्म-दं मारुतिं दूतं विषम-स्थः कपि-द्विपम् ॥
शोकाऽपनुदमं-व्यग्रं प्रायुङ्क्त कपि-कुञ्जरः. ॥ ८८ ॥

शर्मदमित्यादि—कपिकुञ्जरः सुग्रीवः हनूमन्तं दूतं प्रायुङ्क्त प्रस्थापितवान् '७४१। वृन्दारक-नाग-कुञ्जरैः-।२।१।६२।' इत्यादिना कर्मधारयः सः। वृत्तान्तं ज्ञातुमित्यर्थात् प्रायुङ्क्त इति '२७३५। प्रोपाभ्यां युजेः-।१।३।६४।' इत्यात्मनेपदम्। '२५४३। रुधादिभ्यः श्नम् ।३।१।७८।' कपिकुञ्जरः किंभूतः। विषमे दुर्गपर्वते तिष्ठतीति विषमस्थः। '२९१६। सुपि स्थः ।३।२।४।' इति कः। मारुतिं कीदृशं शर्म कल्याणं ददातीति शर्मदः। '२९१४। आतोऽनुपसर्गे कः ।३।२।३।' इति कः। श्रेष्ठत्वमाह। कपिद्विपं कपिश्रेष्ठम्। द्वाभ्यां पिबतीति द्विपः। कपिरयं द्विप इव। '७३५। उपमितं व्याघ्रादि-।२।१।५६।' इत्या-

१—'७७७८। यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः। चारश्च गूढपुरुषः।' इति भा॰ स॰।

दिना कर्मधारयः। पुनः कीदृशं शोकापनुदं शोकमपनुदति। '२९१९। तुन्द-शोकयोः—।३।२।५।' इति कः। अव्यग्रं सुचित्तमित्यर्थः॥

३८०—विश्वास-प्रद-वेषो ऽसौ पथि-प्रज्ञः समाहितः॥
चित्त-संख्यो जिगीषूणामुत्पपात नभस्-तलम्.॥८९॥

विश्वासेत्यादि—असौ मारुतिर्नभस्तलमुत्पपात। विश्वासं प्रददातीति विश्वासप्रदः। '२९२०। प्रे दाज्ञः।३।२।६।' इति कः। विश्वासप्रदो वेषो यस्य भिक्षुवेष इत्यर्थः। वेष्यते आत्मानेनेति '३१८८। अकर्तरि च कारके।३।३।१९।' इति घञ्। '११७०। विष्लृ व्याप्तौ' इत्यस्य रूपम्। पन्थानं प्रजानातीति पथिप्रज्ञः समाहितः अभ्रान्तचित्तः 'इदमादिष्टं इदं च मया तत्र वक्तव्यम्' इति। जिगीषूणां जेतुमिच्छताम्। चित्तसंख्यः चित्तं संख्याति परिच्छिनत्तीति '२९२१। समि ख्यः।३।२।७।' इति कः॥

३८१—सुरा-पैरिव घूर्णद्भिः शाखिभिः पवना-ऽऽहतैः॥
ऋष्यमूकमगाद् भृङ्गैः प्रगीतं साम-गैरिव.॥९०॥

सुरापैरित्यादि—मारुतिर्ऋष्यमूकमगात्। शाखिभिरुपलक्षितम्। घूर्णद्भिः कम्पमानैः पवनाहतत्वात्। अत एव सुरापैरिव मत्तैरिव। '२९२२। गापोष्टक् ।३।२।८।' इत्यत्र 'पिबतेः सुरा-शीध्वोः' इति टक्। प्रगीतं प्रगीयते ऽत्रेति। अधिकरणे क्तः। कैर्भृङ्गैः सामगैरिव सामवेदपाठकैरिव साम गायन्तीति '२९२२। गापोष्टक्।३।२।८।'॥

३८२—तं मनो-हरमागत्य गिरिं वर्म-हरौ कपिः॥
वीरौ सुखा-ऽऽहरो ऽवोचद् भिक्षुर् भिक्षार्ह-विग्रहः.॥९१॥

तमित्यादि—ऋष्यमूकं गिरिमागत्य कपिर्वीरौ रामलक्ष्मणौ अवोचत् उक्तवान्। कीदृशं मनोहरं रम्यत्वात्। मनो हरतीति '२९२३। हरतेरनुद्यमने ऽच्।३।२।९।' वर्महरौ कवचं हर्तुं क्षमौ। संभाव्यमानवयसावित्यर्थः। '२९२४। वयसि च।३।२।१०।' इत्यच्। सुखाहरः सुखाहरणशीलः। '२९२५। आङि ताच्छील्ये।३।२।११।' इत्यच्। भिक्षुः परिव्राड्वेषः न कपिरूपः यतो विश्वासप्रदवेष इत्युक्तम्। भिक्षार्हविग्रहः भिक्षायोग्यशरीरः कृशत्वादित्यर्थः। भिक्षामर्हतीत्यच्॥

३८३—'बलिनावमुमद्रीन्द्रं युवां स्तम्बे-रमाविव॥
आचक्षाथां मिथः कस्माच्छङ्करेणा ऽपि दुर्गमम्॥९२॥

१—'८२९। तनुत्रं वर्म दंशनम्।' २—'६३४। अथ कलेवरम्। गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः॥' ३—'७९९। दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः॥ मतङ्गजो गजो नागः कुञ्जरो वारणः करी। इभः स्तम्बेरमः पद्मी।' इति ना० अ०॥

बलिनावित्यादि—युवां अमुं अद्रीन्द्रम् । कस्मात् कारणादिथः प्राप्तौ । '१११८। इण् गतौ' इत्यस्मात् '२७८९ । वर्तमानसामीप्ये वर्तमानवद्वा ।३।३।१३१।' इति यसि रूपम् । भूते लट् थस् । एतदाचक्षाथां कथयतम् । लोटि रूपम् । बलिनौ बलवन्तौ । यतः शङ्करेणापि महादेवेनापि दुर्गमं दुःखेन गम्यते । काविव स्तम्बेरमाविव यथा मत्तद्विपौ प्राप्तुतस्तद्वत् । '२९२७ स्तम्ब-कर्णयोः—।३।२।१३। इत्यच् । कर्तरि हस्तिन्यभिधेये 'हस्ति-सूचकयोः' इति वचनात् । शङ्कर इति '२९२८। शमि धातोः—।३।२।१४।' इत्यच् ॥

दुर्गमत्वदर्शनायाह—

२८४—व्याप्तं गुहा-शयैः क्रूरैः क्रव्याद्भिः स-निशाचरैः ॥
तुङ्ग-शैल-तरु-छन्नं मानुषाणाम-गोचरम्. ॥ ९३ ॥

व्याप्तमित्यादि—कीदृशमद्रीन्द्रं क्रव्यमपक्वमांसं भक्षयद्भिः । क्रव्योपपदा-दृदेः '२९७८। क्रव्ये च ।३।२।६९।' इति विट् । क्रूरैः हिंसकैः सिंहादिभिः सनिशाचरैः राक्षससहितैर्व्याप्तम् । गुहाशयैः गुहायां शेरते इति शीङः २९२९। अधिकरणे शेतेः ।३।२।१५।' इत्यच् । तुङ्गाः उच्चाः शैलाः शिलायां भवा ये तरवस्तैश्छन्नं व्याप्तम् । अत एव मानुषाणामगोचरं अगम्यम् । '३।२९८।गोचर-सञ्चर—।३।३।११९।' इत्यादिना निपातितः ॥

प्रागुक्तष्टाधिकारः । इति ऊर्ध्वं खशादिप्रत्ययानाह—

२८५—सत्त्वमेजय-सिंहाऽऽढ्यान् स्तनं-धय-सम-त्विषौ ॥
कथं नाडिंधमान् मार्गानागतौ विषमोपलान्. ॥९४॥

सत्त्वमित्यादि—युवामिमान् मार्गानागतौ । सत्त्वमेजयसिंहाढ्यान् । सत्त्व-मेजयन्ति ये सिंहाः । '२९४१। एजेः खश् ।३।२।२८।' । '२९४२। अरुर्द्विषत् —।६।३।६७।' इति मुम् । तैराढ्यान् व्याप्तान् । सिंहग्रहणं तद्वद्धिंस्रोपलक्षणार्थ-म् । हिनस्तीति सिंहः । पृषोदरादित्वाद्वर्णविपर्ययः । नाडिन्धमानिति । उच्चनी-चाधिरोहणात् मुहुर्मुहुर्निःश्वासैर्नाडिं धमन्तीति '२९४५। नाडी-मुष्ट्योश्च ।३।२ ।३०।' इति खश् । '२९४३। खित्यनव्ययस्य ।६।३।६६।' इति ह्रस्वः । विषमोप-लान् उच्चतपाषाणयुक्तान् । स्तनन्धयसमत्विषौ बालवत्सुकुमारौ । सामर्थ्यं पुन-र्युवयोरचिन्त्यम् । स्तनं धयतः पिबतः । '२९४४। नासिका-स्तनयोः—।३।२।२९।- इति खश् । '२९४२। अरुर्द्विषद्—।६।३।६७।' इति मुम् ॥

२८६—उत्तीर्णौ वा कथं भीमाः सरितः कूलमुद्वहाः, ॥
आसादितौ कथं व्रातं न गजैः कूलमुद्रुजैः. ॥ ९५ ॥

उत्तीर्णावित्यादि—कथं वा केनोपायेन युवां सरितो नदीरुत्तीर्णौ । भीमा-

---

१ १११५ उच-प्रांशूव्रत तुङ्गे इति ना० म० ।

ऽऽलकरीः यतः कूलमुद्वहाः कूलमापूर्य वहन्त्यः। '२९४६। उदि कूले-।३।२।-३१।' इति खश्। गजैः कूलमुद्रुजैः कूलं भिन्दद्भिः कथं नासादितौ न व्यापादितौ इति भूतं कथयतम् ॥

२८७—रामो ऽवोचद्धनूमन्तम्
'आवामभ्रं-लिहं गिरिम् ॥
ऐव विद्वन्! पितुः कामात्[1]
पान्तावल्पं-पचान् मुनीन्. ॥ ९६ ॥

राम इत्यादि—हनुर्वदनैकदेशः स निन्दितो ऽस्यास्तीति निन्दायां मतुप्। '३५३९। अन्येषामपि दृश्यते ।६।३।१३७।' इति दीर्घः। 'हनूमान् हनुमानपि' इति विश्वदर्शनात्। तस्य किल जातमात्रस्य आदित्यरथं गृह्णतो हनुद्वयं भग्नमिति श्रूयते। तं रामो ऽवोचत् उक्तवान्। तत् किमित्याह—हे विद्वन्, यदमुं गिरिमावामैव आगतौ तत् पितुः कामादभिप्रायात्। आङ्पूर्वादिणो लङि रूपम्। अभ्रंलिहमुच्चैस्तरम्। अभ्रं लेढीति '२९४७। वहाभ्रे लिहः ।३।२।३२।' इति खश्। किं कुर्वाणौ पान्तौ रक्षन्तौ। मुनीन् अल्पम्पचान् अल्पसन्तुष्टान्। अल्पं पचन्तीति '२९४९। मितनखे च ।३।२।३४।' इति मितेत्यर्थग्रहणात् खश्। चकारस्यानुक्तसमुच्चयार्थत्वाद्वा ॥

कः पुनः पिता यदादेशादागताविव्यत आह—

२८८—अ-मितं-पचमीशानं सर्व-भोगीणमुत्तमम् ॥
आवयोः पितरं विद्धि ख्यातं दशरथं भुवि. ॥९७॥

अमितम्पचमित्यादि—आवयोः पितरं दशरथनामानं भुवि विख्यातं विद्धि जानीहि। '२४२५ हु-झल्भ्यो हेर्धिः ।६।४।१०१।' अमितम्पचं महासत्रिणं पूर्ववत् खश् मुम् च। ततो नञ्समासः। ईशानमीशनशीलं स्वामिनमित्यर्थः। '३१०९। ताच्छील्य–।३।२।१२९।' इत्यादिना चानश्। सर्वभोगीणं सर्वसत्वभोगाय हितम्। '१६७०। आत्मन्-विश्वजन-।५।१।९।' इति खः। भोगशब्दो ऽत्र शरीरवाची। '१९७। अट्-कुप्वाङ्–।८।४।२।' इत्यादिना णत्वम्।

यदि पितुरादेशादागतौ किमत्र गमनेनान्वेषयथ इत्याह—

२८९—छलेन दयिता ऽरण्याद् रक्षसा ऽरुं-तुदेन नः ॥
अ-सूर्यं-पश्यया मूर्त्या हृता, तां मृगयावहे.' ॥९८॥

छलेनेत्यादि—नो ऽस्माकं दयिता अरण्याद्राक्षसेन हृता। कीदृशेन। अरुन्तुदेन मर्मस्पृशा। '२९५०। विध्वरुषोस्तुदः ।३।२।३५।' इति खश्। मुम्। असूर्यम्पश्यया आदित्यगोप्यया मूर्त्या शरीरेणोपलक्षिता। '२९४१। असूर्य-ल-

[1]—'१४४६। इच्छामनोभवौ **कामौ**।' इति ना० अ०।

लटयोः—।३।२।२६।' इति खश्। तां हर्तां मृगयावहे गवेषयावः। '२०४६। मृग अन्वेषणे' स्वार्थिकण्यन्तः। युवयोः पौरुषान्वितत्वात् कथं हृतेत्याह—छलेन छद्मना॥

त्वं पुनः कस्य चेत्यत आह—

३९०—प्रत्यूचे मारुती रामम्—'अस्ति वालीति वानरः॥
शमयेदपि संग्रामे यो ललाटं-तपं रविम्.॥९९॥

प्रत्यूच इत्यादि—रामं मारुतिः प्रत्यूचे प्रत्युक्तवान्। अस्ति वालीति नाम्ना कपीश्वरः यः संग्रामे युद्धे ललाटन्तपं सर्वेषामुपरि वर्तमानं रविं पूर्ववत् खश्। शमयेत् पराजयेदिति सम्भावने लिङ्। वालिशब्दो नान्तः इदन्तश्च। तथा च 'वाली वालिश्च कथ्यते' इति शब्दभेदः॥

३९१—उग्रं-पश्येन सुग्रीवस् तेन भ्राता निराकृतः,॥
तस्य मित्रीयतो दूतः संप्राप्तो ऽस्मि वशं-वदः, १००

उग्रम्पश्येनेत्यादि—तेन भ्राता उग्रम्पश्यता पापं विजानता।'२९५२। उग्रम्पश्य—।३।२।३७।' इत्यादिना निपातितम्। यश्च सुग्रीवो निराकृतोऽभिभूतस्तस्य हि दूतः प्राप्तो ऽस्मि। वशंवदः। वशमनुकूलं वदतीति वशंवदः। '२९३५। प्रिय-वशे वदः खच्।३।२।३८।' कीदृशस्य मित्रीयतो मित्रमिच्छतः। '२६५७। सुप आत्मनः क्यच्।३।१।८।'॥

किं तेन सख्येति चेदाह—

३९२—प्रियं-वदो ऽपि नैवाऽहं ब्रुवे मिथ्या[1] परं-तप !,॥
सख्या तेन दश-ग्रीवं निहन्तासि द्विषं-तपम्.॥१०१॥

प्रियंवद इत्यादि—प्रियंवदतया लोको मिथ्या वदति अहं प्रियंवदोऽपि नैव मिथ्या ब्रुवे वदामि। पूर्ववत् खच्। परन्तप शत्रूणामुपतापयितः।२९५४। द्विषत्-परयोः—।३।२।३९।' इति खच्। तेन सुग्रीवेण सख्या मित्रेण दशग्रीवं निहन्तासि हनिष्यसि। हन्तेर्लुटि रूपम्। कीदृशं द्विषन्तपम् शत्रूणामुपतापयितारम्। पूर्ववत् खच्॥

३९३—वाचं-यमो[2]ऽहमनृते सत्यमेतद् ब्रवीमि ते,॥
एहि, सर्वं-सहं मित्रं सुग्रीवं कुरु वानरम्.'॥१०२॥

वाचंयम इत्यादि—'२९५७। वाचंयम-पुरन्दरौ च।६।३।६९।' इति मुमागमो निपात्यते। तस्मात् सत्यमेतत् पूर्वोक्तम्। ब्रवीमि ते तुभ्यम्। तादर्थ्ये

१—'१३८। सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्। प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः॥' मनुस्मृतिः अ० ४। इति मर्म जानन्नाह—'नैवाऽहं ब्रुवे मिथ्या' इत्यादि। २—'७४९। तपस्वी तापसः पारिकाङ्क्षी **वाचं-यमो** मुनिः।' इति ना० म०

चतुर्थी । यत एवं तस्मादेहि आगच्छ । सुग्रीवं वानरं मित्रं कुरु । कीदृशं सर्वंसहं सर्वं सहत इति '२९५८। पूःसर्वयोः—।३।२।४१।' इति खच् ॥

२९४—सर्वं-कष-यशः-शाखं राम-कल्प-तरुं कपिः ॥

आदायाऽभ्रं-कषं प्रायान् मलयं फल-शालिनम् .१०३

सर्वङ्कषेत्यादि—रामः कल्पतरुरिव यस्तमादाय गृहीत्वा कपिः प्रायात् गतः । कीदृशं रामम् सर्वङ्कषयशःशाखं सर्वं कषन्ति व्याप्नुवन्ति यानि यशांसि । '२९५९। सर्व-कूल-।३।२।४२।' इत्यादिना खच् । तान्येव शाखा यस्य । फलशालिनमभिमतफलसम्पादनात । अभ्रङ्कषमुच्चैस्तरं मलयम् । पूर्ववत् खच् ॥

२९५—मेघं-करमिवाऽऽयान्तमृतुं रामं क्लमान्वितः ॥

दृष्ट्वा मेने न सुग्रीवो वालि-भानुं भयं-करम् . ॥१०४

मेघङ्करमित्यादि—राममायान्तं दृष्ट्वा । सुग्रीवो वालिनं भानुमिव भयंकरं भीतिजनकं न मेने न बुद्धवान् ।'२९६०। मेघर्त्ति—। ३।२।४३।' इत्यादिना खच् । क्लमान्वितो ग्लानो वालिभानुना पीडितत्वात् । कीदृशं रामम् । मेघङ्करं ऋतुमिव प्रावृट्कालमिव । पूर्ववत् खच् ॥

२९६—उपाऽग्न्यकुरुतां सख्यमन्योन्यस्य प्रियं-करौ, ॥

क्षेमं-कराणि कार्याणि पर्यालोचयतां ततः. ॥१०५॥

उपाग्नीत्यादि—उपाग्नि अग्निसमीपे रामसुग्रीवौ सख्यमकुरुतां 'इतःप्रभृत्यावयोः सख्यम्' इति । अन्योन्यस्य प्रियङ्करौ । '२९६१। क्षेम-प्रियमद्रेऽण्च ।३।२।४४।' इति चकारात् । ततः सख्यकरणानन्तरं क्षेमङ्कराणि । हितजनकानि यथास्वं कार्याणि प्रत्यालोचयतां निरूपितवन्तावित्यर्थः । पटपुटेत्यत्र चुरादिकाण्डे धातौ लोचृ पठ्यते तस्य लङि रूपम् ॥

२९७—आशितं-भवमुत्कुष्टं वल्गितं शयितं स्थितम् ॥

बह्वमन्यत काकुत्स्थः कपीनां स्वेच्छया कृतम् . १०६

आशितम्भवमित्यादि—आशितम्भवमशनम् । '२९६२। आशिते भुवः करण-भावयोः ।३।२।४५।' इति खच् । उत्कुष्टं किलकिलायितम् । वल्गितं धावनम् । तथा शयितं स्थितं च कपीनां स्वेच्छया कृतं एतत्काकुत्स्थो बह्वमन्यत श्लाघितवान् । पुण्यभाज इमे यदेषां स्वेच्छाविहारिणां चेष्टितं, अस्माकं तु शोकसन्तप्तानां न किंचिदस्तीति । सर्वत्र भावे निष्ठा ॥

२९८—ततो वलिं-दम-प्रख्यं कपि-विश्वं-भराऽधिपम् ॥

सुग्रीवः प्राब्रवीद् रामं वालिनो युधि विक्रमम् .१०७

तत इत्यादि—ततः कार्यालोचनानन्तरं सुग्रीवोऽब्रवीत् । लङि '२४५२। ब्रुव ईट ।७।३।९३।' किमुक्तवान् । वालिनो युधि विक्रमं शौर्यमिति प्रधानं कर्म

राममित्यकथितम् । कीदृशं रामम् बलिन्दमप्रख्यं विष्णुतुल्यम् । बलिं दमयतीति '२९६३। संज्ञायां भृ-तृ-वृजि—।३।२।४६।' इत्यादिना खच् । अमन्तस्य मित्वह्रस्वत्वे । तथा विश्वं बिभर्तीति विश्वम्भरा तस्या अधिपं अधिपातीत्यधिपः। '२८९८। आतश्चोपसर्गे—।३।१।१३६।' इति कः ॥

३९९—'वसुं-धरायां कृत्स्नायां नाऽस्ति वालि-समो बली, ॥
हृदयं-गममेतत् त्वां ब्रवीमि, न पराभवम्. ॥१०८॥

वसुन्धरायामित्यादि—वसुन्धरायां पूर्ववत् खच् । वालिना समोऽन्यो बली बलयुक्तो नास्तीति हृदयङ्गमं मम । स्वानुभवं हि वस्तु हृदयङ्गममित्युच्यते । तेन संज्ञायामित्यधिकृत्य '२९६४। गमश्च ।३।२।४७।' इति खच् । न पुनस्त्वां पराभवमभिभवं ब्रवीमि ॥

इति खजधिकारः ।

एवंपराक्रमो ऽसौ तत्र किं त्वं करिष्यसीत्याह—

४००—दूर-गैरन्त-गैर् बाणैर् भवानत्यन्त-गः श्रियः ॥
अपि संक्रन्दनस्य स्यात् क्रुद्धः, किमुत वालिनः१०९

दूरगैरित्यादि—यतो भवान् क्रुद्धः सन् संक्रन्दनस्यापि शक्रस्यापि । '२८९६। नन्दि ग्रहि ।३।१।१३४।' इत्यादिना ल्युः । बाणैः करणभूतैः । दूरगैः दूरं गच्छन्तीति । अन्तगैः कार्यसमापकैः । '२९६५। अन्तात्यन्त—।३।२।४८।' इत्यादिना डः । श्रियो लक्ष्म्याः अत्यन्तगः विनाशयिता स्यात् । अत्यन्तं पर्यवसानं गच्छतीति । किं पुनर्वालिनो लक्ष्म्या अत्यन्तगो भवान्विनाशयितेति ॥

४०१—वरेण तु मुनेर् वाली संजातो दस्युहो रणे ॥
अ-वार्य-प्रसरः प्रातरुद्यन्निव तमोऽपहः ॥११०॥

वरेणेत्यादि—मुनेस्तु वरेण दस्युहः दस्यून् शत्रून् वध्यादिति । '२९६६। आशिषि हनः ।३।२।४९।' डः । अतो रणे अवार्यप्रसरोऽनभिभवनीयगतिः सञ्जातः । क इव तमोऽपह इव तमोऽपहः आदित्यः । तमोऽपहन्तीति । '२९६७। अपे क्लेशतमसोः ।३।२।५०।' इति डः । प्रातः प्रभाते उद्यन् उद्गच्छन् । उत्पूर्वादिणः शतरि इणो यण् । अवार्यप्रसरस्तद्वदसावपि । सर्वं वाक्यं सावधारणं भवतीति प्रातरप्युद्यन्नवार्यप्रसर एवेति तेन सर्वकाले अस्यावार्यप्रसरत्वं सिद्धं न तु प्रातरेवोद्यन्नवार्यप्रसर इति ॥

१—'५० । **संक्रन्दनो** दुश्च्यवनस् तुराषाण् मेघवाहनः । आखण्डलः सहस्राक्ष ऋभुक्षाः ।' २—'७७६। रिपौ वैरि-सपत्नाऽरि,द्विषद्-द्वेषण-दुर्हृदः । द्विड्विपक्षाऽहिता—ऽमित्र-**दस्यु**-शात्रव शत्रवः ॥' ३—'१४४९ । राहौ **ध्वान्ते** गुणे **तमः**।'इति सर्वत्र ना०अ० । तमःशब्दार्थालयः—'तमः करि-हरिं सोमं प्रपीड्य कुरुते तमः । चकोराद स-तमस्-कान् यद् तद् युक्तं तमसोऽस्य वै ॥' इति कोशावतंसः । १—तमोऽन्धकारः ।

२—तमो राहु ३—तमो गुण ४ शोकयुक्तानित्यर्थ

४०२—अतिप्रियत्वान् न हि मे कातरं प्रतिपद्यते ॥
चेतो वालि-वधं राम ! क्लेशापहमुपस्थितम्. ॥१११॥

अतीत्यादि—हे राम ! मदीयं चेतो वालिवधं कर्मीभूतमुपस्थितं प्राप्तं न हि प्रतिपद्यते नैव प्रत्येति । यस्मात् कातरं व्याकुलम् । वालिनोऽतिबलयुक्तत्वात् । कीदृशं वधं । क्लेशापहम् दुःखस्योन्मूलकम् । पूर्ववद्डः । अतिप्रियत्वाद्वालिवधस्य । यस्य हि यत्प्रियं तत्सिद्धमपि असौ न प्रत्येति ॥

इति डाधिकारः ॥

उपस्थितो ऽस्य वध इति कथं ज्ञायत इत्याह—

४०३—शीर्ष-घातिनमायातमरीणां त्वां विलोकयन् ॥
पतिघ्नी-लक्षणोपेतां मन्येऽहं वालिनः श्रियम्. ११२

शीर्षेत्यादि—अरीणां शीर्षघातिनम् । '२९६८। कुमार-शीर्षयोर्णिनिः ।३।२।५१।' इति निपातनात् शिरसः शीर्षभावः । आयातं विलोकयन् वालिनः श्रियं पतिघ्नीलक्षणोपेतामहं मन्ये । पतिं हन्ति यल्लक्षणं तेनोपेतामिवेतीवार्थोऽत्र द्रष्टव्यः । '२९७०। अमनुष्यकर्तृके च ।३।२।५३।' इति टक् । '२३६३। गमहन— ।६।४।९८।' इत्युपधालोपः । '३५८। हो हन्तेः—।७।३।५४।' इति कुत्वम् ॥

४०४—शत्रुघ्नान् युधि हस्तिघ्नो
गिरीन् क्षिप्यन्न-कृत्रिमान् ॥
शिल्पिभिः पाणिघैः क्रुद्धस्
त्वया जय्यो ऽभ्युपाय-वान्. ॥ ११३ ॥

शत्रुघ्नानित्यादि—किञ्च युधि संग्रामे वाली त्वया जय्यः शक्यो जेतुं यदि युष्मदस्त्राणां शक्तिर्दृष्टा तां च द्रष्टुमिच्छामीति वक्ष्यमाणाभिप्रायः । '६५। क्षय्यजय्यौ शक्यार्थे ।६।१।८१।' इत्ययादेशनिपातनम् । कीदृशः अभ्युपायवान् युद्धोपाययुक्तः । किं कुर्वन् क्रुद्धः क्षिप्यन् गिरीन् । दिवादित्वाच्छ्यन् । अकृत्रिमान् देवनिर्मितान् । शत्रुघ्नान् शत्रून् हन्तीति । '२९७०। अमनुष्य—।३।२।५३।' इति टक् । हस्तिघ्न इव हस्तिघ्नः हन्तुं शक्तः । '२९७१। शक्तौ हस्ति-कपाटयोः ३।२।५४।' इति सूत्रस्य मनुष्यकर्तृकार्थारम्भकत्वात् । वाली चामनुष्यः । शिल्पिभिर्युद्धकुशलैः वानरैः सह क्षिप्यन् । सहार्थस्य गम्यमानत्वात् सहयोगे तृतीया । पाणिघैः पाणिवादकैः । ते हि हस्तियुद्धेऽन्यस्य वाद्यस्यासंभवात् हस्तिमुखमेव वादयित्वा गिरीन् प्रहरणान् क्षिप्यन्ति । '२९७२। पाणिघ-ताडघौ शिल्पिनि ।३।२।५५।' इति कर्तरि निपातनम् ॥

४०५—आढ्यं-करण-विक्रान्तो महिषस्य सुरद्विषः ॥
प्रियं-करणमिन्द्रस्य दुष्करं कृतवान् वधम्. ॥११४॥

आढ्यमित्यादि—अनाढ्यमाढ्यं करोत्यनेनेति । '२९७२। आढ्य-सुभग—।३।२।५६।' इत्यादिना करणे ख्युन् । आढ्यङ्करणं विक्रान्तं यस्य वालिनः । अनाढ्यः सन् विक्रान्तेनाढ्यो भूत इत्यर्थः । महिषस्य सुरद्विषो दुन्दुभेर्वधं मरणं यः कृतवान् दुष्करं कृच्छ्रसाध्यं प्रियङ्करणमिन्द्रस्य तुष्टिकरम् । अप्रियं प्रियं करोत्यनेनेति पूर्ववत् ख्युन् ॥

४०६—प्रियं-भावुकतां यातस् तं क्षिपन् योजनं मृतम् ॥
स्वर्गे प्रियं-भविष्णुश् च कृत्स्नं शक्तो ऽप्यबाधयन्, '॥

प्रियमित्यादि—तमेवं सुरद्विषं मृतं पादाङ्गुष्ठेन योजनमध्वानं क्षिपन् प्रेरयन् । क्षिपेस्तौदादिकस्योभयपदिनो रूपम् । प्रियम्भावुकतां यातस्तथा स्वर्गे प्रियम्भविष्णुश्चासीत् । '२९७४। कर्तरि भुवः—।३।२।५७। इत्यनेनाढ्यादिषूपपदेषु खिष्णुच्खुकञौ । शक्तो ऽपि समर्थो ऽपि कृत्स्नं लोकमित्यर्थात् । अबाधयन् अपीडयन् । '१६५१। बध संयमे' इति चौरादिकः तस्य शतरि रूपम् । स ईदृशस्त्वया शक्यो जेतुं यदित्वदस्त्राणां सामर्थ्यं दृष्टमित्यभिप्रायेणाब्रवीत् सुग्रीवः॥

रामोऽपि तदभिप्रायं विदन् यत् कृतवान् तदाह—

४०७—जिज्ञासोः शक्तिमस्त्राणां रामो न्यून-धियः कपेः ॥
अभिनत् प्रतिपत्त्यर्थं सप्त व्योम-स्पृशस् तरून्. ॥

जिज्ञासोरित्यादि—अस्त्राणां शराणां शक्तिं जिज्ञासोः ज्ञातुमिच्छोः कपेः सुग्रीवस्य न्यूनधियः स्वल्पबुद्धेः । यतः प्रमाणान्तरेणापरिज्ञानात् प्रत्यक्षेण ज्ञातुमिच्छतीति प्रतिपत्त्यर्थं संप्रत्ययार्थं रामः सप्त तरून् तालान् पङ्क्त्या स्थितान् एकेन शरेणाभिनत् व्योमस्पृशः । '४३२। स्पृशोऽनुदके क्विन् ।३।२।५८।' ॥

४०८—ततो वालि-पशौ वध्ये राम-र्त्विग्-जित-साध्वसः ॥
अभ्यभून् निलयं भ्रातुः सुग्रीवो निनदन् दधृक्. ॥

तत इत्यादि—ततस्तरुभेदादनन्तरं सुग्रीवो भ्रातुर्निलयमभ्यभूत् अभिभूतवान् । कीदृशः दधृक् धृष्टः । '३७३। ऋत्विग्—।३।२।५९।' इत्यादिना निपातितम् धृषेः क्विन् । द्विर्वचनम् ।'३७७। क्विन्प्रत्ययस्य कुः ।८।२।६२।' इति कुत्वं खकारः चर्त्वं ककारः । यस्माद्वालिनि पशाविव वध्ये वधार्हे । रामेण ऋत्विजा याजकेन जितसाध्वसः अपनीतसाध्वसः तस्माद्दधृक् । ऋतौ यजति ऋतुं वा यजति ऋतुप्रयुक्तो वा यजतीति ऋतुपूर्वाद्यजेः क्विन् । यजादित्वात् सम्प्रसारणम् । इदमृत्विक्शब्दनिर्वचनम् । रूढितस्तु याजयितृषु ब्राह्मणेषु क्विन्प्रत्ययस्य कुः । निनदन् किलकिलाशब्दं कुर्वन् ॥

४०९—गुहाया निरगाद् वाली सिंहो मृगमिव द्युवन् ॥
भ्रातरं युङ् भियः संख्ये घोषेणाऽऽपूरयन् दिशः ॥

गुहाया इत्यादि तस्य गुहस्य मित्याद्वाली निर्गत ।

'२४५८। इणो गा लुङि ।२।४।४५'। '२२२३। गाति-स्था-।२।४।७७।' इति सिचो लुक्। आतरं द्युवन् अभिगच्छन्। '१११३। द्यु अभिगमने' अस्यादादिकस्य वर्तमानसामीप्ये लटः शतरि उवङादेशे रूपम्। संख्ये युद्धे। भियो यञ्ज भीतेर्योक्ता कर्मणि षष्ठी। भीतिं युञ्जन्नित्यर्थः। यजेः पूर्ववत् क्विन् '२७६। युजेरसमासे ।७।१।७१।' इति नुम्। संयोगान्तलोपः। क्विन्प्रत्ययस्य कुः। ङकारः। कः कमिव। सिंहो मृगमिव द्युवन्। घोषेण दिशः आपूरयन्। दिशन्ति इति दिशः पूर्ववत् क्विन् ॥

४१०—व्यायच्छमानयोर् मूढो भेदे सदृशयोस् तयोः ॥
बाणमुद्यतमायंसीदिक्ष्वाकु-कुल-नन्दनः. ॥ ११९ ॥

व्यायच्छेत्यादि—तयोर्वालिसुग्रीवयोर्व्यायच्छमानयोः कलहायमानयोः सदृशयोः समानयोः भेदे पृथक्त्वे मूढो भ्रान्तः सन् इक्ष्वाकुकुलनन्दनो रामो बाणमुद्यतं सज्जीकृतमायंसीत् उपसंहृतवान्। '२७४२। समुदाङ्भ्यो यमो ग्रन्थे ।१।३।७५।' इति तङ् न भवति। अकर्त्रभिप्रायत्वात्। तत्र 'कर्त्रभिप्राये' इति वर्तते। '२६९५। आङो यमहनः ।१।३।२८।' इत्यनेनापि न स्यात् सकर्मकत्वात् तत्र 'अकर्मकात्' इति वर्तते। समानपूर्वस्य दृशेः 'समानान्ययोश्च' इत्युपसंख्यानात् '४२९। त्यदादिषु-।३।२।६०।' इत्यादिना कञ्। '१०१७। दृग्-दृश्-वतुषु ।६।३।८९।' इति समानस्य सभावः ॥

४११—ऋष्यमूकमगात् क्रान्तः
कपिर् मृग-सदृग् द्रुतम् ॥
किष्किन्धाऽद्रिसदाऽऽत्यर्थं
निष्पिष्टः कोष्णमुच्छ्वसन्. ॥ १२० ॥

ऋष्यमूकमित्यादि—कपिः सुग्रीवः किष्किन्धाद्रिसदा वालिना किं किं दधातीति किष्किन्धा गुहा। '२९१५। आतो ऽनुपसर्गे कः ।३।२।३।' पारस्करादिदर्शनात् पूर्वस्य सुडागमो मलोपः षत्वं च निपात्यते। तदुपलक्षितोऽद्रिः किष्किन्धाद्रिः। तत्र सीदतीति '२९७५। सत्सूद्विष-।३।२।६१।' इत्यादिना क्विप्। तेनात्यर्थं निष्पिष्टः पीडितः। निष्पिष्टत्वात् क्रान्तः सन् ऋष्यमूकं मृगसदृक् द्रुतमगात्। समानोपपदात् दृशेः पूर्ववत्। क्विन्। कोष्णमीषदुष्णमुच्छ्वसन्। '१०३३। कवं चोष्णे।६।३।१०७।' इति चकारात् कोः कादेशः ॥

४१२—कृत्वा वालि-द्रुहं रामो मालया स-विशेषणम्. ॥
अङ्गद-स्वं पुनर् हन्तुं कपिघ्नाऽऽह्वाययद् रणे. १२१

कृत्वेत्यादि—वालिद्रुहं सुग्रीवम्। वालिनं द्रुह्यतीति '२९७५। सत्सू-।३।२।६१।' इत्यादिना क्विप् मालया सविशेषणं सचिह्नं कृत्वा भेदपरिज्ञानार्थं रामः अङ्गदस्वं वालिनम्। अङ्गदं सूत इति पूर्ववत् क्विन्। '२८१। ओः सुपि

।६।४।८२।' इति यणादेशः । तं रणे हन्तुं कपिना सुग्रीवेणाह्वाययत् अभिभवं कारितवान् । ह्वयतेर्हेतुमण्णिचि '२५८५। शा-च्छा ।७।३।३७।' इत्यादिना युक् ॥

४१३—तयोर् वानर-सेनान्योः संप्रहारे तनुच्छिदम् ॥

वालिनो दूर-भाग् रामो बाणं प्राणाऽदमत्यजत् १२२

तयोरित्यादि—वानरसेनान्योः वानरस्वामिनोः '२७२। एरनेकाचः ।६।४।८२।' इति यण् । संप्रहारे युद्धे प्रवृत्ते रामो बाणमत्यजत् । वालिनस्तनुच्छिदं तनुं शरीरं छिनत्तीति पूर्ववत् क्विप् '१४६। छे च ।६।१।७३।' इति तुक् । प्राणादं प्राणापहारिणम् । प्राणानत्तीति प्राणादम् । '२९७७। अदो ऽनन्ने ।३।२।६८।' इति विट् । दूरभाक् दूरमवस्थितो रामो दूरं भजत इति २९७६। भजो ण्विः ।३।२।६२।' ॥

४१४—वालिनं पतितं दृष्ट्वा वानरा रिपु-घातिनम् ॥

बान्धवाऽऽक्रोशिनो भेजुरनाथाः ककुभो दश. १२३

वालिनमित्यादि—रिपुघातिनं रिपून् हन्तुं शीलमस्येति '२९८८। सुप्यजातौ णिनिः—।३।२।७८।' तं वालिनं पतितं दृष्ट्वा वानरा दश ककुभो दश दिशो भेजुः । अनाथाः सन्तः स्वामिनो हतत्वात् । बान्धवाक्रोशिनो बान्धव इव आक्रोशन्तीति '२९८९। कर्तर्युपमाने ।३।२।७९॥' इति णिनिः ॥

४१५—धिग् दाशरथिमित्यूचुर्
मुनयो वन-वर्तिनः. ॥
उपेयुरु मधु-पायिन्यः
क्रोशन्त्यस् तं कपि-स्त्रियः. ॥ १२४ ॥

धिगित्यादि—येषां सत्यन्यस्थाने वृत्तौ च वन एव वर्तितुं शास्त्रतो नियमः ते वनवर्तिनो मुनयः ।'२९९०। व्रते ।३।२।८०।' इति णिनिः । धिगिमं दाशरथिमित्यूचुः उक्तवन्तः । येनानपराधे ऽपि वालिनीदृशं कृतमिति । कपिस्त्रियश्च वालिनमुपेयुः मधुपायिन्यः । आभीक्ष्ण्येन मधु पिबन्त्यः। '२९९१। बहुलमाभीक्ष्ण्ये ।३।२।८१।' इति णिनिः । क्रोशन्त्यः 'हा नाथ !' इति रुदन्त्यः ॥

४१६—राममुच्चैरुपालब्ध शूर-मानी कपि-प्रभुः ॥

व्रण-वेदनया ग्लायन् साधुं-मन्यम-साधुवत्. ॥१२५॥

राममित्यादि—कपिप्रभुर्वाली राममुच्चैर्महता शब्देनोपालब्ध उपालब्धवान् । लभिरात्मनेपद्यनिट् । तस्य लुङि '२२८१। झलो झलि ।८।२।२६।' इति सिचो लोपः । '२२८०। झषस्तथोर्धोऽधः ।८।२।४०।' ।'५२। झलां जश् झशि ।८।४।५३।' । शूरमानी शूरमात्मानं मन्यमानः ।२९९३। आत्ममाने खश्च ।३।

१ ८२ दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः इति ना० अ०।

२।८३।' इति चकाराण्णिनिः। व्रणवेदनया ग्लायन् ग्लानिमुपगच्छन्। साधुम्मन्यं साधुमात्मानं मन्यमानं रामम्। तेनैव खश्। तस्मिन् सार्वधातुके परतो दिवादित्वात् श्यन्। पूर्वपदस्य मुम्। असाधुवदसाधुमिव। असाधुना तुल्यं वर्तते इति वतिः॥

४१७—'मृषा ऽसि त्वं हविर्-याजी राघव! छद्म-तापसः॥
अन्य-व्यासक्त-घातित्वाद् ब्रह्मघ्नां पाप-संमितः. १२६

मृषेत्यादि—हे राघव! त्वं छद्मना तापसः स त्वं मृषैव मिथ्यैव हविर्याजी हविषा करणेनेष्टवानसि न लोकग्रासय इत्यभिप्रायः। २९९६। करणे यजः।३।२।८५।' इति भूते णिनिः॥ इतः प्रभृति भूत इत्यधिक्रियते। यतो ब्रह्मघ्नां पापसंमितः ब्रह्म हतवन्त इति '२९९८। ब्रह्म—।३।२।८७।' इत्यादिना क्विप्। तेषां पापेन तुल्यः। कुतः। अन्यव्यासक्तघातित्वात् अन्यस्मिन् सुग्रीवे व्यासक्तं मां हतवान्। '२९९७। कर्मणि हनः।३।२।८६।' इति णिनिः। तत्र 'कुत्सितग्रहणं कर्तव्यम्' इत्युक्तम्। यदि सुग्रीवेण मम विरोधः किं तवायातमिति कुत्सितहननम्॥

तदेव दर्शयन्नाह—

४१८—पाप-कृत् सुकृतां मध्ये राज्ञः पुण्यकृतः सुतः॥
मामपापं दुराचार! किं निहत्या ऽभिधास्यसि. १२७

पापकृदित्यादि—हे दुराचार! मामपापं निहत्य पापकृत् कृतकिल्बिषः राज्ञो दशरथस्य पुण्यकृतः सुतः सुकृतां मध्ये किमभिधास्यसि वक्ष्यसि। किं क्षेपे। नकिंचिदभिधातव्यमस्तीति भावः। सर्वत्र '२९९९।सुकर्म-पाप—।३।२।८९।' इत्यादिना क्विप्॥

४१९—अग्नि-चित् सोम-सुद् राजा रथ-चक्र-चिदाऽऽदिषु॥
अनलेष्विष्टवान् कस्मान् न त्वया ऽपेक्षितः पिता. ॥

अग्निचिदित्यादि—कस्मात्त्वया पिता नापेक्षितः नानुवृत्तः। येनैवं कृतवानसीति। कीदृशः अग्निचित् आहिताग्निः। अग्निं चितवानिति '३००१। अग्नौ चेः।३।२।९१।' इति क्विप्। सोमसुत् सोमं सुतवान् सोमयाजी। '३०००। सोमे सुञः।३।२।९०।' इति क्विप्। अनलेषु अग्निषु इष्टवान्। रथचक्रचिदादिषु रथचक्रवच्चीयत इति '३००२। कर्मण्यग्न्याख्यायाम्।३।२।९२।' इति क्विप्। आ-

---

१—'१४८०। मृषा मिथ्या च वितथे।' इति ना० अ०। २—'९० न कूटैरायुधैर् हन्याद् युध्यमानो रणे रिपून्। न कर्णिभिर् नापि दग्धैर् नाग्नि-ज्वलित-तेजनैः॥' '१०४ अमाययैव वर्तेत न कथंचन मायया।' मनुस्मृतिः अ० ७। इत्यादिराजधर्मान् स्मारयन्नाह—'छद्मतापसः' इति। '२३० कपटोऽस्त्री व्याज-दम्भोपधयश् छद्म-कैतवे।' ३—'७१७। चितवानग्निमग्नि-चित्।' इति ना० अ०।

दिशब्दग्रहणाच्चयेनचिदादिग्रहणम् । अस्यार्थो हि तदाकार इष्टकाचय इत्युच्यते तद्वारेणाग्निरपि ॥

४२०—मांस-विक्रयिणः कर्म व्याधस्याऽपि विगर्हितम् ॥
मां घ्नता भवताऽकारि निःशङ्कं पाप-दृश्वना. १२९

मांसेत्यादि—मांसविक्रयिणः कुत्सितकर्मकारिणो व्याधस्यापि विगर्हितं निन्दितम् । '२००३। कर्मणीनिविक्रियः ।३।२।९३।' इति इनिः । तत्र 'कुत्सितग्रहणं कर्तव्यम्' इत्युक्तम् । निकृष्टकर्मकरणेनेति यन्नवता पापदृश्वना पापं दृष्टवता । '३००४। दृशेः क्वनिप् । ३।२।९४।, । '३५५। न संयोगाद्वमन्तात् ।६।४।१३७।' इति अल्लोपप्रतिषेधः । कर्म अकारि कृतम् । कर्मणि लुङ् । निःशङ्कं शङ्कां त्यक्त्वा । किं कुर्वता मां घ्नता मारयता । हन्तेः शतरि '२३६३। गमहन—।६।४।९८।' इत्युपधालोपः । '३५८। हो हन्तेः—।७।३।५४।' इति कुत्वम् ॥

४२१—बुद्धिपूर्वं ध्रुवन् न त्वा राज-कृत्वा पिता खलम् ॥
सहयुध्वानमन्येन यो ऽहिनो मामनागसम् ॥१३०॥

बुद्धिपूर्वमित्यादि—त्वत्पिता त्वां खलं असाधुचरितं ध्रुवन् गच्छन् '१४९२। ध्रु गतिस्थैर्ययोः' इति तुदादौ पठ्यते । तस्य गतौ ज्ञानार्थे वर्तमानस्य शतरि विकरणलोपे उवङादेशे रूपम् । यत्र राजकृत्वा । कस्य तदेत्यर्थात् । '२००५ राजनि युधि कृञः ।३।२।९५।' इति क्वनिप् । तत्तस्य बुद्धिपूर्वम् ध्रुवमवश्यं तस्येति व्याख्याने कृद्योगे कर्मणि षष्ठ्या भवितव्यम् । यस्त्वं मामनागसमपापमन्येन सहयुध्वानं अन्येन सुग्रीवेण सह योद्धुं प्रवृत्तम् । '२००६। सहे च ।३।२।९६।' इति क्वनिप् । अहिनः हिंसितवान् । हिंसेर्लङि मध्यमपुरुषैकवचने श्नमि श्नसोरल्लोपे हल्ङ्यादिलोपे रुत्वे च रूपम् ॥

मांसार्थं हत इति चेदाह—

४२२—पञ्च पञ्चनखा भक्ष्या ये प्रोक्ताः कृत-जैर् द्विजैः, ॥
कौशल्या-ज ! शशाऽऽदीनां तेषां नैको ऽप्यहं कपिः.

पञ्च पञ्चेत्यादि—हे कौशल्याज कौशल्याजात । '२००७। सप्तम्यां जनेर्डः ।३।२।९७।' ये पञ्च पञ्चनखाः । 'शशकः शल्लकी गोधा खड्गी कूर्मश्च पञ्चमः' इति । कृतजैः कृतयुगजातैः सप्तम्यां जनेर्डः । द्विजैर्द्विजातैः । '३०११। अन्येष्वपि दृश्यते ।३।२।१०१।' इति डः । सप्तम्यामित्युपलक्षणम् । असप्तम्यामपि दृश्यते । भक्ष्याः भक्षणीयाः प्रोक्ताः । तेषामहमेको ऽपि न भविता अहं कपिः । तत्किमिति हतोऽहं त्वयेति ॥

१—'७९२ आगो ऽपराधो मन्तुश्च' इति सर्वत्र ना० म० ।

४२३—कथं दुष्टुः स्वयं धर्मे प्रजास् त्वं पालयिष्यसि, ॥
आत्माऽनुजस्य जिह्रेषि सौमित्रेस् त्वं कथं न वा. १३२

कथमित्यादि—स्वयमात्मना धर्मे दुष्टुः दुःस्थः सन्। 'अपदुःसुषु स्थः' इत्यौणादिकः कुप्रत्ययः। कथं प्रजाः पालयिष्यसि नैवेति भावः। '३००९। उपसर्गे च संज्ञायाम् ।३।२।९९।' इति जनेर्डः। कथं वा सौमित्रेर्भ्रातुरात्मानुजस्य कनीयसः। आत्मानमनुजात इति '२०१०। अनौ कर्मणि-।३।२।१००।' इति डः। न जिह्रेषि न लज्जसे ॥

४२४—मन्ये किं-जमहं घ्नन्तं त्वामं-क्षत्रिय-जे रणे ॥
लक्ष्मणा ऽधिज ! दुर्वृत्त ! प्रयुक्तमनुजेन नः'. १३३

मन्य इत्यादि—किंजं त्वामहं कुतो ऽपि जातं न राजजातं मन्ये। '३००८। पञ्चम्यामजातौ। ३।२।९८।' इति डः। घ्नन्तं मारयन्तम्। अक्षत्रियजे रणे क्षत्रियादजाते। हे लक्ष्मणाधिज लक्ष्मणाग्रज! दुर्वृत्त नोऽस्माकमनुजेन भ्रात्रा प्रयुक्तं प्रेरितम्। तत्र 'पञ्चम्यामजातौ' इत्युक्तं जातावपि दृश्यते अक्षत्रियज इति। 'उपसर्गे च संज्ञायाम्' इत्युक्तं असंज्ञायामपि दृश्यते। लक्ष्मणाधिज इति 'अनौ कर्मणि' इत्युक्तं अकर्मण्यपि दृश्यते। अनुज इति सर्वत्रान्येष्वपि दृश्यत इति डः ॥ इत्युपपदाधिकारः ॥

४२५—प्रत्यूचे वालिनं रामो—'ना ऽकृतं कृतवानहम् ॥
यज्वभिः सुत्वभिः पूर्वैर् जरद्भिश् च कपीश्वर ! १३४

प्रत्यूच इत्यादि—रामो ऽपि वालिनं प्रत्यूचे प्रत्युक्तवान्। किमित्याह। हे कपीश्वर! पूर्वैर्जरद्भिर्वृद्धैः। '३०९२। जीर्यतेरतृन् ।३।२।१०४।' यज्वभिः याज्ञिकैः सुत्वभिः सोमयाजिभिः। '३०९१। सु-यजोर्ङ्वनिप् ।३।२।१०३।'। नाकृतं कृतवानहं अपि तु कृतमेव कृतवानहम् । '८९९। निष्ठा ।२।२।३६।' इति भूते क्तक्तवत् ॥

४२६—ते हि जालैर् गले पाशैस् तिरश्चामुपसेदुषाम् ॥
ऊषुषां पर-दारैश् च सार्धं निधनमैषिषुः. ॥ १३५ ॥

त इत्यादि—यस्मात्ते पूर्ववृद्धाः जालैर्गले पाशैश्च तिरश्चां मृगपक्षिसरीसृपा-

---

१—'२ ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि। सर्वस्याऽस्य यथान्यायं कर्तव्यं परिरक्षणम्।' मनु० अ० ७ इति स्मृत्या राज्ञां प्रजारक्षणमेव मुख्यो धर्मः स च दुष्टाचरणेन न संपद्यतेति द्योतयन्नाह—'कथं दुष्टुः स्वयं धर्मे—' इत्यादि। २ ततो रामः परदारसेवनादिदुष्कर्मकरणात् दण्ड्य एव त्वं तथाभूतस्य च दण्डाकरणं '२० यदि न प्रणयाद्राजा दण्डं दण्ड्येष्वतन्द्रितः। शूले मत्स्यानिवा ऽपक्ष्यन् दुर्बलान् बलवत्तराः।' म० अ० ७। इति स्मृते राज्ञां दोषायैवेति युक्तमेवैतदित्याह—'ना ऽकृतं कृतवान्' इत्यादि। ३—'६०५ प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्नपि'। ना० अ०।

णां तिरोऽञ्चतीति '३७३। ऋत्विग्-।३।२।५९।' इत्यादिना क्विन्। आमि '४१६। अचः ।६।४।१३८।' इत्यल्लोपः। तेषां निधनं विनाशमैषिषुः इष्टवन्तः। इषेर्लुङि रूपम्। कीदृशाम्। उपसेदुषां समीपमुपगतवतां तेषां समीपवर्तिनामुपद्रवकारित्वात्। '३०९७। भाषायाम्-।३।२।१०८।' इति क्वसुः। परदारैश्च सार्धमूषुषां उषितवताम्। पूर्ववत्क्वसुः वसेर्यजादित्वात्संप्रसारणम्॥

४२७—अहं तु शुश्रुवान्—भ्रात्रा स्त्रियं भुक्तां कनीयसा[1]॥
उपेयिवाननूचानैर्[2] निन्दितस्—त्वं लता-मृग! ॥१३६॥

अहमित्यादि—हे लतामृग हे शाखामृग! अहं पुनः शुश्रुवान् श्रुतवान्। पूर्ववत् क्वसुः। यदुत भ्रात्रा कनीयसा भुक्तां स्त्रियं त्वमुपेयिवान् सन् अनूचानैर्वेदविद्भिर्निन्दितस्ततो मे नैव दोषः। '३०९८। उपेयिवाननाश्वाननूचानश्च ।३।२।१०९।' इति उपेयिवानित्यादिना निपातितौ॥

४२८—अन्वनैषीत् ततो वाली त्रपा-वानिव राघवम्.॥
न्यक्षिपच्च चाऽङ्गदं यत्नात् काकुत्स्थे तनयं प्रियम्.

अन्वित्यादि—ततो रामवचनादनन्तरं वाली राघवमन्वनैषीत् अनुनीतवान्। 'देव क्षम्यतां यदजानता मयोक्तम्' इति। नयतेर्लुङित्यनेन भूतसामान्ये लुङ्। त्रपावानिव यथा लज्जावान् कश्चिदनुनयति तद्वत्। अङ्गदं च प्रियं तनयं काकुत्स्थे रामे व्यक्षिपत् न्यस्तवान्। यत्नादादरात्। क्षिपेरनद्यतने लङ्। लकारप्रत्ययस्यातिङीति प्रतिषेधाच्च कृत्संज्ञा॥

४२९—म्रियमाणः स सुग्रीवं प्रोचे सद्-भावमागतः—॥
'संभविष्याव एकस्यामभिजानासि मातरि.॥ १३८॥

म्रियमाण इत्यादि—स वाली म्रियमाणः सन् सद्भावं शोभनभावमागतः सन् सुग्रीवं प्रोचे। किमित्याह। अभिजानासि स्मरसि। एकस्यां मातरि संभविष्यावः। समभवाव इत्यस्मिन्नर्थे '२७७३। अभिज्ञावचने लृट् ।३।२।११२।' इत्यनद्यतने लृट्। अभिजानासीत्यभिज्ञावचनस्योपपदत्वात्॥

४३०—अवसाव नगेन्द्रेषु, यत् पास्यावो मधूनि च,॥
अभिजानीहि तत् सर्वं, बन्धूनां समयो ह्ययम्.१३९

अवसावेत्यादि—अभिजानीहि स्मर। यन्नगेन्द्रेषु अवसाव उषितवन्तौ। अत्राभिज्ञावचनस्य यच्छब्दसहितत्वात् '२७७४। न यदि ।३।२।११३।' इत्यनेन लृटि प्रतिषिद्धे लङेव भवति। अत्र वासमात्रं स्मर्यते। मधूनि च यत्पास्यावः तत्र पीतवन्तौ तत्सर्वमभिजानीहि। अत्र '२७७५। विभाषा साकाङ्क्षे

१—'१४४३। वृद्धप्रशस्ययोर् ज्यायान् कनीयांस् तु युवा ऽल्पयोः।'
२—'७१५। अनूचान प्रवचने साङ्गे ऽधीती' इति सर्वत्र ना० अ०।

।३।२।११४।' इति पक्षे लृट् । साकाङ्क्षता च प्रयोक्तुर्लक्ष्यलक्षणयोः संबन्धे । तत्र वासो लक्षणं पानं च लक्ष्यमिति । यस्माद्धन्धूनामयमेष समयः कालः ॥

४३१—दैवं न विदधे नूनं युगपत् सुखमावयोः, ॥
शश्वद् बभूव तद् दुःस्थं यतो न' इतिहा ऽकरोत्.

दैवमित्यादि—नूनमवश्यं दैवमावयोः सुखं युगपदेककालं न विदधे न हि विहितवत् । परोक्षे लिट् । ञित्वात्तङ् । आतो लोपः । यतो यस्मात्तत् दैवं शश्वत् नित्यं दुःस्थमननुकूलं नोऽस्माकं बभूव तस्मादितिह एवमकरोत् । इत्येवं कृतवान् । यद्युगपदावयोः सुखविधानं तद्दुःस्थं शश्वद्बभूव । हाकरोदिति भूतानद्यतनपरोक्षे लिटि प्राप्ते '२७७६। ह-शश्वतोर्लङ् च ।३।२।११६।' इति लङ् । चकारात् लिट् । तत्र शश्वच्छब्दे उपपदे लिडेवोदाहृतः न लङ् । हशब्दे लङेव न लिडपीति ॥

४३२—ददौ स दयितां भ्रात्रे मालां चाऽग्र्यां हिरणमयीम्,
राज्यं संदिश्य भोगांश्च् च ममार व्रण-पीडितः १४१

ददावित्यादि—स वाली दयितां ताराख्यां भ्रात्रे सुग्रीवाय ददौ मालां चाग्र्यां श्रेष्ठां हिरण्मयीं सुवर्णघटिताम् । राज्यं सामात्यादिद्रव्यप्रकृतिम् । संदिश्य दत्त्वा । भोगांश्च राज्याङ्गानि । ममार व्रणपीडितः । तत्रापि परोक्षे लिट् ॥

४३३—तस्य निर्वर्त्य कर्तव्यं सुग्रीवो राघवाऽऽज्ञया ॥
किष्किन्धाऽद्रि-गुहां गन्तुं मनः प्रणिदधे द्रुतम् १४२

तस्येत्यादि—तस्य मृतस्य कर्तव्यं पिण्डोदकादिकरणीयं कृत्वा सुग्रीवो राघवाज्ञया 'गच्छ वर्षासमयमतीत्य शरदागमिष्यसि' इति आज्ञया किष्किन्धाद्रिगुहां गन्तुं मनः प्रणिदधे कृतवान् । अत्रापि परोक्षे लिट् ॥

४३४—नाम-ग्राहं[१] कपिभिरशनैः स्तूयमानः समन्ता-
दन्वग्-भावं रघु-वृषभयोर् वानरेन्द्रो विराजन् ॥
अभ्यर्णे ऽम्भः-पतन-समये पर्णलीभूत-सानुं
किष्किन्धाद्रिं न्यविशत मधु-क्षीब-गुञ्जद्-द्विरेफम्.

१—मन्दाक्रान्तावृत्तमिदम् । तल्लक्षणं तु—'९७ **मन्दाक्रान्ता** जलधिषडगैर् म्-भौ न-तौ ताद्गुरू चेत् ।' इति वृत्तरत्नाकरे भट्टकेदारः ।

नामेत्यादि—वानरेन्द्रः सुग्रीवः किष्किन्धाद्रिं न्यविशत निविष्टवान् । '२६८३। नेर्विशः ।१।३।१७।' इति लङ् । अशनैः सुष्ठु कपिभिः स्तूयमानः । वर्तमाने लट् । तस्य कर्मणि विहितत्वात् । '३१०३। लक्षणहेत्वोः क्रियायाः—।३। २।१२६।' इति शानच् । नामग्राहं नाम गृहीत्वा । '३३८०। नाम्न्या दिशि-ग्रहोः ।३।४।५८।' इति णमुल् । समन्तात्सर्वतः । विराजन् शोभमानः । अत्र परस्मैपदसंज्ञकः शतृप्रत्ययः । किं कृत्वा रघुवृषभयोरन्वग्भावं अनुकूलो भूत्वा । अन्वक्पूर्वाद्भवतेः '३३८६। अन्वच्यानुलोम्ये ।३।४।६४।' इति णमुल् । तदनुकूलवर्तित्वाद्विराजन् । कदा न्यविशत् । अभ्यर्णे निकटे । अम्भःपतनसमये प्रावृषीत्यर्थः । पर्णलीभूतसानुं पर्णानि सन्ति येषामिति सिध्मादिपाठाल्लच् । तदन्तादभूततद्भावे च्विः । पर्णलीभूताः सानव एकदेशा यस्याद्रेः । मधुक्षीबा मधुमत्ता गुञ्जन्तो द्विरेफा यत्र । क्षीब इति '३०३५। अनुपसर्गात् फुल्ल-क्षीब-कृशोल्लाघाः ।८।२।५५।' इति निपातितः । '४०७। क्षीबृ मदे ।' इत्यस्मात् क्तप्रत्ययस्य लोप इडभावश्च निपात्यते । गुञ्जेर्लट् । क्वचित् प्रथमासमानाधिकरणेऽपि शतृप्रत्ययः ॥

इति सोपपदकृतः ॥

इति श्री-जयमङ्गलाऽऽख्यया व्याख्यया समलंकृते श्री-भट्टिकाव्ये-
द्वितीयेऽधिकार-काण्डे लक्षण-रूपे प्रथमः परिच्छेदः (वर्गः),
तथा लक्ष्य-रूपे कथानके सुग्रीवाऽभिषेको नाम षष्ठः
सर्गः पर्यवसितः ।

सप्तमः सर्गः ॥

इतस्ताच्छीलिकं कृतमधिकृत्योच्यते । ताच्छीलिकमित्युपलक्षणम् । तद्धर्मतत्साधुकारिष्वपि द्रष्टव्यम् । यतः '३११४। आक्वेस्तच्छील-तद्धर्म-तत्साधुकारिषु ।३।२।१३४।' इति तत्राधिक्रियते—

४३५—ततः कर्ता वनाऽऽकम्पं ववौ वर्षा[१]-प्रभञ्जनः[२], ॥
नभः पूरयितारश् च समुन्नेमुः पयो-धराः[३] ॥ १ ॥

तत इत्यादि—ततः प्रवेशानन्तरं वर्षाप्रभञ्जनः प्रावृड्वातो ववौ वाति स्म- '११२४। वा गति गन्धनयोः' इति । कर्ता वनाकम्पं साधु कुर्वन् । '३११५। तृन् ।३।२।१३५।' इति तृन् । '६२७। न लोक—।२।३।६९।' इति षष्ठीप्रतिषेधः । पयोधरा मेघाश्च समुन्नेमुः समुन्नताः । कीदृशाः । नभः पूरयितारः । तृन् ॥

१—'२४१। स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षाः' । २—'७०। नभस्वद्-वातपवन-पवमान .' । ३ १९७२। स्त्री-स्तनाब्दौ पयो-धरौ' । ना० म० 1

४३६—तर्पणं प्रजनिष्णूनां शस्यानाम[1]-मलं पयः ॥
रोचिष्णवः[2] स-विस्फूर्जा मुमुचुर् भिन्न-वद् घनाः ॥२॥

तर्पणमित्यादि—घना अमलं पयो मुमुचुः। भिन्नवत् भिन्ना इव। कीदृशं पयः। तर्पणं शस्यानां तर्पणं तर्पयतीति '२८३१। कृत्यल्युटो बहुलम् ।३।३।११३।' इति कर्तरि ल्युट्। प्रजनिष्णूनां साधु प्रादुर्भवताम्। रोचिष्णवः साधु दीप्यमानाः। सविस्फूर्जाः सवज्रनिस्वानाः। '३११६। अलंकृञ्—।३।२।१३६। इत्यादिना इष्णुच् ॥

४३७—निराकरिष्णवो[3] भानुं दिवं वर्तिष्णवो[5] ऽभितः ॥
अलंकरिष्णवो[4] भान्तस् तडित्वन्तश्[6] चरिष्णवः[7] ॥३॥

निरेत्यादि—भानुं निराकरिष्णवो निराकरणशीला घनाः पयो मुमुचुरिति योज्यम्। दिवमभितो वर्तिष्णव आकाशमभितो वर्तनस्वभावाः। पूर्वपश्चिमयो-र्वर्तनहेतुत्वात्। पर्यभिभ्यां सर्वोभयार्थे तसिः। 'अभितःपरितः—' इति द्वितीया। तडित्वन्तः सविद्युतः। अत एव भान्तो दीप्यमानाः। एवं च कृत्वा अलंकरिष्णवोऽलङ्करणशीला इव। दिशश्चरिष्णवः इतस्ततो गमनशीलाः। पूर्ववदिष्णुच् ॥

४३८—तान् विलोक्या ऽसहिष्णुः[8] सन्
विललापोन्मदिष्णु[9]-वत् ॥
वसन् माल्यवति ग्लास्नू[10]
रामो जिष्णुर्[11]-अधृष्णु-वत् ॥ ४ ॥

तानित्यादि—तान् घनान्विलोक्य असहिष्णुरसहनशीलो रामः माल्यवति पर्वते वसन्विललाप। उन्मदिष्णुवत् उन्मदनशीलः उन्मत्तस्तद्वत्। पूर्ववदिष्णुच्। ग्लास्नुः ग्लानशीलः जिष्णुर्जयशीलः। अधृष्णुवदप्रगल्भ इव। शोकाभिभूतत्वात्। '३११९। ग्ला-जि-स्थश्च ग्स्नुः ।३।२।१३९।' धृष्णुरिति '३१२०। त्रसि-गृधि—३।२।१४०।' इत्यादिना क्नुः।

१—'३६३। वृक्षाऽऽदीनां फलं शस्यम्' २—'६६५। विभ्राड् भ्राजिष्णु-रोचिष्णू' इति ना० अ०। ३—'१०७५। निराकरिष्णुः क्षिप्नुः स्यात्'। ४।५—'१०७४। उत्पतिष्णुस् तूत्पतिता ,ऽलंकरिष्णुस् तु मण्डितः। भूष्णुर् भविष्णुर् भविता वर्तिष्णुर् वर्तनः समौ।' ६—'९०। अभ्रं मेघो वारिवाहः स्तनयित्नुर् बलाहकः। धाराधरो जल-धरस् तडित्वान् वारिदोऽम्बुभृत्।' ७—'११११। चरिष्णु जङ्गम-चरम्'। ८—'१०७६। सहिष्णुः सहनः क्षन्ता'। ९—'१०६८। सोन्मादस् तून्मदिष्णुः स्यात्'। १०—'६२१। ग्लान-ग्लास्नू, आमयावी विकृतो व्याधितो ऽपटुः' ११—'८४२। जेता जिष्णुश् च जित्वरः।' इति सर्वत्र ना० अ०।

किं तद्विलपनमित्याह—

४३९—'भ्रमी कदम्ब-संभिन्नः पवनः शमिनामपि ॥
क्लमि-त्वं कुरुतेऽत्यर्थं मेघ-शीकर-शीतलः. ॥ ५ ॥

भ्रमीत्यादि—भ्रमी भ्रमणशीलः । कदम्बसंभिन्नः कदम्बगन्धसंश्लिष्टः शमिनामपि शमनशीलानामपि क्लमित्वं कुरुते अत्यर्थं ग्लानिं कुरुते । '३१२१। शमित्यष्टाभ्यो घिनुण् ।३।२।१४१।' । '२७६३। नोदात्तोपदेश-।७।३।३४।' इत्यादिना उपधावृद्धिप्रतिषेधः ॥

४४०—संज्वारिणेव मनसा ध्वान्तमायासिना मया ॥
द्रोहि खद्योत-संपर्कि नयनामोषि दुःसहम्. ॥ ६ ॥

संज्वारिणेत्यादि—मयैतत् ध्वान्तं तमो दुःसहं दुःखेन सह्यत इति। मनसा करणभूतेन। कीदृशेन। संज्वारिणेव रोगशीलेनेव । आयासिना आयासशीलेन मयेति । द्रोहि अपकारशीलम् । ध्वान्तं खद्योतसंपर्कि ज्योतिरिङ्गणसंसर्गशीलम्। नयनामोषि चक्षुर्मोषणशीलम्। '३१२२। संपृचानुरुध—।३।२।१४२।' इत्यादिना सर्वे घिनुणन्ताः ॥

४४१—कुर्वन्ति परिसारिण्यो विद्युतः परिदेविनम् ॥
अभ्याघातिभिरामिश्राश् चातकैः परिराटिभिः. ॥७॥

कुर्वन्तीत्यादि—एता विद्युतः परिदेविनं परिदेवनशीलं कुर्वन्ति । मामित्यर्थात् । कीदृश्यः । परिसारिण्यः परिसरणशीलाः । चातकैः पक्षिविशेषैः परिराटिभिः परिरटनशीलैः । एवंचाभ्याघातिभिः अभिहननशीलैः । दुःखोत्पादनात् । आमिश्रा युक्ता विद्युतः । पूर्ववद्घिनुण् ॥

४४२—संसर्गी परिदाहीव शीतोऽप्याभाति शीकरः, ॥
सोढुमाक्रीडिनोऽशक्याः शिखिनः परिवादिनः. ॥८॥

संसर्गीत्यादि—संसर्गी संसर्जनशीलः । शीतोऽपि शीकरो बिन्दुः । परिदाहीव परिदहनशील इवाभाति । शिखिनश्च मयूराः सोढुमशक्याः । आक्रीडिनो नर्तनशीलाः । परिवादिनः परिवदनशीला इव । इवशब्दश्चात्र लुप्तो द्रष्टव्यः । पूर्ववद् घिनुण् ॥

४४३—एता दैवानुरोधिन्यो द्वेषिण्य इव रागिणम् ॥
पीडयन्ति जनं धाराः पतन्त्यो ऽनपकारिणम्. ॥९॥

१—'९५। धारासंपात आसारः **शीकरो**ऽम्बुकणाः स्मृताः' । २—'५४८। समौ पतङ्ग-शलभौ, **खद्योतो** ज्योतिरिङ्गणः ।' ३—'५२६ । अथ सारङ्गः स्तोकक**श्** **चातकः** समाः।' ४—'५५१। मयूरो बर्हिणो बर्ही नील-कण्ठो भुजङ्ग-भुक् । शिखावल-**शिखी** केकी इति सर्वत्र ना० भ० ॥

एता इत्यादि—एता धाराः पतन्त्यो द्वेषिण्य इव द्वेषणशीला इव जनं रागिणं रागशीलम्। अनपकारिणमनपराधशीलं पीडयन्ति। दैवानुरोधिन्यः भाग्यानुरोधात् प्रवर्तनशीलाः। पूर्ववत् घिनुण्। घिनुणि च 'रञ्जेरुपसंख्यानम्' इत्यनुनासिकलोपः। कृताननुनासिकनिर्देशाद्वा लोपनिपातनम्॥

४४४—कुर्याद् योगिनमप्येष स्फूर्जा-वान् परिमोहिनम्॥
त्यागिनं सुख-दुःखस्य परिक्षेप्यम्भसामृतुः॥१०॥

कुर्यादित्यादि—एष ऋतुरम्भसां जलानां परिक्षेपी परित्यजनशीलः। कर्मणि षष्ठी। योगिनमपि योगशीलमपि। सुखदुःखस्य त्यागिनं त्यागशीलम्। कर्मणि षष्ठी। परिमोहिनं परिमोहनशीलम्। कुर्यात्। कीदृशः। स्फूर्जावान् वज्रनिर्घोषयुक्तः। पूर्ववद् घिनुण्॥

४४५—विकत्थी याचते प्रत्तम-विश्रम्भी मुहुर् जलम्॥
पर्जन्यं चातकः पक्षी निकृन्तन्निव मानसम्॥११॥

विकत्थीत्यादि—चातको मानसं निकृन्तन्निव खण्डयन्निव। प्रत्तं प्रदत्तम्। '३०७८। अच उपसर्गात् तः।७।४।४७।' जलं याचत इति प्रधानं कर्म। पर्जन्यमित्यकथितम्। विकत्थी विकत्थनशील इव पर्जन्योऽपि मह्यं जलं ददाति। इवशब्दो लुप्तोऽत्र द्रष्टव्यः। अविश्रम्भी अविश्वासशीलः। मानसखण्डनात् '३१२३। वौ कष-लस—।३।२।१४३।' इति घिनुण्॥

४४६—प्रलापिनो भविष्यन्ति कदा न्वेते ऽपलाषिणः॥
प्रमाथिनो वियुक्तानां हिंसकाः पाप-दर्दुराः॥१२॥

प्रलापिन इत्यादि—एते पापदर्दुराः पापाश्च ते दर्दुराश्चेत्याक्रोशाभिधानम्। कदा नु अपलाषिणो भविष्यन्ति। अपलषणशीलाः व्यपगतकामा इत्यर्थः। '९५३। लष कान्तौ।' '३१२४। अपे च लषः।३।२।१४४।' इति घिनुण्। प्रलापिनः प्रलपनशीलाः। प्रमाथिनः प्रमथनशीलाः। चेतसामित्यर्थात्। '३१२५। प्रे लप—३।२।१४५।' इत्यादिना घिनुण्। अत एव वियुक्तानां मादृशां हिंसकाः हिंसनशीलाः। इत्येवं विललाप। '३१२६। निन्द-हिंस—।३।२।१४६।' इत्यादिना वुञ्॥

४४७—निन्दको रजनिंमन्यं दिवसं क्लेशको निशाम्॥
प्रावृष्यनैषीत् काकुत्स्थः कथंचित् परिदेवकः॥१३॥

निन्दक इत्यादि—काकुत्स्थो दिवसं रजनिंमन्यं रजनीमात्मानं मन्यमानं घनान्धकारित्वात्। '२९९३। आत्ममाने खश् च।३।२।८३।' '२९४३। खित्यनव्ययस्य।६।३।६६।' इति ह्रस्वत्वम्। निशां च प्रावृषि कथमप्यनैषीत् नीतवान्। निन्दकः निन्दनशीलः। नक्तंदिनस्येत्यर्थात्। क्लेशकः क्लेशनशीलः। परिदेवकः परिदेवनशीलः। आत्मन इत्यर्थात्॥

४४८—अथोपशरदे ऽपश्यत् क्रौञ्चानां चेष्टनैः कुलैः ॥
उत्कण्ठा-वर्धनैः शुभ्रं रवणैरम्बरं ततम् ॥ १४ ॥

अथेत्यादि—अथानन्तरमुपशरदे शरत्समीपे इति । '६७७। अव्ययीभावे शरत्प्रभृतिभ्यः ।५।४।१०७।' इति समासान्तष्टच् । '६५८। तृतीया-सप्तम्योर्बहुलम् ।२।४।८४।' इत्यमभावः । क्रौञ्चानां कुलैस्ततं व्याप्तमम्बरं शुभ्रं शुक्लमपश्यत दृष्टवान् । चेष्टनैः व्यापारशीलैः । रवणैः शब्दनशीलैः । अनयोश्चलनशब्दार्थत्वात् '३१२८। चलनशब्द—३।२।१४८।' इत्यादिना युच् । उत्कण्ठावर्धनैः उत्कण्ठावर्धनशीलैः । '३१२९। अनुदात्तेतश्च—।३।२।१४९।' इति युच् । क्रौञ्च इति क्विन्प्रत्ययान्तत्वात् प्रज्ञादित्वादण् ॥

४४९—विलोक्य द्योतनं चन्द्रं लक्ष्मणं शोचनो ऽवदत्— ॥
'पश्य दन्द्रमणान् हंसानरविन्द—समुत्सुकान् ॥१५॥

विलोक्येत्यादि—चन्द्रं विलोक्य द्योतनं साधु द्योतमानम् । '३१२९। अनुदात्तेतश्च—।३।२।१४९।' इति युच् । शोचनः शोचनशीलः । '३१३० । जुचङ्क्रम्य—।३।२।१५०।' इत्यादिना युच् । रामो लक्ष्मणमवदत् । पश्य हंसान् दन्द्रमणान् शनैर्द्रमणशीलान् । द्रमेर्नित्यं कौटिल्य एव भवति नतु क्रियासमभिहार इत्युक्तम् । तदन्ताद्युच् । अतो लोपः । यस्य हलः । अरविन्दसमुत्सुकान् '६४१ । प्रसित—।२।३।४४।' इति सप्तमीं विधाय 'सप्तमी' इति योगविभागात् सः ॥

४५०—कपिश् चङ्क्रमणो ऽद्यापि ना ऽसौ भवति गर्धनः, ॥
कुर्वन्ति कोपनं तारा मण्डना गगनस्य माम् ॥१६॥

कपिरित्यादि—नासौ कपिः सुग्रीवो ऽद्यापि चङ्क्रमणः शनैर्गमनशीलो न भवति । यतो गर्धनो ऽभिलाषशीलः स्त्रीष्वित्यर्थात् । पूर्ववद्युच् । ताराश्च मां कोपनं कोपनशीलं तद्विषय एव कुर्वन्ति । कीदृश्यः । गगनस्य मण्डना भूषणाः । '३१३१ । क्रुध—मण्डार्थेभ्यश्च ।३।२।१५१।' इति युच् ॥

४५१—ना ऽवैत्याप्यायितारं किं कमलानि रविं कपिः ॥
दीपितारं दिनाऽऽरम्भे निरस्त-ध्वान्त-संचयम् ॥१७॥

नावैतीत्यादि—किमसौ कपिः रविं नावैति नावगच्छति । कमलान्याप्यायितारं साधु वर्धयन्तम् । '३१२९। अनुदात्तेतश्च—।३।२।१२९।' इति प्राप्ते ।३१३२। न यः।३।२।१५२' इति प्रतिषिद्धे तृन्नेव भवति । ततश्च '६२७। न लोक—।२।२।६९। इति षष्ठीप्रतिषेधः । दिनारम्भे दीपितारं साधु दीप्यमानम् । पूर्ववद्युचि प्राप्ते

१—'१०८३ । रवणः शब्दनो, नान्दीवादी नान्दीकरः समौ ।' २—'१०६७। गृध्नुस् तु गर्धन' लुब्धो ऽभिलाषुकस् तृष्णक् समौ लोलुप-लोलुभौ ' ना० प०

'३१३३। सूद-दीप-दीक्ष—।३।२।१५३।' इति प्रतिषेधः। निरस्तध्वान्तसंचयं अपनीतान्धकारसंहतिकं किमसौ शरत्समयं नावैतीत्यर्थः॥

४५२—अतीते वर्षुके काले, प्रमत्तः स्थायुको गृहे॥
गामुको ध्रुवमध्वानं सुग्रीवो वालिना गतम्.॥१८॥

अतीतेत्यादि—वर्षुके वर्षणशीले काले अतीतेऽपि गृहे स्थायुकः स्थितिशीलः शरदि नागतत्वात् प्रमत्तः सन् सुग्रीवो वालिना गतं अध्वानं प्राप्तमार्गं ध्रुवमवश्यं गामुकः साधु गन्ता। '३१३४। लष-पत—।३।२।१५४।' इत्युकञ्। '६२७। न लोक—।२।३।६९।' इति षष्ठीप्रतिषेधः॥

४५३—जल्पाकीभिः सहा SSसीनः
स्त्रीभिः प्रजविना त्वया॥
गत्वा लक्ष्मण! वक्तव्यो
जयिना निष्ठुरं वचः॥ १९॥

जल्पाकीभिरित्यादि—हे लक्ष्मण! त्वया प्रजविना प्रकृष्टगमनशीलेन। '३१३६। प्रजोरिनिः।३।२।१५६।' जयिना अभिभवनशीलेन।'३१३७। जिदृ-क्षि—।३।२।१५७।' इत्यादिना इनिः। सुग्रीवो निष्ठुरं वचोभिधातव्यः। जल्पाकीभिः जल्पनशीलाभिः स्त्रीभिः सहासीनः। '३१३५। जल्प-भिक्ष—।३।२।१५५।' इति षाकन्। षित्वात् ङीष्। तन्मध्ये हि परुषमभिधीयमानः। परिभवं मन्यत इति भावः॥

४५४—शैले विश्रयिणं क्षिप्रमनादरिणमभ्यमी॥
व्याय्यं परिभवी ब्रूहि पापमव्यथिनं कपिम्.॥२०॥

शैल इत्यादि—कपिं क्षिप्रं गत्वा ब्रूहि इत्यकथितं कर्म। व्याय्यं वच इति प्रधानं कर्म। अस्य चातिस्पष्टार्थत्वादिदं तदिति संदिष्टम्। अनादरिणमनादरशीलं कपिं कालातिक्रमणात्। आङ्पूर्वो दृङ्। अत एव पापं दुराचारम्। अव्यथिनं निर्भयशीलम्। नञ्पूर्वो व्यथिः। शैले विश्रयिणं तत्र स्थितिशीलम्। विपूर्वः श्रयतिः। त्वं चाभ्यमी अभिमुखगमनशीलः। अभिपूर्वोऽमगत्यादिषु। परिभवी साधु परिभवं जनयन्। परिपूर्वो भवतिः। अत्र सर्वत्र '३१३७। जिदृक्षि—।३।२।१५७।' इत्यादिना इनिः॥

१—'१८१। स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाक्।' इत्यनुशासनात् त्रिषु लिङ्गेष्वयं शब्दः।

४५५—स्पृहयालुं कपिं स्त्रीभ्यो निद्रालुम्-अदयालु-वत् ॥
श्रद्धालुं भ्रामरं धारुं सद्रुमद्रौ वद द्रुतम्.' ॥ २१ ॥

स्पृहयालुमित्यादि—स्त्रीभ्यः स्पृहयालुं कपिं साधु स्पृहयन्तम् । स्पृहिः स्वार्थिकण्यन्तो ऽदन्तश्च । '२३११। अयामन्त-।६।४।५५।' इत्ययादेशः ।'५७४। स्पृहेरीप्सितः ।१।४।३६।' इति सम्प्रदानसंज्ञा । द्रुतं वद ब्रूहि । अदयालुवत् अदयनशील इव । निद्रालुं निद्राशीलं अस्मत्कार्येष्वनवधानत्वात् शयनीय एव अदयनशील इव । निद्रालुं निद्राशीलं अस्मत्कार्येष्वनवधानत्वात् शयनीय एव सर्वदा स्थितत्वात् स्त्रीभिः सह । श्रद्धालुं साध्वभिलषन्तम् । किम् । भ्रामरं भ्रमरैः कृतम् । '१४९१। क्षुद्राभ्रमर-।४।३।११९।' इत्यादिना अञ् । मध्वित्यर्थात् । '६२७। न लोक-।२।३।६९।' इति षष्ठीप्रतिषेधः । '३१३८। स्पृहि-गृहि-।३।२।१५८।' इत्यादिना आलुच् । श्रद्धालुत्वादेव धारुं साधु पिबन्तं भ्रामरमेव । सद्रुं साधु सीदन्तम् । क अद्रौ ।'३१३९। दा-धेट्-सि-शद-सदो रुः ।३।२।१५९।' ॥

४५६—सृमरो भङ्गुर-प्रज्ञो गृहीत्वा भासुरं धनुः ॥
विदुरो जित्वरः प्राप लक्ष्मणो गत्वरान् कपीन्. ॥२२॥

सृमर इत्यादि—लक्ष्मणः कपीन् प्राप । कीदृशः । साधु गन्ता । '३१४०। सृघस्यदः क्मरच् ।३।२।६०।' । भङ्गुरा ये स्वयमेव भज्यन्ते ।'३१४१ भञ्ज-भास-।३।२।१६१।' इति घुरच् । तान् प्रजानातीति भङ्गुरप्रज्ञः '२९२०। प्रे दाज्ञः ।३।२।६।' इति कः । विदुरः साधु वेदी । '३१४२। विदि-भिदि-च्छिदेः कुरच् ।३।२।१६२।' । जित्वरः साधु जयशीलः । '३१४३। इण्-नश्-जि-।३।२।१६३।' इत्यादिना क्वरप् । गृहीत्वा धनुर्भासुरं भासनशीलम् । गत्वरान् गमनशीलान् कपीन् अस्थिरप्रकृतीनित्यर्थः । 'गत्वरश्च' इति निपातितम् । गमेः क्वरप्यनुनासिकलोपः ॥

४५७—तं जागरूकः कार्येषु दन्दशूक-रिपुं कपिः ॥
अ-कम्प्रं मारुतिर् दीप्रं नम्रः प्रावेशयद् गुहाम् ॥२३॥

तमित्यादि—तं लक्ष्मणं कपिर्मारुतिः गुहां प्रावेशयत् । विशेर्हेतुमण्ण्यन्तात् लङि रूपम् । कार्येषु कृत्येषु जागरूकः सावधानः । '३१४५। जागरूकः ।३।२।१६५।' इति जागर्तेरूकः । दन्दशूकरिपुं हिंस्रारिम् । '३१४६। यज-जप-।३।२।१६६।' इत्यादिना दंशेर्यङन्तादूकः । '२६३५। लुप सद-।३।१।२४।'

१—'१०७८। स्वप्नक् **शयालुर्** निद्रालुर् निद्राण-शयितौ समौ' । २—'१०७२। **श्रद्धालुः** श्रद्धया युक्ते' । ३—'१०७७। **जागरूको** जागरिता । ४—'**दन्दशूकस्** तु पुंलिङ्गो राक्षसे च सरीसृपे ।' इति कोशान्तरम् । ५—'११२०। चलनं कम्पनं **कम्प्रं**, चलं लोलं चलाचलम्' इति सर्वत्र ना० अ०

इत्यादिना यङ् । दीप्रं साधु दीप्यमानम् । अकम्प्रं अकम्पनशीलं अभीरुमित्यर्थः। नम्रः साधु प्रह्वीभूतः । सर्वत्र '३१४७। नमि-कम्पि–।३।२।१६७।' इत्यादिना रः॥

४५८—कम्राभिरावृतः[1] स्त्रीभिराशंसुः[2] क्षेममात्मनः ॥
इच्छुः प्रसादं प्रणमन् सुग्रीवः प्रावदन् नृपम्.॥२४॥

कम्राभिरित्यादि—सुग्रीवः प्रावदन् नृपं लक्ष्मणम् । स्त्रीभिरावृतः परिवृतः सन् प्रणमन् । ताभिः सहेत्यर्थः । कम्राभिः कमनशीलाभिः । पूर्ववद्रः । आत्मनः क्षेमं कल्याणमाशंसुः प्रार्थयमानः । '३१४८। सनाशंसभिक्ष उः ।३।२।१६८।' '६२७। न लोक–।२।३।६९।' इति षष्ठीप्रतिषेधः । इच्छुः प्रसादं प्रसादयिषणशीलः । 'अपि मे स्वामी प्रसन्नः स्यात्' इति । '३१४९। विन्दुरिच्छुः । ३।२।१६९।' इति निपातनम् ॥

४५९—'अहं स्वप्नक् प्रसादेन तव वन्दारुभिः[3] सह ॥
अ-भीरुरवसं स्त्रीभिर् भासुराभिरिहेश्वरः. ॥ २५ ॥

अहमित्यादि—अहं तव प्रसादेन इह गुहायामवसं उषितवान् स्वप्नक् निद्रालुः चिन्ताभावात् । '३१५२। स्वपि-तृषोर्नजिङ् ।३।२।१७२।' वन्दारुभिर्वन्दनशीलाभिः सह । '३१५३। शॄ-वन्द्योरारुः ।३।२।१७३।' अभीरुः अभयशीलः । '३१५४। भियः क्रु-क्लुकनौ ।३।२।१७४।' । भासुराभिः भासनशीलाभिः । ईश्वरः ईशनशीलः । '३१५५। स्थेश-भास–।३।२।१७५।' इति वरच् ॥

४६०—विद्युन्-नाशं रवेर् भासं
विभ्राजं शश-लाञ्छनम् ॥
राम-प्रत्तेषु भोगेषु
नाहमज्ञासिषं रतः. ॥ २६ ॥

विद्युदित्यादि—रामप्रत्तेषु रामदत्तेषु भोगेषु रतः सक्तः । नाहमज्ञासिषं नाहं ज्ञातवान् । लुङि '२३७७। यम-रम–।७।२।७३।' इत्यादिना सगिटौ । विद्युन्नाशं द्योतनशीला विद्युतः तासां नाशम् । रवेर्भाः भासनशीला दीप्तिः । ताम् विभ्राजं साधु दीप्यमानं शशलाञ्छनं चन्द्रम् । प्रावृडतिक्रान्ता शरद्वायातेति नाज्ञासिषमित्यर्थः । सर्वत्र '३१५७। भ्राज-भास–।३।२।१७७।' इति क्विप् ॥

१—'१०६९ । कम्रः कामयिता ऽभीकः कमनः कामनो ऽभिकः ।' ।२—'१०-७२-आशंसुराशंसितरि' । ३—(४५५) श्लोकस्थं टिप्पणं प्रेक्षणीयम् । ४—'१०-७३ । वन्दारुरभिवादके' इति स० ना० अ० ॥

४६१–एष शोक-च्छिदो वीरान् प्रभो ! सम्प्रति वानरान् ॥
धरा-शैल-समुद्राणामन्त-गान् प्रहिणोम्यहम्. ॥२७॥'

इति ताच्छीलिकाः समाप्ताः ।

एष इत्यादि—हे प्रभो ! एषो ऽहं सम्प्रति वानरान् प्रहिणोमि प्रस्थापयामि । कीदृशान् शोकच्छिदः शोकापनोदनशीलान् । अन्येभ्यो ऽपि दृश्यत इति क्विप् । वीरान् शूरान् । धराशैलसमुद्राणां अन्तं गच्छन्ति ये तानन्तगान् । '२९६५। अन्तात्यन्त—।३।२।४८।' इति डः । धरा पृथ्वी । धरासमुद्रशैलानामिति पाठान्तरम् । अत्र 'बहुष्वनियमः' इति पूर्वनिपातः । यथा वीणाशङ्खदुन्दुभयः ॥ इति ताच्छीलिककृतः ॥

अथ निरधिकारकृत्—

इतो विशेषाधिकाराभावात् निर्विशेषकृतो दर्शयन्नाह—

४६२–राघवस्य ततः कार्यं कारुर् वानर-पुङ्गवः ॥
सर्व-वानर-सेनानामाश्वागमनमादिशत्. ॥ २८ ॥

राघवस्येत्यादि—ततो ऽभिधानानन्तरं वानरपुङ्गवः सुग्रीवः सर्ववानरसेनानामाशु शीघ्रमागमनमादिशत् आदिष्टवान् । पुमांश्चासौ गौश्चेति । '७२९। गोरतद्धितलुकि ।५।४।९२।' इति समासान्तष्टच् । व्युत्पत्तिमात्रमेतत् । पुङ्गवशब्दस्तु प्रधानमाचष्टे । कारुः करोतीति '३१६९। उणादयो बहुलम् ।३।३।१।' इत्यौणादिकः । 'कृ-वा-पा-जि—' इत्यादिना उण् । एवमाशु । कस्य कर्तेत्याह । राघवस्य कार्यम् ॥

४६३–'वयमद्यैव गच्छामो रामं द्रष्टुं त्वराऽन्विताः ॥
कारका मित्र-कार्याणि सीता-लाभाय', सो ऽब्रवीत्.॥

वयमित्यादि—आगमनमादिश्य सुग्रीवो ऽब्रवीत् उक्तवान् । वयमद्यैव गच्छाम इति । रामं द्रष्टुं रामं द्रक्ष्याम इति । त्वरान्विताः त्वरिता इत्यर्थः । कीदृशा वयम् । सीतालाभाय सीतां प्राप्स्याम इति । कारका मित्रकार्याणि रावणवधादेः कार्यस्य कर्तारो भविष्याम इति । गच्छाम इति क्रिया । तस्यां क्रियायां क्रियार्थायामुपपदे तुमुन् ण्वुलौ भविष्यति काले स्याताम् । मित्रकार्याणीति । '६२८। अकेनोर्भविष्यदाधमर्ण्ययोः ।२।३।७०।' इति षष्ठीप्रतिषेधे द्वितीयैव स्यात् । सीतालाभायेति '३१८०। भाववचनाश्च ।३।३।११।' इति क्रियार्थां क्रियार्थायामुपपदे भविष्यति घञ् । '५८२। तुमर्थाच्च भाववचनात् ।२।३।१५।' इति चतुर्थी ॥

४६४–ततः कपीनां संघाता हर्षाद् राघव-भूतये ॥
पूरयन्तः समाजग्मुर् भय-दाया दिशो दश. ॥ ३० ॥

तत इत्यादि—तत आदेशादनन्तरं कपीनां संघाताः समाजग्मुः । हर्षात् हर्षेण । आदेशदानमेव हर्षहेतुः । राघवभूतये कापि नाम राघवस्य संपत्स्यादिति समाजग्मुरित्यस्यां क्रियायां क्रियार्थायामुपपदे '३१८०। भाववचनाश्च ।३।३।११।' इति भविष्यति क्तिन् । चतुर्थी च पूर्ववत् । पूरयतो व्याप्नुवन्तः । दश दिशः । भयदायाः भयं दास्याम इत्यस्यां क्रियायामुपपदे '३१८१। अण् कर्मणि च ।३।३।१२।' इत्यण् । आतो युक् ॥

४६५—सुग्रीवाऽन्तिकमासेदुः सादयिष्याम इत्यरिम् ॥
करिष्यन्त इवाऽकस्माद् भुवनं निर्-दशाननम् . २१

सुग्रीवेत्यादि—अरिं शत्रुं सादयिष्यामो व्यापादयिष्याम इति सुग्रीवान्तिकमासेदुः आगताः । '२१९३। लृट् शेषे च ।३।३।१३।' इति चकारात् क्रियार्थायामुपपदे भविष्यति लृट् । आसेदुरिति क्रिया क्रियार्था । अकस्मादतर्कितं भुवनत्रयं निर्दशाननं रावणरहितं करिष्यन्त इव तथाविधमहासंरम्भदर्शनादुत्प्रेक्ष्यते । '२१९३। लृट् शेषे च ।३।३।१३।' इति लृट् । अत्र क्रियायाः क्रियार्थाया अन्यः शुद्धो भविष्यत्कालः शेषः ॥

४६६—कर्ता ऽस्मि कार्यमायातैरेभिरित्यवगम्य सः ॥
काकुत्स्थ-पादप-च्छायां शीत-स्पर्शामुपागमत् . ॥२२॥

कर्तास्मीत्यादि—एभिरायातैर्वानरैः कार्यं सीतान्वेषणादि कर्तास्मि करिष्यामीति अवगम्य । अनद्यतने भविष्यति लुट् । सुग्रीवः काकुत्स्थपादपच्छायामुपागमत् । पद्यन्त इति पादाः । '३१८२। पद-रुज—।३।३।१६।' इति । कर्तरि घञ् । तत्र भविष्यतीति निवृत्तम् । पादैः पिबतीति पादपो वृक्षः । '२९१५। आतो ऽनुपसर्गे कः ।३।२।३।' । काकुत्स्थः पादप इव समाश्रयणीयत्वात् । तस्य छायां शीतस्पर्शाम् अनुद्वेजनकरीम् । स्पृश्यत इति स्पर्शस्तन्मात्र उच्यते । '३१८८। अकर्तरि च—।३।३।१९।' इति घञ् । नतु '३१८२। पद-रुज-।३।३।१६।' इत्यादिना । तत्र हि 'स्पृश उपताप इति वक्तव्यम्' इत्युक्तं स्पृशतीति स्पर्श उपतापः ॥

४६७—कार्यं सार-निभं दृष्ट्वा वानराणां समागमम् ॥
अवैन् नाशं दशाऽऽस्यस्य निर्वृत्तमिव राघवः. ॥२३॥

इति निरधिकारकृत् ।

कार्यमित्यादि—राघवो वानराणां समागमं दृष्ट्वा कार्यं सारनिभं सीतालाभतुल्यम् । सरति कालान्तरे तिष्ठतीति कर्तरि कारके '३१८३। सृ स्थिरे ।३।३।१७।' इति घञ् । दशास्यस्य रावणस्य नाशं विनाशं निर्वृत्तमिव निष्पन्नमिव अवैत् ज्ञातवान् । अवपूर्वादिणो लङि रूपम् ॥

इति निरधिकाराः कृतः ॥

अतः परं भावे ऽकर्तरि च कारक इत्यधिकृत्य कृदुच्यते—

४६८—ततः कपि-समाहारमेकनिश्चायमागतम् ॥
उपाध्याय इवाऽऽयामं सुग्रीवोऽध्यापिपद् दिशाम् ३४

तत इत्यादि—ततः कपिसमागमनानन्तरं सुग्रीवः कपिसमाहारं कपिसमूहं दिशामायाममध्यापिपत् बोधितवान् । अमुका अमुका दिक् ईदृशीति । '५४०। गतिबुद्धि-।१।४।५२।' इत्यादिना समाहारस्य कर्मसंज्ञा । आयामपरिज्ञानं चास्य वालिभयाद्दूरपरिभ्रमणात् । एकनिश्चायमागतं एकराशितां प्राप्तं आयाममित्यर्थः । निश्चायमिति '३१९०। परिमाणाख्यायाम्-।३।३।२०।' इति घञ् । पश्चादेकशब्देन '७२६। पूर्वकालैक-।२।१।४९।' इति सः । क इव । उपाध्याय इवेति । उपेत्याधीयते अस्मादिति '३१९१। इङश्च ।३।३।२१।' इति घञ् ॥

४६९—स-जलाऽम्भो-द-संरावं हनु-मन्तं सहाऽङ्गदम् ॥
जाम्बवं नील-सहितं चारु-सन्द्रावमब्रवीत्—॥ ३५ ॥

सजलेत्यादि—सुग्रीवो हनुमन्तमब्रवीत् । सजलाम्भोदसंरावं सजलमेघस्येव संरावो यस्य हनुमतः । '३१९२। उपसर्गे रुवः ।३।३।२२।' इति घञ् । सहाङ्गदं अङ्गदसहितम् । तथा जाम्बवं ऋक्षाधिपतिं नीलसहितमब्रवीत् । जाम्बवशब्दो ऽकारान्तो द्रष्टव्यः । चारुसन्द्रावं चारुगतिम् ।'३१९४। समि युद्रुदुवः ।३।३।२३।' इति घञ् ॥

कुलकम् ३६—४०—

४७०—'यात यूयं यम-श्रायं दिशं नायेन दक्षिणाम् ॥
विश्रावैस् तोय-विश्रावं तर्जयन्तो महोदधेः ॥ ३६ ॥

यातेत्यादि—यूयं यात गच्छत । यमश्रायं यमस्थानम् । श्रयत्येनमिति '३१९५। श्रि-णी-भुवो ऽनुपसर्गे ।३।३।२४।' इति घञ् कर्मणि । काम् ? दक्षिणां दिशम् । सामान्याभिधानाद्विशेषाभिधानम् । नायेन नीत्या सामादिना । नीयतेऽनेनेति पूर्ववत्करणे घञ् । महोदधेस्तोयविश्रावं तोयध्वनिं तर्जयन्तो न्यक्कुर्वाणाः । कैः विश्रावैः स्वैः शब्दैः । उभयत्रापि '३१९६। वौ क्षुश्रुवः ।३।३।२५।' इति कर्मणि घञ् ॥

१—'७१२ । **उपाध्यायो**ऽध्यापकः' । २—'१९५। शब्दे निनादनिनदध्वनिध्वान-रव-स्वनाः । १९६। स्वान-निर्घोष-निर्ह्राद-नाद-निस्वान-निःस्वनाः । आरवाऽऽरावसंराव-विरावाः ।' ३—'८७६। प्रद्रावोद्राव-**संद्राव**-संदावा विद्रवोद्रवः ।' ४—'११७०। उन्नाय उन्नये, **श्रायः** श्रयणे, जयने जयः ।' ५—'११९५ निगारोद्गार-**विश्रावोद्** ग्राहास्तु गरणादिषु इति स० ना० म०

४७१—उन्नायानधिगच्छन्तः प्रद्रावैर् वसुधा-भृताम् ॥
वनाऽभिलावान् कुर्वन्तः स्वेच्छया चारु-विक्रमाः ३७

उन्नायानित्यादि—वसुधाभृतां पर्वतानां उन्नायानुच्चयानुच्चत्वान्यधिगच्छन्तः जानन्तः । '३१९७। अवोदोर्नियः ।३।३।२६।' इति भावे घञ् । कैः प्रद्रावैः प्रकृष्टगतिभिः । '३१९८। प्रे द्रु-स्तु-स्रुवः ।३।३।२७।' इति घञ् । वनाभिलावान् वनविध्वंसान् । '३१९९। निरभ्योः पू-ल्वोः ।३।३।२८।' इति भावे घञ् । स्वेच्छया कुर्वन्तः । चारुविक्रमाः असाधारणपराक्रमाः । यात यूयमिति संबन्धः॥

४७२—सदोद्गार-सुगन्धीनां फलानामलमाशिताः ॥
उत्कारेषु च धान्यानामनभीष्ट-परिग्रहाः ॥ ३८ ॥

सदेत्यादि—सदा सर्वदा उद्गारे भक्षणानन्तरं श्वसनपूर्वके शब्दोच्चारणे यानि सुगन्धीनि तेषामलं पर्याप्तमाशिताः । '१५९५। गॄ शब्दे' इत्यस्मादुत्पूर्वात् '३२००। उदयोर्ग्रः ।३।३।२९।' इति घञ् । आङ्पूर्वादश्नातेः । '३०५३। आदिकर्मणि क्तः कर्तरि च ।३।४।७१।' इति कर्तरि क्तः । कृत्प्रयोगे कर्मणि षष्ठी न लोकेति निषिद्धाऽतः शेषे षष्ठी । उत्कारेषु च राशिषु धान्यानाम् । '१५०३। विक्षेपे' इत्यस्मादुत्पूर्वात् '३२०१। कॄ धान्ये ।३।३।३०।' इति कर्मणि घञ् । अनभीष्टपरिग्रहाः अनभिलाषुका इत्यर्थः ॥

४७३—संस्तावमिव शृण्वन्तश् छन्दोगानां महाध्वरे ॥
शिञ्जितं मधु-लेहानां पुष्प-प्रस्तार-शायिनाम् ॥३९॥

संस्तावमित्यादि—मधुलेहानां भ्रमराणां पुष्पप्रस्तारशायिनाम् । '३२०३ प्रेद्रो ऽयज्ञे ।३।३।३२।' इति घञ् । शिञ्जितं शृण्वन्तः यूयं यात । छन्दोगानां महाध्वरे संस्तावमिव सम्भूय स्तवनमिव पाठध्वनिविशेषमिव वा ।'३२०२। यज्ञे समि स्तुवः ।३।३।३१।' इति घञ् ॥

४७४—आलोचयन्तो विस्तारमम्भसां दक्षिणोदधेः ॥
स्वादयन्तः फल-रसं मुष्टि-संग्राह-पीडितम् ॥ ४० ॥

१—'(४७०) श्लोकस्थं टीकनमवलोक्यम् । २—(४६९) श्लोकस्थं टिप्पणमालोचनीयम् । ३—'११८२ लवोऽभिलावो लवने निष्पावः पवने पवः' । ४ —(४७०) श्लोकस्थं टीकनं प्रेक्ष्यम् । ५—'११९४। **उत्कारश्** च निकारश् च द्वौ धान्योत्क्षेपणार्थकौ ६ १९७ अथ मर्मरः । स्वनिते वस्त्र पर्णाना भूषणाना तु **शिञ्जितम्**' इति सर्वत्र ना० अ०

आलोचयन्त इत्यादि—दक्षिणोदधेरम्भसां विस्तारं विस्तीर्णताम्। विपूर्वात् स्तृणातेः '३२०४। प्रथने वावशब्दे ।३।३।३३।' इति घञ्। आलोचयन्तो निरूपयन्तः। स्थानस्य विस्तार इति। फलरसमास्वादयन्तः। मुष्टिसंग्राहपीडितम्। मुष्टेः संग्राहेण हस्तेन पीडितम्। ग्रहेः '३२०८। समि मुष्टौ ।३।३।३६।' घञ्। भावे मुष्टिविषये व्युत्पादितत्वात्। मुष्टिग्रहणमभिव्यक्त्यर्थं ज्ञातव्यम्॥

४७५—न्याय्यं यद् यत्र, तत् कार्यं पर्यायेणाऽविरोधिभिः,॥
निशोपशायः कर्तव्यः फलोच्चायश् च संहतैः ॥४१॥

न्याय्यमित्यादि—यदत्र न्यायादनपेतं तत्कार्यमविरोधिभिर्युष्माभिः। '३२०९। परिन्योर्नीणोः—।३।३।३७।' इति घञ्। पदार्थानामनपचारेणेत्यर्थः। '३२११। व्युपयोः शेतेः पर्याये ।३।३।३९।' इति घञ्। पर्यायेण परिपाट्या। '३२१०। परावनुपात्यय इणः ।३।३।३८।' इति भावे घञ्। अनुपात्ययः पर्यायः। निशोपशायः कर्तव्यः। युष्माभिर्निशायामुपशायः पर्यायशयनं कर्तव्यम्। '३२११। व्युपयोः शेतेः पर्याये ।३।३।३९।' इति घञ्। फलोच्चायश्च संहतैः युष्माभिः कर्तव्यः '३२१२। हस्तादाने—।३।३।४०।' इति घञ्। हस्तादानं चादेयस्य प्रत्यासत्तिः।

४७६—सीता रक्षो-निकायेषु स्तोक-कायैश् छलेन च ॥
मृग्या शत्रु-निकायानां व्यावहासीमनाश्रितैः ॥ ४२ ॥

सीतेत्यादि—छलेन युष्माभिः सीता मृग्या। रक्षोनिकायेषु निवासेषु। निवसन्त्यस्मिन्निति अधिकरणे '३२१३। निवास-चिति—।३।३।४१।' इत्यादिना घञ्। आदेश्च ककारः। स्तोककायैर्युष्माभिः। चिन्वन्त्यस्माच्छुभमिति कायः। शरीरे घञ्। शत्रुनिकायानां अरिसमूहानाम्। निचीयत इति निकायः। '३२१४। संघे चानौत्तराधर्ये ।३।३।४२।' इति कर्मणि घञ् आदेश्च ककारः। तेषां संबन्धिनीं व्यावहासीं परस्परहसनम्। अनाश्रितैः। व्यवपूर्वाद्धसः कर्मव्यतीहारे '३२१६। णचः स्त्रियाम्—।५।४।१४।' इति स्त्रीलिङ्गे भावे णचं विधाय णचः स्त्रियामञ्। '३२१७। न कर्मव्यतिहारे ।७।३।२६।' इति वृद्धिप्रतिषेधः॥

४७७—सांराविणं न कर्तव्यं, यावन् नाऽऽयाति दर्शनम्, ॥
संदृष्टायां तु वैदेह्यां निग्राहो वोऽर्थवानरेः ॥ ४३ ॥

सांराविणमित्यादि—सांराविणमभिव्याहृत्या भाषणं न कर्तव्यं युष्माभिः यावन्नायाति दर्शनं सीतेत्यर्थात् संपूर्वाद्रौतेः '३२१८। अभिविधौ भाव इनुण् ।३।३।४४।' तदन्तादणिनुण इत्यण्। तस्मिन् '१२४५। इनण्यनपत्ये ।६।४।१६४।' इति प्रकृतिभावः। यस्मात्संदृष्टायां चेतस्यां वैदेह्यां अरेर्निग्राहः आक्रोशोऽभिभवलक्षणः वो युष्माकमर्थवान्। '३२२०। आक्रोशेऽवन्योर्ग्रहः ।३।३।४५।' इति भावे घञ्॥

---

१ ११९० उपशायो विशायश्च पर्याय-शयनार्थकौ' इति ना० म० ॥

४७८—भ्रग्राहैरिव पात्राणामन्वेष्या मैथिली कृतैः ॥
ज्ञातव्या चेङ्गितैर् धर्म्यैर् ध्यायन्ती राघवाऽऽगमम्.

भ्रग्राहैरित्यादि—पात्राणां भिक्षाभाजनानां भ्रग्राहैरिव कृतैरन्वेष्या मैथिली । भिक्षुकवेषैरिव युष्माभिरित्यर्थः । ग्रहेः '।३२२१। ग्रे लिप्सायाम् ।३।३।४६।' इति भावे घञ् । कर्मणि षष्ठी । इङ्गितैर्धर्म्यैः चेष्टितैः कुलाङ्गनोचितैः ज्ञातव्या सा ध्यायन्ती रामागमम् । कुलाङ्गना हि प्रोषितभर्तृका सर्वदा भर्तुरागमनं ध्यायति ॥

४७९—[1]वेदि-वत् स-परिग्राहा यज्ञियैः संस्कृता द्विजैः ॥[2]
द्रष्टव्या मास-तमादह्नः प्राग-निन्दित-वेश-भृत् ॥४५॥

वेदिवदित्यादि—यथा यज्ञियैर्यज्ञकर्मार्हैर्द्विजैः ब्राह्मणैः । वेदिः यज्ञस्थली । सपरिग्राहा परिगृहीता संस्कृता तथा सा ऽपि अतिपवित्रत्वात् । ग्रहेः '३२२२। परौ यज्ञे ।३।३।४७।' इति यज्ञविषये घञ् । मासतमादह्नः प्राग्दृश्या दर्शनार्हाः । मासस्य पूरणं यदहः । '१८५७। नित्यं शतादिमास—।५।२।५७।' इत्यादिना तमडागमः । अस्मादेव निपातनात् मासस्यासंख्यावाचित्वे डट् । मासतमे ऽह्नीति हेतुं दर्शयन्नाह । तस्याः पूतत्वात्तद्वदनिन्दितवेशभृत् मैथिली मङ्गलमात्राभरणा दर्शनार्हा । तां द्रष्टुं भवतां न चिरकालो भवतीति मासावधिना प्रेषिताः ॥

४८०—नी[3]वार-फल-मूलाऽशानृषीनप्यतिशेरते ॥
यस्या गुणा निरुद्ग्रावास् तां द्रुतं यात, पश्यत. ॥४६॥

नीवारेत्यादि—यस्या गुणा ब्रह्मचर्यादयः ऋषीनप्यतिशेरते न्यकुर्वते तां द्रुतं यात पश्यत । तत्र नीवारः अकृष्टपच्यधान्यम् । '३२२३। नौ वृ धान्ये ।३।३।४८।' इति घञ् । '१०४४। उपसर्गस्य घञ्—।६।३।१२२।' इति दीर्घत्वम् । फलं मोचादि । मूलं शालूकादि । एतान्यश्नन्ति ये ऋषयः । कीदृशा गुणाः । निरुद्ग्रावाः स्थिराः । '३२२४। उदि श्रयति—।३।३।४९।' इति घञ् ॥

४८१—उच्छ्राय-वान् घनाऽऽरावो वानरं जलदाऽरवम् ॥
दूराऽऽप्लावं हनू-मन्तं रामः प्रोचे गजाऽऽप्लवः ४७

उच्छ्रायवानित्यादि—रामो हनूमन्तं प्रोचे । कीदृशः । उच्छ्रायवानुन्नतियुक्तः । पूर्ववद् घञ् । घनस्येवारावो यस्य । '३२२५। विभाषा ऽऽङि रुप्लुवोः ।३।३।५०।' इति भावे घञ् । गजाप्लवः गजगमनः । पक्षे पूर्ववदप् । कीदृशम् । दूराप्लावं दूरमाप्लाव उद्गमनं यस्य । पूर्ववत् घञ् ॥

१—'७२३ । वेदिः परिष्कृता भूमिः, समे स्थण्डिल-चत्वरे ।' २—'(३५५) श्लोकस्थं टिप्पणं प्रेक्षणीयम्' । ३—'९१० तृण-धान्यानि नीवाराः ।' इति ना० अ० । ४—'(४६९) श्लोकस्थं टीकनमवलोकनीयम्' ।

४८२–'अवग्राहे यथा वृष्टिं प्रार्थयन्ते कृषीवलाः, ॥
प्रार्थयध्वं तथा सीतां, यात सुग्रीव-शासनात् ॥४८॥

अवग्राह इत्यादि—अवग्राहो वर्षप्रतिबन्धः । '२२२६। अवे ग्रहः–।३।३।५१।' इति पक्षे अप् । यथा अवग्राहे कृषीवला वृष्टिं प्रार्थयन्ते तथा सीतां यूयं प्रार्थयध्वम् । तस्या दुर्लभत्वादत्यन्तादरणीयत्वाच्च । यात सुग्रीवशासनात् ॥

४८३–वणिक् प्रग्राह-वान् यद्वत् काले चरति सिद्धये, ॥
देशाऽपेक्षास् तथा यूयं याता ऽऽदायाऽङ्गुलीयकम्.'

वणिगित्यादि—तुला प्रगृह्यते येन सूत्रेण स प्रग्राहः । '२२२७। प्रे वणिजाम् ।३।३।५२।' इति करणे घञ् । स तुलासंबन्धी विद्यते यस्य वणिजः । संसर्गे मतुप् । यथा तुलाप्रग्राहवान् तदुपलक्षितो वणिक् काले उचिते क्रयसिद्धये चरति तथा यूयं अङ्गुलीयकं तुलासूत्रस्थानीयं चिह्नमादाय देशापेक्षाः तत्तद्देशस्थितास्तत्र हि चिह्नेन रामदूता इति लक्ष्यन्ते ॥

४८४–अभिज्ञानं गृहीत्वा ते समुत्पेतुर् नभस्-तलम् ॥
वाजिनः स्यन्दने भानोर् विमुक्त-प्रग्रहा इव. ॥५०॥

अभिज्ञानमित्यादि—ते वानरा नभस्तलमुत्पेतुः । वाजिन इव विमुक्तप्रग्रहाः । विमुक्तः प्रग्रहो नियमरज्जुर्येषामिति । '३२२८। रश्मौ च । ३।३।५३।' इति विभाषाग्रहणमनुवर्तते । घञभावपक्षे '३२३४। ग्रह-वृ-दृ-निश्चि-गमश्च ।३।३।५८।' इत्यप् । स्यन्दने रथे भानोरादित्यस्य । किं कृत्वा । अभिज्ञानं गृहीत्वा चिह्नमङ्गुलीयकमादाय ॥

४८५–उदक् शतवलिं कोट्या, सुषेणं पश्चिमां तथा ॥
दिशं प्रास्थापयद् राजा वानराणां कृत-त्वरः ॥५१॥

उदगित्यादि—वानराणां राजा सुग्रीवः शतवलिं नाम वानरं वानराणां कोट्या सह उदगुदीचीं दिशं प्रास्थापयत् । तिष्ठतेर्ण्यन्तस्य लङि रूपम् । उदीचीशब्दात् प्रथमान्ताद्दिशि वर्तमानादस्तातिः । तस्याञ्चतेर्लुक् । लुक् तद्धितलुकीति स्त्रीप्रत्ययस्य लुक् । तस्मिन्निवृत्ते भसंज्ञाभावादीत्वमपि निवर्तते । तसिलादिस्तद्धित एधाचूपर्यन्त इत्यव्ययत्वे द्वितीयालुक् । तथैव सुषेणं वानरं पश्चिमां दिशं प्रास्थापयत् । कृतत्वरः त्वरितः ॥

१—'१५ । वृष्टिर् वर्षं तद्विघाते ऽवग्राहाऽवग्रहौ समौ ।' २—'१४४५ । तुला सूत्रे ऽश्वादिरश्मौ **प्रग्राहः** प्रग्रहो ऽपि च ।' ३—'(४८३) श्लोकस्थं टीकनं प्रेक्ष्यम् इति ना० म०

४८६—प्राचीं तावद्भिर्-व्यग्रः कपिभिर् विनतो ययौ ॥
अ-प्रग्राहैरिवाऽऽदित्यो वाजिभिर्-दूर-पातिभिः. ५२

प्राचीमित्यादि—कपिभिस्तावद्भिरित्येककोटिसंघातैः सह विनतः प्रणतः। सुग्रीव इत्यर्थात्। अव्यग्रः अनाकुलः। प्राचीं पूर्वां दिशं ययौ। यथा आदित्यो वाजिभिरप्रग्राहैः मुक्तबन्धनैः करणभूतैः। '३२२८। रश्मौ च।३।३।५३।' इति घञ्। दूरयायिभिः॥

४८७—ययुर् विन्ध्यं शरन्-मेघैः प्रावारैः प्रवरैरिव ॥
प्रच्छन्नं मारुति-प्रष्ठाः सीतां द्रष्टुं प्लवङ्गमाः ॥ ५३ ॥

ययुरित्यादि—मारुति-प्रष्ठाः हनूमदग्रेसराः सीतां द्रष्टुं विन्ध्यपर्वतं ययुः। शरन्मेघैः प्रावारैरिव प्रच्छन्नम् '३२२९। वृणोतेराच्छादने।३।३।५४।' इति घञ्। प्रवरैः श्रेष्ठैः। अनाच्छादने ग्रहेत्यादिना अप्॥

४८८—परिभावं मृगेन्द्राणां कुर्वन्तो नग-मूर्धसु ॥
विन्ध्ये तिग्मांशु-मार्गस्य चेरुः परिभवोपमे. ॥ ५४ ॥

परीत्यादि—मृगेन्द्राणां सिंहानां परिभावमभिभवं कुर्वन्तः। विन्ध्ये चेरुः भ्रान्ताः।'३२३०। परौ भुवो ऽवज्ञाने।३।३।५५।' इति घञ्। कीदृशे [तिग्मांशुमार्गस्य] परिभवोपमे। आदित्यमार्गस्य परिभवनम्। अत्युच्चत्वात्। घञ्-भावपक्षे अप्॥

४८९—भ्रेमुः शिलोच्चयास् तुङ्गानुत्तेरुरतरान् नदान् ॥
आशंसवो लवं शत्रोः सीतायाश् च विनिश्चयम् ॥५५॥

भ्रेमुरित्यादि—उत्पूर्वाच्चिनोतेः '३२३१। एरच्।३।३।५६।' इत्यच्। शिलाभिरुच्चयो येषां तान् शिलोच्चयान्। भ्रेमुः भ्रमणक्रियाया व्याप्यत्वात् सकर्मकता। नदान् अतरान् तरितुमशक्यान् उत्तेरुः उत्तीर्णवन्तः। शत्रोर्लवमुच्छेदनम्। सीतायाश्च विनिश्चयं विनिर्णयम्। आशंसवः आशंसनशीलाः। '३१४८। सनाशंसभिक्ष उः।३।२।१६८।' तरलवौ '३२३२। ऋदोरप्।३।३।५७।' इति अप्प्रत्ययान्तो विनिश्चयमिति ग्रहेत्यप्॥

४९०—आदरेण गमं चक्रुर्
विषमेष्वव्यथ्य-सङ्गसाः ॥
व्यामुवन्तो दिशो ऽन्यादान्
कुर्वन्तः स-व्यधान् हरीन्. ॥ ५६ ॥

१—'६८१। द्वौ प्रावारोत्तरासंगौ समौ बृहतिका तथा।' २—'१२२४। शैलवृक्षौ नगावगौ।' इति ना० अ०।

आदरेणेत्यादि—विषमेष्वपि प्रदेशेषु गमं गमनं चक्रुः। आदरेणानवज्ञया। ग्रहेत्यप्। असंवसाः त्यक्ताहाराः। '३२३५। उपसर्गेऽदः।३।३।५९।' इत्यपि- '३२३६। घञपोश्च।२।४।३८।' इति अदेर्घस्लादेशः। हरीन् सिंहान्। सप्रघासान् सप्रहारान्। '३२३८। व्यध-जपोः-।३।३।६१।' इत्यप्। सप्रहारस्त्वादन्यादान् परित्यक्ताहारान् कुर्वन्तः। '३२३७। नौ ण च।३।३।६०।' इति निपूर्वाददोऽण् प्रत्ययः। तस्मिन्नदेर्वं घस्लादेशः। चकारादपि तत्र निघसः। दिशो व्याप्नुवन्तः सर्वव्यापिनः॥

४९१—संचेरुः स-हसाः केचिद्,-स्वनाः केचिदाटिषुः॥
संयाम-वन्तो यति-वन्, निगदानपरेऽमुचन्.॥५७॥

संचेरुरित्यादि—सहसाः सस्मिताः। अस्वनास्तूष्णीकाः। '३२३९। स्वन-हसोर्वा।३।३।६२।' इत्यप्। यतिवत् संयामवन्तः नियमवन्तः '३२४०। यमः समुप-नि-विषु च ३।३।६३।' इति वञ्। आटिषुः अटितवन्तः। अटेर्लुङि रूपम्। अपरे निगदान्वचनान्यमुचन्। '३२४१। नौ गद—।३।३।६४।' इत्यादिना विकल्पेनापो विधानात् घञ्॥

४९२—अथ क्लमाद-निःक्वाणा नराः क्षीण- पणा इव॥
अ-मदाः सेदुरेकस्मिन् नितम्बे निखिला गिरेः॥५८॥

अथेत्यादि—अथ परिभ्रमणादनन्तरं क्लमेन परिश्रमेण अमदाः गतहर्षाः। '३२४४। मदोऽनुपसर्गे।३।३।६७।' इत्यप्। अत एव निःक्वाणाः निश्शब्दाः '३२४२। क्वणो वीणायां च।३।३।६५।' इत्यपो विकल्पेन घञ्। वीणादिविषयमेतत्। क्वणेर्निपूर्वादनुपसर्गाद्वीणादिविषयाच्च विकल्पेनाप्प्रत्यय इत्युक्तम्। एकस्मिन् गिरेर्नितम्बे सेदुः निषण्णाः। निखिलाः समस्ता वानराः। क्षीणपणा इव अर्थरहिता नरा इव। पण्यन्त इति पणाः। व्यवहाराय कृते पणे व्यवस्थाप्यन्ते। '३२४३। नित्यं पणः परिमाणे।३।३।६६।' इत्यप्॥

४९३—ततः स-संमदास् तत्र निरैक्षन्त पतत्रिणः॥
गुहा-द्वारेण निर्यातः संमजेन पशूनिव.॥ ५९॥

तत इत्यादि—ततो विश्रामानन्तरं ते तत्र तस्मिन् पर्वते पतत्रिणः पक्षिणो निरैक्षन्त ईक्षितवन्तः। ईक्षेर्लङि रूपम्। कीदृशान् गुहाद्वारेण निर्यातः निर्ग-

---

१—'११७०। निगादो निगदे, मादो मद, उद्वेग उद्भ्रमः।' २—'१९७। निक्वाणो निक्वणः क्वाणः क्वणः क्वणनमित्यपि। १९८ वीणायाः क्वणिते प्रादेः प्रक्वाणः प्रक्वणादयः।' ३—'१२५३। पणो द्यूताऽऽदिषूत्सृष्टे भृतौ मूल्ये धनेऽपि च।'। ४—'३४४। कटको ऽस्त्री नितम्बोऽद्रेः, स्नुः प्रस्थः सानुरस्त्रियाम्।' ५—'५६२। पशूनां समजोऽन्येषां समाजोऽथ सधर्मिणाम्' इति सर्वत्र ना० अ०

च्छतः । निष्पूर्वाद्यातेः शत्रन्तस्य शसि रूपम् । ससंमदाः सहर्षाः । '३२४५। प्रमद-संमदौ-।३।३।६८।' इति निपातितम् । समजेन वृन्देन पशूनिव निर्यातः '३२४६। समुदोरजः पशुषु ।३।३।६९।' इत्यप् ॥

४९४—वीनामुपसरं दृष्ट्वा ते ऽन्योन्योपहवा गुहाम् ॥
प्राविशन्नाहव-प्रज्ञा आहावमुपलिप्सवः. ॥ ६० ॥

वीनामित्यादि—वीनां पक्षिणामुपसरं नैरन्तर्येण निर्गमनं दृष्ट्वा । उपसर इव उपसरः नैरन्तर्यमात्रेणोपलक्षितत्वात् । उपसरो हि स्त्रीगवीषु पुङ्गवानामभिगमनमुच्यते स च नैरन्तर्येण भवति । '३२४८। प्रजने सर्तेः ।३।३।७१।' इत्यप् । ते वानरा अन्योन्योपहवाः परस्परमाह्वानं येषां आगच्छतागच्छत प्रविशत इति । '२५६८। ह्वः संप्रसारणम् ।६।१।३२।' इत्यप् संप्रसारणं च । गुहां प्राविशन् प्रविष्टवन्तः । आहवप्रज्ञाः युद्धप्रज्ञाः । आहूयते युद्धाय स्पर्धते ऽत्र '३२५०। आङि युद्धे ।३।३।७३।' इत्यप् संप्रसारणं च । आहावमुपलिप्सवः उदकाधारमुपलब्धुमिच्छवः । '३२५१। निपानमाहावः।३।३।७४।' इति घञि संप्रसारणं निपात्यते वृद्धिरस्येव । अप्प्रत्यये त्ववृद्धिः ॥

४९५—कुर्वन्तो हवमाप्तानां पिपासा-वध-काङ्क्षिणः ॥
द्वारं तमो-घन-प्रख्यं गुहायाः प्राविशन् द्रुतम् ॥ ६१ ॥

कुर्वन्त इत्यादि—गुहां प्रविश्य तस्याः द्वारमपरं प्राविशन् । आप्तानां स्निग्धानां हवमाह्वानं कुर्वन्तः । '३२५२। भावे ऽनुपसर्गस्य ।३।३।७५।' इत्यप् संप्रसारणं च । पिपासा पातुमिच्छा तृष्णा वधो ऽपनयनम् । '३२५३। हनश्च वधः ।३।३।७६।' इत्यप् वधादेशश्च । तं काङ्क्षितुं शीलं येषामिति । '७१७। काक्षि माक्षि काङ्क्षायाम्' इत्यस्मात् '२९८८। सुप्यजातौ णिनिः-।३।२।७८।' । '२२६२। इदितो नुम्-।७।१।५८।' साधुकारिणि वा । कीदृशं द्वारं तमोघनप्रख्यं तमसो घनः मूर्तिः काठिन्यं तेन सदृशम् '३२५४। मूर्तौ घनः ।३।३।७७।' इति हन्तेरप्प्रत्ययो घनादेशश्च निपात्यते । मूर्तिमत्तम इव द्वारमित्यर्थः ॥

४९६—तस्मिन्नन्तर्घणे ऽपश्यन् प्रघाणे सौध-सद्मनः. ॥
लौहोद्घन-घन-स्कन्धा ललिताऽपघनां स्त्रियम् . ६२

तस्मिन्नित्यादि—द्वारमतिक्रम्य यः सावकाशप्रदेशः सो ऽन्तर्घण इत्युच्यते । तथाह्यन्तर्हन्यते क्रोडीभवत्यस्मिन्निति अनुगतार्थत्वम् । '३२५५। अन्तर्घनो देशे

१—'११८३। प्रजनः स्यादुपसरः ।' २—'८७१। अभ्यामर्द-समाघातसंग्रामाऽभ्यागमा ऽऽहवाः ।' ३—'२८०। आहावस्तु निपानं स्यादुपकूप-जलाशये ।' ४—'१३१८। घनो मेघे मूर्तिगुणे त्रिषु मूर्ते निरन्तरे ।' ५—'३३२। प्रघाण-प्रघणाऽलिन्दा बहिर्द्वार-प्रकोष्ठके ।' ६—'११९२। निधाय तक्ष्यते यत्र काष्ठे काष्ठं स उद्घनः ।' ७—'६३४। अङ्गं प्रतीको ऽवयवो ऽपघनो, ऽथ कलेवरम् ।' इति स० ना० अ० ॥

।३।३।७८' इत्यन्तःपूर्वाद्धन्तेरप् घनादेशः घणादेशो वा ये णकारं पठन्ति । यत्तु संज्ञीभूतो वार्हीकेषु देशविशेष इत्युक्तं तत् संज्ञाशब्दमाश्रित्य । तस्मिन्नन्तरे यत् सौधसद्म धवलगृहं तस्य प्रघणे एकदेशे।'३२५६। प्रघणः प्रवाणश्च ।३।३।७९।' इति निपातितम् । स्त्रियं ललितापघनां ललिताङ्गीमपश्यन् । '३२५९। अपघनो ऽङ्गम् ।३।३।८१।' इति निपातनम् । लोहोद्घनघनस्कन्धाः । यस्मिन् स्थापयित्वा काष्ठादीनि संस्क्रियन्ते स उद्घनः तद्वद्घनाः स्कन्धो येषामिति । '३२५७। उद्घनोऽत्याधानम् । ।३।३।८०।' इति निपातनम् ॥

४९७–सा स्तम्बघ्न[1]-पद-न्यासान् विघनेन्दु-सम-द्युतिः ॥
परिघोरु-भुजानाह हसन्ती स्वागतं कपीन्. ॥ ६३ ॥

सेत्यादि—सा स्त्री हसन्ती कपीन् स्वागतं वच आह । कीदृशी विघनेन्दुसमद्युतिः । विहन्यते अभिभूयते अन्या द्युतिर्येन स विघनः '३२५९। करणेऽयोविद्रुषु ।३।३।८२।' इत्यप् घनादेशश्च । सचेन्दुश्चेति सः । तत्समा द्युतिर्यस्याः । स्तम्बो हन्यते येन पादन्यासेन स स्तम्बघ्नः । तृणकाष्ठादिः । '३२६०। स्तम्बे क च ।३।३।८३।' इति करणे कः ।'२३६३। गम-हन । ६।४।९८।' इत्युपधालोपः । तादृशः पादन्यासो येषां कपीनामिति । परिहन्यते येन । '३२६१। परौ घः ।३।३।८४।' इत्यप् घादेशश्च । परिघो ऽर्गलः । तदनुकारिणो विपुला बाहवो येषामिति ॥

४९८–पिप्रायां ऽद्रि-गुहोपघ्नानु[2]द्घान्[3] संघसमागतान् ॥
फलैर् नाना-रसैश् चित्रैः स्वादु-शीतैश्-च वारिभिः ६४

पिप्रायेत्यादि—तान्विविधैः फलैर्वारिभिश्च पिप्राय तर्पितवती । अद्रिगुहोपघ्नान् । आद्रिगुहैव उपघ्न आश्रयो येषां कपीनाम् ।३२६२। उपघ्न आश्रये ।३।३।८५।' इत्यप् उपधालोपश्च निपात्यते । संघसमागतान् समूहेनागतान् । उद्घान् प्रशस्तान् ।'३२६४। संघोद्घौ गण-प्रशंसयोः ।३।३।८६।' इति समुदोरुपपदयोः हन्तेरपि टिलोपश्च निपात्यते ॥

४९९–निघाऽनिघ-तरु-च्छन्ने तस्मिंस् त लब्धिमः फलैः ॥
तृप्तास् तां भ्राजथु-मतीं पप्रच्छुः-'कस्य पूरियम्.'६५

निघेत्यादि—तस्मिन्प्रघणे निघानिघैर्निमितानिमितैस्तरुभिश्छन्नैः। '३२६५। निघो निमितम् ।३।३।८७।' इति निपूर्वाद्धन्तेरपि टिलोपे निपात्यते । समारोह-परिरोहाभ्यां निमितमित्युच्यते । ते कपयः । लब्धिमैर्लाभनिर्वृत्तैः । '३२६६। ड्वितः

१—'११९३। स्तम्बघ्नस् तु स्तम्बघनः स्तम्बो येन निहन्यते ।' । २—'११७७। स्यादुपघ्नो ऽन्तिकाश्रये ।' । ३—'१४९। मतल्लिका मचर्चिका प्रकाण्डमुद्घ-तल्लजौ । प्रशस्त इति सर्वत्र ना० अ०

क्तिः ।३।३।८८।' फलैस्तृप्ताः सन्वस्तां स्त्रियं आजग्मुमतीं शोभावतीम् । पप्रच्छुः पृष्टवन्तः कस्येयं पूरिति । '२२६७। क्विपो ऽथुच् ।३।३।८९।' तदन्ताम्मतुप् ॥

५००–'रक्षणं करोषि कस्मात् त्वं, यत्नेना ऽऽख्यायतां शुभे !
स्वप्ने निधि-वदाभाति तव संदर्शनं हि नः. ॥ ६६ ॥

रक्षणमित्यादि—हे शुभे ! कस्माद्वा रक्षणं रक्षां करोषि । एतद्यत्नेनादरेण नोऽस्माकमाख्यायताम् । उभयत्रापि '३२६८। यज–याच–।३।३।९०।' इति नङ् । यस्मात्स्वप्ने निधिवत् निधिरिव तव संदर्शनमाभाति । नोऽस्माकमतिदुर्लभत्वात् । स्वप्न इति '३२६९। स्वपो नन् '३।३।९१। निधिरिति '३२७०। उपसर्गे घोः किः ।३।३।९२।' ॥

५०१–ततो जलधि-गम्भीरान् वानरान् प्रत्युवाच सा– ॥
'इयं दानव-राजस्य पूः सृष्टिर् विश्वकर्मणः ॥ ६७ ॥

तत इत्यादि—ततस्तस्मादनन्तरं सा प्रत्युवाच । जलं धीयते अस्मिन्निति अधिकरणे चेति किः । जलधिः समुद्रः । तद्वद्गम्भीरानक्षोभ्यत्वात् । इयं पूः दानवराजस्य विश्वकर्मणः सृष्टिः । सृज्यत इति सृष्टिः । कर्मणि '३२७२। स्त्रियां क्तिन् ।३।३।९४।' ॥

इतः स्त्रीलिङ्गमधिकृत्योच्यते—

५०२–निहतश् च स्थितिं भिन्दन् दानवोऽसौ बल-द्विषा,॥
दुहिता मेरुसावर्णेरहं नाम्ना स्वयं-प्रभा. ॥ ६८ ॥

निहत इत्यादि—असौ दानवराजः स्थितिं मर्यादां भिन्दन् । '३२७३। स्थागा पा-पचो भावे ।३।३।९५।' इति क्तिन् । बलद्विषा इन्द्रेण निहतः । यस्य चाहं दुहिता । स पिता । नाम्ना मेरुसावर्णिः, अहं च नाम्ना स्वयंप्रभेति ॥

५०३–जूतिमिच्छथ चेत् तूर्णं, कीर्तिं वा पातुमात्मनः ॥
करोमि वो बहिर्-यूतीन्, पिधध्वं पाणिभिर्दृशः ६९'

जूतिमित्यादि—यदि तूर्णं शीघ्रं जूतिं गमनमिच्छथ । कीर्तिं वा आत्मनः पातुं रक्षितुम् । वः युष्मान् बहिर्यूतीन् बहिर्भूतान् । '३२७४। ऊति-यूति–।३।३।९७।' इत्यादिना निपातितः । तत्र यौतेर्जवतेश्च क्तिन् दीर्घत्वं च निपात्यते । कीर्तिरपि '१७७५। कृत संशब्दने' स्वार्थिको णिच् । '२५७१। उपधायाश्च ।७।१।१०१।' इतीत्वं तस्मात् क्तिन् । अतः पाणिभिः । दृशो दृष्टीः पिधध्वं आच्छादयध्वम् । अपिपूर्वाद्धाञो लोटि द्विर्वचने '२५०१। दध-स्तथोश्च ।८।२।३८।' इति अभ्यासस्य भष्भावे '२४८३। श्नाभ्यस्तयोः–।६।४।११२।' इत्याकारलोपे '५२। झलां जश् झशि ।८।४।५३।' इति धातोर्दकारे 'वष्टि भागुरिः–' इत्युपसर्गाकारलोपे च रूपम् ॥

१—'११६६। रक्षणम् त्राणे, रणः कणे ।' इति ॥ २—'११९६ । जवने जूतिः सातिः ।' इति सर्वत्र ना० अ० ॥

५०४—व्रज्या-वती निरुद्धाऽक्षान् विद्येवाऽनुष्ठित-क्रियान् ॥
निरचिक्रमदिच्छा-तो वानरांश् चङ्क्रमा-वतः. ॥७०॥

व्रजेत्यादि—सा व्रज्यावती प्रशस्तगमनवती । '३२७५। व्रज-यजोर्भावे क्यप् ।३।३।९८।' प्रशंसायां मतुप् । वानरान्निरुद्धाक्षान् निरचिक्रमत् निष्कासितवती । क्रमेर्ण्यन्तस्य लुङि '२३१६। सन्वल्लघुनि—।७।४।९३।' इति सन्वद्भावात् '२३१७। सन्यतः ।७।४।७९।' इतीत्वम् । २३१८। दीर्घो लघोः ।७।४।९४।' इति न दीर्घत्वं संयोगपरस्य गुरुत्वात् । अनुष्ठितक्रियानाचरिततदुपदिष्टव्यापारान् । '३२७७। कृञः श च ।३।३।१००।' इति शः । '२७५६। सार्वधातुके यक् ।३।१।६७।' । रिङादेशश्च । चङ्क्रमावतः कुटिलगतिमतः । '३२७९। अः प्रत्ययात् ।३।३।१०२।' इत्यकारः । इच्छात इति वानराणामिच्छायाः । '३२७८। इच्छा ।३।३।१०१।' इति निपातितम् । इषेः शप् प्रत्ययः छभावश्च निपात्यते । विद्या । '३२७६। संज्ञायाम् ।३।३।९९।' इति क्यप् । यथा विद्या अनुष्ठितक्रियान् कृतपुरश्चरणान् पुरुषानिच्छातोऽभीष्टं सम्पादयति तद्वत्सेति ॥

५०५—निष्क्रम्य शिक्षया तस्यास् त्रपा-वन्तो रसा-तलात् ॥
ज्ञात्वा मासमतिक्रान्तं व्यथामवललम्बिरे. ॥ ७१ ॥

निष्क्रम्येत्यादि—तस्याः शिक्षया उपदेशेन '३२८०। गुरोश्च हलः ।३।३।१०३।' इत्यकारः । तस्माद्रसातलान्निष्क्रम्य निर्गम्य त्रपावन्तः स्त्रिया उपदेशेन निष्क्रान्ता वयमिति त्रपेति । '३२८१। षिद्भिदादिभ्योऽङ् ।३।३।१०४।' मासमतिक्रान्तं ज्ञात्वा बहिर्निर्गताः सन्तः व्यथां भयम् । भिदादित्वादङ् । अवललम्बिरे वयं मासावधिना प्रेषिताः स च मासो विनैव कार्येणातिक्रान्त इति स्वामिनो भयम् ॥

५०६—चिन्ता-वन्तः कथां चक्रुरुपधा-भेद-भीरवः ॥
'अ-कृत्वा नृ-पतेः कार्यं पूजां लप्स्यामहे कथम्. ७२

चिन्तेत्यादि—उपधानमुपधा परीक्षा । '३२८३। आतश्चोपसर्गे ।३।३।१०६।' इत्यङ् । तत्परिशुद्धो हि भृत्यः कार्येषु नियुज्यते । तदकरणादुपधाया भेदोऽभावः तस्माद्भीरवः । चिन्तावन्त इतिकर्तव्यतामूढाः कथां चक्रुः कृतवन्तः। कीदृशीमित्याह । अकृत्वा नृपतेः कार्यं पूजां लप्स्यामहे कथमिति नैवेत्यर्थः । चिन्तादयः । '३२८२। चिन्ति—पूजि—।३।३।१०५।' इत्यादिना अङन्ताः ॥

५०७—प्रायोपासनया शान्तिं मन्वानो वालि-संभवः ॥
युक्त्वा योगं स्थितः शैले विवृण्वंश्चित्त-वेदनाम्. ॥७३॥

प्राय इत्यादि—उपासनेति । '३२८४। ण्यासश्रन्थो युच् ।३।३।१०७।' प्रायेण अविच्छेदेन उपवासेनोपासना अनशनेनासनमित्यर्थः । तया शान्तिं

कल्याणं मन्वानोऽवगच्छन् उपायान्तराभावात् । वालिसम्भवो ऽङ्गदः । योगश्चित्तवृत्तिनिरोधः । तं युक्त्वा संबध्य शैले स्थितः। चित्तवेदनां चित्तपीडां विवृण्वन् । 'घट्टि-विदि-वन्दिभ्यो युज् वक्तव्यः' इति युच् ॥

५०८—प्रस्कन्दिकामिव प्राप्तो
ध्यात्वा ब्रूते स्म जाम्बवान् ॥
'धिक् शालभञ्जिका-प्रख्यान्
विषयान् कल्पना-रुचीन्, ॥ ७४ ॥

प्रस्कन्दिकामित्यादि—त्वया का क्रिया कर्तव्येत्यन्यैः पृष्टः सन् जाम्बवान् ध्यात्वा विचिन्त्य ब्रूते स्म । प्रस्कन्दिकामिव रोगविशेषमिव प्राप्तो यातः उत्साहाभावात् । '३२८५। रोगाख्यायां ण्वुल् बहुलम् ।३।३।१०८।' शालभञ्जिका क्रीडाविशेषः । '३२८६। संज्ञायाम् ।३।३।१०९।' इति ण्वुल् । '७११। नित्यं क्रीडा—।२।२।१७।' इत्यादिना सः । तत्प्रख्या विषया रूपादयः अतितुच्छत्वात् । अतस्तान् धिक् । किन्तु कल्पनारुचीन् कल्पनीयान् ॥

५०९—यां कारिं राज-पुत्रो, ऽयमनुतिष्ठति, तां क्रियाम् ॥
अहमप्यनुतिष्ठामि' सो ऽप्युक्त्वैवमुपाविशत्. ॥७५॥

यामित्यादि—अयं राजपुत्रो ऽङ्गदो यां कारिं क्रियामनुतिष्ठति तां क्रियां अहमप्यनुतिष्ठामि । '३२८७। विभाषा ऽऽख्यान—परिप्रश्नयोरिञ् च ।३।३।११०' इति करोतेरिञ् । पक्षे '३२७७। कृञः श च ।३।३।१००।' इति शः । सोऽप्येवमुक्त्वा उपाविशत् अनशनेन स्थितः ॥

५१०—उवाच मारुतिर् वृद्धे संन्यासिन्यत्र वानरान् ॥
'अहं पर्याय—संप्राप्तां कुर्वे प्रायोपवेशिकाम्. ॥ ७६ ॥

उवाचेत्यादि—मारुतिर्वानरानुवाच वृद्धे जाम्बवति संन्यासिनि अनशनवति अहमप्यत्र शैले पर्यायेण परिपाट्या संप्राप्तां प्रायोपवेशिकां अनशनं कुर्वे । '३२८८। पर्यायार्हर्ण—।३।३।१११।' इत्यादिना ण्वुल् ॥

५११—अ-भावे भवतां यो ऽस्मिन्
जीवेत्, तस्याऽस्त्वं-जीवनिः, ॥'
इत्युक्त्वा सर्व एवा ऽस्थुर्
बद्ध्वा योगाऽऽसनानि ते. ॥ ७७ ॥

अभाव इत्यादि—अभावे विनाशे भवतां यो ऽस्मिन् लोके जीवेत् तस्यास्त्वजीवनिः धिग्जीवितम् । '३२८९। आक्रोशे नञ्यनिः ।३।३।११२।' एवमुक्त्वा सर्व एव अस्थुः स्थिताः । तिष्ठतेः '२२२३। गाति-स्था—।२।४।७७।' इति सिचो लुक् । बद्ध्वा योगासनानि विरचय्य पद्मासनादीनि ॥

इतस्त्रीलिङ्गभावं निवर्त्य कृदुदाह्रियते—

५१२—अ-क्लेश्यमसिना ऽत्यन्तं कबन्ध-वधमभ्यधुः, ॥
धिङ् नः प्रपतनं घोरं क्लेदाऽन्तत्वम-नाथ-वत् ॥ ७८

अक्लेश्यमित्यादि—कबन्धवधं योजनबाहोर्वधमभ्यधुः अभिहितवन्तः। अभिपूर्वो धाञभिधाने वर्तते। कीदृशं अक्लेश्यं प्रयासरहितम्। कस्मात् असिना सुखमरणात् तं चात्यन्तं अन्ते तस्याग्निरभूत्। अस्माकं धिक् प्रपतनं विनाशम्। दुःखेन घोरत्वात्। क्लेदान्तत्वं अन्ते पूतीभावं तदस्मास्ति। अर्शआदित्वादच्। अनाथानामिव। अक्लेश्यप्रपतनशब्दौ भावसाधनौ। कृत्यल्युटो बहुलमिति ॥

५१३—ततो मन्द-गतः पक्षी तेषां प्रायोपवेशनम् ॥
अशनीयमिवाशंसुर् महानायाद-शोभनः ॥ ७९ ॥

तत इत्यादि—ततो ऽभिहितानन्तरं महान् पक्षी सम्पातिनामा जटायुभ्राता। आयात् आगतः। मन्दगतो मन्दगमनः। '३०५०। नपुंसके भावे क्तः ।३।३।११४।' आहिताग्नित्वात् परनिपातः। तेषां यत्प्रायोपवेशनं तदशनीयमिव भोजनीयमिव। '२८४१। कृत्यल्युटो बहुलम् ।३।३।११३।' इति कृत्यः। आशंसुः आशंसनशीलः। अशोभनः शोभारहितः। दावाग्निना प्लुष्टशरीरत्वात्। '३२९०। ल्युट् च ।३।३।११५।' इति भावे ल्युट्। '३२९१। कर्मणि च येन—।३।३।११६।' इत्येतत्परिहृत्योदाहृतत्वात् ॥

५१४—देह-व्रश्चन-तुण्डाऽग्रं तं विलोक्या ऽशुभाऽऽकरम् ॥
पाप-गोचरमात्मानमशोचन् वानरा मुहुः ॥ ८० ॥

देहेत्यादि—वृश्च्यते येन तुण्डाग्रेण। '३२९३। करणाधिकरणयोश्च ।३।३।११७।' इति करणे ल्युट्। देहस्य व्रश्चनमिति कृद्योगे षष्ठी। देहव्रश्चनं तुण्डाग्रं यस्य तं विलोक्य। वानरा अशुभाकरं पापस्योत्पत्तिस्थानम्। आकर इवाकरः। '३२९६। पुंसि संज्ञायां घः—।३।३।११८।' तत्र हि करणाधिकरणयोरिति वर्तते। एवं उत्तरत्रापि चात्मानं पापगोचरं पापविषयं पापविषये पतिता वयमिति मुहुरशोचन् शोचितवन्तः। '३२९८। गोचर-सञ्चर—।३।३।११९।' इत्यधिकरणे निपातितः ॥

५१५—'जटायुः पुण्य-कृत् पक्षी दण्डकाऽरण्य-सञ्चरः ॥
कृत्वा राघव-कार्यं यः स्वराऽऽरूढो ऽग्नि-संस्कृतः ॥ ८१

जटायुरित्यादि—कृत्वा राघवकार्यम्। अग्निसंस्कृतः अग्निना कृतसंस्कारः। स्वः स्वर्गमारूढः। जटायुः पुण्यकृत्। संचरत्यस्मिन्निति संचरः। पूर्ववत् निपातित। दण्डकारण्यं संचरो ऽवस्थानं यस्येति ॥

१ १०२० प्रश्नन. तूलिका पमे। प्रश्न मा० अ० ॥

५१६–नरकस्या ऽवतारो ऽयं प्रत्यक्षो ऽस्माकमागतः, ॥
अ-चेष्टा यदिहा ऽन्यायादनेना ऽत्स्यामहे वयम्. ८२

नरकस्येत्यादि—अवतीर्यते येन कर्मणेति । '३२९९। अवे तॄस्त्रोर्घञ् । ३।३।१२०।' स एवायं नरकस्यावतारः प्रत्यक्षो ऽस्माकमागतः । यद्यस्माद्वयमचेष्टाः निश्चलाः अनेन पक्षिणा अन्यायादयुक्त्या । नीयते अनेनेति निपूर्वादिणः '३३०१। अध्याय-न्याय–।३।३।१२२।' इति निपातनात् घञ् । अत्स्यामहे भक्षयिष्यामहे । कर्मणि लृट् ॥

५१७–हृदयोदङ्क-संस्थानं कृतान्ताऽऽनाय-सन्निभम् ॥
शरीराऽऽखन-तुण्डा ऽग्रं प्राप्या-ऽमुं शर्म दुर्लभम्. ॥

हृदयेत्यादि—अमुं पक्षिणं प्राप्य । कीदृशं हृदयोदङ्कसंस्थानम् उदञ्च्यते आकृष्यते अनेनेति उत्पूर्वादञ्चतेः। '३३०२। उदङ्को ऽनुदके ।३।३।१२३।' इति घञ् निपात्यते । हृदयस्योदङ्कः संदंशः तत् संस्थानं तत्सदृशम् । कृतान्तानायसन्निभं यमजालतुल्यम् । तत्प्रविष्टस्य दुःखेन निर्गमत्वात् । '३३०३। जालमानायः ।३।३।१२४।' इति नयतेराङ्पूर्वात्करणे घञ् निपात्यते । आखन्यते येन तुण्डाग्रेण । खनो घञ् । शरीरस्याखनं तादृक् तुण्डाग्रं यस्येति । प्राप्य शर्म सुखं दुर्लभं कृच्छ्रलभ्यम् । '३३०५। ईषद्–।३।३।१२६।' इत्यादिना खल् । अत्र करणाधिकरणयोश्चेति निवृत्तम् । '२८३३। तयोरेव कृत्य-क्त-खलर्थाः ।३।४।७०।' इति योज्यम् । '३३०६। उपसर्गात् खल्-घञोः ।७।१।६७।' इति प्राप्तस्य नुमः। '३३०७। न सुदुर्भ्याम्–।७।१।६८।' इति प्रतिषेधः॥

५१८–ईषदाढ्यङ्करो ऽप्येष न परत्रा ऽशुभ-क्रियः, ॥
अस्मान्नुमितो ऽभ्येति परिम्लानो बुभुक्षया. ॥८४॥

ईषदित्यादि—य एष अस्मान्नुमितः प्रदेशादभ्येति आगच्छति स परत्र परलोके ईषदाढ्यङ्करो ऽपि अनाढ्यैरीषदाढ्यो ऽपि न कृतः। अशुभेन कर्मणेत्यर्थात् । '३३०८। कर्तृ-कर्मणोश्च भू-कृञोः ।३।३।१२७।' इति च्व्यर्थे कर्मोपपदात्करोतेः खल्। यतः परिम्लानो बुभुक्षया। यो हि कर्मणा शुभेन ईषदाढ्यङ्करोऽपि न कृतः स कथं न बुभुक्षया पीड्यते । परिम्लायतीति कर्तरि बहुलवचनात् ल्युट् । निष्ठान्तो वा । '३०१७। संयोगादेः– ।८।२।४३।'इत्यादिना निष्ठानत्वम् । अशुभक्रियः सत्त्वद्रोहाभिरतत्वात् ॥

५१९–संप्राप्य वानरान् पक्षी जगाद मधुरं वचः– ॥
'के यूयं दुरुपस्थाने मनसा ऽप्यद्रि-मूर्धनि. ॥ ८५ ॥

इति कृदधिकारः ।

१—'२७०। आनायः पुंसि जालं स्यात्क्षणसूत्रं पवित्रकम् ।' इति अ० को० ।

संप्राप्येत्यादि—वानरान् संप्राप्य पक्षी जगाद गदितवान्। के यूयं अद्रि-मूर्धनि पर्वतशिरसि दुरुपस्थाने दुःखेनोपस्थातुं शक्ये मनसापि किं पुनः शरीरेण। '३२०९। आतो युच्–।३।३।१२८।' तत्रापि ईषदादयो ऽनुवर्तन्ते। कर्तृकर्मणोरिति न स्मर्यते॥

इति कृदधिकारः॥

अथ प्रकीर्णकाः।

इतः प्रकीर्णकश्लोकानाह—

५२०—आत्मनः परिदेवध्वे कुर्वन्तो राम-संकथाम्, ॥
समानोदर्यमस्माकं[1] जटायुं च स्तुथा ऽऽदरात्. ॥८६॥

आत्मन इत्यादि—आत्मनः परिदेवध्वे शोचथ '५३४। देवृ देवने' इति भौवादिकः। शसि '३५५। न संयोगाद्वमन्तात् ।६।४।१३७।' इत्यल्लोपो न भवति। जटायुं च समानोदर्यं भ्रातरमस्माकम्। '१६५९। समानोदरे शयितः ।४।४।१०८।' इति यत्। आदरात् प्रस्तुथ प्रस्तुतिं कुरुथ। जटायुः पुण्यकृदित्यादिना। रामसत्कथां च कुर्वन्तः अतः के यूयमिति॥

५२१—शङ्का-धवित्र[2]-वचनं प्रत्यूचुर् वानराः खगम्— ॥
'वयं शत्रु-लवित्रेषोर्[3] दूता रामस्य भू-पतेः. ॥ ८७॥

शङ्केत्यादि—धुनोत्यपनयत्यनेनेति धवित्रम्। '३१३५। अर्ति-लू-धू–।३।२।१८४।' इत्यादिना करणे इत्रः। किमयं करिष्यतीति शङ्काधवित्रं वचनं यस्य तं खगं वानराः प्रत्यूचुः। शत्रुलवित्रा इषवो बाणा यस्य रामस्य भूपतेस्तस्य वयं दूताः। पूर्ववदित्रं कृत्वा सः॥

५२२—केना ऽपि दौष्कुलेयेन कुल्यां माहाकुलीं प्रियाम् ॥
हृतां माहाकुलीनस्य तस्य लिप्सामहे वयम्. ॥ ८८॥

केनेत्यादि—तस्य रामस्य प्रियां केनापि दौष्कुलेयेन हृताम्। दुष्कुलस्यापत्यमिति '११६५। दुष्कुलाड्ढक् ।४।१।१४२।' कुल्यां कुले साध्वीं '१६५०। तत्र साधुः ।४।४।९८।' इति यत्। माहाकुलीं माहाकुलीनस्येति महाकुलस्यापत्यमिति '११६४। महाकुलादञ्खञौ ।४।१।१४१।' इति अञ्खञौ। लिप्सामहे वयं लब्धुमिच्छामः॥

५२३—त्रिंशत्तममहर् यातं मत्वा प्रत्यागमाऽवधिम् ॥
अ-कृताऽर्था विषीदन्तः पर-लोकमुपास्महे. ॥ ८९॥

१—'५९७ समानोदर्य-सोदर्य-सगर्भ्य-सहजाः समाः।'। २—'७२९। धवित्रं व्यजनं तद् यद् रचितं मृगचर्मणा।' ३—'८९८ दात्रं लवित्र-मायन्तो योत्रं योक्त्रमथो फलम्' इति सर्वत्र ना० म०।

त्रिंशादित्यादि—त्रिंशतः पूरणम् । '१८५६। विंशत्यादिभ्यः—।५।२।५६।' इति तमट् । त्रिंशत्तमं यदहः तत् प्रत्यागमावधिं प्रत्यागमनस्यावधिं यातं अतीतं मत्वा अकृतार्था अनिष्पादितप्रयोजना विषीदन्तो विषादं गच्छन्तो वयं परलोकमुपास्महे प्रायोपवेशनेन म्रियामहे ॥

५२४—म्रियामहे, न गच्छामः कौशल्यायनि-वल्लभाम् ॥
उपलभ्यामं-पश्यन्तः कौमारीं पततां वर ! ॥९०॥'

म्रियामह इत्यादि—हे पततां पक्षिणां वर ! म्रियामहे न गच्छामः किमिति कौमारीं अकृतपूर्वदारपतिं लब्धवतीम् । '१२१४। कौमारापूर्ववचने ।४।२।१३।' इति साधुः । कौशल्यायनिवल्लभाम् । कौशल्याया अपत्यं कौशल्यायनी रामः । '११७९। कौशल्य—कार्माय्याभ्यां च ।४।१।१५५।' इति फिञ् । फस्यायनादेशः । तस्य वल्लभां इष्टां उपलभ्यां प्रशस्ताम् । '२८४४। पोरदुपधात् ।३।१।९८।' इति यत् । '२८४६। उपात्प्रशंसायाम् ।७।१।६६।' इति यत्प्रत्यये नुम् । अपश्यन्तोऽनुपलभमानाः । एते प्रकीर्णकाः ॥

इतः ङिदतिशेषमधिकृत्याह—

५२५—जगाद वानरान् पक्षी-'नाध्यगीढ्वं ध्रुवं स्मृतिम् ॥
यूयं संकुटितुं यस्मात् कालेऽस्मिन्नध्यवस्यथ. ॥९१॥

जगादेत्यादि—ध्रुवं अवश्यं स्मृतिं स्मृतिशास्त्रं नाध्यगीढ्वं नाधीतवन्त इति पक्षी वानरान् जगाद ।'२४६०। विभाषा लुङ्—लृङोः ।२।४।५०।' इति विभाषा गाङादेशः । '२४६१। गाङ्कुटादिभ्यः—।१।२।१।' इति सिचो ङित्वम् । '२३६२। घुमा-स्था—।६।४।६६।' इतीत्वम् '२२४९। धि च ।८।२।२५।' इति सिचो लोपः । '२२४७। इणः षीध्वम् ।८।३।७८।' इति मूर्धन्यः । यस्माद्यूयमस्मिन् काले संकुटितुं अवसातुमध्यवस्यथ अभिप्रायं कुरुथ । कुटादित्वात् ङित्वम् ॥

अयमेवावसातुं काल इति चेदाह—

५२६—नाऽयमुद्विजितुं कालः स्वामि-कार्याद् भवादृशाम् ॥
हृत-सार्ये च्युते राज्याद् रामे पर्युत्सुके भृशम्. ॥९२॥

नायमित्यादि—भवादृशां युष्मद्विधानां स्वामिकार्यादुद्विजितुं नायं कालः। '२५३६। विजः—।१।२।२।' इति ङित्त्वम् । किमिति न भवतीति चेदाह—राज्याच्च्युते भ्रष्टे रामे निर्वासितत्वात्। तत्रापि हृतभार्ये भृशमत्यर्थं पर्युत्सुके सीतायाम् ॥

५२७—यत्नं प्रोर्णवितुं तूर्णं दिशं कुरुत दक्षिणाम्, ॥
प्रोर्णुवित्रीं दिवस् तत्र पुरीं द्रक्ष्यथ काञ्चनीम्. ॥९३॥

यत्नमित्यादि—दक्षिणां दिशं प्रोर्णवितुं आच्छादयितुं छादयिष्याम इति तुमुन् । तूर्णं शीघ्रं यत्नं कुरुत । तस्यां दिशि पुरीं द्रक्ष्यथ । काञ्चनीं । '१५३२। प्राणिरजतादिभ्यो ऽञ् ।४।३।१५४।' प्रोर्णुवित्रीं अभिव्यापिनीम् इति स्पष्ट ।

दिश आकाशस्य । कर्मणि षष्ठी । '२४४७। विभाषोर्णोः ।१।२।३।' इति ङित्त्वपक्षे उवङ् । अङित्त्वपक्षे च गुणः । कुरुतेति '२२३४। सार्वधातुकमपित् ।१।२।४।' इति ङित्त्वे विकरणस्य गुणो न भवति । तस्य चार्धधातुकत्वात् अङित्त्वे धातो-र्गुणः । '२४६७। अत उत् सार्वधातुके ।६।४।११०।' इति उत् ॥

कालापकम् ९४–९७—

५२८—लङ्कां नाम्ना गिरेर् मूर्ध्नि राक्षसेन्द्रेण पालिताम् ॥
निर्जित्य शक्रमानीता ददृशुर् यां सुर-स्त्रियः ॥९४॥

लङ्कामित्यादि—यां पुरीं नाम्ना लङ्कां सुरस्त्रियो ददृशुः दृष्टवत्यः । '२२४२। असंयोगाल्लिट् कित् ।१।२।५।' इति कित्त्वम् । तां यातेति वक्ष्यमाणेन सम्बन्धः । गिरेः सुवेलस्य मूर्ध्नि स्थितां राक्षसेन्द्रेण पालितामिति दुर्गमत्वमाख्यातम् । शक्रं निर्जित्य सुरस्त्रिय आनीता इति च रावणस्य माहात्म्यम् ॥

५२९—बभूव या ऽधिशैलेन्द्रं मृदित्वेवैन्द्र-गोचरम् ॥
कुषित्वा जगतां सारं सैका शङ्के कृता भुवि. ॥९५॥

बभूवेत्यादि—अधिशैलेन्द्रं शैलेन्द्रस्य सुमेरोरुपरि । सप्तम्यर्थेऽव्ययीभावः । इन्द्रगोचरमिन्द्रनिलयममरावत्याख्यं मृदित्वेव तिरस्कृत्येव बभूव । '३३९३। इन्धि-भवतिभ्यां च ।१।२।६।' इति कित्त्वम् । जगतां सारं कुषित्वा न निष्कृष्य । सैका भुवि कृता निर्मितेत्यहं शङ्के । तां यात मृदित्वा कुषित्वेति '३३२२। न क्त्वा सेट् ।१।२।१८।' इति कित्त्वप्रतिषेधे प्राप्ते '३३२३। मृड-मृद—।१।२।७।' इत्यादिना कित्त्वम् ॥

५३०—अ-मृडित्वा सहस्राऽक्षं क्लिशित्वा कौशलैर् निजैः ॥
उदित्वा ऽलं चिरं यत्नात् सैका धात्रा विनिर्मिता. ९६

अमृडित्वेत्यादि—सहस्राक्षमिन्द्रममृडित्वा असुखितं कृत्वा । निजैः आत्मीयैः कौशलैः चिरं क्लिशित्वा प्रयत्नं कृत्वा । उदित्वा अभिधायालं पर्याप्तमेवं करिष्यामीति । यत्नात् महता प्रयासेन । सैका धात्रा विनिर्मिता । पूर्ववत्कित्त्वम् ॥

५३१—मुषित्वा धन-दं पापो यां गृहीत्वा ऽवसद् द्विषन्, ॥
तां रुदित्वेव शक्रेण यात लङ्कामुपेक्षिताम्. ॥ ९७ ॥

मुषित्वेत्यादि—मुषित्वा धनदं वैश्रवणं तस्मात्पुरं पुष्पकं च विमानमपहृत्य । पापः पापाचरणात् यां गृहीत्वा अवसत् उषितः । द्विषन् शत्रुः । शक्रेण रुदित्वेवोपेक्षितामवधीरिताम् । '२६०९। रुद-विद—।१।२।८।' इति कित्त्वम् । तत्र चकारेण क्त्वेत्यनुवर्तते ॥

१—७१ । [illegible] सप्तार [illegible] । [illegible]
[illegible] ॥

५३२—विदित्वा शक्तिमात्मीयां रावणं विजिघृक्षवः ॥
उक्तं पिपृच्छिषूणां वो मा स्म भूत सुषुप्सवः. ॥९८॥

विदित्वेत्यादि—आत्मीयां शक्तिं सामर्थ्यं विदित्वा। पूर्ववत्कित्त्वं। रावणं विजिघृक्षवः विग्रहीतुमिच्छवः। सुषुप्सवः शयितुमिच्छवो मा स्म भूत। न प्रमत्ता भवतेत्यर्थः। रावणस्य बलीयस्त्वादिदमुक्तं मया वो युष्माकं पिपृच्छिषूणां प्रष्टुमिच्छूनाम्। अत्र '२६०९। रुद-विद।१।२।८।' इति सनः कित्त्वे सम्प्रसारणम्। प्रच्छेः '२६११। किरश्च पञ्चभ्यः।७।२।७५।' इतीडागमः॥

५३३—ना ऽविविदिषुमभ्येति सम्पद् रुरुदिषुं नरम्, ॥
किं मुमुषिषु-वद् यात द्विषो ना ऽपचिकीर्षया. ॥९९॥

नेत्यादि—वेदितुं ज्ञातुमिच्छुर्यो न भवति तं नरमविविदिषुं रुरुदिषुं रोदितुमेषणस्वभावं सम्पद्विभूतिर्नाभ्येति नागच्छतीति वो मयोक्तमिति योज्यम्। किं न यात न गच्छत। मुमुषिषुवत् चौरवदित्यर्थः। पूर्ववत्कित्त्वम्। द्विषः शत्रोरपचिकीर्षया अपकर्तुमिच्छया। '२६१२। इको झल्।१।२।९।' इति कित्त्वे गुणो न भवतीति '२६१४। अज्झनगमां सनि।३।४।१६।' इति दीर्घः। '२३९०। ऋत इद्धातोः।७।४।१००।'॥

५३४—बुभुत्सवो द्रुतं सीतां भुत्सीध्वं, प्रब्रवीमि वः, ॥
मा च भुद्ध्वं मृषोक्तं नः, कृषीढ्वं स्वामिने हितं १००

बुभुत्सव इत्यादि—बुभुत्सवो ज्ञातुमिच्छवः यदि सीताम्। बुधेः सन्नन्तात् '२६१३। हलन्ताच्च।१।२।१०।' इति कित्त्वम्। '३२६। एकाचः।८।२।३७।' इति भष्भावः। तदा द्रुतं तां भुत्सीध्वं जानीतेति वो युष्मान् ब्रवीमि। '२३००। लिङ्-सिचौ—।१।२।११।' इति कित्त्वम्। मृषोक्तं मिथ्योक्तं नो ऽस्माकं मा च भुद्ध्वं न जानीत, अपि तु सत्यम्। '२२८१। झलो झलि।८।२।२६।' इति सिचो लोपः। '५२। झलां जश् झशि।८।४।५३।' कित्त्वं पूर्ववत्। अतो यूयं स्वामिने रामाय हितं कृषीढ्वं कुरुत। '२३६८। उश्च।१।२।१२।' इति कित्त्वम्। '२२४७। इणः षीध्वं—।८।३।७८।' इति मूर्धन्यः॥

५३५—समगध्वं पुरः शत्रोर्, मोदयध्वं रघूत्तमम्, ॥
नोपायध्वं भयं, सीतां नोपायंस्त दशाननः. ॥१०१॥

समगध्वमित्यादि—इदमहमाशंसे यदुत शत्रोः रावणस्य पुरः अग्रतः समगध्वं संगता भवत। '२७९०। आशंसायां भूतवच्च।३।३।१३२।' इति लुङ्। '२६९९। समो गम्यृच्छि—।१।२।३।' इति तङ्। '२७००। वा गमः।१।३।२९।' इति सिचः कित्त्वे '२४२८। अनुदात्त—।६।४।३७।' इत्यनुनासिकलोपः। '२३।

१—'७७६। रिपौ वैरि-सपत्नारि-द्विषद्-द्वेषण-दुर्हृदः। द्विड्-विपक्षा ऽहिताऽमित्र-दस्यु-शात्रव-शत्रवः।' इति मा० अ०।

६१। ह्रस्वादङ्गात् ।८।२।२७।' इति सिचो लोपः । मोदयध्वं रघूत्तमं हर्षयत । तत्कार्यकरणात् । मा च भयमुपायध्वं सूचयत । भयं मा कार्ष्टेत्यर्थः । '२६९५। आङो यमहनः ।१।३।२८।' इति तङ् । '२६९८। यमो गन्धने ।१।२।१५।' इति तङ् । यमो गन्धन इति सिचः कित्त्वे अनुनासिकलोपः । गन्धनं सूचनम् । अन्यथा युष्मासु गन्धितलयेषु नियतमसौ दशाननः सीतामुपायंस्त स्वीकृतवान् स्यात् । तस्य दुर्वृत्तत्वात् । '२७९०। आशंसायां भूतवच्च ।३।३।१३२।' इत्यनिष्टाशंसायां लुङ् । '२७२९। उपाद्यमः स्वकरणे ।१।३।५६।' इति तङ् । स्वकरणं चात्र विवाहनमुक्तम् । '२७३०। विभाषोपयमने ।१।२।१६।' इति अकित्त्वपक्षे रूपम् ॥

५३६—ततः प्रास्थिषता ऽद्रीन्द्रं महेन्द्रं वानरा द्रुतम् ॥
सर्वे किलकिलायन्तो, धैर्यं चाऽऽधिषता ऽधिकम् ॥

तत इत्यादि—ततः सम्पातिवचनानन्तरं सर्वे वानरा महेन्द्रं पर्वतं प्रास्थिषत प्रस्थितवन्तः । धैर्यं चाधिकमाधिषत आहितवन्त आत्मनि । तिष्ठतेर्दधातेश्च '२३८९। स्था-घ्वोरिच्च ।१।२।१७।' इति कित्त्वमित्त्वं च । तिष्ठतेः '२६८९। समव-प्र-विभ्यः स्थः ।१।३।२२।' इति तङ् । किलकिलायन्तः किलकिलाध्वनिं कुर्वाणाः । '८१। अव्यक्तानुकरण—।६।१।९८।' इत्यादिना डाच् तदन्तात् '२६६८। लोहितादिडाज्भ्यः क्यष् ।३।१।१३।' । '२६६९। वा क्यषः ।१।३।९०।' इति परस्मैपदम् ॥

कुलकम् १०३—१०७—

५३७—निकुञ्जे तस्य वर्तित्वा रम्ये प्रक्ष्वेदिताः परम् ॥
मणि-रत्नाऽधिशयितं प्रत्युदैक्षन्त तोय-धिम् ॥१०३॥

निकुञ्ज इत्यादि—तस्य पर्वतस्य निकुञ्जे लतादिपिहितस्थाने वर्तित्वा स्थित्वा । '३३२२। न क्त्वा सेट् ।१।२।१८।' इति कित्त्वप्रतिषेधः । परं प्रक्ष्वेदिता उच्चैरव्यक्तशब्दं कुर्वाणाः । '३०५२। निष्ठा शीङ्—।१।२।१९।' इति कित्त्वप्रतिषेधः । तोयधिं प्रत्युदैक्षन्त दृष्टवन्तः । लङि रूपम् । कीदृशं मणिरत्नाधिशयितम् । '३०८७। क्तो ऽधिकरणे च ।३।४।७६।' इति क्तः पूर्ववत्कित्त्वप्रतिषेधः । मणिर्यद्रत्नमिति स्त्रीरत्नादावपि रत्नशब्दस्य दृष्टत्वात् एकपदव्यभिचारे विशेषणविशेष्यभावः । तस्याधिशयितमवस्थानमित्यर्थः ॥

५३८—अ-मर्षितमिव घ्नन्तं तटाऽद्रीन् सलिलोर्मिभिः ॥
श्रिया समग्रं द्युतितं मदेनेव प्रलोठितम् ॥ १०४ ॥

१—'३४८। निकुञ्ज-कुञ्जौ वा क्लीबे लतादिपिहितोदरे ।' । २—'२५९। भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिरथोर्मिषु ' इति ना० म०

अमर्षित इत्यादि—सलिलोर्मिभिः कल्लोलैः। तटाद्रीन् तटस्थान् पर्वतान् भ्रन्तं प्रत्युदैक्षन्त। अमर्षितमिव '२०५५। मृषस्तितिक्षायाम् ।१।२।२०।' इति किस्त्वप्रतिषेधः। पश्चात् नञ्समासः। श्रिया हेतुभूतया समग्रं संपूर्णम्। द्युतितमिति कर्तरि निष्ठा। यदि वा श्रिया कर्तृभूतया द्युतितं शोभितम्। यत्रेत्यध्याहृत्य तमैक्षन्तेति योज्यम्। एवं च कृत्वा '२०५६। उदुपधात्–।१।२।२१।' इत्यादिना भावे निष्ठायां विकल्पेन किस्त्वप्रतिषेधात् किस्त्वमुदाहृतम्। मदेनेव मत्ततयेव। श्रिया हेतुभूतया प्रलोठितं घूर्णितुमारब्धम्। '२०५३। आदिकर्मणि–।३।४।७१।' निष्ठायामकिस्त्वमुदाहृतम्॥

५३९—पूतं शीतैर् नभस्वद्भिर्[1] ग्रन्थित्वेव स्थितं रुचः॥
गुम्फित्वेव निरस्यन्तं तरङ्गान्[2] सर्वतो मुहुः॥१०५॥

पूतमित्यादि—नभस्वद्भिर्वायुभिः शीतैः पूतं पवित्रीकृतम्। '२०५०। पूङश्च ।७।२।५१।' इति विकल्पेनेट्। अत एव पक्षे पूङः क्त्वानिष्ठयोः किस्त्वप्रतिषेधोऽत्र न भवति। तत्र सेडित्यनुवर्तते। रुचो दीप्तीर्ग्रन्थित्वेव संदर्भ्येव स्थितम्। '३३२४। नोपधात्थफान्ताद्वा ।१।२।२३।' इति किस्त्वप्रतिषेधपक्षे रूपम्। सर्वतस्तरङ्गान् गुम्फित्वेव निरस्यन्तं क्षिपन्तम्। नोपधादिति विकल्पेन किस्त्वप्रतिषेधः। यत्रेत्यध्याहृत्य तमैक्षन्तेति योज्यम्॥

५४०—वञ्चित्वा ऽप्यम्बरं दूरं स्वस्मिंस् तिष्ठन्तमात्मनि॥
तृषित्वैवा ऽनिशं स्वादु पिबन्तं सरितां पयः॥१०६॥

वञ्चित्वेत्यादि—स्थित्यनतिक्रमादम्बरं दूरं वञ्चित्वातिक्रम्य। '३३२५। वञ्चि-लुञ्चि–१।२।२४।' इति किस्त्वप्रतिषेधः। स्वस्मिन्नात्मनि स्वरूपे तिष्ठन्तम्। अत्र '१४०। नश्छव्यप्रशान् ।८।३।७।' इति नकारस्य रुत्वम्। पूर्वस्य त्वनुनासिकादेशः। तृषित्वेव तृषित इव भूत्वा। '३३२६। तृषि-मृषि–।१।२।२५।' इत्यादिना [किस्त्वविकल्पः।] प्रतिषेधः। तत्सलिलस्य स्वादुत्वात्। सरितां पयः स्वादु पिबन्तं अनिशमजस्रम्॥

५४१—द्युतित्वा शशिना नक्तं[3] रश्मिभिः[4] परिवर्धितम्॥
मेरोर् जेतुमिवा ऽऽभोगमुच्चैर् दिद्योतिषुं मुहुः॥१०७॥

द्युतित्वेत्यादि—शशिना नक्तम् रात्रौ द्युतित्वा दीप्तिमता भूत्वा। रश्मिभिः परिवर्धितं वृद्धिं नीतं सन्तं तोयधिं मेरोराभोगं महत्त्वं जेतुमिव मुहुरुच्चैर्दिद्योतिषुं वर्धितुमिच्छुमित्यर्थः। अनेकार्थत्वाद्धातूनाम्। द्युतित्वा दिद्योतिषुमिति '२६१७। रलो व्युपधात्–।१।२।२६।' इति किस्त्वाकिस्त्वे। तत्र द्युकारो-

---

१—'७०। नभस्वद्-वात-पवन-पवमान-प्रभञ्जनाः।' २—(५३८) श्लोकस्थं टिप्पणं विलोकनीयम्। ३—'१४७१ दिवा ऽह्नीत्यथ दोषा च नक्तं च रजनावपि।' ४—'११८। किरणोस्रमयूखांऽशु-गभस्ति-घृणि-रश्मयः।' इति सर्वत्र ना० अ०।

षधादिकारोपधाच्च रलन्ताद्धलादेर्धातोः परौ क्त्वासनौ वा न कितौ भवत इति सूत्रार्थः ॥

५४२—विलोक्य सलिलोच्चयानधि-समुद्रमभ्रंलिहान्
भ्रमन्-मकर-भीषणं समधिगम्य चाऽधः पयः ॥
गमाऽऽगम-सहं द्रुतं कपि-वृषाः[2] परिप्रैषयन्
गजेन्द्र-गुरु-विक्रमं तरु-मृगोत्तमं मारुतिम् [1] ॥१०८॥

विलोक्येत्यादि—कपिवृषाः कपिमुख्या मारुतिं हनुमन्तं द्रुतं परिप्रैषयन् व्यसर्जयन् । परिप्रपूर्वात् '१२०२। इष गतौ' इत्यस्मात् हेतुमण्ण्यन्तात् लङि रूपम् । किं कृत्वेत्याह । विलोक्य सलिलोच्चयान् सलिलोर्मीन् । ऊर्ध्वं चीयत इति '३२२१। एरच् ।३।३।५६।' । अधिसमुद्रं समुद्रस्योपरि । अभ्रंलिहान् दूरमुच्छ्रितान् । अधश्च पयः समधिगम्य ज्ञात्वा । कीदृशम् भ्रमद्भिर्मकरैर्भीषणं भयानकम् । भीषयतीति नन्द्यादित्वाल्ल्युः । गमागमसहं गमनागमनयोर्यं मारुतिम् । गजेन्द्रस्येव गुरुर्विक्रमो यस्य । तरुमृगेषु वानरेषूत्तममिति । सप्तमीति योगविभागात् सः ॥

॥ इति ङित्त्वाधिकारः ॥

इति श्री-जयमङ्गलाऽऽख्या व्याख्यया समलंकृते श्री-भट्टिकाव्ये-
द्वितीयेऽधिकार-काण्डे लक्षण-रूपे द्वितीयः परिच्छेदः (वर्गः),
तथा लक्ष्य-रूपे कथानके सीताऽन्वेषणं नाम सप्तमः
सर्गः पर्यवसितः ।

अष्टमः सर्गः ।

आत्मनेपदमधिकृत्याह—

५४३—अगाधत ततो व्योम हनूमानुरु-विग्रहः, ॥
अत्यशेरत तद्-वेगं न सुपर्णा[3]ऽर्क-मारुताः ॥ १ ॥

अगाधतेति—ततो विसर्जनानन्तरं हनूमान् समुद्रलङ्घनाय व्योमाकाशमगाधत प्रस्थितवान् । '७। गाधृ प्रतिष्ठा-लिप्सयोः ।' इत्यस्माल्लङ् । '२१५७। अनुदात्तङित:—।१।३।१२।' इत्यनुदात्तेत्त्वादात्मनेपदम् । उरुविग्रहः कामरूपित्वात् तदानीमुत्पादितविपुलकायः । तस्य चोत्पततो वेगं गरुडादित्यपवनाः नात्यशेरत नातिक्र-

---

१—'पद्येऽस्मिन् पृथ्वी वृत्तम् । तल्लक्षणं तु—'१४। ज-सौ ज-स-य-ला वसु-ग्रहयतिश्च पृथ्वी गुरुः ।' इति वृत्तरत्नाकरे भट्टकेदार आह । २—'१४२०। शुक्ले मूर्षिश्रेष्ठे सुकृते वृषभे वृषः ।' ३—'२२। गरुत्मान् गरुडस् तार्क्ष्यो वैनतेयः खगेश्वरः १४ नागान्तको विष्णुरथः सुपर्णः । इति सर्वत्र ना० स० ॥

शयितवन्तः। ङित्वात्तङ्। '२४४२। शीङो रुट् ।७।१।६।' '२४४१। शीङः सार्वधातुके गुणः ।७।४।२१।'॥

५४४–अभायत यथाऽर्केण सुप्रातेन शरन्-मुखे, ॥
गम्यमानं न तेनाऽऽसीदगतं क्रामता पुरः. ॥ २ ॥

अभायतेत्यादि—यथा अर्केण सुप्रातेन सुप्रभातेन नीहाराद्यभावात्। शोभनं प्रातरनेनेति।'८६०। सुप्रात-सुश्व–।५।४।१२०।' इति समासान्तनिपातनम्। शरन्मुखे शरदारम्भे। अभायत दीप्यते स्म। '२६७९। भाव-कर्मणोः ।१।३।१३। इति भावे तङ्। तद्वत्तेनाभायत। पुरोऽग्रतो यदर्केण गम्यमानमवष्टभ्यमानं वर्त्मेत्यर्थात्। कर्मण्यात्मनेपदम्। तेन हनूमता क्रामता गच्छता। शिति क्रम इति दीर्घत्वम्। नागतमासीत् अपि तु सर्वमेव गतमिति॥

५४५–वियति व्यत्यतन्वातां मूर्ती हरि-पयोनिधी, ॥
व्यत्यैतां चोत्तमं मार्गमर्केन्द्रेन्दु-निषेवितम्. ॥ ३ ॥

वियतीत्यादि—हरिपयोनिधी हनूमत्समुद्रौ मूर्ती स्वदेहौ वियत्याकाशे व्यत्यतन्वातां व्यतिविस्तारितवन्तौ। तनोतेर्लङ्। '२६८०। कर्तरि कर्मव्यतिहारे ।१।३।१४।' इत्यात्मनेपदम्। उत्तमं च मार्गं अर्केन्द्रेन्दुनिषेवितं व्यत्यैतां व्यतिगतवन्तौ। इणः परस्य लङः कर्मव्यतिहार इत्यात्मनेपदं प्राप्तं '२६८१। न गति-हिंसार्थेभ्यः ।१।३।१५।' इति गत्यर्थत्वात् प्रतिषिद्धं, तेन तसस्तामादेशः। तत्र हरेर्गच्छतः पुरतो यस्मिन्वियत्प्रदेशे स्वमूर्तिं विस्तारितुमवसरो भविता, तत्र पयोनिधिरूर्मिभिः स्वमूर्तिं वितस्तार। पयोनिधेश्च वेला तटं गच्छतो यत्र स्वमूर्तिविस्तारावसरो भावी तत्र हरिः स्वमूर्तिं वितस्तार। तथा पयोनिधेर्यं मार्गं गन्तुमवसरो भविता, हरिरुत्पत्य तं मार्गं गन्तुमैच्छत्। यं च हरेर्मार्गं गन्तुमवसरो भविता तं मार्गं पयोनिधिरभ्रंलिहैरूर्मिभिरैच्छत्। यत्र यत्क्रियावसरे क्रियां करोति स तत्र तत्क्रियाकारीत्युपचर्यते। यथा देवदत्तसाध्यां क्रियां यज्ञदत्तः कुर्वन् तत्कारीत्युच्यते। ततश्चेतरेणेतरसंबन्धिन्याः क्रियायाः करणात् अन्यतरसंबन्धिन्याश्चेत् सम्भवति कर्मव्यतिहारः॥

५४६–व्यतिजिग्ये समुद्रोऽपि न धैर्यं तस्य गच्छतः ॥
व्यत्यगच्छन् न च गतं प्रचण्डोऽपि प्रभञ्जनः. ॥४॥

व्यतीत्यादि—तस्य हरेर्गच्छतः स्वदेहस्याल्पतां कर्तुं योऽवसरो भावी तत्र समुद्रो नातिशयधैर्यं कृतवान्। तेन तस्य धैर्यं न जितं, तदानीं तस्योद्धतकल्लोलत्वात्। अपिशब्दाच्च हनूमानपि समुद्रस्य शान्तत्वं कर्तुं योऽवसरो भावी तत्र नातिशयधैर्यं कृतवान्। तेन तस्य धैर्यं वा न जितं, तदानीं तस्य विपुलकायत्वात्।

१—'१३८३। यमाऽनिलेन्द्र-चन्द्राऽर्क-विष्णु-सिंहांऽशु-वाजिषु। शुकाऽहि-कपि-भेकेषु हरिर् ना कपिले त्रिषु।' इति नानार्थेऽमरः।

तदेवं हनूमतः समुद्रो हनूमानपि समुद्रस्य धैर्यं न व्यतिजग्ये नाभिबभूव। एकवचनस्य प्रत्येकाभिसंबन्धात्। कर्मव्यतीहारे पूर्ववदात्मनेपदम्। '२३३१। सँलिटोर्जे: ।७।३।५७।' इति कुत्वम्। तस्य हनूमतो गतं गमनं प्रचण्डोऽपि महान् प्रभञ्जनो वायुर्न व्यत्यगच्छत् प्राप्तवान्॥

तस्यातिजवेन गच्छतः पथि राक्षसी संप्राप्ता तामसौ व्यापादितवानित्याह—

५४७—व्यतिघ्नन्तीं पथि घ्नन्तं राक्षसीं पवनाऽऽत्मजः॥
जघानाऽऽविश्य वदनं निर्यात् भित्त्वोदरं द्रुतम् ५

व्यतीत्यादि—हनिष्यास्येनमिति राक्षस्या यो वधकरणावसरः तत्र व्यतिघ्नन् व्यतिघ्नन्तीं तस्यैनां हनिष्यामीति यो वधकरणावसरः तत्र घ्नन्तीं तदेवमितरेतरक्रियाकरणेन व्यतिघ्नन्तीं राक्षसीम्। न गतीत्यादिना हिंसार्थत्वादात्मनेपदप्रतिषेधः। तां पवनात्मजो हनूमान् जघान। कथं, वदनमाविश्य उदरं भित्त्वा द्रुतं निर्यात् निर्गच्छन्। यातेः शतरि रूपम्॥

५४८—अन्योन्यं स्म व्यतियुतः
शब्दान् शब्दैस् तु भीषणान्॥
उदन्वांश् चानिलोद्धूतो
म्रियमाणा च राक्षसी.॥ ६॥

अन्योन्यमित्यादि—अन्योन्यमित्यन्योन्यस्येत्यर्थः। 'कर्मव्यतिहारे सर्वनाम्नो द्वे भवतः स्त्रीनपुंसकयोरामभाव इति वक्तव्यम्।' अन्योन्यस्य संबन्धिभिः शब्दैः उदन्वद्राक्षसौ शब्दान् भीषणानात्मीयान् व्यतियुतः स्म मिश्रितवन्तौ। '११०६। यु मिश्रणे'इत्यस्मात् '२७७८। लट् स्मे।३।२।११८।' इति भूते लट्। '२६८२। इतरेतर–।१।३।१६।' इत्यादिना कर्मव्यतिहार आत्मनेपदप्रतिषेधः। तत्रोदन्वतः शब्दकरणाद्यो भीषणशब्दमिश्रणावसरो भावी तत्र राक्षसी म्रियमाणा शब्दान् भीषणानुदन्वच्छब्दैर्युयाव। राक्षस्याः शब्दकरणाद्यो भीषणशब्दमिश्रणावसरो भावी तत्रोदन्वाननिलोद्धूतः शब्दान् भीषणान् राक्षसीशब्दैर्युयाव॥

५४९—न्यविक्षत महा-ग्राह-संकुलं मकराऽऽलयम्॥
सैका बहूनां कुर्वाणा नक्राणां स्वाऽऽशितम्भवम्॥७॥

न्यविक्षतेत्यादि—महद्भिर्ग्राहैः संकुलं मकरालयं समुद्रं न्यविक्षत प्रविष्टवती। '२६८३। नेर्विशः।१।३।१७।' इत्यात्मनेपदम्। '२३३६। शल इगुपधादनिटः क्सः।३।१।४५।' बहूनां नक्राणामेकापि सती स्वाशितम्भवं सुष्ठु तृप्तिं कुर्वाणा। '२८६२। आशिते भुवः–।३।२।४५।' इति भावे खच्॥

---

१ '२७५ ग्राहोऽवहारो, नक्रस्तु कुम्भीर' इति ना० म०

५५०—कृतेनोपकृतं वायोः परिक्रीणानमुत्थितम् ॥

पित्रा संरक्षितं शक्रात् स मैनाकाऽद्रिमैक्षत. ॥ ८ ॥

कृतेनेत्यादि—स हनूमान् समुद्रादुत्थितं मैनाकाद्रिमैक्षत । वायोरुपकृत-मुपकारं कृतेन प्रत्युपकारेण परिक्रीणानं परिक्रयं विचिन्वन्तम् । '२६८४। परि-व्यवेभ्यः क्रियः ।१।३।१८।' इत्यकर्त्रभिप्रायविषयमात्मनेपदम् । पित्रा वायुना रक्षितं शक्रात् । तेन हि पक्षच्छेदकाले महता वेगेन समुद्रं नीत्वा रक्षित इति श्रूयते ॥

५५१—खं पराजयमानोऽसावुन्नत्या पवनाऽऽत्मजम् ॥

जगादाऽद्रिर् 'विजेषीष्ठा मयि विश्रम्य वैरिणम्.॥९॥

खमित्यादि—असावद्रिः उन्नत्या उन्नतया खं पराजयमानोऽभिभवन् पव-नात्मजं जगाद । मयि विश्रम्य स्थित्वा वैरिणं शत्रुं विजेषीष्ठाः त्वमभिभूयाः । आशिषि लिङ् । उभयत्रापि '२६८५। वि-पराभ्यां जेः ।१।३।१९।' इति तङ् ॥

५५२—फलान्यादत्स्व चित्राणि, परिक्रीडस्व सानुषु, ॥

साध्वनुक्रीडमानानि पश्य वृन्दानि पक्षिणाम्. ॥ १० ॥

फलानीत्यादि—चित्राणि नानाविधानि फलानि आदत्स्व गृहाण । '२६८६। आङोदोऽनास्यविहरणे ।१।३।२०।' इत्यात्मनेपदम् । सानुषु ममैकदेशेषुपरिक्रीड-स्व विहर । पक्षिणां च वृन्दानि साधु शोभनं अनुक्रीडमानानि विहरन्ति सन्ति पश्य । उभयत्र '२६८७। क्रीडोऽनु-सं-परिभ्यश्च ।१।३।२१।' इति तङ् ॥

५५३—क्षणं भद्राऽवतिष्ठस्व, ततः प्रस्थास्यसे पुनः ॥

न तत् संस्थास्यते कार्यं दक्षेणोरीकृतं[2] त्वया. ॥ ११ ॥

क्षणमित्यादि—हे भद्र कल्याण ! क्षणमवतिष्ठस्व । ततः पश्चात्प्रस्थास्यसे यास्यसि । यच्च कार्यं करणीयं दक्षेणानलसेन त्वया ऊरीकृतमङ्गीकृतं न च संस्थास्यते अपि तु निष्पत्स्यत एवेत्यर्थः । सर्वत्र '२६८९। समव-प्र-विभ्यः स्थः ।१।३।२२।' इति तङ् ॥

५५४—त्वयि नस् तिष्ठते प्रीतिस् तुभ्यं तिष्ठामहे वयम्, ॥

उत्तिष्ठमानं मित्राऽर्थे कस् त्वां न बहु मन्यते. ॥१२॥

त्वयीत्यादि—त्वयि विषये अस्माकं प्रीतिरस्ति । तेन संशये अस्माभिरन्यो निर्णेता नान्वेषणीयः । किंतु नोऽस्माकं प्रीतिरेव निर्णयं पश्यन्ती त्वयि तिष्ठ-ते । '२६९० प्रकाशन-स्थेयाख्ययोश्च ।१।३।२३।' इत्यात्मनेपदम् । विवादपद-निर्णेता स्थेय उच्यते । तुभ्यं तिष्ठामहे वयमिति त्वयि विषये अस्माकं चेतो

—'२०१६ । दक्षे तु चतुर-पेशल-पटवः सूत्थान उष्णश्च ।' । २—'११६४। ऊरीकृतमुररीकृतमङ्गीकृतमाश्रुतं प्रतिज्ञातम् ।' इति सर्वत्र ना० अ० ॥

वर्तेत इति स्वाभिप्रायम् । तुभ्यं तिष्ठामहे स्वाभिप्रायं निवेदयाम इत्यर्थः । अत्र प्रकाशनं च स्वाभिप्रायकथनम् । '५७२। श्लाघ-ह्नुङ्-स्था-शपां ज्ञीप्स्यमानः ।१।४।३४।' इति सम्प्रदानसंज्ञायां चतुर्थी । कस्मादेवं मां श्लाघस इति चेदाह । उत्तिष्ठमानं यतमानम् । '२६९१। उदोऽनूर्ध्वकर्मणि ।१।३।२४।' इत्यात्मनेपदम् । कस्त्वां न बहु मन्यते न श्लाघते ॥

५५५—ये सूर्यमुपतिष्ठन्ते मन्त्रैः संध्या-त्रयं द्विजाः, ॥
रक्षोभिस् तापितास् तेऽपि सिद्धिं ध्यायन्ति तेऽधुना.

य इत्यादि—ये द्विजा मन्त्रैः करणभूतैः सूर्यमुपतिष्ठन्ते प्रत्युपासते । '२६९२। उपान्मन्त्रकरणे ।१।३।२५।' इत्यात्मनेपदम् । संध्यात्रयं त्रिसन्ध्यम् । अत्यन्तसंयोगे द्वितीया । तेऽपि रक्षोभिस्तापिताः उपद्रुताः अधुना ते सिद्धिं ध्यायन्ति । किं पुनरहं यस्ते पितुः सुहृत् ॥

तदेव दर्शयन्नाह—

५५६—अ-व्यग्रमुदतिष्ठस्व वीर! वायोरहं सुहृत्, ॥
रविर् वितपतेऽत्यर्थमाश्वस्य मयि गम्यताम्. ॥१४॥

अव्यग्र इत्यादि—हे वीर ! अव्यग्रमनाकुलं मय्युपतिष्ठस्व सन्निहितो भव । '२६९३। अकर्मकाच्च ।१।३।२६।' इत्यात्मनेपदम् । यतो वायोस्तव पितुरहं सुहृत् । रविरत्यर्थं वितपते दीप्यते । '२६९४। उद्-विभ्याम्—।१।३।२७।' इत्यात्मनेपदम् । तत्राकर्मकादिति वर्तते । तस्मादाश्वस्य विश्रम्य गम्यताम् ॥

५५७—तीव्रमुत्तपमानोऽयम-शक्यः सोढुमातपः, ॥
आघ्नान इव संदीप्तैरलातैः सर्वतो मुहुः. ॥ १५ ॥

तीव्रमित्यादि—तीव्रं सुष्ठु उत्तपमानो दीप्यमान आतपः सोढुमशक्यः । पूर्ववदात्मनेपदम् । अलातैः उल्मुकैः संदीप्तैः सर्वत आघ्नान इव ताडयन्निव । '२६९५। आङो यमहनः ।१।३।२८।' इत्यविवक्षितकर्मकत्वादात्मनेपदम् '२३६३। गम-हन—।६।४।९८।' इत्युपधालोपः '३५४। हो हन्तेः—।७।३।५४।' इति कुत्वम् ॥

५५८—संशृणुष्व कपे ! मत्कैः संगच्छस्व वनैः शुभैः, ॥
समारन्त ममाऽभीष्टाः संकल्पास् त्वय्युपागते. १६

संशृणुष्वेत्यादि—हे कपे ! संशृणुष्व आकर्णय । '२६९९। समो गम्यृच्छि—।१।३।२९।' इत्यादिविवक्षितकर्मकत्वादात्मनेपदम् । शुभैः शोभमानैः । इगुपधलक्षणः कः । वनैर्मत्कैः मत्स्वामिकैः । अहं स्वामी येषामिति '१८७७।

१—'१२० । रोचिः शोचिरुभे क्लीबे, प्रकाशो द्योत **आतपः** ।' । २—'९१५। अथ स्त्री स्यादङ्गारो, **ऽलातमु**ल्मुकम् ।' । ३—'१५५। धीर् धारणावती मेधा, **संकल्प** कर्म मानसम् इति सर्वत्र ना० अ०

स एषां ग्रामणीः।५।२।७८।' इति कः ।'१२७३। प्रत्ययोत्तरपदयोश्च।७।२।९८।' इति मदादेशः। संगच्छस्व संगतो भव। पूर्ववदात्मनेपदम्। समारन्त ममाभीष्टा इति ममाभिप्रेता ये संकल्पा अभिप्रायाः 'कदा नु मे सुहृत्तया वा कश्चिद्रेष्यति यस्याहमुपयोगी स्याम्' इति ते समारन्त आगताः त्वय्युपागते सति। अर्तेर्लुङि पूर्ववदात्मनेपदम्। '२३८२। सर्ति-शास्त्यर्तिभ्यश्च।३।१।५६।' इत्यङि '२४०३। ऋ-दृशोऽङि गुणः।७।४।१६।' ।'२२५४। आडजादीनाम्।६।४।७२।' भाषाविपयस्य प्रयोगः॥

न चैवं मिथ्या वायुर्मे सुहृदित्याह—

५५९—के न संविद्रते, वायोर् मैनाकाऽद्रिर् यथा सखा, ॥
यत्नादुपाह्वये प्रीतः, संह्वयस्व विवक्षितम्. ॥१७॥'

क इत्यादि—वायोर्मैनाकाद्रिर्यथा सखेति के न संविद्रते जानन्ति। वेत्तेः पूर्ववदात्मनेपदम् '२७०१। वेत्तेर्विभाषा।७।१।७।' इति रुट्। तस्मात्। प्रीतः सन् अहं यत्नादुपाह्वये भवन्तमाह्वयामि। ततः संह्वयस्व कथय विवक्षितमभिप्रेतम्। '२७०३। नि-समुपविभ्यो ह्वः।१।३।३०।' इत्यकर्त्रभिप्राये लट्लोटोरात्मनेपदम्। ततो ऽकर्मकादिति निवृत्तम्। सामान्येन विधानम्॥

५६०—द्यामिवाह्वयमानं तमवोचद् भूधरं कपिः ॥
उपकुर्वन्तमत्यर्थं प्रकुर्वाणोऽनुजीवि-वत्. ॥ १८ ॥

द्यामित्यादि—द्यामिवाकाशमिवाह्वयमानं महत्तया स्पर्धमानम्। २७०४। स्पर्द्धायामाङः।१।३।३१।' इत्यात्मनेपदम्। अत्यर्थमुपकुर्वन्तं आतिथ्येन तमीदृशं भूधरमवोचत्। कपिः प्रकुर्वाणः सेवमानो ऽनुजीविवत् भृत्यवत्। '२७०५। गन्धन-।१।३।३२।' इत्यादिना सेवने तङ्॥

५६१—'कुल-भार्यां प्रकुर्वाणमहं द्रष्टुं दशाननम् ॥
यामि त्वरा-वान् शैलेन्द्र!, मा कस्यचिदुपस्कृथाः.१९

कुलभार्यामित्यादि—अहं दशाननं द्रष्टुं यामि कुलभार्यां प्रकुर्वाणं कुलनारीमभिगच्छन्तम्। तस्यां सहसा प्रवर्तमानमित्यर्थः। साहसिक्ये तङ्। त्वरावान् त्वरायुक्तः। अतः हे शैलेन्द्र! मा कस्यचिदशनपानादिकस्य उपस्कृथाः अतिशयवन्तं मा कार्षीरित्यर्थः। माङि लुङ्। प्रतियत्ने तङ्। '२५४७। तनादिभ्यस्त-थासोः।२।४।७९।' इति सिचो लुक्। '२५५२। उपात्प्रतियत्न-।६।१।-१३९।' इति सुट्। कस्यचिदिति '७१४ कृञः प्रतियत्ने।२।३।५३।' इति कर्मणि षष्ठी॥

१—'७७७। वयस्यः स्निग्धः सवया, अथ मित्रं **सखा** सुहृत्।'। २—'८०। **द्यो**-दिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम्। नभोऽन्तरिक्षं। गगनमनन्तं सुरवर्त्म खम्। वियद् विष्णुपदं वा तु पुंस्याकाश-विहायसी॥' ३—'७७४। षण्डो वर्ष-वरस् तुल्यौ, सेवकार्थ्य**नुजीविनः**।' इति सर्वत्र ना० अ०॥

५६२–योऽपचक्रे वनात् सीतामधिचक्रे न यं हरिः, ॥
विकुर्वाणः स्वरानद्य बलं तस्य निहन्म्यहम्. ॥२०॥

य इत्यादि—यः सीतामपचक्रे अभिबभूव। अवक्षेपणे तङ्। वनादिति वनमुपगम्य। ल्यब्लोपे कर्मणि पञ्चमी। यं हरिरिन्द्रो नाधिचक्रे न प्रसेहे। '२७०६। अधेः प्रसहने।१।३।३३।' इति तङ्। तस्य बलं दशाननस्य सामर्थ्यम्। कीदृशं स्वरान् विकुर्वाणं विविधान् स्वरान् कुर्वाणम्। '२७०७। वेः शब्द-कर्मणः।१।३।३४।' इति तङ्। तस्य दशाननस्य बलं निहन्मि॥

५६३–विकुर्वे नगरे तस्य पापस्याऽद्य रघु-द्विषः, ॥
विनेष्ये वा प्रियान् प्राणानुदानेष्येऽथवा यशः. २१

विकुर्वे इत्यादि—तस्य रघुद्विषो रामशत्रोः पापस्य नगरे पुर्यां अहमद्य विकुर्वे विविधं चेष्टे। '२७१८। अकर्मकाच्च।१।३।४५।' इति तङ्। तत्र विकुर्वाणो यदि वा प्रियानपि प्राणान् स्वाम्यर्थे विनेष्ये अपनेष्यामि। '२७०९। संमानन-।१।३।३६।' इत्यादिना व्यये तङ्। यतो धर्मादिषु विनियोगो व्ययः। यशो वा उदानेष्ये ऊर्ध्वं नेष्यामि तस्यापकारकरणात्। अत्रोत्सञ्जने तङ्। उत्सञ्जन-मुत्क्षेपणम्॥

५६४–विनेष्ये क्रोधमथवा क्रममाणोऽरि-संसदि ॥[2]
इत्युक्त्वा खे पराक्रंस्त तूर्णं सूनुर् नभस्वतः. ॥२२॥

विनेष्य इत्यादि—यदि वा क्रोधमात्मनो विनेष्ये अपनेष्यामि। '२७२०। कर्तृस्थे च-।१।३।३७।' इति तङ्। कर्तृस्थस्य क्रोधकर्मणो ऽशरीरत्वात् अत्र व्ययो न संभवतीति। अरिसंसदि शत्रुसभायां क्रमम। णः अप्रतिबन्धेन प्रवर्त-मानः। '२७११। वृत्ति-सर्ग-।१।३।३८।' इत्यादिना वृत्तौ तङ्। वृत्तिरप्रतिबन्धः॥ इत्येवमुक्त्वा सूनुर्नभस्वतः वायोस्तनयः खे तूर्णं पराक्रंस्त शीघ्रमुत्सेहे।'२७१२। उप-पराभ्याम्।१।३।३९।' इत्यनेन सर्गे तङ्। सर्ग उत्साहः॥

५६५–परीक्षितुमुपाक्रंस्त राक्षसी तस्य विक्रमम् ॥
दिवमाक्रममाणेव केतु-तारा भय-प्रदा. ॥ २३ ॥

परीत्यादि—तस्य हनूमतो विक्रमं शौर्यं परीक्षितुं राक्षसी उपाक्रंस्त उत्सेहे पूर्ववत्तङ्। दिवमाक्रममाणेव। यथा केतुः स्वर्भानुः तारा नभस्युद्गच्छति भयं-करा। '२७१३। आङ उद्गमने -।१।३।४०।' इति तङ्। तत्र हि ज्योतिरुद्गमन इत्युक्तम्। केतुतारायाश्च ज्योतिःस्वभावत्वात्॥

१—(५४५) श्लोकस्थं टिप्पणमालोचनीयम्। २—'७२०। समज्या परिषद् गोष्ठी सभा-समिति-संसदः।'। ३—(५२९) श्लोकस्थं टीकनं विलोकयताम्। ४—'१२६७ ग्रहभेदे ध्वजे केतु, पार्थिवे तनये सुत ' इति सर्वत्र ना० म०

५६६—जले विक्रममाणाया हनूमान् शत-योजनम् ॥
आस्यं प्रविश्य निरयादणूभूया ऽप्रचेतितः. ॥ २४ ॥

जल इत्यादि—विक्रममाणायाः पद्भ्यां विचरन्त्याः । '२७१४। वेः पादवि-हरणे ।१।३।४१।' इति तङ् । जलग्रहणात् गतिविशेषं दर्शयति । आस्यं शतयोजनं शतं योजनानि यस्य प्रमाणतः । तदणूभूय सूक्ष्मीभूय प्रविश्य निरगात् निर्गतः। उदरं विदार्येत्यर्थात् । अप्रचेतितः अविज्ञातः ॥

५६७—द्रष्टुं प्रक्रममाणो ऽसौ सीतामम्भोनिधेस् तटम्, ॥
उपाक्रंस्ता ऽऽकुलं घोरैः क्रममाणैर् निशाचरैः ॥२५॥

द्रष्टुमित्यादि—असौ हनूमान् सीतां द्रष्टुं प्रक्रममाणः आरभमाणः आदिकर्मणि यथा भोक्तुं प्रक्रमते इति । उदधेस्तटमुपाक्रंस्त गन्तुं प्रारब्धवानित्यर्थः । ततश्च प्रोपयोरादिकर्मणि समानार्थत्वात् '२७१५। प्रोपाभ्यां समर्थाभ्याम् ।१।३।४२।' इति तङ् । घोरैः रौद्रैः । निशाचरैराकुलं व्याप्तम् । तटं क्रममाणैः इतस्ततो गच्छद्भिः । '२७१६। अनुपसर्गाद्वा ।१।३।४३।' इति तङ् ॥

५६८—आत्मानमपजानानः शश-मात्रो ऽनयद् दिनम्, ॥
ज्ञास्ये रात्राविति प्राज्ञः प्रत्यज्ञास्त क्रिया-पटुः. ॥२६॥

आत्मानमित्यादि—मा कश्चिदद्राक्षीदिति तथाविधमात्मानं शरीरमवजानानः अपह्नुवानः । '२७१७। अपह्नवे ज्ञः ।१।३।४४।' इति तङ् । यो हि शश-मात्रो भूत्वा स्थितः तेन कथमात्मा लोके नापलपितः स्यात् । अनयद्दिनं अगमयद्दिवसम् । ज्ञास्ये रात्राविति प्रत्यज्ञास्त प्रतिज्ञातवानित्यर्थः । '२७१९। सं-प्रति-भ्यामनाध्याने ।१।३।४६।' इत्यात्मनेपदं लुङो भवति । आध्यानं चोत्कण्ठनम् । ज्ञास्ये इत्यकर्मकाचेत्यकर्मकक्रियावचनत्वादात्मनेपदम् । प्राज्ञः क्रियापटुरिति बुद्धिकौशलं कर्मकौशलं च दर्शयति ॥

५६९—संजानानान् परिहरन् रावणाऽनुचरान् बहून् ॥
लङ्कां समाविशद् रात्रौ वदमानोऽरि-दुर्गमाम्. ॥२७॥

संजानानानित्यादि—रावणस्यार्थेषु कार्येषु ये चरन्तीति '२९२०। चरेष्टः ।३।२।१६।' तान् बहून् संजानानान् चेतयतः परिहरन् । अनाध्याने तङ् । रात्रौ लङ्कां समाविशत् प्रविष्टवान् । अरिदुर्गमां राक्षसदुर्गमाम् । वदमानो भासमानः । '२७२०। भासनोपसंभाषा–।१।३।४७।' इत्यादिना आत्मनेपदम् ॥

५७०—कंचिन् नोपावदिष्टा ऽसौ, केनचिद् व्यवदिष्ट न, ॥
शृण्वन् संप्रवदमानाद् रावणस्य गुणान् जनात्. ॥२८

१—'५२९। गन्धर्वः शरभो रामः सृमरो गवयः शशः।' इति ना० अ० ॥
२—(५५६) श्लोकस्य टीकनं द्रष्टव्यम् ।

कंचिदित्यादि—असौ प्रविष्टः सन् न कंचिदुपावदिष्ट उपसान्त्वितवान्। उपसम्भाषायां तङ्। केनचिद्व्यवदिष्ट न, न भाषितवान्। विमतौ तङ्। विमतिर्नानामतिः। शृण्वन् आकर्णयन्। जनात् संप्रवदमानात् संभूय भाषमाणात्। रावणस्य संबन्धिनो गणान्। '२७२१। व्यक्तवाचाम्—१।३।४८।' इत्यात्मनेपदम्। जनानां व्यक्तवाक्त्वात्॥

५७१—जल्पितोत्कुष्ट-संगीत-प्रनृत्त-स्मित-वल्गितैः॥
घोषस्यान्ववदिष्टेव लङ्का पूत-क्रतोः पुरः. ॥ २९ ॥

जल्पितेत्यादि—पूतक्रतोरिन्द्रस्य या पूः तस्या अमरावत्याः संबन्धिनो घोषस्यान्ववदिष्टेव लङ्का। अनुशब्दः सादृश्ये। सदृशं वादं कृतवती। तैर्जल्पितादिभिः। उभयत्रापि जल्पितादिघोषस्य तुल्यत्वात्। लङ्केति तत्स्थो जन उच्यते। तेन व्यक्तवाग्विषयत्वात् '२७२२। अनोरकर्मकात्—१।३।४९।' इति तङ्। तत्र व्यक्तवाचामित्यनुवर्तते न समुच्चारण इति॥

५७२—ऐद् विप्रवदमानैस् तां संयुक्तां ब्रह्म-राक्षसैः॥
तथाऽवगिरमाणैश् च पिशाचैर् मांस-शोणितम्. ३०

ऐदित्यादि—तां ब्रह्मराक्षसैः संयुक्तां हनूमानैत् जगाम। इणो लङि रूपम्। विप्रवदमानैः परस्परविरुद्धार्थाभिधायिभिः। विप्रलापात्मके व्यक्तवाचां समुच्चारणे '२७२३। विभाषा विप्रलापे।१।३।५०।' इति तङ्। तथा पिशाचैर्मांसशोणितमवगिरमाणैः भक्षयद्भिः संयुक्ताम्। गिरतेरभ्यवहारार्थत्वात् '२७२४। अवाद् ग्रः।१।३।५१।' इति तङ्। मांसशोणितमिति '९१०। जातिरप्राणिनाम्।२।४।६।' इत्येकवद्भावः॥

५७३—यथा-स्वं संगिरन्ते स्म गोष्ठीषु स्वामिनो गुणान्, ॥
पान-शौण्डाः पथः क्षीबा वृन्दैरुदचरन्त च. ॥३१॥

यथास्वमित्यादि—ब्रह्मराक्षसाः पिशाचाश्च यथास्वमात्मीयस्य स्वामिनो गुणान् गोष्ठीषु गोष्ठीमध्ये संगिरन्ते स्म अभ्युपगतवन्तः। '२७२५। समः प्रतिज्ञाने। १।३।५२' इति तङ्। पानशौण्डाः पानसक्ताः क्षीबा मत्ताः सन्तः पथो मार्गानुदचरन्त उत्क्रम्य गच्छन्ति स्म। '२७२६। उदश्चरः सकर्मकात्।१।३।५३।' इति तङ्। वृन्दैरिति सम्भूयेत्यर्थः॥

१—'११५२। उक्तं भाषितमुदितं **जल्पित**माख्यातमभिहितं लपितम्।' २—'२३५। क्रन्दितं रुदितं **क्रुष्टं**, जृम्भस्तु त्रिषु जृम्भणम्।'। ३—।'८१४। आस्कन्दितं धौरितकं रेचितं **वल्गितं** प्लुतम्।' ४—(५६४) श्लोकस्थं टिप्पणं विलोक्यताम्। ५—'१०९८ मत्ते **शौण्डो**त्कट-क्षीबा कामुके कमिता ऽनुक इति सर्वत्र ना० म०

**५७४–यानैः समचरन्ता ऽन्ये कुञ्जरा‌ऽश्व-रथा‌ऽऽदिभिः, ॥
संप्रायच्छन्त वन्दीभिरन्ये पुष्प-फलं शुभम्. ॥२२॥**

यानैरित्यादि—अन्ये यानैः कुञ्जरादिभिः समचरन्त संचरन्ते स्म ।'२७-२७। समस्तृतीयायुक्तात् ।१।३।५४।' इति तङ् । अन्ये वन्दीभिरानीताभिः । सम्प्रदाने तृतीया । अशिष्टव्यवहारे तृतीया चतुर्थ्यर्थे भवति इति वचनाद्वन्दीभ्य इत्यर्थः । पुष्पफलं शोभनं संप्रायच्छन्त ददति स्म । '२७२६। दाणश्च सा चेच्चतुर्थ्यर्थे ।१।३।५५।' इति तङ् । पुष्पफलमिति जातेरेकवद्भावः ॥

**५७५–कोपात् काश्चित् प्रियैः प्रत्तमुपायंसत नाऽऽसवम्, ॥
प्रेम जिज्ञासमानाभ्यस् ताभ्योऽऽशप्सत कामिनः २३**

कोपादित्यादि—काश्चित् स्त्रियः कोपात् अन्यस्त्रीगमनजनितात् । आसवं मद्यविशेषं नोपायंसत न स्वीकृतवत्यः ।२७३०। विभाषोपयमने ।१।२।१६।' इत्यकित्वपक्षे रूपम् । '२७२९। उपाद्यमः स्वकरणे ।१।३।५६।' इति तङ् । पाणिग्रहणपूर्वस्य स्वीकरणस्य तत्र स्थितत्वादौपचारिकमत्र स्वीकरणं द्रष्टव्यम् । '२७४२। समुदाङ्भ्यो यमो ग्रन्थे ।१।३।७५।' इति वा तङ् । उदाङ्पूर्वस्य यम आदानार्थत्वात् । अवसरप्राप्तं सूत्रद्वयमुपाहृतं स्यात् । प्रियैः प्रत्तं दत्तम् । '३०७८। अच उपसर्गात्तः ।७।४।४७।'प्रेम जिज्ञासमानाभ्यः किमस्मासु प्रेमास्ति वा न वेति कृतकोपप्रकाशेन ज्ञातुमिच्छन्तीभ्यः । '२७३१। ज्ञा-श्रु-स्मृ-दृशां सनः ।१।३।५७।' इति तङ् । ताभ्यो योषिद्भ्यः । कामिनः अशप्सत न मे त्वदन्या प्रियास्तीति तदीयशरीरस्पर्शनेन शपथं चक्रुः । शप उपालम्भने इत्यात्मनेपदम् । वाचा उपालम्भनं शरीरस्पर्शनम् '५७२। श्लाघ-ह्नु–।१।४।३४।' इत्यादिना सम्प्रदानसंज्ञायचतुर्थी । तासां ज्ञापयितुमिष्यमाणत्वात् ॥

**५७६–प्रादिदृक्षत नो नृत्यं, ना ऽशुश्रूषत गायनान् ॥
रामं सुस्मूर्षमाणोऽसौ कपिर् विरह-दुःखितम्. ॥२४॥**

प्रादिदृक्षतेत्यादि—असौ कपिर्लङ्कायां नो नृत्यं प्रादिदृक्षत । गायनान् गायकान् । '२९०८। गस्थकन् ।३।१।१४६।' ण्युट् च । नाशुश्रूषत न श्रोतुमिष्टवान् किमिति रामं विरहदुःखितं सुस्मूर्षमाणः स्मर्तुमिच्छन् । सन्नन्तेभ्यः पूर्ववदात्मनेपदम् । '२६१५। अज्झनगमां सनि ।६।४।१६।' इति दीर्घत्वम् । '२४९४। उदोष्ठ्यपूर्वस्य ।७।१।१०२।' इत्युत्वम् ॥

१—'८२३ । सर्वं स्याद् वाहनं **यानं** युग्यं पत्रं च धोरणम् ।'। २—'८६३ । स्युर् मागधास् तु मगधा **वन्दिनस्** स्तुतिपाठकाः ।'। ३—'१०३९। मैरेय**मासवः** सीधुर् मेदको जगल· समौ ।' इति सर्वत्र ना० अ० ।

५७७—अनुजिज्ञासतेवाऽथ लङ्का-दर्शनमिन्दुना ॥
तमोऽपहविमुक्तांऽशु पूर्वस्यां दिश्युदैयत. ॥ ३५ ॥

अन्वित्यादि—अथैतस्मिन् प्रस्तावे इन्दुना चन्द्रेण उदैयत उदितम् । इणो भावे लङि रूपम् । पूर्वस्यां दिशीति पूर्णेनेति दर्शयति । दृश्यते यत् दर्शनं रूपम् । लङ्काया रूपमनुजिज्ञासतेव । पूर्वेण प्राप्तस्यात्मनेपदस्य '२७३२। नानोर्ज्ञः ।१।३।५८।' इति प्रतिषेधः । तमोपहास्तमोविध्वंसमानाः विमुक्ताः प्रेरिता अंशवो यस्मिन् उदय इति ॥

५७८—आशुश्रूषन् स मैथिल्या वार्ता हर्म्येषु रक्षसाम् ॥
शीयमानाऽन्धकारेषु समचारीद-शङ्कितः. ॥ ३६ ॥

आशुश्रूषन्नित्यादि—स कपिर्मैथिल्याः सीताया वार्तामाशुश्रूषन् श्रोतुमिच्छन् । '२७३३। प्रत्याङ्भ्यां श्रुवः ।१।३।५९।' इत्यात्मनेपदप्रतिषेधः । रक्षसां हर्म्येषु गृहेषु । समचारीत् संक्रान्तवान् । '२३३०। अतो ल्रान्तस्य ।७।२।२।' इति वृद्धिः । शीयमानान्धकारेषु अपगच्छत्तमःसु । '९१२। शद्लृ शातने' । '२३६२। शदेः शितः ।१।३।६०।' इति तङ् । '२३६०। पा-घ्रा—।७।३।७८।' इति शीयादेशः । अशङ्कितः शङ्कारहितः ॥

५७९—शत-साहस्रमारक्षं मध्यगं रक्षसां कपिः ॥
ददर्श, यं कृतान्तोऽपि म्रियेताऽऽसाद्य भीषणम्, ३७

शतेत्यादि—मध्यगं मध्यमकोष्ठगतं आरक्षं गोपकं शतसाहस्रं रक्षसां लक्षमात्रं ददर्श विलोकितवान् । शतसहस्रं परिमाणमस्येति प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकीति वचनात् । '१६९२। शतमानविंशतिक—।५।१।२७।' इत्यादिना अणि । '१७५२। संख्यायाः संवत्सर—।७।३।१५।' इत्युत्तरपदवृद्धिः। भीषणं भयानकं आसाद्य प्राप्य । कृतान्तोऽपि यमोऽपि म्रियेत प्राणान् संत्यजेत् ।'२५३८। म्रियतेर्लुङ्लिङोश्च ।१।३।६१।' इति तङ् । तत्र हि शित इत्यनुवर्तते ॥

५८०—अध्यासिसिषमाणेऽथ वियन्-मध्यं निशा-करे ॥
कासांचक्रे पुरी सौधैरतीवोद्भासिभिः सितैः ॥३८॥

अधीत्यादि—अथ निशाकरे चन्द्रमसि वियन्मध्यं अध्यासितुमारोढुमिच्छति सति । '२७३४। पूर्ववत्सनः ।१।३।६२।' इत्यात्मनेपदम् । अस्तेरनुदात्तेत्त्वमात्मनेपदनिमित्तम् । तेनैव सन्नन्तादपि भवति । अत्र सनि इटि कृते अजादेर्द्वितीय-

---

१—'१४४७। व्यूहो- वृन्देऽप्यहिर् वृत्रे-ऽप्यग्नीन्द्रकोस- **तमोपहाः** ।'—२—'३२५। **हर्म्यादि** धनिनां वासः, प्रासादो देव-भूभुजाम् ।' ३—'६६ **कृतान्तो** यमुना भ्राता शमनो यमराट् यम ' ४ '३२९ **सौधोऽस्त्री**

कारिका इति सर्वत्र ना० अ०

स्येति द्विर्वचनम् । पुरी लङ्का कासांचक्रे शोभते स्म । सौधैः सौधानां ज्योत्स्नया चोद्भासमानत्वात् ।'२२४०। आम्प्रत्ययवत्--।१।३।६३।' इति तङ् ॥

५८१--इन्दुं चषक-संक्रान्तमुपायुङ्क्त यथाऽमृतम् ॥
प्रयुञ्जानः प्रिया वाचः समाजाऽनुरतो जनः ॥३९॥

इन्दुमित्यादि--एवं शोभितायां लङ्कायां समाजानुरतः पानगोष्ठीरतो जनः चषकसंक्रान्तं मद्यभाजने प्रतिबिम्बेन संक्रान्तमिन्दुमुपायुङ्क्त उपभुक्तवान् । प्रतिबिम्बावच्छिन्नस्य मद्यस्योपलक्ष्यमाणत्वादेवमुक्तम् । यथाऽमृतं अमृतमिव । प्रिया अनुकूला वाचः प्रयुञ्जानः अभिदधानः । २७३५। प्रोपाभ्याम्--।१।३। ६४।' इति तङ् ॥

५८२--संक्ष्णुवान इवोत्कण्ठामुपाभुङ्क्त सुरामलम् ॥
ज्योत्स्नायां विगलन्-मानस् तरुणो रक्षसां गणः४०

संक्ष्णुवान इत्यादि--रक्षसां तरुणो गणः उत्कण्ठां प्रियासु संस्मरणं संक्ष्णुवान इव समुत्तेजयन्निव ।२७३६। समः क्ष्णुवः ।१।३।६५।' इति तङ् । ज्योत्स्नायां सुरां अलं पर्याप्तमुपाभुङ्क्त अभ्याहृतवान् ।'२७३७। भुजो ऽनवने ।१।३।६६।' इति तङ् । विगलन्मानः ॥

५८३--मध्वपाययत स्वच्छं सोत्पलं दयिताऽन्तिके ॥
आत्मानं सुरताऽऽभोग-विश्रम्भोत्पादनं मुहुः ॥४१॥

मध्वित्यादि--कीदृशं मधु स्वच्छत्वात् सोत्पलतया सुरभित्वात् शोभनं जातं यतः स्वयमात्मानं मुहुरपाययत पायितवत् । '२७३८। णेरणौ--।१।३। ६७।' इति तङ् । दयितान्तिके दयितस्य समीपे । सुरताभोगः सुरतविमर्दः तत्र विश्रम्भः तस्योत्पादनं जनकम् । उत्पादयतीति '२८४१। कृत्यल्युटो बहुलम् ।३।३।११३।' इति कर्तरि ल्युट् ॥

५८४--अभीषयन्त ये शक्रं राक्षसा रण-पण्डिताः ॥
अविस्मापयमानस् तान् कपिराटीद् गृहाद् गृहम्,४२

अभीषयन्तेत्यादि--एवं रक्षःसु यथायथं चेष्टमानेषु ये राक्षसा रणपण्डिताः संग्रामविज्ञाः शक्रमभीषयन्त भीषितवन्तः । '२५८४। भी-स्म्योर्हेतुभये ।१।३। ६८।' इति तङ् । '२५९५। भियो हेतुभये षुक् ।७।३।४०।' भयग्रहणमुपलक्षणं तेन स्मयतेरपि भवति । तानसौ कपिरविस्मापयमानः विस्मयमकारयन् ।

१--'१०४०। चषकोऽस्त्री पानपात्रं सरकोऽप्यनुतर्षणम् ।' । २--'१००। चन्द्रिका कौमुदी ज्योत्स्ना प्रसादस् तु प्रसन्नता ।' ३--'७८९। समौ विश्रम्भ-विश्वासौ भ्रेषो भ्रंशो यथोचितात् ।'। ४--'४७। इन्द्रो मरुत्वान् मघवा बिडौजाः पाकशासनः । वृद्धश्रवा॰ शुनासीर॰ पुरुहूत॰ पुरन्दर॰ । जिष्णुर्लेखर्षभ॰ शक्र॰ ।' इति सर्वत्र ना० अ० ॥

'२५९६। नित्यं स्मयतेः।६।१।५७' इत्यात्वम्। गृहाद्गृहमाटीत् गतवान्। लुङि रूपम्॥

५८५—सीतां दिदृक्षुः प्रच्छन्नः सोऽगर्धयत राक्षसान्, ॥
अवञ्चयत मायाश् च स्व-मायाभिर् नरद्विषाम्, ४३

सीतामित्यादि—स कपिः सीतां दिदृक्षुः सीतां द्रष्टुमिच्छुः प्रच्छन्नः राक्षसानगर्धयत। व्यामोहयत्। स्वमायाभिश्च नरद्विषां मायाश्च अवञ्चयत अतिसंहितवान्। '२७३९। गृधि-वञ्च्योः प्रलम्भने।१।३।६९।' इति तङ्॥

५८६—अपलापयमानस्य शत्रूंस् तस्याऽभवन् मतिः॥
'मिथ्या कारयते चारैर् घोषणां राक्षसाऽधिपः' ॥४४॥

अपेत्यादि—तस्य कपेः शत्रून् राक्षसान् अपलापयमानस्य न्यक्कुर्वतः। '२५२९। विभाषा लीयतेः।६।१।५१' इत्यात्वे '२५९२। लियः सम्मानन—।१।३।७०।' इत्यादिना शालिनीकरणे न्यग्भावने आत्मनेपदम्। मतिरभवत्। कीदृशीत्याह—मिथ्याकारयत इति। अयं राक्षसाधिपतिश्चारैर्दण्डवाहकैः यां घोषणां पुनः पुनः कारयति जागृत जागृतेति तां मिथ्या कारयते येनाहमविज्ञात एव प्रविष्टः। '२७४०। मिथ्योपपदात् कृञो ऽभ्यासे।१।३।७१।' इति तङ्। अभ्यासश्च पुनः पुनः करणम्॥

कुलकम् ४५-४९—

५८७—गूहमानः स्व-माहात्म्यमटित्वा मन्त्रि-संसदः॥
नृभ्योऽपवदमानस्य रावणस्य गृहं ययौ, ॥ ४५ ॥

गूहमान इत्यादि—स्वमाहात्म्यं स्वपराक्रमं गूहमानः आवृण्वन्। '२३५४। ऊदुपधाया गोहः।६।४।८९।' इत्यूत्वम्। '२१५८। स्वरितञितः—।१।३।७२।' इति तङ्। अटित्वा मन्त्रिसंसदः शुकसारणादिगृहाणि गत्वा रावणस्य गृहं ययौ। कीदृशस्य। नृभ्यो ऽपवदमानस्य कुप्यतः असूयतो वा। '२७४१। अपाद्वदः।१।३।७३।' इति तङ्। नृभ्य इति '५७५। क्रुध-द्रुह—।१।४।३७।' इति सम्प्रदानसंज्ञायां चतुर्थी॥

कीदृशं गृहमित्याह—

५८८—दिशो द्योतयमानाभिर् दिव्य-नारीभिराकुलम्॥
श्रियमायच्छमानाभिरुत्तमाभिरनुत्तमाम्॥ ४६॥

१—'७७९। चारश् च गूढ-पुरुषश्, चा ऽऽप्त-प्रत्ययितौ समौ।' २—'१८३। आम्रेडितं द्विस्-त्रिरुक्तमुच्चैर् घुष्टं तु घोषणा।' ३—'७७०। मन्त्री धीसचिवोऽमात्यो- ऽन्ये कर्मसचिवास् ततः।' इति सर्वत्र ना० अ० ४ (५६४) श्लोकस्य

नु प्रति

दिश इत्यादि—दिशः द्योतयमानाभिः भासयमानाभिः। '२५६४। णिचश्च ।१।३।७४।' इति तङ्। दिव्यनारीभिः उत्तमाभिः प्रधाननायिकाभिराकुलं व्याप्तम्। श्रियमनुत्तमामतिशयवतीं आयच्छमानाभिः स्वीकुर्वाणाभिः। '२७४२। समुदाङ्भ्यः—।१।३।७५। इति तङ् ॥

५८९—नित्यमुद्यच्छमानाभिः स्मर-संभोग-कर्मसु ॥
जानानाभिरलं लीला-किलकिंचित-विभ्रमान् ॥४७॥

नित्यमित्यादि—स्मरसंभोगकर्मसु कामोपभोगक्रियासु। नित्यमुद्यच्छमानाभिः उत्साहमानाभिः। लीला जानानाभिः। '२७४३। अनुपसर्गाज्ज्ञः ।१।३।७६।' इति तङ्। पूर्ववत्तङ्। लीलाः स्त्रीणां शृङ्गारचेष्टाविशेषाः। तथा चोक्तम्—'विलास-लीलाः किलकिंचितानि बिब्वोक-मोट्टायित-विभ्रमाणि। विच्छित्त-माकुट्टिमितेक्षितानि योज्यानि तज्ज्ञैः सुकुमारनृत्ते' इति। लक्षणं चैषां नृत्यशास्त्रे॥

५९०—स्वं कर्म कारयन्नास्ते निश्चिन्तो या झष-ध्वजः, ॥
स्वाऽर्थं कारयमाणाभिर् यूनो मद-विमोहितान् ॥४८॥

स्वमित्यादि—स्वमात्मीयं मोहनादिकर्म दिव्यनारीः कारयन् अनुष्ठापयन् एष झषध्वजः कामदेवः निश्चिन्त आस्ते। ताभिराकुलमिति योज्यम्। '५४१। हृ-क्रोरन्यतरस्याम् ।१।४।५३।' इति द्विकर्मकता। यूनः स्वार्थं स्वप्रयोजनं मैथुनाख्यं कारयमाणाभिः आकुलम्। ता हनूमानिति वक्ष्यमाणेन संबन्धः। कीदृशान्। मदविमोहितान् मधुपानमदपरवशान्। ताभिः ॥

कीदृशीभिरित्याह—

५९१—कान्तिं स्वां वहमानाभिर्
यजन्तीभिः स्व-विग्रहान् ॥
नेत्रैरिव पिबन्तीभिः
पश्यतां चित्त-संहतीः ॥ ४९ ॥

कान्तिमित्यादि—स्वां कान्तिं शोभां वहमानाभिः। यजन्तीभिः स्वविग्रहान् ददतीभिः कामिभ्यः। तत्र स्वं कर्मेति णिचश्चेत्यस्य विषयः। कान्तिं स्वां स्वविग्रहानिति स्वरितेत इत्यस्य विषयः। '२७४४। विभाषोपपदेन प्रतीयमाने ।१।३।७७।' इति विभाषा आत्मनेपदम् ॥ इत्यात्मनेपदाधिकारः ॥ शेषभूतत्वात् परस्मैपदविधानमाह—नेत्रैरिति। पश्यतां चित्तसंहतीः। चित्तसंदोहान् पिबन्तीभिरिव गृह्णन्तीभिरिव। '२१५९। शेषात्कर्तरि परस्मैपदम् ।१।३।७८।' ॥

१—'६३४। अथ कलेवरम्। गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः। कायो देहः क्लीबपुंसोः, स्त्रियां मूर्तिस् तनुस् तनूः ।' इति ना० अ० ॥

५९२—ता हनूमान् पराकुर्वन्नगमत् पुष्पकं प्रति ॥
विमानं मन्दरस्याद्रेरनुकुर्वदिव श्रियम्. ॥ ५० ॥

ता इत्यादि—ता दिव्यनारीः पराकुर्वन्नपक्षिपन् । अगमत् । पुष्पकं प्रति पुष्पकविमानं प्रति । येन पुष्पकविमानेन जगाम । कीदृशं मन्दरस्याद्रेः श्रियमनुकुर्वदिव । '२७४५। अनु-पराभ्यां कृञः ।१।३।७९।' कर्त्रभिप्राये चात्मनेपदस्य प्राप्तत्वात् ॥

युग्मम् ५१, ५२—

५९३—तस्मिन् कैलास-संकाशं शिरः-शृङ्गं भुज-द्रुमम् ॥
अभिक्षिपन्तमैक्षिष्ट रावणं पर्वत-श्रियम् ॥ ५१ ॥

तस्मिन्नित्यादि—तस्मिन् विमाने रावणमैक्षिष्ट । कैलाससंकाशं कैलासतुल्यम् । शिरःशृङ्गं शिरांसि शृङ्गाणीव यस्य । भुजद्रुमं भुजा द्रुमा इव यस्य । तं पर्वतस्य श्रियमभिक्षिपन्तं अभिभवन्तम् । '२७४६। अभिप्रत्यतिभ्यः क्षिपः ।१।३।८०।' इति परस्मैपदम् । तस्य स्वरितेत्त्वात् कर्त्रभिप्राय आत्मनेपदं प्राप्तम् ॥

५९४—प्रवहन्तं सदाऽऽमोदं सुप्तं परिजनाऽन्वितम् ॥
मघोने परिमृष्यन्तमारभन्तं परं स्मरे ॥ ५२ ॥

प्रवहन्तमित्यादि—सदामोदं कस्तूरिकादिपरिमलं प्रवहन्तम् । '२७४७। प्राद्वहः ।१।३।८१।' इति परस्मैपदं स्वरितेत्त्वात् । सुप्तं शयने संविष्टम् । परिजनान्वितं पारिपार्श्विकाधिष्ठितम् । मघोने इन्द्राय परिमृष्यन्तं असूयन्तम् । '२७४८। परेर्मृषः ।१।३।८२।' इति परस्मैपदं । मृषेः स्वरितेत्त्वात् । '५७५। क्रुध द्रुह—।१।४। ३७।' इति सम्प्रदानसंज्ञायां चतुर्थी । स्मरे कामे परमत्यर्थं आरभन्तं सक्तिं कुर्वाणम् । '२७४९। व्याङ्-परिभ्यो रमः ।१।३।८३।' इति परस्मैपदम् । रमेरनुदात्तेत्त्वात्

५९५—व्यरमत् प्रधनाद् यस्मात् परित्रस्तः सहस्र-दृक्, ॥
क्षणं पर्यरमत् तस्य दर्शनान् मारुताऽऽत्मजः. ॥५३॥

१—'७८। अस्यो (कुवेरस्य) द्यानं चैत्ररथं, पुत्रस्तु नलकूबरः, । कैलासः स्थानमलका पूर्, विमानं तु पुष्पकम् ।' इति ना० अ० । २—'श्रीर् वेषरचना शोभा भारती सरल-द्रुमे । लक्ष्म्यां त्रि-वर्ग-संपत्तौ वेशोपकरणे मतौ ।' इति विश्व-मेदिन्यौ । ३—'१०३५ । निभ-संकाश-नीकाश-प्रतीकाशोपमादयः ।' इति ना० अ० ॥ ४—अस्मिन् 'शिरः-शृङ्ग' पदे इवादेरुपमावाचकस्य साधारणधर्मस्य च लोपात् समासगा लुप्तोपमा—'वादेर् लोपे समासे सा कर्माधार-क्यचि क्यङि । कर्म-कर्त्रोर्णमुल्येतद् द्विलोपे क्विप्-समासगा ॥' इति तल्लक्षणं काव्यप्रकाशे दशम उल्लासे दृश्यते । ५—'१६४। विमर्दोत्थे परिमलो गन्धे जन-मनोहरे। आमोदः सोऽतिनिर्हारी, वाच्य-लिङ्गत्वमा-गुणात् ।' ६—(-५८४) श्लोकस्थं टिप्पणं पश्यन्तु । ७—'८६९। युद्धमायोधनं जन्यं प्रधनं प्रविदारणम् ' इति ना० अ० ॥

व्यरमदित्यादि—यस्माद्रावणात् सहस्राक्षइन्द्रः परित्रस्तः '५८८। भीत्रार्थानाम्—।१।४।२५।' इत्यपादाने पञ्चमी। प्रधनात् युद्धात्। व्यरमत् उपरतव्यापारोऽभूत्।'२७४९। व्या ङ्-परिभ्यो रमः।१।३।८३।'इति परस्मैपदम्। जुगुप्सा-विराम-प्रमादार्थानामपादाने पञ्चमी। तस्य दर्शनान्मारुतात्मजः हनूमान् क्षणं पर्यरमत् तुष्टिमानभवदित्यर्थः। 'साधु रावण' इति। पूर्ववल्लुङः परस्मैपदम्॥

५९६—उपारंसीच्च च संपश्यन् वानरस् तं चिकीर्षितात्॥
रम्यं मेरुमिवाऽऽधूत-काननं श्वसनोर्मिभिः॥ ५४॥

उपेत्यादि—तं रावणं पश्यन् वानरः चिकीर्षितात्कर्तुमिष्टात् सीतान्वेषणादुपारंसीत् निवृत्तः। उपाच्चेत्यधिकृत्य '२७५१। विभाषाऽकर्मकात् ।१।३।८५।' इति लुङः परस्मैपदम्। तस्य मेरोरिव रम्यत्वात् तदाह मेरुमिव। श्वसनोर्मिभिः वातसमूहैः। आधूतकाननं प्रचलितवनं मेरुम्। तथा श्वसनोर्मिभिः श्वसित-कल्लोलैः आधूतानि शिरांस्याननानि च यस्येति॥

५९७—दृष्ट्वा दयितया साकं रहीभूतं दशाननम्॥
ना ऽत्र सीतेत्युपारंस्त दुर्मना वायु-संभवः.॥ ५५॥

दृष्ट्वेत्यादि—रहीभूतं विजनस्थं दशाननम्। '२१२१। अरुर्मनश्चक्षुः—।५।४।५१।' इत्यादिना च्वौ सलोपः। दयितया साकं दृष्ट्वा नात्र सीतेति कृत्वा उपारंस्त विमना निवर्तते स्म। '२७५१। विभाषा ऽकर्मकात् ।१।३।८५।' इति तङ्। वायुसंभवो हनुमान्॥

५९८—ततः प्राकारमारोहत् क्षपाटानविबोधयन्,॥
नाऽयोधयत् समर्थो ऽपि सीता-दर्शन-लालसः.॥५६॥

तत इत्यादि—तत उत्तरकालं प्राकारमारोहत् आरूढवान्। क्षपाटान् राक्षसान् अविबोधयन् अचेतयन्। '२५६४। णिचश्च ।१।३।७४।' इत्यात्मनेपदे प्राप्ते '२७५२। बुध-युध—।१।३।८६।' इत्यादिना वा लटः परस्मैपदम्।बुधेरणौ सकर्मकस्य चित्तवत्कर्तृत्वात् हनूमतश्चित्तवत्त्वात्। तत्र ह्यकर्मका ये तेषामचित्तवत्कर्तृकत्वार्थमुपादानमित्युक्तम्। तान्नायोधयत् समर्थो ऽपि न संग्रामितवान्। यतः सीतादर्शनलालसः लम्पटः। '२७५४। अणावकर्मकात्—।१।३।८८।' इत्यनेन उभयत्रापि लङः परस्मैपदम्। युधेरेकस्याचित्तवत्कर्तृकत्वात्॥

५९९—अध्यासीद्, 'राघवस्या ऽहं नाशयेयं कथं शुचम्,॥
वैदेह्या जनयेयं वा कथमानन्दमुत्तमम्.॥ ५७॥

अध्यासीदित्यादि—राघवस्याहं कथं केन प्रकारेण शुचं शोकं नाशयेयम्। कथं वा वैदेह्याः सीताया आनन्दं जनयेयमिति हनुमानध्यासीत् चिन्तितवान्।

१—'१२०५। कं शिरोम्बुनोः।' २—'१०५३। दुर्मना विमना अन्तर्मनाः स्यादुत्क उन्मनाः।' ३—'२२२। प्राकारो वरणः सालः।' इति सर्वत्र ना० अ०॥

'९७४। ध्यै चिन्तायाम्' इत्यस्य लुङि रूपम्। नशिजन्योरकर्मकत्वात् '२७५४। अणौ–।१।३।८८।' इत्यनेन लिङः परस्मैपदम्। न बुधेत्यादिना जनीजृषित्यादिना। जनेर्मित्संज्ञायां ह्रस्वत्वम्॥

६००—दृष्ट्वा राघव-कान्तां तां द्रावयिष्यामि राक्षसान्,॥
तस्या हि दर्शनात् पूर्वं विक्रमः कार्य-नाश-कृत्॥५८॥

दृष्ट्वेत्यादि—इयमसाविति राघवस्य कान्तां दृष्ट्वा द्रावयिष्यामि राक्षसान् पलाययिष्यामि। अत्र अणावित्यनेन न बुधेत्यादिना तस्याकर्मकस्य चित्तवत्कर्तृकत्वात्। हि यस्मात् तस्याः सीताया दर्शनात्पूर्वं विक्रमः कार्यस्य सीतादर्शनरूपस्य नाशकृत्॥

६०१—चिन्तयन्नित्थमुत्तुङ्गैः[1] प्रावयन्तीं दिवं वनैः॥
अशोक-वनिकामारा[2]दपश्यत् स्तबका[3]ऽऽचिताम्. ५९

चिन्तयन्नित्यादि—इत्थं पूर्वोक्तप्रकारेण चिन्तयन्नारात्समीपे अशोकवनिकामपश्यत्। उत्तुङ्गैरुच्चैर्वनैर्दिवमाकाशं प्रावयन्तीं व्याप्नुवानाम्। '२७५२। बुधयुध–।१।३।८६।' इत्यादिना तिप्। प्रवतेरकर्मकस्याचित्तवत्कर्तृकत्वात्। अशोकवनिकायाश्चाचित्तवतीत्वात्। स्तबकाचितां अशोकपुष्पस्तबकैः छन्नाम्॥

कुलकम् ६०—६४—

६०२—तां प्राविशत् कपि-व्याघ्रस् तरू[4]न्-चलयन् शनैः॥
अ-त्रासयन् वन-शयान् सुप्तान् शाखा[5]सु पक्षिणः. ६०

तामित्यादि—तामशोकवनिकां कपिव्याघ्रः कपिर्व्याघ्र इव शनैर्मन्दं प्राविशत्। तरूनचलयन् अकम्पयन्। चलेरकर्मकत्वाच्चित्तवत्कर्तृकादणावित्यनेन च लटः परस्मैपदं न निगरणेत्यादिना। तद्धि तत्र सकर्मकार्थं अचित्तवत्कर्तृकार्थं चेत्युक्तम्। वनशयान् पक्षिणः शाखासु सुप्तान् अत्रासयन्। '२७५४। अणौ–।१।३।८८।' इत्यनेन परस्मैपदम्। वने शेरत इति '२९२९। अधिकरणे शेतेः।३।२।१५।' इत्यच्। '९७६। शय-वास-वासिषु–।६।३।१८।' इत्यादिना सप्तम्या विभाषा अलुक्॥

६०३—अवाद् वायुः शनैर् यस्यां लतां नर्तयमान-वत्॥
नाऽऽश्वासयन्त संत्रस्ता ऋतवोऽन्योन्य-संपदः.॥६१॥

१—'११२५। उच्च-प्रांशून्नतोदग्रोच्छ्रितास् तुङ्गे।'। २—'१४५१। आराद् दूर-समीपयोः।' ३—'३६४। स्याद् गुच्छकस् तु स्तबकः, कुड्मलो मुकुलो ऽस्त्रियाम्।' ४—'३५३। वृक्षो महीरुहः शाखी विटपी पादपस् तरुः'। ५—'३५१। समे शाखा-लते, स्कन्धशाखा शाले शिफा-जटे' इति सर्वत्र ना० म०

अत्रादित्यादि—यस्यामशोकवनिकायां वायुर्वातः शनैर्मन्दमवात् वाति स्म । तामाटेति वक्ष्यमाणेन संबन्धः । लतां नर्तयमानवत् नृत्यमिव कारयन् । नृतिश्चलने वर्तते । ततश्च । '२७५३। निगरण-।१।३।८७।' इत्यादिना परस्मैपदं प्राप्तं ।'२७५५। न पादमि-।१।३।८९।' इत्यादिना प्रतिषिद्धम् । ऋतवो ऽन्योन्यसंपदः परस्परस्य विभूतीः नायासयन्त नोपपीडयन्ति स्म । संत्रस्ता रावणात् । आङ्पूर्वाद्यसेः चित्तवत्कर्तृकत्वात् अणावित्यादिना परस्मैपदं प्राप्तं 'न पादमि' इत्यादिना प्रतिषिद्धम् ॥

६०४—ज्योत्स्ना ऽमृतं शशी यस्यां वापीर् विकसितोत्पलाः ॥
अपाययत संपूर्णः सदा दश-मुखाऽऽज्ञया. ॥ ६२ ॥

ज्योत्स्नेत्यादि—यस्यां रावणाज्ञया शशी सदा संपूर्णः सन् ज्योत्स्नामृतं वापीरपाययत पायितवान् । निगरणार्थत्वात्तिपि प्राप्ते न पादमीत्यादिना प्रतिषिद्धे णिचश्चेति तङ् ॥

६०५—प्रादमयन्त पुष्पेषु यस्यां वन्द्यः समाहृताः ॥
परिमोहयमाणाभी राक्षसीभिः समावृताः. ॥ ६३ ॥

प्रादमयन्तेत्यादि—यस्यां वन्द्यः समाहृताः समानीताः पुष्पेषु कामं प्रादमयन्त शमितवत्यः । तन्मतस्याचरणात् । कीदृश्यः । परिमोहयमाणाभिः व्यामोहयन्तीभिः राक्षसीभिः परिवृताः । दमि-परिमुहोः अणावित्यादिना प्राप्तस्य परस्मैपदस्य न पादमीत्यादिना प्रतिषेधे णिचश्चेत्यात्मनेपदम् ॥

६०६—यस्यां वासयते सीतां केवलं स रिपुः स्मरात् ॥
न त्वरोचयता ऽऽत्मानं चतुरो बुद्धि-मानपि ॥६४॥

यस्यामित्यादि—रिपुर्दशाननः स्मरात् कामाद्धेतोः केवलं निष्फलं यस्यां सीतां वासयते स्म वासितवान् । न त्वरोचयत आत्मानं नैवात्मानमुपरोचितवान् । चतुरो ऽपि योषिदाराधनकुशलो ऽपि । बुद्धिमानपि संपद्युक्तो ऽपि । रोचिवास्योरणावित्यादिना प्राप्तस्यापि च परस्मैपदस्य न पादमीति प्रतिषेधे णिचश्चेति तङ् ॥

६०७—मन्दायमान-गमनो हरितायत्-तरुं कपिः, ॥
द्रुमैः शकशकायद्भिर् मारुतेना ऽऽट सर्वतः. ॥६५॥

मन्देत्यादि—कपिः सर्वतः सर्वत्र तामाट विजहार । यत्तदोर्नित्यसंबन्धात्तामिति गम्यते । मन्दायमानगमनः मन्दीभवद्गमनः । कीदृशीम् । हरितायत्तरुं शाद्वलीभवद्वृक्षाम् । अप्राणिजातेश्चेत्यूङ् । द्रुमैरुपलक्षिताम् । कीदृशैः ।

१—'२८२। वापी, तु दीर्घिका ।' २—वन्दिशालास्थिताः स्त्रिय इत्यर्थः । '८८४। प्रग्रहोपग्रहौ वन्द्यां, कारा स्याद् बन्धनालये ।' ३—'२७ । मदनो मन्मथो मारः कामः पञ्चशरः स्मरः । ' इति सर्वत्र ना० अ० ।

शकशकायद्भिः शकस्वभावैः शकीभवद्भिः। केन मारुतेन। अत्रामन्दं मन्दं भवति अहरिता हरिता भवन्तीति लोहितादित्वात् क्यष्। अशकाः शका भवन्तीति वाक्ये। '२१२८। अव्यक्तानुकरणात्–।५।४।५७।' इति डाच्। तस्मिन्विषयभूते 'डाचि बहुलं द्वे भवतः।' 'नित्यमाम्रेडिते डाचि' इति पररूपत्वम्। डाजन्तात् शकशकाशब्दात् क्यष्। '२६६९। वा क्यषः।१।३।९०।' इति परस्मैपदं आत्मनेपदं च॥

६०८–अस्यन्दन्निन्दु-मणयो, व्यरुचन् कुमुदाऽऽकराः, ॥
अलोठिषत वातेन प्रकीर्णाः स्तबकोच्चयाः. ॥ ६६ ॥

अस्यन्दन्नित्यादि—चन्द्रोदयादिन्दुमणयः अस्यन्दन् स्यन्दन्ते स्म। तामाटेति योज्यम्। व्यरुचन् कुमुदाकराः विराजितवन्तः। स्तबकोच्चयाः गुच्छराशयः। वातेन प्रकीर्णाः इतस्ततो विक्षिप्ताः सन्तः अलोठिषत लुठन्ते स्म। सर्वत्र '२३४५। द्युद्भ्यो लुङि।१।३।९१।' इति विभाषा परस्मैपदम्। द्युतादयश्च कृपूपर्यन्ताः॥

६०९–सीताऽन्तिके विवृत्सन्तं वर्त्स्यत्-सिद्धिं प्लवङ्गमम् ॥
पतत्रिणः शुभा मन्द्रमानुवानास् त्वजिह्लदन्. ॥६७॥

सीतेत्यादि—सीतासमीपे विवृत्सन्तं वर्तितुमिच्छन्तं प्लवङ्गमं वर्त्स्यत्सिद्धिं वर्त्स्यन्ती भविष्यन्ती सिद्धिः सीतादर्शनलक्षणा यस्य। '२३४७। वृद्भ्यः स्य-सनोः।१।३।९२।' इति विभाषा तिप्। तं पक्षिणः शुभाः प्रशस्ता अजिह्लदन् सुखयन्ति स्म। णिचि लुङि चङि रूपम्। कीदृशाः। मन्द्रं गम्भीरं मधुरमानुवानाः वाद्यमानाः। 'आङि नु-प्रच्छयोरुपसंख्यानं' इति तङ्। '११०८। णु स्तुतौ' इत्यादादिकस्य परस्मैपदित्वात्॥

६१०–वर्तिष्यमाणमात्मानं सीता पत्युरिवाऽन्तिके ॥
उदपश्यत् तदा तथ्यैर् निमित्तैरिष्ट-दर्शनैः. ॥ ६८ ॥

वर्तिष्यमाणमित्यादि—सीतापि तदा तस्मिन् काले पत्यू रामस्यान्तिके आत्मानं वर्तिष्यमाणमिव उदपश्यत् उत्प्रेक्षते स्म। '२३४७। वृद्भ्यः स्य-सनोः।१।३।९२।' इति विभाषावचनात्तङ्। निमित्तैश्चक्षुःस्पन्दनादिभिः। तथ्यैरविसंवादिभिः इष्टदर्शनैः इष्टार्थप्रकाशकैः। दर्शनमिति। '२८४१। कृत्यल्युटो बहुलम्।३।३।११३।' इति कर्तरि ल्युट्॥

१—'१११२। समीपे निकटाऽऽसन्न-सन्निकृष्ट-सनीडवत्। सदेशाभ्याश-सविध-समर्याद-सवेशवत्॥ १११३। उपकण्ठान्तिका-ऽभ्यर्णाऽभ्यग्रा अप्यभितो ऽव्ययम्।' २—'५५२। शकुन्ति-पक्षि-शकुनि-शकुन्त-शकुन-द्विजाः।५५३ पतत्रि-पत्रि-पतग-पतत्-पत्त्ररथाण्डजाः।' ३—'१९५। सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति।' ४—'१२८३ निमित्त हेतु-लक्ष्मणो इति सर्वत्र ना० म०

६११–'निरवर्त्स्यन् न चेद् वार्ता सीताया, वितथैव नः ॥
अकल्प्स्यदुद्यतिः सर्वा', हनूमानित्यचिन्तयत् ॥६९॥

इत्यात्मनेपदाधिकारः ।

निरवर्त्स्यन्नित्यादि—चेदिति यद्यर्थे । यदि सीताया वार्ता न निरवर्त्स्यत् निर्वृत्तिं नायास्यत्, तदा वृथैव निष्फलैव नो ऽस्माकमुद्यतिः सर्वा अयमुद्यमः समुद्रलङ्घनादिकः । अकल्प्स्यत् अभविष्यत् । इत्येवं हनूमानचिन्तयत् । क्रियातिपत्तौ लृङ् । तत्र निरवर्त्स्यदिति '२३४७। वृद्भ्यः स्य-सनोः ।१।३।९२।' इति विभाषापरस्मैपदम् । अकल्प्स्यदिति '२३५१। लुटि च क्लृपः ।१।३।९३।' इति चकारात् स्य-सनोरपि भवति विभाषापरस्मैपदम् । उद्यतिरिति यमेः '३२७२। स्त्रियां क्तिन् ।३।३।९४।' । '२४२८। अनुदात्त–।६।४।३७।' इत्यादिना अनुनासिकलोपः ॥ इत्यात्मनेपदाधिकारः ॥

इतः प्रभृति कारकमधिकृत्याह—

विशेषकम् ७०–७२—

६१२–वृक्षाद् वृक्षं परिक्रामन् रावणाद् बिभ्यतीं भृशम् ॥
शत्रोस् त्राणम-पश्यन्तीम-दृश्यो जनकाऽऽत्मजाम् ७०

वृक्षादित्यादि—तां जनकात्मजां सीतां स कपिकुञ्जरो ऽपश्यदिति वक्ष्यमाणेन संबन्धः । वृक्षात् वृक्षं परिक्रामन् गच्छन् । '५८६। ध्रुवमपाये ऽपादानम् ।१।४।२४।' इत्यपादानसंज्ञायां पञ्चमी । रावणात् बिभ्यतीं भृशं त्रस्यन्तीं अत्यर्थं शत्रो रावणाद्रक्षामपश्यन्तीं यतो भयं ततः कुतो रक्षेति '५८८। भीत्रार्थानाम्–।१।४।२५।' इत्यपादानसंज्ञा । अदृश्यः प्रच्छन्नो भूत्वा । '२८५९। ऋदुपध–।३।१।११०।' इत्यादिना क्यप् ॥

६१३–तां पराजयमानां स प्रीते रक्ष्यां दशाऽऽननात् ॥
अन्तर्दधानां रक्षोभ्यो मलिनां म्लान-मूर्धजाम् ॥७१॥

तामित्यादि—प्रीतेः रावणसंबन्धिन्याः पराजयमानां विमुखीभवन्तीम् । '५८९। पराजेरसोढः ।१।४।२६।' इत्यपादानत्वम् । असोढो ऽर्थः प्रीतिः । रक्ष्यां दशाननात् रावणविषये स्वयं निवार्यप्रसराम् । '५९०। वारणार्थानामीप्सितः ।१।४।२७।' इत्यपादानत्वम् । प्रवृत्तिविघातलक्षणया रक्षणक्रियया आत्मसंबन्धिन्या दशाननस्य व्याप्तुमभिप्रेतत्वात् । अन्तर्दधानां रक्षोभ्यः मा मां रक्षांसि द्राक्षुरिति । ततश्च '५९१। अन्तर्धौ येनादर्शनम्–।१।४।२८।' इत्यपादानसंज्ञा । अन्तर्धिनिमित्तं हि रक्षोभिरात्मनो दर्शनस्यानीप्सितत्वात् । मलिनां शरीरेण म्लानमूर्धजां मलिनकेशां बद्धवेणीत्वात् ॥

---

१ '१७८। वार्ता प्रवृत्तिर् वृत्तान्त उदन्तः स्यात् ।' इति ना० अ० ॥

६१४—रामादधीत-संदेशो वायोर् जातश् च्युत-स्मिताम् ॥
प्रभवन्तीमिवादित्यादपश्यत् कपि-कुञ्जरः. ॥ ७२ ॥

रामादित्यादि—सत्कृत्य अधीतसंदेशो गृहीतसंदेशः कपिकुञ्जरः। '५९२। आख्यातोपयोगे।१।४।२९।' इत्यपादानसंज्ञा। रामस्याख्यातृत्वात्। सावधानतया संदेशग्रहणात् नियमपूर्वकविद्यावत् संदेशग्रहणम्। वायोर्जात इति '५९३। जनिकर्तुः—।१।४।३०।' इत्यपादानसंज्ञा। जन्यर्थस्य जन्मनः कर्ता हनुमान् तस्य वायुः प्रकृतिः कारणम्। च्युतस्मितां शोकाक्रान्तत्वात्। प्रभवन्तीमिवादित्यात्।'५९४। भुवः प्रभवः ।१।४।३१।' इत्यनेन भवत्यर्थस्य सीतायाः कर्तृभूतायाः प्रथमत उपलभ्यमानत्वात्। अतः प्रभव आदित्यः तस्यास्तेजस्वित्वात् ॥

६१५—रोचमानः कु-दृष्टिभ्यो रक्षोभ्यः प्रत्तवान् श्रियम् ॥
श्लाघमानः पर-स्त्रीभ्यस् तत्राऽऽगाद् राक्षसाऽधिपः.॥

रोचमान इत्यादि—तत्र तस्यामशोकवनिकायां राक्षसाधिपो रावणः आगात् आगतः। रोचमानः कुदृष्टिभ्यः त्यक्तत्रयीधर्मत्वात्। ये कुदृष्टयः कुबुद्धयः तान् स्वविषये स्पृहावतः कारयन्नित्यर्थः। '५७१। रुच्यर्थानां प्रीयमाणः ।१।४।३३।' इति सम्प्रदानसंज्ञायां चतुर्थी। रुचेरभिलाषस्य तत्रावस्थानात्। कुदृष्टयः प्रीयमाणाः। रक्षोभ्यः श्रियं विभूतिं प्रत्तवान्। '५६९। कर्मणा यमभिप्रैति—।१।४।३२।' इति सम्प्रदानम्। ददातिक्रियया राक्षसानामभिप्रीयमाणत्वात्। श्लाघमानः परस्त्रीभ्यः युष्मद्विषये ऽस्माकं श्लाघेति परकलत्राणि ज्ञापयितुमेपयन्। '५७२। श्लाघ-ह्नुङ्—।१।४।३४।' इत्यादिना सम्प्रदानत्वम्। श्लाघया बहुमानेन ज्ञापयितुमिष्यमाणत्वात्तासाम् ॥

६१६—अशप्त निह्नुवानो ऽसौ सीतायै स्मर-मोहितः, ॥
धारयन्निव चैतस्यै वसूनि प्रत्यपद्यत. ॥ ७४ ॥

अशप्तेत्यादि—सीतायै निह्नुवानः क्रौर्यादिकं न मेऽस्तीति सीतां ज्ञापयितुमैपयन्नित्यर्थः। तस्यै सीतायै अशपत्। शपथं सीतां ज्ञापयितुमैपदित्यर्थः। किमित्येवमाह। स्मरमोहितः। अत्र शपथापह्नुतिक्रियया सीतामाज्ञापयितुमिष्यमाणत्वात्। पूर्ववत् सम्प्रदानसंज्ञा। किंचास्यै सीतायै स्वामिनीभूतायै वसूनि द्रव्याणि प्रत्यपद्यत अङ्गीकृतवान्। धारयन्निव गृहीतवित्त इव। अत्र '५७३। धारेरुत्तमर्णः ।१।४।३५।' इति सीतायाः कदाचिदुत्तमर्णया तुल्यत्वात् ॥

६१७—तस्यै स्पृहयमाणो ऽसौ बहु प्रियमभाषत, ॥
सानुनीतिश् च सीतायै नाऽक्रुध्यन्, नाप्यसूयत.७५

तस्यामित्यादि—असौ राक्षसाधिपः स्पृहयमाणः सीतामाप्तुमिच्छन् बहुप्रियमभाषत वक्ष्यमाणम्। '५७४। स्पृहेरीप्सितः ।१।४।३६।' इति स्पृहयतेः

प्रयोगे सीताया   सानुनीतिश्च सानुनय सीता-

थै नाक्रुध्यत् तां प्रति कोपं न कृतवान्। नाप्यसूयत दोषाविष्करणलक्षणामसूयां न कृतवान्। क्रुध्यतिसूयत्योर्दिवादिकयोरुदात्तेन्ङितोर्लङि प्रयोगे '५७५। क्रुध-द्रुह-।१।४।३७।' इत्यादिना सम्प्रदानम् ॥

६१८—'संक्रुध्यसि मृषा किं त्वं दिदृक्षुं मां मृगेक्षणे !, ॥
ईक्षितव्यं पर-स्त्रीभ्यः स्व-धर्मो रक्षसामयम्. ॥ ७६ ॥

संक्रुध्यसीत्यादि—किं त्वं शुभाशुभे दिदृक्षुं द्रष्टुमिच्छुं मां हे मृगेक्षणे ! संक्रुध्यसि। '५७६। क्रुध द्रुहोरुपसृष्टयोः।१।४।३८।' इति कर्मसंज्ञा। क्रुधेरुपसर्गेण युक्तत्वात्। कुतस्ते परिज्ञानं यत्परस्त्रीषु शुभाशुभं निरूपयसि अन्यत्र दुष्टाशयत्वात्। अथ कथं मृषा संक्रुध्यामीति चेदाह—ईक्षितव्यं परस्त्रीभ्यः का शुभा न शुभेति यदीक्षितव्यमीक्षणीयं तदयं स्वधर्मो रक्षसाम्। '५७७। राधीक्ष्योर्यस्य विप्रश्नः।१।४।३९।' इति सम्प्रदानसंज्ञा। यतः स्त्रीविषये विविधस्य प्रश्नस्य क्रियमाणत्वात् ॥

६१९—शृण्वद्भ्यः प्रतिशृण्वन्ति मध्यमा भीरु[1] ! नोत्तमाः, ॥
गृणद्भ्यो ऽनुगृणन्त्यन्ये ऽकृताऽर्था, नैव मद्-विधाः.॥

शृण्वद्भ्य इत्यादि—अनेनात्मनः प्रभावं दर्शयति। शृण्वद्भ्यः प्रार्थयमानेभ्यः स्वामिन्निदं क्रियतामिति मध्यमाः प्रभवः प्रतिशृण्वन्ति ओमित्युपगच्छन्ति। हे भीरु ! नोत्तमा मादृशाः। ते हि स्वातन्त्र्यात्स्वयमेव हितं प्रतिपद्यन्त इति भावः। '५७८। प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता।१।४।४०।' इति सम्प्रदानसंज्ञा। पूर्वस्याः प्रार्थनक्रियायाः प्रार्थयितुः कर्तृत्वात्। अन्ये प्रभवो ऽकृतार्थाः अलब्धलाभाः गृणद्भ्यः अनुग्राह्यस्य भृत्यस्य कस्यचिच्च स्तुतिं कुर्वद्भ्यो मन्त्रिभ्यः अनुगृणन्ति तान् प्रोत्साहयन्ति। अनुगृणीत अनुगृणीतेति ममानुगतो भवतीति नैव मद्विधा अनुगृणन्ति कृतार्थत्वात्। '१५९५। गृ शब्दे' इत्यस्य प्रयोगे '५७९। अनु प्रतिगृणश्च।१।४।४१।' इति सम्प्रदानसंज्ञा। गृणातेः स्तुतिक्रियापेक्षया कर्तृत्वात् ॥

६२०—इच्छ स्नेहेन दीव्यन्ती विषयान् भुवनेश्वरम्, ॥
संभोगाय परिक्रीतः कर्तास्मि तव नाऽप्रियम्.॥७८॥

इच्छेत्यादि—ईदृशं पूजितं भुवनेश्वरं त्रिलोकविजयिनमिच्छ अङ्गीकुरु। आत्मानमुद्दिश्य स्नेहेन प्रेम्णा। '५६०। साधकतमं करणम्—।१।४।४२।' इति करणसंज्ञा। दीव्यन्ती क्रीडन्ती विषयान् शब्दादिभिरित्यर्थः। '५६२। दिवः कर्म च—।१।४।४३।' इति करणसंज्ञापवादात् कर्मसंज्ञा। संभोगाय परिक्रीतः त्वद्विषयभोगेन परिक्रीत इत्यर्थः। '५८०। परिक्रयणे सम्प्रदानम्—।१।४।४४।' इति सम्प्रदानत्वम्। तव नाप्रियं कर्तास्मि न करिष्यामि ॥

---

[1]—'५६६। विशेषास्त्वङ्गना भीरुः कामिनी वामलोचना।' इति ना० अ०। 'भीरुस्त्रिषु' त्रिलिङ्गः स्याद् वरयोषिति योषिति।' इति मेदिनी च।

६२१–आस्स्व साकं मया सौधे, मा ऽधिष्ठा निर्-जनं वनम्॥
मा ऽधिवात्सीर् भुवं, शय्यामधिशेष्व स्मरोत्सुका.७९

आस्स्वेत्यादि—मया साकं सार्धं सौधे धवलगृहे आस्स्व तिष्ठ। आसे- र्लोटि रूपम्। '६७२। आधारो ऽधिकरणम् ।१।४।४५।' इत्यधिकरणसंज्ञायां सप्तमी। मा ऽधिष्ठा निर्जनं वनम्। '५४२। अधि-शीङ्-स्थासां कर्म ।१।४।४६।' इत्यधिकरणे कर्मसंज्ञा। लुङि रूपम्। मा ऽधिवात्सीः भुवं भूमौ मा शयिष्ठाः। माङि लुङि रूपम्। '५४४। उपान्वध्याङ्वसः ।१।४।४८।' इति अधिकरणे कर्मसंज्ञा। किंतु। शय्यामधिशेष्व। शीङो लोटि रूपम्। '५४२। अधिशीङ्- ।१।४।४६।' इति कर्मसंज्ञा। स्मरोत्सुका कामार्थिनी॥

६२२–अभिन्यविक्षथास् त्वं मे यथैवाऽव्याहता मनः, ॥
तवाऽप्यध्यावसन्तं मां मा रौत्सीर् हृदयं तथा.॥८०॥

अभीत्यादि—यथैव त्वमव्याहता अनिवारिता सती मे मम मनः अभिन्य- विक्षथाः अभिनिविष्टासि। लुङि रूपम्। '२६८३। नेर्विशः ।१।३।१७।' इति तङ्। '५४३। अभि-नि-विशश्च ।१।४।४७।' इत्यधिकरणे मनसः कर्मसंज्ञा। तथा त्वमपि त्वद्धृदयमध्यावसन्तं मां मा रौत्सीः मा निवारय। रुधेर्लुङि रूपम्। '५४४। उपान्वध्याङ्—।१।४।४८।' इति हृदयस्य कर्मसंज्ञा॥

६२३–मा ऽवमंस्था नमस्यन्तम-कार्य-ज्ञे! जगत्-पतिम्, ॥
संदृष्टे मयि काकुत्स्थम-धन्यं कामयेत? का.॥८१॥

मेत्यादि—हे अकार्यज्ञे! अविशेषज्ञे। मां जगत्पतिं नमस्यन्तं माऽवमंस्थाः। लुङि रूपम्। '५२५। कर्तुरीप्सिततमम्–।१।४।४९।' इति कर्मसंज्ञा। अवमान- क्रियया कर्तृसंबन्धिन्याः जगत्पतेराप्तुमिष्टत्वात्। संदृष्टे मयि काकुत्स्थमधन्यं मन्दभाग्यं का कामयेत का इच्छेत्। नैवेत्यर्थः। '५३८। तथायुक्तं चानीप्सितम् ।१।४।५०।' इति कर्मसंज्ञा। येनैव प्रकारेण कर्तुरीप्सिततमं क्रियया युक्तं तेनैवे- प्सितादन्यस्य रामस्य प्रयुज्यमानत्वात्॥

६२४–यः पयो दोग्धि पाषाणं, स रामाद् भूतिमाप्नुयात्, ॥
रावणं गमय प्रीतिं बोधयन्तं हिताऽहितम्. ॥ ८२ ॥

य इत्यादि—यथा पाषाणात् पयो न संभवति तथा रामादपि विभूतिरिति नैराश्यं दर्शयति। पयसः पूर्वेणैव कर्मसंज्ञा। पाषाणस्य '५३९। अकथितं च ।१।४।५१।' इत्यनेन। रावणं गमय प्रीतिं भवत्या सह प्रीतिं गच्छन्तं गमय प्रीतिम्। स्वयमेव हिताहितं भवतीं बुध्यमानां बोधयन्तम्। '५४७। गति-बुद्धि- ।१।४।५२।' इत्यादिना कर्मसंज्ञा। गति–बुद्ध्योरण्यन्तावस्थायां तयोः कर्तृत्वात्॥

---

१ '४१ विभूतिर् भूतिरैश्वर्यमणिमादिकमष्टधा' इति ना० म०

६२५—प्रीतो ऽहं भोजयिष्यामि भवतीं भुवन-त्रयम्, ॥
किं विलापयसेऽत्यर्थं, पार्श्वे शायय रावणम्. ॥८३॥

प्रीत इत्यादि—अहं प्रीतः सन् भुवनत्रयं तत्समुत्थं भोज्यं भोक्तुं योग्यं भवतीं भोजयिष्यामि । प्रत्यवसानार्थत्वात्कर्मसंज्ञा । प्रत्यवसानमभ्यवहारः । अकर्त्रभिप्राये '२५६४। णिचश्च।१।३।७४।' इत्यात्मनेपदं न भवति । विलपन्तं विविधं भाषमाणं किं विलापयसेऽत्यर्थं नाहं त्वामिच्छामीति ब्रुवाणा । अत्र शब्दकर्मकत्वात् कर्मसंज्ञा । कर्त्रभिप्राये णिचश्चेत्यात्मनेपदम् । तस्मादिदं प्रार्थये—पार्श्वे रावणं शायय । अत्राकर्मकत्वात्कर्मसंज्ञा ॥

६२६—आज्ञां कारय रक्षोभिर्, मा प्रियाण्युपहारय, ॥
कः शक्रेण कृतं नैच्छेदधिमूर्धानमञ्जलिम्. ॥ ८४ ॥

इति कारकाधिकारः ॥

आज्ञामित्यादि—रक्षांसि त्वदाज्ञां कुर्वन्त्येव । कारय प्रियाणि च त्वत्संबन्धीनि मामुपहरन्तमुपहारय उत्पादय । '५४१। हृ-क्रोरन्यतरस्याम् ।१।४।५३। इति कर्मसंज्ञा । शक्रेण कृतं विरचितं अञ्जलिमधिमूर्धानं अधिगतः प्राप्तो मूर्धा येनेति । को नेच्छेत् '५५९। स्वतन्त्रः-।१।४।५४।' इति कर्तृसंज्ञा । शक्रेण प्रणतोऽहमित्यर्थः । प्रयोज्यकर्ता नोदाहृतोण्यन्तावस्थायामुदाहृतत्वात् ॥ इति कारकाधिकारः ॥

इतः प्रभृति कर्मप्रवचनीयरुधिकृत्याह—

६२७—वचनं रक्षसां पत्युरनु क्रुद्धा पति-प्रिया ॥
पापाऽनुवसितं सीता रावणं प्राब्रवीद् वचः ॥ ८५ ॥

वचनमित्यादि—रक्षसां पत्यू रावणस्य वचनमनु लक्ष्यीकृत्य । '५४७। अनुर्लक्षणे ।१।४।८४।' इति कर्मप्रवचनीयसंज्ञायां द्वितीया । क्रुद्धा सती सीता । पतिप्रिया पतिः प्रियो यस्या इति । रावणं प्राब्रवीद्वचो वक्ष्यमाणम् । पापानुवसितं पापेन संयुक्तम् । '५४९। तृतीयार्थे ।१।४।८५।' इत्यनेन कर्मप्रवचनीयसंज्ञायां द्वितीया । पापमन्ववसित इति । द्वितीयेति योगविभागात् सः सुप्सुपेति वा ॥

६२८—'न भवाननु रामं चेदुप शूरेषु वा, ततः ॥
अपवाह्य च्छलाद् वीरौ किमर्थं मामिहा ऽहरः,॥८६॥

नेत्यादि—यदि भवाननुरामं रामान्न हीन इत्यर्थः । '५५०। हीने ।१।४।८६।' इत्यनेन कर्मप्रवचनीयसंज्ञा । अनुशब्दश्च स्वहीनार्थद्योतकः । हीनश्चोत्कृष्टापेक्षः । उपशूरेषु वा शूरेभ्यो वा यद्यधिको भवान् । '५५१। उपोऽधिके च ।१।४।८७।' इति चकाराद्धीने उपशब्दस्य कर्मप्रवचनीयसंज्ञा । यस्मादधिकमित्यनेन सप्त-

---

१—'८७४। प्रसभं तु बलात्कारो हठो, ऽथ स्खलितं **छलम्** ।' इति ना० अ० । '**छलं** छद्म स्खलितयो इति हैमश्च ।

मी। उपशब्दस्याधिकद्योतनात्। किमर्थं कनकमृगच्छलेन। वीरौ रामलक्ष्मणौ अपवाह्य अन्यतो नीत्वा। मामिहाहरः लङ्कामानीतवान्॥

६२९—'उप-शूरं न ते वृत्तं कथं रात्रिंचराऽधम!॥
यत् संप्रत्यपलोकेभ्यो लङ्कायां वसतिर् भयात्॥८७॥

उपेत्यादि—हे रात्रिंचराधम! कथं ते वृत्तं चरितं नोपशूरं शूरेभ्यो न हीनम्। '५५१। उपो ऽधिके च।१।४।८७।' इति चकाराद्धीने उपशब्दस्य कर्मप्रवचनीयसंज्ञा। यद्यस्मात् संप्रत्यधुना भयाल्लङ्कायां जलपर्वतदुर्गायां वसतिः। वसेरतिः 'वहि-वस्यर्तिभ्यश्चित्' इत्यौणादिकः। अपलोकेभ्यो लोकान् वर्जयित्वा। '५९६। अप-परी वर्जने।१।४।८८।' इति कर्मप्रवचनीयसंज्ञायां '५९८। पञ्चम्यपाङ्-परिभिः।२।३।१०।' इति पञ्चमी॥

६३०—आ राम-दर्शनात् पाप! विद्योतस्व स्त्रियः प्रति॥
सद्-वृत्तान[1]नु दुर्-वृत्तः परस्त्रीं जात-मन्मथः॥८८॥

आ रामेत्यादि—हे पाप! आ रामदर्शनात् रामदर्शनं यावत्। '५९७। आङ् मर्यादावचने।१।४।८९।' इति पूर्ववत्पञ्चमी। स्त्रियः प्रति योषितो लक्ष्यीकृत्य। विद्योतस्व स्थिरो भव। स्त्रिय इति '३०२। वा ऽम्-शसोः।६।४।८०।' इति इयङ्। '५५२। लक्षणेत्थंभूत-।१।४।९०।' इत्यादिना कर्मप्रवचनीयत्वम्। सद्वृत्ताननु दुर्वृत्तः सदाचारिणामुपरि दुर्वृत्त इत्यर्थः। इत्थंभूताख्याने ऽनोः कर्मप्रवचनीयत्वम्। परस्त्रीं जातमन्मथः। अत्र वीप्सायां कर्मप्रवचनीयत्वम्॥

६३१—अभि द्योतिष्यते रामो भवन्तम-चिरादिह,॥
उद्गूर्ण-बाणः संग्रामे यो नारायणतः प्रति.॥८९॥

अभीत्यादि—भवन्तमभि भवन्तं लक्ष्यीकृत्य। '५५५। अभिरभागे।१।४।९१।' इति कर्मप्रवचनीयत्वम्। अचिरादिह लङ्कायां रामो द्योतिष्यते असह्यतेजाः भविष्यति। य उद्गूर्णबाणः संग्रामे नारायणतः प्रति तेन तुल्यः। '५९९। प्रतिः प्रतिनिधि-प्रतिदानयोः।१।४।९२।' इति प्रतिनिधौ कर्मप्रवचनीयत्वम्। '६००। प्रतिनिधि-प्रतिदाने च यस्मात्।२।३।११।' इति पञ्चमी। प्रतियोगे पञ्चम्यास्तसिः। मुख्यसदृशः प्रतिनिधिः॥

६३२—कुतो ऽधियास्यसि क्रूर! निहतस् तेन पत्रिभिः॥
न सूक्तं भवता ऽत्युग्रमतिरामं मदोद्धत!॥९०॥

कुत इत्यादि—हे क्रूर! तेन रामेण उद्गूर्णबाणेन पत्रिभिः शरैः निहतः सन् कुतो ऽधियास्यसि केन प्रकारेण निःसरिष्यसि। '५५४। अधि-परी अनर्थकौ।१।४।९३।' इति अधेः कर्मप्रवचनीयसंज्ञा। धात्वर्थव्यतिरेकार्थस्यानभिधानादनर्थकत्वम्। संज्ञा च गत्युपसर्गसंज्ञाबाधनार्था। तेन '३९७८। तिङि चोदात्त-

---

[1] १३१३ प्रवाणौ शैल-पाषणौ पत्रिणौ सर-पक्षिणौ।' इति ना० म०।

वति ।८।१।७१।' इति निघाताभावो द्रष्टव्यः । पञ्चमी च 'प्रश्नाख्यानयोः' इत्युपसंख्यानाद्भवति । किमिति हनिष्यतीति चेत्—यतो भवता न सूक्तं प्रशस्तमुक्तम् । '५५५। सुः पूजायाम् ।१।४।९४।' इति कर्मप्रवचनीयत्वम् । '३७८३। गतिरनन्तरः ।६।२।४९।' इति स्वराभावः । अत्युग्रमतिरौद्रम् । अतिरामं रामभधिक्षिप्य । काकुत्स्थमधन्यमिति । '५५६। अतिरतिक्रमणे च ।१।४।९५।' इति कर्मप्रवचनीयत्वम् । चकारात्पूजायां च तत्र चाप्युक्तमिति प्रयोगः । हे मदोद्धत ! ॥

६३३—परिशेषं न नामा ऽपि स्थापयिष्यति ते विभुः, ॥
अपि स्थाणुं जयेद् रामो, भवतो ग्रहणं कियत्. ९१

परीत्यादि—रामो विभुः प्रभुः ते परिशेषं नामपि संज्ञामपि न स्थापयिष्यति, किमु देहम् । '५५७। अपिः पदार्थ—।१।४।९६।' इत्यादिना पदार्थे कर्मप्रवचनीयसंज्ञा । पदस्य देहस्याप्रयुज्यमानस्यार्थे अपिशब्दो वर्तते । अपि स्थाणुं जयेद्रामो यमाराध्याधिपत्यं प्राप्तवानसि तमपि स्थाणुं महादेवं जेतुं संभाव्यते भवतो ग्रहणं कियत् । यस्त्वेव न भवति । अत्र संभावनायां कर्मप्रवचनीयत्वम् । संभावने लिङ् । उपसर्गबाधनत्वात्संज्ञायाः '२२७०। उपसर्गात्सुनोति—।८।३।६५। इत्यादिना पत्वं न भवति ॥

६३४—अपि स्तुह्यपिसेधा ऽस्मांस् तथ्यमुक्तं नराऽशन !, ॥
अपि सिञ्चेः कृशानौ त्वं दर्पं, मय्यपि यो ऽभिकः. ९२

अपीत्यादि—हे नराशन ! मया तथ्यमुक्तं यन्नामापि न स्थापयिष्यतीति । अस्मानपि स्तुहि साधूक्तमिति प्रशंस । '२२०१। सेर्ह्यपिच्च ।३।४।८७।' इति अपिति ङित्वाद्गुणाभावः । अपिसेध निगृहाण यथेच्छं तथा क्रियताम् । मया तु सत्यमेवोक्तमिति भावः । अत्रान्ववसर्गे कामचारानुज्ञाने कर्मप्रवचनीयसंज्ञा । किंच कृशानावग्नौ दर्पं अपि सिञ्चेः क्षरेस्त्वम् । अत्र गर्हायां लिङि रूपम् । यो-ऽयं मय्यपि मद्विषयेऽपि अभिकः कामयिता । '१८७४। अनुकाभिक—।५।२।७४।' इत्यादिना निपातितः । उपसर्गसंज्ञाबाधनार्थत्वात् स्तौति-सेधि-सिचां षत्वं न भवति ॥

६३५—अधिरामे पराक्रान्तमधिकर्ता स ते क्षयम्, ॥'
इत्युक्त्वा मैथिली तूष्णीमासांचक्रे दशाननम्. ॥९३॥

अधीत्यादि—पराक्रान्तस्य शौर्यस्य राम ईशितेत्यस्मिन्नर्थे अधिरामे पराक्रान्तम् । '३०९०। नपुंसके भावे क्तः ।३।३।११४।' । '६४४। अधिरीश्वरे १।४।९७।' इति स्वस्वामिसंबन्धे अधेः कर्मप्रवचनीयसंज्ञा । '६४५। यस्माद-

---

१—'३९। व्योमकेशो भवो भीमः स्थाणू रुद्र उमा-पतिः ।' इति ना० अ० । 'स्थाणुः कीले हरे पुमान्' इति कोशान्तरे च । २—'५९। अग्निर्—' इत्यादित आरभ्य ६१ । आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः ।' इति ना० अ० ।

धिकम्—।२।३।९।' इत्यादिना सप्तमी । यश्चैवं स रामस्ते क्षयमधिकर्ता करिष्य-ति । अत्र कर्मण्येव द्वितीया । न '५४८। कर्मप्रवचनीययुक्ते ।२।३।८।' इति '७७४। विभाषा कृञि ।१।४।९२।' इति या संज्ञा तस्या गत्युपसर्गसंज्ञाबाध-नार्थत्वात् । संज्ञापक्षे '३९७८। तिङि चोदात्तवति ।८।१।७१।' इति निघाता-भावो द्रष्टव्य इति । एवमुक्त्वा दशाननं मैथिली तूष्णीमासांचक्रे तूष्णीं स्थि-तवती ॥

इति कर्मप्रवचनीयाधिकारः ॥

इतः प्रभृति 'अनभिहिते' इत्यधिकृत्य विभक्तिविधानमाह—

६३६—ततः खड्गं समुद्यम्य रावणः क्रूर-विग्रहः ॥
वैदेहीमन्तरा क्रुद्धः क्षणमूचे विनिश्वसन् ॥ ९४ ॥

तत इत्यादि—ततः सीतावचनादुत्तरकालं रावणः खड्गं समुद्यम्य उत्क्षि-प्य । कर्मणि द्वितीया । क्रूरविग्रहः दुष्प्रेक्ष्यत्वात् । वैदेहीमन्तरा क्रुद्धः वैदेह्या वधे कुपितः । '५४५। अन्तराऽन्तरेण युक्ते ।२।३।४।' इति षष्ठ्यपवादाद्द्वितीया । अन्तराशब्दो मध्यमाधेयप्रधानमाचष्टे, आधेयश्चात्र वधः, क्षणमूचे उक्तवान् । उक्तिक्रियया क्षणस्य कालस्य साकल्येन संबन्धात् '५५८। कालाध्वनोः—।२।३।५।' इति द्वितीया । विनिश्वसन् क्रोधात् ॥

६३७—'चिरेणाऽनुगुणं प्रोक्ता प्रतिपत्ति-पराङ्मुखी ॥
न मासे प्रतिपत्तासे मां चेन्, मर्तासि मैथिलि ! ९५'

चिरेणेत्यादि—हे मैथिलि ! चिरेणापि कालेनानुगुणमनुकूलं मया प्रो-क्तापि सती प्रतिपत्तिपराङ्मुखी । उक्तस्यार्थस्यानुष्ठानं प्रतिपत्तिः तस्यां परा-ङ्मुखी इदानीं यदि त्वं मासे त्रिंशद्दिवसलक्षणे मां न प्रतिपत्तासे नाङ्गीकरि-ष्यसि तदा मर्तासि मरिष्यसि । उभयमपि लुटि रूपम् । तत्र चिरेण प्रोक्ता इति । '५६३। अपवर्गे तृतीया ।२।३।६।' विवक्षितार्थप्रकाशनं फलं तस्य प्राप्तौ तत्क्रियापरिसमाप्तिरपवर्ग इति । मां मासे न प्रतिपत्तास इति '६४३। सप्तमी-पञ्चम्यौ कारकमध्ये ।२।३।७।' इति सप्तमी । कर्मकर्त्रोः कारकयोर्मध्यत्वात् मासस्य ॥

६३८—प्रायुङ्क्त राक्षसीर् भीमा मन्दिराय प्रतिव्रजन् ॥
'भयानि दत्त सीतायै सर्वा यूयं कृते मम ॥ ९६ ॥'

प्रायुङ्क्तेत्यादि—रावणो राक्षसीर्भीमा भयानकाः प्रायुङ्क्त समादिष्टवान् । ल-ङि रूपम् । मन्दिराय प्रतिव्रजन् गृहाय प्रतिव्रजन् । '५८५। गत्यर्थकर्मणि—।२।३।१२।' इत्यादिना तु चतुर्थी । कर्मप्रवचनीयादिसूत्रचतुष्टयेनोदाहृतं कर्मप्र-वचनीयाधिकार एव दर्शितत्वात् । किमादिशदित्याह—सर्वा यूयं सीतायै भया-नि दत्त । लोटि रूपम् । चतुर्थी संप्रदाने । संपूज्यादस्य प्रकर्षेण दीयत इति सं-प्रदानम् मम कृते

६३९–गते तस्मिन् समाजग्मुर् भयाय प्रति मैथिलीम् ॥
राक्षस्यो, रावण-प्रीत्यै क्रूरं चोचुरलं मुहुः. ॥ ९७ ॥

गत इत्यादि—तस्मिन् रावणे गते सति राक्षस्यः समाजग्मुः संभूय गताः। '२६९९। समो गम्यृच्छि—।१।३।२९।' इत्यादिना आत्मनेपदं न भवति। आङा व्यवहितत्वात्। मैथिलीं प्रति लक्ष्यीकृत्य भयाय सीतायै भयं दातुम्। '५८१। क्रियार्थोपपदस्य च कर्मणि स्थानिनः।२।३।१४।' इति चतुर्थी। ददातेः क्रियार्थोपपदस्य स्थानिनः प्रयुज्यमानस्य भयं कर्म। क्रिया चात्र समागमः। तत्रोपपदं क्रियार्थमिति क्रूरं च भयानकम्। मुहुः प्रतिक्षणं अलं पर्याप्तमूचुः उक्तवत्यः। रावणप्रीत्यै रावणस्यैवं प्रीतिः स्यादिति। '५८२। तुमर्थाच्च भाववचनात्।२।३।१५।' इति चतुर्थी। क्रियायां क्रियार्थायामिति तुमुना समानार्थत्वात्। भाववचनाश्चेत्यनेन विहितस्य क्तिनः क्रियार्थं उपपदं क्रूराभिधानम् ॥

६४०–'रावणाय नमस्कुर्याः, स्यात् सीते! स्वस्ति ते ध्रुवम् ॥
अन्यथा प्रातराशाय कुर्याम त्वामलं वयम्. ॥९८॥

रावणायेत्यादि—हे सीते! रावणाय नमस्कुर्याः रावणं नमस्कुरु। एवं च सति ते तुभ्यं स्वस्ति कल्याणं ध्रुवं स्यात्। युष्मच्छब्दस्य चतुर्थ्येकवचनान्तस्य तेआदेशः। नमस्कृत्वेति पाठान्तरम्। तत्र नमस्कृत्वा स्थितायै तुभ्यमित्यध्याहृत्य योज्यम्। अन्यथा ह्यसमानकर्तृकत्वात् क्त्वाप्रत्ययो न घटते। नमस्कृत्येति पाठान्तरम्। साक्षात्प्रभृतिषु नमःशब्दस्य विकल्पेन गतिसंज्ञा। गत्यभावपक्षे नित्यं गतिसमासाभावे ल्यबादेशः। '१५४। नमस्पुरसोर्गत्योः।८।३।४०।' इति विसर्जनीयस्य सकारादेशश्च न संभवतीति। अन्यथेति यदि न नमस्कुर्याः तदा अलं प्रातराशाय प्रातर्भोजनाय त्वां कुर्याम वयमित्यूचुः। '२२००। नित्यं ङितः।३।४।९९।' इति सलोपः। रावणायेत्यादिषु '५८३। नमःस्वस्ति—।२।३।१६।' इत्यादिना चतुर्थी ॥

६४१–तृणाय मत्वा ताः सर्वा वदन्तीस् त्रिजटाऽवदत् ॥
'आत्मानं हत दुर्वृत्ताः! स्व-मांसैः कुरुताऽशनम्. ९९

१—अत्र 'उपपदविभक्तेः कारकविभक्तिर् बलीयसी' इति वार्तिकबलात् कर्मणि द्वितीयैव प्राप्ता, परं च तस्याप्यपवादभूतेन '५८१। क्रियार्थोपपदस्य च कर्मणि स्थानिनः।२।३।१४।' इति सूत्रेण चतुर्थ्येव भवति। तेन 'नमस्कुर्मो नृसिंहाय, स्वयंभुवे नमस्कृत्य' इत्यादिवत् 'रावणाय—' इत्यस्य रावणं प्रसादयितुमित्यर्थो युक्त इति ज्ञेयम्। एवं सति 'नमः-स्वस्ति-' इत्यादिना चतुर्थी' इति टीकाकृदुक्तं प्रमादगर्भितम्। केवलं 'नमः-स्वस्ति' इत्याकारकशब्दयोग एव तस्या विधानादिति भाति। किंतु 'प्रातराशाय त्वां अलं कुर्याम' इत्यत्र तु अलंशब्दयोगात् 'नमः-स्वस्ति-' इत्यनेनैवेति। अत्र युक्तायुक्तविवेचनं तु [illegible]म्।

तृणायेत्यादि—अथानन्तरं राक्षसीर्वदन्तीः त्रिजटा रावणस्वसा अवदत् उक्तवती। तृणाय मत्वा तृणमिव संगणय्य। '५८४। मन्यकर्मण्यनादरे—।२।३।१७।' इति चतुर्थी। तत्र 'कुत्सितग्रहणं कर्तव्यम्' इत्युक्तम्। इह मा भूत् तृणं मत्वेति। किमवदत् आत्मानं हत मारयत। दुर्वृत्ताः दुराचाराः। स्वमांसैः कुरुताशनमिति करणे तृतीया॥

किमर्थमेवमाहेत्याह—

६४२—अद्य सीता मया दृष्टा सूर्यं चन्द्रमसा सह॥
स्वप्ने स्पृशन्ती मध्येन तनुः श्यामा सुलोचना. ॥१००'

अद्येत्यादि—स्वप्ने मया अद्य सीता दृष्टा। कर्तरि तृतीया। सूर्यं स्पृशन्ती चन्द्रमसा सह। सहयोगे तृतीया। सूर्याचन्द्रमसाविति रामलक्ष्मणाविति भावः। मध्येन तनुः तन्वी। '५६६। इत्थंभूतलक्षणे।२।३।२१।' तृतीया '५०२। वोतो गुणवचनात्।४।१।४४।' इति ङीबभावपक्षे रूपम्। श्यामा वर्णेन। सुलोचना शोभननेत्रा॥

६४३—तास् तया तर्जिताः सर्वा मुखैर् भीमा यथाऽऽगतम्॥
ययुः सुषुप्सवस् तल्पं भीमैर् वचन-कर्मभिः ॥१०१॥

ता इत्यादि—ता राक्षस्यस्तया त्रिजटया तर्जिता भर्त्सिताः। सुषुप्सवः स्वप्तुमिच्छवस्तल्पं शयनीयं ययुर्गताः। यथागतं यतो यतस्तल्पादुत्थाय गताः। '६६१। यथाऽसादृश्ये।२।१।७।' इति वीप्सायामव्ययीभावः। मुखैर्भीमा रौद्राः मुखानां विकृतत्वात्। '५६५। येनाङ्गविकारः।२।३।२०।' इति तृतीया। भीमैर्वचनकर्मभिः उपलक्षिताः। इत्थंभूते तृतीया॥

६४४—गतासु तासु मैथिल्या संजानानो ऽनिलाऽऽत्मजः॥
आयातेन दशाऽऽस्यस्य संस्थितो ऽन्तर्हितश् चिरम्॥

गतास्वित्यादि—तासु राक्षसीषु गतासु। अनिलात्मजो हनूमान् 'रामसंकथां प्रास्तावीत्' इति वक्ष्यमाणेन संबन्धः। मैथिल्या संजानानः इयं सेत्यवगच्छन्। '५६७। संज्ञो ऽन्यतरस्याम्—।२।३।२२।' इति कर्मणि तृतीया। '२७१९। सं-प्रतिभ्याम्—।१।३।४६।' इति तङ्। दशास्यस्यायातेनागमनेन हेतुना चिरमन्तर्हितो निलीनः स्थितः। '५६८। हेतौ।२।३।२३।' इति तृतीया॥

६४५—ऋणाद् बद्ध इवोन्मुक्तो वियोगेन क्रतु-द्विषः॥
हेतोर् बोधस्य मैथिल्याः प्रास्तावीद् राम-संकथाम्. ॥

ऋणादित्यादि—ऋणाद्धेतोर्बद्ध इवोन्मुक्तो यथा स्थानान्तरं गतवान्। '६०१। अकर्तर्यृणे—।२।३।२४।' इति पञ्चमी। ऋणस्याकर्तृहेतुत्वात्। ऋणेन बन्धित इवेति नोक्तम्। अप्रयोजककर्तृत्वादृणस्य। उन्मुक्तः क्रतुद्विषो रावणस्य

क्लेशेन '६०२ विभाषा गुणे ऽस्त्रियाम् ।२ ३ २५' इति पक्षे तृती

योदाहृता न पञ्चमी । वियोगस्य गुणपदार्थत्वात् । किमिति संकथां प्रास्तावीदित्याह—हेतोर्बोधस्य मैथिल्याः । एष रामदूत इति मैथिल्या बोधो ऽवगमः स्यात् । '६०७। षष्ठी हेतुप्रयोगे ।२।३।२६।' इति बोधशब्दस्य षष्ठी । प्रास्तावीदिति '२३८५। स्तु-सु-धूञ्भ्यः परस्मैपदेषु ।७।२।७२।' इतीट् । '२२६८। नेटि ।७।२।४।' इति हलन्तलक्षणाया वृद्धेः प्रतिषेधः नेगन्तलक्षणायाः ॥

६४६—तं दृष्ट्वा ऽचिन्तयत् सीता-'हेतोः कस्यैष रावणः ॥
अवरुह्य तरोरारादैति वानर-विग्रहः ॥ १०४ ॥

तमित्यादि—तं हनूमन्तं रामं स्तुवन्तं दृष्ट्वा सीता अचिन्तयत् । कस्य हेतोः रावणो वानरविग्रहः सन् ऐति आयाति । आङ्पूर्वस्येणो रूपम् ।'६०८। सर्वनाम्नस्तृतीया च ।२।३।२७।' इति षष्ठी । किंशब्दस्य सर्वनामत्वात् । आरात् अन्तिके । तरोरिति '५९५। अन्यारात्–।२।३।२९।' इत्याराच्छब्दयोगे पञ्चमी । अवरुह्यावतीर्येति । अवरोहणापेक्षया ह्यपादाने पञ्चमी । अपेक्षाया यौगपद्याभावात् । 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' आराद्योगे न वर्तते ॥

६४७—पूर्वस्मादन्य-वद् भाति भावाद् दाशरथिं स्तुवन्, ॥
ऋते क्रौर्यात् समायातो मां विश्वासयितुं नु किम् ? ॥

पूर्वस्मादित्यादि—पूर्वस्माद्रावणादन्यवद्भातीति ज्ञायते। अन्येन तुल्यं वर्तते इति कृत्वा अन्यशब्दयोगे पञ्चमी । यतो भावात् स्नेहाद्दाशरथिं स्तुवन् । किं नु क्रौर्यादृते क्रौर्यं वर्जयित्वा । ऋतेशब्दयोगे पञ्चमी । मां विश्वासयितुं संभावयितुं किमागत इत्यचिन्तयत् ॥

६४८—इतरो रावणादेष राघवाऽनुचरो यदि, ॥
स-फलानि निमित्तानि प्राक् प्रभातात् ततो मम. १०६

इतर इत्यादि—यदि रावणादितरः प्रतियोगी राघवानुचरः राघवार्थकारी । इतरयोगे पञ्चमी । ततो मम सफलानि स्वप्नलक्षणानि दर्शनादीनि निमित्तानि । प्राक् प्रभातात् आदित्योदयात्पूर्वस्मिन् काले । अन्यस्य हि प्रभातादुत्तरकाले सफलानि । अञ्चूत्तरपदयोगे पञ्चमी ॥

६४९—उत्तराहि वसन् रामः समुद्राद् रक्षसां पुरम् ॥
अवैत् लवण-तोयस्य स्थितां दक्षिणतः कथम्. १०७

उत्तराहीत्यादि—रामदूतो ऽयमिति न संभाव्यते । यतः समुद्रादुत्तरा या दिक् तस्यामुत्तराहि वसन् रामः । आहि च दूरे उत्तराच्चेति । तत्राहिप्रत्ययान्तेन उत्तराहिशब्देन योगे समुद्रादिति पञ्चमी । लवणतोयस्य लवणसमुद्रस्य दक्षिणतो दक्षिणस्यां दिशि स्थितां रक्षसां पुरीं लङ्कां कथमवैत् ज्ञातवान् । दक्षिणत इति '१९७८। दक्षिणोत्तराभ्यामतसुच् ।५।३।२८।' तदन्तेन योगे '६०९। षष्ठ्यतसर्थप्रत्ययेन ।२।३।३०।' इति षष्ठी ॥

**६५०—दण्डकान् दक्षिणेना ऽहं सरितो ऽद्रीन् वनानि च ॥
अतिक्रम्या ऽम्बुधिं चैव पुंसामगममाहृता. ॥ १०८ ॥**

दण्डकानित्यादि—दण्डकानामदूरे या दक्षिणा दिक् तस्यामिति । '१९-८४। एनबन्यतरस्याम्—।५।३।३५।' इति सप्तम्यन्तादेनप् प्रत्ययः । तदन्तेन योगे '६१०। एनपा द्वितीया ।२।३।३१।' इति द्वितीया । दक्षिणेन दण्डकानां दक्षिणस्यां दिशि । सरितो ऽद्रीन् वनानि च अम्बुधिं चातिक्रम्य पुंसामगममगम्यम् । '३२३४। ग्रह-वृ-दृ-निश्चि-गमश्च ।३।३।५८।' इत्यप् । अहमाहृता आनीता । तत्कथमवैदित्यचिन्तयत् ॥

**६५१—पृथङ् नभस्वतश् चण्डाद् वैनतेयेन वा विना ॥
गन्तुमुत्सहते नेह कश्चित् किमुत वानरः. ॥१०९॥'**

पृथगित्यादि—नभस्वतो वातात् चण्डात् पृथक् वायुं त्यक्त्वा । वैनतेयेन वा विना गरुडं वा वर्जयित्वा । '६०३। पृथग्विना—।२।३।३२।' इत्यादिना तृतीयापञ्चम्यौ । इह लङ्कायां कश्चित् गन्तुं नोत्सहते किमुत वानरः ॥

**६५२—इति चिन्ता-वतीं कृच्छ्रात् समासाद्य कपि-द्विपः ॥
मुक्तां स्तोकेन रक्षोभिः प्रोचे—'ऽहं राम-किङ्करः ११०**

इतीत्यादि—एवमुक्तेन प्रकारेण चिन्तावतीं कपिद्विपो हनूमान् । कृच्छ्रात्समासाद्य कथमप्युपगम्य । अहं रामकिङ्करः रामप्रेषणकर इति प्रोचे । मुक्तां स्तोकेनाल्पेन रक्षोभिः कर्तृभिः । '६०४। करणे च स्तोकाल्प—।२।३।३३।' इत्यादिना तृतीयापञ्चम्यौ । कृच्छ्र-स्तोकयोरसत्त्ववचनयोः करणत्वात् ॥

यदि त्वं रामकिङ्करः क्वासावित्याह—

**६५३—विप्रकृष्टं महेन्द्रस्य न दूरं विन्ध्य-पर्वतात् ॥
ना ऽनभ्याशे समुद्रस्य तव माल्यवति प्रियः. ॥१११॥**

विप्रेत्यादि—माल्यवति पर्वते तव प्रियो रामः महेन्द्रस्य पर्वतस्य विप्रकृष्टं दूरं । विन्ध्यपर्वताच्च न दूरम् । '६११। दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् ।२।३।३४।' इति षष्ठी-पञ्चम्यौ । महेन्द्रपर्वत-विन्ध्ययोर्दूरविप्रकृष्टयोस्तु '६०५। दूरान्तिकार्थेभ्यो द्वितीया च ।२।३।३५।' इति द्वितीया । नानभ्याशे न दूरे समुद्रस्य । '६११। दूरान्तिकार्थैः—।२।३।३४।' इति षष्ठी । माल्यवति '६३३। सप्तम्यधिकरणे ।२।३।३६।' इति सप्तमी । चकाराद्दूरान्तिकार्थेभ्यश्च । तेनानभ्याश इति सप्तमी ॥

**६५४—अ-संप्राप्ते दश-ग्रीवे प्रविष्टो ऽहमिदं वनम् ॥
तस्मिन् प्रतिगते द्रष्टुं त्वामुपार्कस्यचेतितः ॥ ११२ ॥**

असमित्यादि—दशग्रीवे दशवदने असंप्राप्ते अप्रविष्टे अहमचेतितः प्रविष्ट इति । तस्मिन् प्रतिगते त्वां द्रष्टुमुपार्क-

ऽसि समुत्सहे स । '६३४। यस्य च भावेन-२।३।३७।' इति सप्तमी । कपेः प्रवेशोपक्रमयोः रावणसंप्राप्तिप्रतिगमनक्रियाभ्यां लक्ष्यमाणत्वात् । उपाक्रंसीत्ति '२७१२। उपपराभ्याम्-।१।३।३९।' इत्यनेन वृत्त्यादिषु सर्गे उत्साहे क्रमेस्तङ् । उत्तमपुरुषैकवचनम् । '२३२३। स्नु-क्रमोरनात्मनेपदनिमित्ते ।७।२।३६।' इति सिच इट् न भवति ॥

यद्यादावेव प्रविष्टो ऽसि तर्हि किमिति स्वकर्म न दर्शितवानसीत्याह—

६५५—तस्मिन् वदति रुष्टो ऽपि ना ऽकार्षं देवि! विक्रमम् ॥
अ-विनाशाय कार्यस्य विचिन्वानः परापरम् ॥११३॥

तस्मिन्नित्यादि—हे देवि! तस्मिन् वदति रुष्टोऽपि विक्रमं नाकार्षं तं तथा वदन्तमनादृत्य विक्रमं नाकार्षमित्यर्थः । '६३५। षष्ठी चानादरे ।२।३।३८।' इति चकारात्सप्तमी । किमर्थं कार्यस्य संदेशकथादेरविनाशाय । विचिन्वानः परापरं पौर्वापर्यं निरूपयन् । कर्त्रभिप्राये तङ् ॥

कथं वानरस्त्वं तस्य किङ्कर इत्याह—

६५६—वानरेषु कपिः स्वामी नरेष्वधिपतेः सखा ॥
जातो रामस्य सुग्रीवस् ततो दूतो ऽहमागतः॥ ११४॥

वानरेष्वित्यादि—वानरेषु स्वामी यः कपिः सुग्रीवः स नरेष्वधिपतेः रामस्य सखा जातः । '६३६। स्वामीश्वर-।२।३।३९।' इत्यादिना षष्ठी-सप्तम्योर्विधानात् सप्तम्युदाहृता । ततो ऽहं दूत आगतः ॥

आगत्य च लङ्कां प्रविश्य इहायात इत्याह—

युग्मम्-११५-११६

६५७—ईश्वरस्य निशाटानां विलोक्य निखिलां पुरीम् ॥
कुशलो ऽन्वेषणस्या ऽहमायुक्तो दूत-कर्मणि ॥११५॥

ईश्वरस्येत्यादि—निशाटानां राक्षसानामीश्वरस्य दशाननस्य । अत्र षष्ठ्युदाहृता । पुरीं निखिलां निःशेषां विलोक्य किं तत्र वर्तत इति । प्राप्त इति वक्ष्यमाणेन संबन्धः । कुशलो ऽन्वेषणस्याहं सीताया अन्वेषणस्य निपुणः । आयुक्तो दूतकर्मणि दूतक्रियायां व्यापृतः । '६३७। आयुक्त-कुशलाभ्याम्-।२।३।४०।' इति षष्ठी-सप्तम्यौ ॥

६५८—दर्शनीय-तमाः पश्यन्
स्त्रीषु दिव्यास्वपि स्त्रियः ॥
प्राप्तो व्याल-तमान् व्यस्यन्
भुजङ्गेभ्यो ऽपि राक्षसान् ॥ ११६ ॥

दर्शनीयेत्यादि—तत्र दिव्यास्वपि स्त्रीषु मध्ये दर्शनीयतमाः स्त्रियः पश्यन्। '६३८। यतश्च निर्धारणम् ।२।३।४१।' इति सप्तमी। दर्शनीयतमत्वेन गुणेन पृथक्करणात्। भुजङ्गेभ्यो ऽपि व्यालतमान् हिंस्रान् राक्षसान् व्यस्यन् अपक्षिपन्। '६३९। पञ्चमी विभक्ते ।२।३।४२।' इति पञ्चमी। भुजङ्गेभ्यो राक्षसानां विभागात् आप्तो देव्याः पादमूलमित्यर्थात् ॥

किमवस्थो राम इत्याह—

६५९—भवत्यामुत्सुको रामः प्रसितः संगमेन ते ॥
मघासु कृत-निर्वापः पितृभ्यो मां व्यसर्जयत्.॥११७॥

भवत्यामित्यादि—भवत्यां त्वयि उत्सुकः उन्मनाः रामः। तव संगमेन प्रसितः प्रसक्तः। '६४१। प्रसितोत्सुकाभ्यां तृतीया च ।२।३।४४।' इति चकारात्सप्तमी। मघाभिर्युक्तः कालः तत्समीपे चन्द्रमसो वर्तमानत्वात्। '१२०४। नक्षत्रेण युक्तः कालः ।४।२।३।' इत्यण्। तस्य '१२०५। लुबविशेषे ।४।२।४।' इति लुप्। तस्मिन् काले पितृभ्यः कृतनिर्वापः दत्तदानः मां व्यसर्जयत्। '६४२। नक्षत्रे च लुपि ।२।३।४५।' इति सप्तमी। तत्रापि '१२९४। लुपि युक्तवद्व्यक्तिवचने ।१।२।५१।' इति स्त्रीलिङ्ग-बहुवचने भवतः। व्यसर्जयदिति विशब्दात् '५३२। प्रातिपदिक–।२।३।४६।' इत्यादिना प्रातिपदिकमात्रे प्रथमा ॥

संदेहनिवृत्त्यर्थं चाभिज्ञानं दर्शयन्नाह—

६६०—अयं मैथिल्यभिज्ञानं काकुत्स्थस्या ऽङ्गुलीयकः ॥
भवत्याः स्मरता ऽत्यर्थमर्पितः सादरं मम. ॥११८॥

अयमित्यादि—काकुत्स्थस्यायमङ्गुलीयको ऽभिज्ञानं चिह्नमयमभिज्ञानमिति लिङ्गाधिके प्रातिपदिकमात्रे प्रथमा। मैथिलीति संबोधनादिके '५३३। संबोधने च ।२।३।४७।' इति। सामन्त्रितं संबुद्धिश्चात्रैव द्रष्टव्यम्। काकुत्स्थस्येति '६०६। षष्ठी शेषे ।२।३।५०।' इति षष्ठी। भवत्या अत्यर्थं स्मरता सादरमर्पितम्। '६१३। अधीगर्थ–।२।३।५२।' इत्यादिना स्मरणार्थे कर्मणः शेषत्वविवक्षायां षष्ठी ॥

६६१—रामस्य दयमानो ऽसावध्येति तव लक्ष्मणः, ॥
उपास्कृषातां राजेन्द्रावागमस्येह, मा त्रसीः. ॥११९॥

रामस्येत्यादि—असौ लक्ष्मणो रामस्य दयमानो रामं रक्षन् शुचं मा कार्षीरिति। दयतेः कर्मणि षष्ठी। तवाध्येति त्वां स्मरति। '६१३। अधीगर्थ–।२।३।५२।' इति षष्ठी। आश्वासनार्थमाह—मा त्रसीः उद्वेगं मा कार्षीः। त्रसेरीदित्त्वादिड्भावाभिदप्रतिषेधात् सिच इट् भवति। यतो राजेन्द्रौ रामलक्ष्मणौ। इहागमस्यागमनस्य। भावे अप्। उपास्कृषातां प्रतियत्नं कृतवन्तौ। आगमनस्य निश्चितत्वात् तस्यैव सुग्रीवसख्येन गुणाधानात् तेन '६१४। कृञः प्रतियत्ने ।२।३ [illegible] इति कर्मणि षष्ठी प्रतियत्ने सुट् तत्र सुट् ॥

६६२—रावणस्येह रोक्ष्यन्ति कपयो भीम-विक्रमाः, ॥
धृत्या नाथस्व वैदेहि !, मन्योरुज्जासयाऽऽत्मनः. १२०

रावणस्येत्यादि—इह लङ्कायां कपयो भीमविक्रमाः असह्यपराक्रमाः रावणस्य रोक्ष्यन्ति सरोगं रावणं करिष्यन्ति । भीमविक्रमा इति गुणप्रधानो निर्देशः । ततश्च विक्रमे रुजः भावकर्तृकत्वात् '६१५। रुजार्थानां भाववचनानामज्वरेः ।२।३।५४।' इति षष्ठी । अतो हे वैदेहि ! धृत्या नाथस्व आशंसस्व । धृतिं लभस्वेत्यर्थः । '६१६। आशिषि नाथः ।२।३।५५।' इति कर्मणि षष्ठी । आशिषि नाथ इत्युपसंख्यानात्तङ् । मन्योरुज्जासयात्मनो मन्यु नाशय । '१८५१। जसु हिंसायां ताडने ।' चौरादिकस्य हिंसार्थत्वात्तेन '६१७। जासि-निप्रहण-।२।३।५६।' इति कर्मणि षष्ठी ॥

६६३—राक्षसानां मयि गते रामः प्रणिहनिष्यति ॥
प्राणानामपणिष्टाऽयं रावणस् त्वामिहानयन्.॥१२१॥

राक्षसानामित्यादि—मयि गते रामो राक्षसानां प्रणिहनिष्यति राक्षसान् मारयिष्यति । पूर्ववत् कर्मणि षष्ठी । निप्रहण इति संघातविगृहीतविपर्यस्तग्रहणमित्युक्तम् । '२२८५। नेर्गद-।८।४।१७।' इत्यादिना णत्वम् । किंच प्राणानामपणिष्टायमिति अयं रावणस्त्वामिहानयन् प्राणानपणिष्ट विक्रीतवान् । '६१८। व्यवहृ-पणोः समर्थयोः ।२।३।५७।' इति षष्ठी । 'प्राणानामपणायिष्ट' इति पाठान्तरम् । तदयुक्तं, स्तुत्यर्थस्य पणेस्तत्र ग्रहणात् '२३०३। गुपू धूप-।३।१।२८।' इत्यादिना आयप्रत्ययो न भवति ॥

६६४—अदेवीद् बन्धु-भोगानां, प्रादेवीदात्म-संपदम्, ॥
शत-कृत्वस् तवैकस्याः स्मरत्यह्नो रघूत्तमः. ॥ १२२ ॥

अदेवीदित्यादि—न केवलं प्राणानपणिष्ट बन्धुभोगानामदेवीत् बन्धुभोगान् विक्रीतवान् । '६१९। दिवस्तदर्थस्य ।२।३।५८।' इति षष्ठी । दिवो व्यवहारार्थत्वात् । प्रादेवीदात्मसंपदं विक्रीतवान् ।'६२०। विभाषोपसर्गे ।२।३।५९।' इति पक्षे द्वितीया । प्रशब्देन युक्तत्वात् । रामानुरागं पुनर्दर्शयन्नाह । शतकृत्व इति बहुत्वोपलक्षणार्थम् । '२०८५। क्रियाभ्यावृत्तिगणने कृत्वसुच् ।५।४।१७।' तवैकस्याह्नो रघूत्तमः स्मरति । '६१३। अधीगर्थ-।२।३।५२।' इति षष्ठी । अह्न इति एकस्मिन्नप्यह्नि । '६२२। कृत्वोऽर्थप्रयोगे काले ऽधिकरणे ।२।३।६४।' इति षष्ठी ॥

एवं तामाश्वास्य संदेशं दापयितुमाह—

६६५—तवोपशायिका यावद् राक्षस्यश् चेतयन्ति न, ॥
[illegible] तावद् भर्तुः शार्ङ्गस्य मैथिलि ! १२३

तवेत्यादि—हे मैथिलि ! तवोपशायिका परिपाट्या शयनं यामी राक्षसीभिः सहेत्यर्थात् । '३२८८। पर्यायार्हणोत्पत्तिषु ण्वुच् ।३।३।१११' यावन्न चेतयन्ति न प्रतिबुध्यन्ते तावत् प्रतिसंदिश्यतां प्रतिसंदेशो दीयताम् । शार्ङ्गस्य भर्तुः शार्ङ्गं धनुर्धारयतो रामस्य । तत्र शार्ङ्गस्येति यथाक्रमं '६२३। कर्तृ-कर्मणोः कृति ।२।३।६५।' इति षष्ठी ॥

६६६—पुरः प्रवेशमाश्चर्यं बुद्ध्वा शाखा-मृगेण सा ॥
चूडा-मणिमभिज्ञानं ददौ रामस्य संमतम्. ॥१२४॥

पुर इत्यादि—शाखामृगेण मर्कटेन पुरो लङ्कायाः दुष्प्रवेशायाः प्रवेशः तमाश्चर्यमद्भुतं बुद्ध्वा सा सीता चूडामणिमभिज्ञानं ददौ सर्वमुक्तमस्य संभाव्यत इति । '६२४। उभयप्राप्तौ कर्मणि ।२।३।६६।' इति षष्ठी । प्रवेश इत्युभयप्राप्तौ कृति लङ्का-हनूमतोः कर्मकर्तृत्वात् । रामस्य संमतं प्रियम् । '३०८१। मतिबुद्धि—।३।२।१८८।' इत्यादिना वर्तमाने निष्ठा । '६२७। न लोक—।२।३।६९।' इति षष्ठीप्रतिषेधे प्राप्ते '६२५। क्तस्य च वर्तमाने ।२।३।६७।' इति षष्ठी ॥

६६७—रामस्य शयितं भुक्तं जल्पितं हसितं स्थितम् ॥
प्रक्रान्तं च मुहुः पृष्ट्वा हनूमन्तं व्यसर्जयत्. ॥१२५॥

रामस्येत्यादि—रामस्य अभिज्ञानं दत्त्वा शयितादिकं मुहुः पृष्ट्वा हनूमन्तं व्यसर्जयत् प्रेषितवती । तस्य शयितं शयनस्थानं किं भूमौ शेते अन्यत्रेति वा । भुक्तं भोजनस्थानं किं गृहे भुङ्क्ते मुनिजनगृहे वेति । जल्पितं मन्त्रस्थानं कि रहसि मन्त्रयते प्रकाशे वेति । हसितं हसनस्थानं किं शृङ्गारवस्तूनि हसति वीरवस्तूनि वेति । स्थितं निवासस्थानं किं गुहायां तिष्ठत्युत तरुतले वेति । प्रक्रान्तं प्रचङ्क्रमणस्थानम् । '२६६६। अनुनासिकस्य—।६।४।१५।' इत्यादिना दीर्घः । किं अङ्गने क्रम्यते अन्यत्र वेति । एषां ध्रौव्यगतिप्रत्यवसानार्थत्वात् । '३०८७। क्तोऽधिकरणे च—।३।४।७६।' इति क्तः । तस्य प्रयोगे '६२६। अधिकरणवाचिनश्च ।२।३।६८।' इति षष्ठी ॥

६६८—असौ दधदभिज्ञानं
चिकीर्षुः कर्म दारुणम् ॥
गामुको ऽप्यन्तिकं भर्तुर्
मनसा ऽचिन्तयत् क्षणम्. ॥ १२६ ॥

असावित्यादि—असौ हनूमान् दधत् धारयन्नभिज्ञानं चिह्नम् । '६२३। कर्तृ-कर्मणोः कृति ।२।३।६५।' इति षष्ठ्यां प्राप्तायां '६२७। न लोक—२।३।६९।' [illegible] क्त्वप्रयोगे प्रतिषेध [illegible] इति [illegible] गृहीता [illegible] चिकीर्षुः कर्तुमिच्छुः । [illegible] षष्ठ्या प्रतिषेध भर्तुः

स्वामिनः अन्तिकं समीपं गामुको ऽपि गमनशीलो ऽपि । उकप्रयोगे प्रतिषेधः । मनसा क्षणं चिन्तितवान् वक्ष्यमाणं कर्म ॥

६६९—'कृत्वा कर्म यथाऽऽदिष्टं पूर्व-कार्याऽविरोधि यः ॥
करोत्यभ्यधिकं कृत्यं, तमाहुर् दूतमुत्तमम् . ॥१२७॥

कृत्वेत्यादि—यो दूतो यथोद्दिष्टं कर्म कार्यं कृत्वा । अत्र कृत्वेत्यव्ययप्रयोगे प्रतिषेधः । तत उत्तरकालं पूर्वकर्माविरोधि पूर्वकृतस्य कार्यस्य यदविरोधि तदधिकं करोति तमुत्तमं दूतमाहुर्विदुर्नीतिविद इति शेषः । मया च यथोद्दिष्टं सीतान्वेषणं कृतमिति भावः ॥

तदेव च दर्शयन्नाह—

६७०—वैदेहीं दृष्टवान् कर्म कृत्वा ऽन्यैरपि दुष्करम् ॥
यशो यास्याम्युपादाता वार्तामाख्यायकः प्रभोः. १२८

वैदेहीमित्यादि—अहमद्य तावद्वैदेहीं दृष्टवान् । निष्ठाप्रयोगे प्रतिषेधः । अन्यदपि कार्यमतिदुष्करं कृत्वा । खल्प्रयोगे प्रतिषेधः । ततो यश उपादाता । आत्मसात्कर्ता । इदमतिदुष्करं तेन कृतमिति । तृन्नन्तस्य प्रयोगे प्रतिषेधः । वार्तामाख्यायकः प्रभोर्वार्तामाख्यातास्मीति भविष्यदधिकारात् '३१७५। तुमुन्ण्वुलौ क्रियायाम्—।३।३।१०' इति ण्वुल् । '६२८। अकेनोर्भविष्यदाधमर्ण्ययोः ।२।३।७०।' इति प्रतिषेधः ॥

६७१—राक्षसेन्द्रस्य संरक्ष्यं मया लव्यमिदं वनम् , ॥'
इति संचिन्त्य सदृशं नन्दनस्याऽभनक् कपिः. १२९

राक्षसेत्यादि—इदं वनमशोकवनिकाख्यं राक्षसेन्द्रस्य संरक्ष्यं रक्षार्हम् । '२८२२। अर्हे कृत्य—।३।३।१६९। '२८७२। ऋ-हलोर्ण्यत् ।३।१।१२४।' तन्मया लव्यं लवनीयम् । '६२९। कृत्यानां कर्तरि वा ।२।३।७१।' इति षष्ठीतृतीये कर्तरि भवतः । इत्येवं संचिन्त्य कपिर्नन्दनस्य वनस्य सदृशं तुल्यं । '६३०। तुल्यार्थैः ।२।३।७२' इति पक्षे षष्ठी । अभनक् भग्नवान् । भञ्जेर्लङि '२५४४। श्नान्नलोपः ।६।४।२३।' इति नलोपे हल्ङ्यादिलोपे जश्त्वे चर्त्वे च रूपम् ॥

६७२—राघवाभ्यां शिवं, दूतस् तयोरहमिति ब्रुवन् ॥
हितो भनज्मि रामस्य, कः किं ब्रूते ऽत्र राक्षसः, १३०

राघवाभ्यामित्यादि—राघवाभ्यां रामलक्ष्मणाभ्यां शिवं भद्रमस्तु । तयोर्हनूमान् दूतो हितो रामस्य भनज्मीदं वनम् । एवं च क्रियमाणे को भवतां मध्ये राक्षसः किं ब्रूते इत्येवं ब्रुवन् । बभञ्ज पवनात्मजो रिपुवनमिति वक्ष्यमाणेन संबन्धः । राघवाभ्यां शिवं हितो रामस्येति '६३१। चतुर्थी चाशिष्य—।२।३।७३।' इत्यादिना षष्ठी-चतुर्थ्यौ ॥

इति विभक्त्यधिकारः ॥

६७३—विलुलित-पुष्प-रेणु-कपिशं
प्रशान्त-कलिका-पलाश-कुसुमं
कुसुम-निपात-विचित्र-वसुधं
स-शब्द-निपतद् द्रुमोत्क-शकुनम् ॥
शकुन-निनाद-नादि-ककुभं
विलोल-विपलायमान-हरिणं
हरिण-विलोचनाऽधिवसतिं
बभञ्ज पवनाऽऽत्मजो रिपु-वनम्. ॥ १२१ ॥

विलुलितेत्यादि—कीदृशं बभञ्ज । विलुलितानां पुष्पाणां रेणुभिः कपिशं पिङ्गम् । प्रशान्ता अवसन्ना कलिकाः पलाशानि पत्राणि कुसुमानि च यत्र । कुसुमानां निपातेन विचित्रा वसुधा यत्र । सशब्दैर्निपतद्भिर्द्रुमैरुत्का उन्मनसः शकुना यत्र । शकुनानां पलायमानानां निनादेन नादिताः संजातनादाः ककुभो दिशो यत्र । विलोला व्याकुला विपलायमाना हरिणा यत्र । हरिणस्येव लोचने यस्याः सीताया तस्या अधिवसतिं निवासम् ॥

इत्यनभिहिताधिकारः ॥

इति श्री-जयमङ्गलाऽऽख्यया व्याख्यया समलंकृते श्री-भट्टिकाव्ये द्वितीयेऽधिकार-काण्डे लक्षण-रूपे तृतीयः परिच्छेदः (वर्गः), तथा लक्ष्य-रूपे कथानके 'ऽशोकवनिकाभङ्गो' नामाष्टमः सर्गः पर्यवसितः ।

नवमः सर्गः ।

अथ प्रकीर्णकाः—

अत्रान्तरे प्रकीर्णकश्लोकानाह—

६७४—द्रु-भङ्ग-ध्वनि-संविग्नाः कुवद्-पक्षि-कुला ऽऽकुलाः ॥
अकार्षुः क्षणदा-चर्यो रावणस्य निवेदनम्. ॥ १ ॥

द्रुभङ्गेत्यादि—क्षणदाचर्यो निशाचर्यः । '२९३०। चरेष्टः ।३।२।१६।' रावणस्य निवेदनमकार्षुः कृतवत्यः वक्ष्यमाणप्रकारेण । द्रु-भङ्ग ध्वनि-संविग्नाः शाखाभङ्गशब्देन संत्रस्ताः । '१२७२। ओविजी भय चलनयोः ।' '३०१९। ओदितश्च ।८।२।४५।' इति निष्ठानत्वम् । कुवत्पक्षिकुलाकुलाः कूजद्भिः पक्षिकुलैः व्यस्तमानसाः । '११९५। कु शब्दे ।' आदादिकस्तस्य उवङादेशः ॥

१—पद्येऽस्मिन् अश्वललितं वृत्तम् । तल्लक्षणं तु—'यदिह न-जौ भ-जौ भ-ज-[illegible] ... यराश्व-यतिमत्' इति वृत्तरत्नाकरे भट्टकेदार आह

६७५—'यदताप्सीच् छनैर् भानुर्, यत्राऽवासीन् मितं मरुत्॥
यदाप्यानं हिमांशुणा, भनक्त्युपवनं कपिः. ॥ २ ॥'

यदित्यादि—यद्वनं भानुः शनैर्मन्दमताप्सीत् तपति स्म। हलन्तलक्षणा वृद्धिः। मरुत् मितं स्तोकमवासीत् वाति स्म। हिमांशुना शिशिररश्मिना आप्यानं वृद्धिं नीतम्। प्यायतेः '८७३। लोपो व्योर्वलि ।६।१।६६।' इति यलोपः। ओदित्त्वान्नत्वम्। तदुपवनं कपिर्भनक्ति चूर्णयतीति निवेदनमकार्षुः॥

६७६—ततोऽशीति-सहस्राणि किङ्कराणां समादिशत्॥
इन्द्रजित्-सूर् विनाशाय मारुतेः क्रोध-मूर्च्छितः.॥३॥

तत इत्यादि—निवेदनानन्तरमिन्द्रजित्सूः रावणः। इन्द्रजितं सूत इति '२९७५। सत्सूद्विष—।३।२।६१।' इत्यादिनानुपसर्गे क्विप्। मारुतेर्हनूमतो विनाशाय। अशीतिसहस्राणि समादिशत् समादिष्टवान्। किङ्कराणां किं कुर्वन्तीति '२९३५। दिवा-विभा—।३।२।२१।' इत्यादिना टच्। क्रोधमूर्च्छितः क्रोधोद्धतः। मूर्च्छेः समुच्छ्राये वर्तमानत्वात्॥

६७७—शक्त्यृष्टि-परिघ-प्रास-गदा-मुद्गर-पाणयः॥
व्यश्नुवाना दिशः प्रापुर् वनं दृष्टि-विषोपमाः. ॥ ४ ॥

शक्तीत्यादि—ते किङ्करा वनं प्रापुः प्राप्तवन्तः। शक्त्यादयः प्रहरणविशेषाः पाणौ येषामिति प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः। व्यश्नुवानाः दिशो व्याप्नुवन्तः। '१३४२। अशू व्याप्तौ' सौवादिकः। दृष्टिविषोपमा भुजङ्गवत् दृष्ट्यैव विनाशयन्त इत्यर्थः॥

६७८—दध्वान मेघ-वद् भीममादाय परिघं कपिः॥
नेदुर् दीप्तायुधास् तेऽपि तडित्वन्त इवाऽम्बुदाः.॥५॥

दध्वानेत्यादि—कपिर्भीमं परिघं भयानकमर्गलमादाय मेघवद्दध्वान ध्वनति स्म। तेऽपि किङ्कराः तडित्वन्त इवाम्बुदाः। नेदुः नदन्ति स्म। किङ्कराणां कृष्णत्वात् मेघैः सादृश्यं आयुधानां च तडितेति॥

६७९—कपिनाऽम्भोधि-धीरेण समगंसत राक्षसाः॥
वर्षास्वुद्धत-तोयौघाः समुद्रेणेव सिन्धवः. ॥ ६ ॥

कपिनेत्यादि—कपिना अम्भोधिधीरेणाक्षोभ्यत्वात्। राक्षसाः समगंसत संगताः। '२६९९। समो गम्यृच्छि—।१।३।२९।' इत्यादिना तङ् लुङ्। यथा सिन्धवो नद्यः उद्धततोयौघाः उद्रिक्तजलपूराः समुद्रेण सङ्गच्छन्ते॥

६८०—लाङ्गूलमुद्धतं धुन्वन्नुद्वहन् परिघं गुरुम्॥
तस्थौ तोरणमारुह्य, पूर्वं न प्रजहार सः. ॥ ७ ॥

लाङ्गूलमित्यादि—स हनूमान् लाङ्गूलं पुच्छमुद्धतं उत्क्षिप्तं धुन्वन्। '१३३५। धूञ् कम्पने' इति स्वादौ पठितः। परिघं गुरुं उद्वहन् तोरणमारुह्य तस्थौ। न तु पूर्वं प्रजहार प्रहृतवान् शूराणां पश्चात् प्रहारित्वात्॥ एते प्रकीर्णकाः॥

इतःपरं सिचि वृद्धिमधिकृत्याह—

६८१—अक्षारिषुः शराऽम्भांसि तस्मिन् रक्षः-पयोधराः, ॥
न चाऽह्वालीत्, न चाऽव्राजीत् त्रासं कपि-महीधरः८

अक्षारिषुरित्यादि—तस्मिन् वने रक्षःपयोधराः रक्षांसि पयोधरा इव। शराम्भांसि शरान् अम्भांसीव। अक्षारिषुः क्षरितवन्तः। क्षरतिरकर्मकः क्षरेत्क्षतजवृत्तिरित्यादि प्रयोगेषु दृश्यते। इह तु सकर्मको विवक्षितः। कपिर्महीधर इव। न चाह्वालीत् न चलितवान्। द्वयोरपि '२२८४। अतो हलादेर्लघोः।७।२।७।' इति विकल्पे प्राप्ते '२२३०। अतो ल्रान्तस्य।७।२।२।' इति सिचि वृद्धिः। नाव्राजीत् त्रासं भयं च न जगाम। महीधरतुल्यत्वात्। '२२६८। नेटि।७।२।४।' इति प्रतिषेधस्य '२२८४। अतो हलादेर्लघोः।७।२।७।' इति विकल्पिते '२२६७। वद-व्रज-।७।२।३।' इत्यादिना वृद्धिः॥

६८२—अवादीत् तिष्ठतेत्युच्चैः, प्रादेवीत् परिघं कपिः॥
तथा, यथा रणे प्राणान् बहूनामग्रहीद् द्विषाम्. ॥९॥

अवादीदित्यादि—तत्र उत्तरकालं कपिस्तिष्ठत मा पलायध्वमिति उच्चैस्तानवादीत्। पूर्ववद्वृद्धिः। तथा तेन प्रकारेण परिघं परिघेण प्रादेवीत् विजिगीषते स्म। '५६२। दिवः कर्म च।१।४।४३।' इति परिघस्य कर्मसंज्ञा। दिवेः '२२६८। नेटि।७।२।४।' इति वृद्धिप्रतिषेधः। यथा बहूनां द्विषां शत्रूणां प्राणान्यग्रहीत् निगृहीतवान्। '२२८४। अतो हलादेः-।७।२।७।' इति विकल्पे प्राप्ते '२२९९। ह्यन्त-क्षण-श्वस-।७।२।५।' इति प्रतिषेधः॥

६८३—व्रणैरवमिषू रक्तं, देहैः प्रौर्णाविषुर् भुवम्, ॥
दिशः प्रौर्णाविषुश् चाऽन्ये यातुधाना भवद्-भियः१०

व्रणैरित्यादि—यातुधाना राक्षसा व्रणैः प्रहारमार्गैः रक्तं शोणितमवमिषुः वमन्ति स्म। '२२९९। ह्यन्त-।७।२।५।' इति वृद्धिप्रतिषेधः। देहैर्भुवं प्रौर्णाविषुः छादितवन्तः। अन्ये यातुधानाः भवद्भियः भवन्ती भीर्येषामिति भयात्पलायमानाः। दिशः प्रौर्णाविषुः छादितवन्तः। '२४४९। ऊर्णोतेर्विभाषा।७।२।६।' इति विकल्पः। ऊर्णोतेः '२४४७। विभाषोर्णोः।१।२।३।' इत्यङित्त्वपक्षे द्रष्टव्यः। ङित्त्वे गुणवृद्धिप्रतिषेधात्॥

६८४—अत्रासिषुश् च्युतोत्साहा भिन्न-देहाः प्रियाऽसवः॥
कपेरत्रासिषुर् नादान् मृगाः सिंह-ध्वनेरिव ॥ ११ ॥

इति सिचि वृद्ध्यविकारः।

अरासिषुरित्यादि—च्युतोत्साहाः निरुत्साहाः अरासिषुः मृताः स्म इति शब्दितवन्तः । यतः प्रियासवः प्रियप्राणाः । कपेः संबन्धिनो नादादत्रासिषुः त्रस्ताः । उभयत्रापि '२२६८। नेटि ।७।२।४।' इति प्रतिषिद्धोऽतो हलादेरिति विकल्पः ॥

इति सिचि वृद्धिविकारः ॥

इत इट्प्रतिषेधमधिकृत्याह—

६८५—मायानामीश्वरास् तेऽपि शस्त्र-हस्ता रथैः कपिम् ॥
प्रत्याववृतिरे हन्तुं हन्तव्या मारुतेः पुनः ॥ १२ ॥

मायानामित्यादि—अथानन्तरं राक्षसा ये दिशो गताः ते कपिं हन्तुं पुनः प्रत्याववृतिरे प्रतिनिवृत्ताः। मायानामीश्वराः प्रभवः। '३१५५। स्थेश—।३।२।१७५।' इति वरच्। '२९८१। नेड्वशि कृति ।७।२।८।' इति नेट्। आर्धधातुकेत्यादिना प्राप्तत्वात्। रथैस्तत्र गताः सन्तः। शस्त्रहस्ताः शस्त्राणि हस्तेषु येषामिति। हनि-कुशेत्यादिना रमेरौणादिकः क्थन्। रथाः। अमि चमीत्यादिना शसेरौणादिकस्त्रन्। हसि-मृग्रिण्वमित्यादिना हसेस्तन्। तयोस्तितुत्रेत्यादिना इट्प्रतिषेधः। हन्तव्या मारुतेरिति हनूमतो वधार्हाः। '६२९। कृत्यानां कर्तरि वा ।२।३।७१।' इति षष्ठी। '२२४६। एकाचः—।७।२।१०।' इत्यादिना इट्प्रतिषेधः। हन्तेर्मसान्तेष्वनिट्त्वात्॥

६८६—तांश् चेतव्यान् क्षितौ श्रित्वा
वानरस् तोरणं युतान् ॥
जघानाऽऽधूय परिघं
विजिघृक्षून् समागतान् ॥ १३ ॥

तानित्यादि—समुदिता एकस्यामेव वेलायां मया हन्तव्या इति वानरस्तोरणमाश्रितवान्। स तोरणं श्रित्वा तान् राक्षसान् विजिघृक्षून् विग्रहीतुमिच्छून्। युतान् समुदितान्। समागतान् ढौकितान्। क्षितौ पृथिव्यां चेतव्यान् पुञ्जीकर्तव्यान् जघान हतवान्। परिघमाधूय परिभ्राम्य। तत्र चेतव्यानिति '२२४६। एकाचः—७।२ १०।' इतीट्प्रतिषेधः। क्षिताविति '३२१३। क्तिच्-क्तौ च संज्ञायाम् ।३।३।१७४।' इति क्तिच्। '३१६३। ति-तु-त्र—।७।२।९।' इत्यादिना इट्प्रतिषेधः। श्रित्वा युतानिति '२३८१। श्रयुकः किति ।७।२।११।' इति इट्प्रतिषेधः। विजिघृक्षूनिति '२६१०। सनि ग्रह-गुहोश्च ।७।२।१२।' इति। तत्र '२६०९। रुद्-विद्—।१।२।८।' इति सनः कित्त्वं '२४१२। ग्रहि—ज्या—।६।१।१६।' इति संप्रसारणं ढत्व-कत्व-षत्वानि॥

६८७—संजुगुक्षव आयूंषि ततः प्रतिरुरूषवः ॥
रावणाऽन्तिकमाजग्मुर् हत-शेषा निशा-चराः ॥१४॥

संजुघुक्षव इत्यादि—तत उत्तरकालं ये हतशेषा निशाचराः ते संजुघुक्षव आयूंषि जीवितानि गोहितुमिच्छवः। गुहेः पूर्ववत्प्रतिषेधः। रावणान्तिकमाजग्मुः आगताः। प्रतिरुरूषवः वक्ष्यमाणमर्थं कथयितुमिच्छवः। अत्रापि पूर्ववत्प्रतिषेधः। तत्र चकारेणोगन्तानां सनि समुच्चितत्वात्॥

६८८–'एकेन बहवः शूराः साऽऽविष्काराः प्रमत्त-वत्॥
वैमुख्यं चकृमे' त्युच्चैरूचुर् दश-मुखाऽन्तिके. ॥१६॥

एकेनेत्यादि—वयं बहवः शूराः साविष्काराः साहंकारा अपि सन्तः एकेनापि कपिना हेतुभूतेन वैमुख्यं चकृम पराङ्मुखत्वमनुष्ठितवन्तः प्रमत्तवत् मद्यपानमत्ता इव। एवं च चित्तव्याक्षेपादुत्तमपुरुषे लिटि कृते '२२९३। कृ-सृ–।७।२।१३।' इत्यादिना इट्प्रतिषेधः नियमित इति। एवं दशमुखान्तिके उच्चैरूचुः॥

६८९–मांसोपभोग-संशूनानुद्विग्नांस् तानवेत्य सः॥
उद्वृत्त-नयनो मित्रान् मन्त्रिणः स्वान् व्यसर्जयत् १६

मांसेत्यादि—स दशमुखस्तानुद्विग्नान् भीतानवेत्य ज्ञात्वा स्वानात्मीयान् मन्त्रिणो व्यसर्जयत् प्राहिणोत्। कीदृशांस्तान्। मांसोपभोगसंशूनान् मांसोपभोगेन स्थूलवर्ष्मणः। उभयत्रापि। '३०३९। श्वीदितो निष्ठायाम्।७।२।१४।' इतीट्प्रतिषेधः। तत्र श्वयतेर्यजादित्वात् संप्रसारणं '२५५९। हलः।६।४।२।' इति संप्रसारणस्य दीर्घः। द्वयोरप्योदित्वान्निष्ठानत्वम्। उद्वृत्तनयनो रोषात् निष्क्रान्ततारकः। '३०२५। यस्य विभाषा।७।२।१५।' इतीट्प्रतिषेधः वृतेरुदित्वात्। मित्रान् स्निग्धान् मन्त्रिणः। '२०३६। ओदितश्च।७।२।१६।' इतीट्प्रतिषेधः। '३०१६। रदाभ्याम्–।८।२।४२।' इति निष्ठानत्वम्॥

६९०–प्रमेदिताः स-पुत्रास् ते
सु-स्वान्ता बाढ-विक्रमाः॥
अ-म्लिष्ट-नादा निरगुः
फाण्टचित्राऽस्त्र-पाणयः. ॥ १७॥

प्रमेदिता इत्यादि—ते मन्त्रिणः सपुत्राः पुत्रैः सह निरगुः निर्गताः। '२४५८। इणो गा लुङि।२।४।४५।' प्रमेदिताः स्निग्धीभवितुमारब्धाः। आदिकर्मणि निष्ठा। ततो '३०५४। विभाषा भावादिकर्मणोः' इति प्रतिषेधः। इट्पक्षे '३०५२। निष्ठा शीङ्–।१।२।१९।' इत्यादिना कित्त्वप्रतिषेधात् गुणः। सुस्वान्ताः स्वामिनि कल्याणमनसः। बाढविक्रमाः भृशपराक्रमाः अम्लिष्टनादाः विस्पष्टवाचः मन्त्रिणां वाग्मित्वात्। फाण्टचित्रास्त्रपाणयः यदशृतमपिष्टं कषायमुदकसंपर्कमात्राद्विभक्तरसं ईषदुष्णं तदल्पप्रयाससाध्यत्वात् अनायाससाध्यं फाण्टमित्युच्यते तेन चित्राणि रञ्जितानि अस्त्राणि पाणौ येषामिति। स्वान्तादयः '३०५८। क्षुब्ध–।७।२।१८।' इत्यादिना निपातिताः॥